184620

UNIVERSAL
LIBRARY
OU_184620
UNIVERSAL
LIBRARY

Tight Binding
Book Only

OSMANIA UNIVERSITY LIBRARY

Call No. 349·546 / S53M Accession No. S 11172

Author ह्यारन्नी, पी. पी. एस्. (संपा.)

Title श्रीमन्महाभारतम्. Vol. II Pt. II

This book should be returned on or before the date last marked below. 1931

mission and approval. Indeed, the genesis of the Mahābhārata, how Vyāsa came to compose it and how he accomplished the same, are all referred to in great detail by Sūta in the first and second chapters, which should naturally have been part of the nucleus of the Mahābhārata for Vaiśampāyana too, who could have learnt it only from Vyāsa's lips.

Even if meticulously critical scholars could allow themselves to give the title of Mahābhārata only to the portion connected with Vyāsa, directly beginning from the fiftythird chapter, the total length of the Mahābhārata will suffer only by a negligible quantity.

This cannot, therefore, vitiate the claim that the Mahābhārata is usually reputed to consist of 100,000 stanzas. Indeed, the title—Mahābhārata—was already accorded to it even during the times of Vaiśampāyana and Sūta. Vaiśampāyana explains the title as (chapter 51, stanza 52½) **भारतानां महज्जन्म महाभारतमुच्यते** and Sūta explains it as (chapter II, stanza 254½) **महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते**, according to some readings, and **महत्त्वाद्भारतत्वाच्च महाभारतमुच्यते**, according to some other readings. We need hardly add that Vaiśampāyana's explanation is on the whole more dignified, and full of real import.

The contention, therefore, that Bhārata was the original title of Vyāsa's work when it consisted only

of 24,000 stanzas or far less still and that the appellation Mahābhārata was applied to the epic only after it had grown up to well nigh 100,000 stanzas is thoroughly untenable. Equally untenable also becomes the theory that the original Mahābhārata was at any time devoid of all Upākhyānas when it consisted of 24,000 stanzas and that it came to be 100,000 stanzas only after all the Upākhyānas had been later on interpolated into the text. For, to think of the Mahābhārata without its Upākhyānas is to rob the epic of all its value as an epic. The stanza in question refers only to the two kinds of computation of the bulk of the Mahābhārata by dividing it into the story proper and the Upākhyānas and not to the plausibility of the kernel ever having existed as a separate entity without the Upākhyānas at all. And we have already shown how the whole of Mahābhārata, as we have it now, from chapter 53 of the Ādi-parvan to the end of the eighteenth parvan, is completely the work of a single author, Vyāsa himself, and how in fact Vyāsa set himself to compose the work only after the incidents narrated in the last of the Parvans had taken place. Thoroughly untenable also is the suggestion put forward by Mr. C. V. Vaidya in his latest work* that Vyāsa

* C. V. Vaidya—History of Sanskrit Literature—Vedic period —See pages 1-13 of third section.

composed the work soon after the Bhārata war in 3102 B. C., that Vaiśampāyana's redaction should have been about 1,400—1,200 B. C., that Sūta's narration in the Naimiśa forest must have been about 250 B. C., and that Vaiśampāyana and Sūta above referred to are 'fictions invented for magnifying the importance of the work.'

We would rather accept the existing tradition that makes Vaiśampāyana a direct pupil of Vyāsa, and Sūta a son of Vaiśampāyana's contemporary, Romaharṣaṇa, than indulge in super-criticism which tries to set at naught the internal evidence of the epic and the current tradition.

It will, therefore, be clear that the main text-tradition of the Mahābhārata is one that has been preserved with remarkable accuracy and that the whole work as we have it now in 18 Parvans is the work of a single author, Vyāsa, though it may be permissible to assume that some of the preliminary chapters of the Ādi-parvan are in their very nature connecting links supplied by Vaiśampāyana and Sūta to suit the occasion when each in his turn was called upon to narrate the story.

Thus, from the available internal evidences supported by external evidences, notably from the Javanese and Kāśmiri recensions and also from the testimonies of Nannayya and of Dion Chryso-

stum, who lived long before him, we are driven to the irresistible conclusion that the Mahābhārata text-tradition, as we have it now in the Southern Recension, is quite authentic and reliable, that the final redaction of the story from the beginning of the first chapter as narrated by Sūta is equally trustworthy and that the extent and scope of the Mahābhārata even during Sūta's time consisted of eighteen main parvans with one hundred sub-parvans, divided into two thousand chapters and comprising one hundred thousand stanzas. A truly scientific and historical reconstruction of the text should, therefore, lead us to constitute the text to its original dimensions and not to cast off or artificially reduce its size under the mistaken notion that the Mahābhārata, to be Vyāsa's, should necessarily be considerably short of 100,000 rather than near 100,000, stanzas.

In the preparation of this volume for the press all the five manuscripts described in pp. XIV-XV of the Introduction to the first volume were utilised in full. अ continues to represent the principal text printed, and क, ख. ग and घ have been utilised for giving additional readings, etc. One more manuscript ङ. has also been utilised for further readings, etc. from pp. 1348. This manuscript belongs to Mr. Krishnaswami Sastrigal, Sub-Registrar, Tanjore. Its description is as follows:—

ङ. Substance—palm-leaf; Size—$17\frac{3}{4} \times 2\frac{3}{8}$ inches; Leaves—231; Lines—13 to a page; Script—Grantha; Ādiparvan complete; Date of transcription—the second day of the Karthigai month of Kollam year 975, corresponding to the 14th November 1799. A. D.

With the issue of the second volume, the Ādi Parvan is complete. It will be noticed that, according to our critical edition, the total number of chapters in the Ādiparvan is 218—the figure given in the Parvasangrahādhyāya of this edition, and which is generally agreed to by all manuscripts representative of the Southern Recension (see pp.

XVIII of the introduction to the first volume). The total number of stanzas in the Ādiparvan in all these 218 chapters, according to our critical edition, comes to 9984½* which is half a stanza more than what is enumerated for the Ādiparvan by Nannaya, the great Telugu Poet (in his Āndhra Bhāratamu pp. 7-35 prose) who flourished about 1022 A. D. . Nannaya's enumeration of the number of stanzas in each of the Parvans of the Mahābhārata is the earliest direct external evidence we have so far, among the manuscripts and printed material available for the Mahābhārata. In all such enumerations, the usual practice seems to be to leave out prose passages from all calculation. We have, therefore, indicated at the end of each of the chapters, the number of stanzas contained therein separately from the number of prose passages in the same, if any.

In his editorial note prefixed to the third fascicule of the Ādiparvan, Dr. Sukthankar has already called attention to the enumeration of stanzas in this Parvan as varying from 7,984 to 10,984 and stated that he prefers the figure 7,984 as it represents the Kāśmiri version and is also the shortest version

* The numerical addition will give 9,985 stanzas, but a half-stanza occuring in pp. 677, already remarked by us as अनन्वित, should be deducted.

of the Parvan hitherto known. The majority of manuscripts usually state 8,884 stanzas to be the length of the Ādiparvan though Nannaya has definitely stated 9,984 stanzas to be the extent of this Parvan. It would now be clear why we chose for our principal text of the Southern Recension अ kośa; for, therein the length of the Ādiparvan is said to be 9,884 stanzas or one hundred short of what Nannaya has said. Indeed, this shortage by one hundred stanzas is just the additional portion that we have added on to the principal text in editing the same in order to fill up some easily discernible lacunae in the manuscript itself.

In the footnote to pp. 1412, we have already indicated how we had to restore the text to the extent of $70\frac{1}{2}$ stanzas, which together with the restoration in other places of stanzas ranging from a half to four or five which we had added to the principal text while editing the same will just account for the 100 stanzas being found short according to the narration of the अ—कोश from the figure given by Nannaya. In the last sheet attached to one of the manuscripts in the Madras Government Oriental Manuscripts Library (Vide Descriptive Catalogue No. 1916), the Ādiparvan is stated to contain 9,984 stanzas. One of the Kāśmiri version manuscripts collated by

Dr. Sukthankar—K 6, also agrees with Nannaya in giving the length of the Ādiparvan as 9,984 stanzas. We may be permitted to add that,according to our critical edition of the Southern Recension, the result we have obtained is approximately the same as Nannaya's and, therefore, justfies Nannaya's recitation as certainly authoritative at any rate in so far as the Southern Recension is concerned.

A careful study of the Ādiparvan as issued by us in comparison with Dr. Sukthankar's edition is certainly called for, if only to assess critically the large and small additions and omissions that are detectable in one or the other Editions. We defer our remarks on this aspect till the completion of the Ādiparvan by the Bhandarkar Institute. But we must not omit to call attention to one or two points arising from the work so far published.

In pp. 574 of his Edition (Fascicule 5), in trying to vindicate the superiority of the (Kāśmiri) Śāradā version, Dr. Sukthankar states that "all the remaining versions are not only heavily interpolated but also *indiscriminately conflated*" (italics are *not* ours), a conclusion he has arrived at on the omission of Kaṇikaniti not only in the Śāradā recension but also in Kṣemendra's Bhāratamañjari, in the Javanese version and in the Telugu adaptations by Nannaya Bhaṭṭa, etc. There are only four printed editions of Nannaya Bhaṭṭa's work so far known to us. In all these, and in all the available manuscripts in important libraries in Madras, we have been able to obtain definite and unmistakable evidence of the inclusion of the reference to Kaṇikaniti in the

exact place in which it occurs in the printed edition of the Southern Recension. A reference to stanza 101 in pp. 158 of Nannaya's Bhārata (Vol. I printed by Vavilla Ramswami Sastrulu & Sons, Madras) will bear out the contention that Nannaya was quite familiar with the imparting of the nīti by Kaṇiṅka to Dhṛtarāṣṭra. Now, we come to the most difficult problem of our Mahābhārata Text criticism. Here is a writer of definite date (1022 A. D.) whose task is only to epitomise the Mahābhārata and who refers to an incident in unmistakable words. Its omission by later writers cannot prove much, except perhaps that their versions are mutilated. Its omission by earlier hands certainly needs explanation. The only evidence that needs to be explained is that of the Javanese version. Certainly, the Javanese version cannot lay claim to be a thoroughly *complete and full* version of the Original Mahābhārata. It must needs be also only an abridgement and adaptation though it may have branched off from the parent stem two or three centuries earlier than Nannaya. An inclusion in the Javanese version, if omitted in any Indian Recension by later scholiasts may point to some defect in the latter, but not an omission in an earlier version which is *prima facie* only an abridgement and an adaptation. Judged by these standards, we are afraid that the omission

of Kaṇiṅkaniti in all the manuscripts and printed material in India, which are subsequent to Nannaya's time, can only prove the mutilated nature of our manuscript-tradition, rather than make Nannaya's and other versions that include Kaṇiṅkaniti to be either *indiscriminately inflated* or otherwise untrustworthy.

PRESIDENCY COLLEGE,
MADRAS.

P. P. S. SASTRI.
1-11-1931.

SCHEME OF SLOKAS.

No.	Name of Parva.	Bombay 1878	Palm Leaf Mss. क, ख-ग	Palm Leaf Ms. अ	Nannaya's Andhra Bharatamu	Madras Govt. Mss. Library D. No 1916.
I	Adi	8884	,,	9884	9984	9984
II	Sabha	2511	4511	4511	4311	4310
III	Aranya	11664	,,	,,	13664	13664
IV	Virata	2050	3500	3500	3500	3500
V	Udyoga	6698	,,	7998	,,	,,
VI	Bhisma	5884	,,	,,	,,	,,
VII	Drona	8909	10909	,,	10919	10919
VIII	Karna	4964	4900	4900	4900	4900
IX	Salya	3220	,,	,,	,,	,,
X	Sauptika	870	,,	,,	(2) 874	,,
XI	Stri	775	,,	,,	(1) 775	,,
XII	Santi	14725	14525	14525	14525	14525
XIII	Anusasana	8000	12000	12000	12000	12000
XIV	Asvamedhika	3320	4420	4420	4420	4420
XV	Asramavasika	1506	1906	1906	1106	1106
XVI	Mausala	320	,,	300	300	300
XVII	Mahaprasthanika	320	218	120	120	120
XVIII	Svargarohana	209	120	200	200	200

Note:--In Sauptika and Stri Parvans all printed editions include the figures 2 and 1 enclosed in brackets, whilst some reliable manuscripts exclude these figures. Their exclusion seems called for.

अध्यायः		पृष्ठम्
	पाण्डवदाहेन धृतराष्ट्रस्य बहिश्शोकः ...	९४९
	पाण्डवेभ्य उदकदानाय धृतराष्ट्रादीनां गङ्गां प्रति गमनमुदकदानञ्च ...	९५०
	विदुरेण सह भीष्मप्रलापः ...	,,
	विदुरेण रहसि भीष्माय पाण्डवा जतुगृहादलक्षिता बिलाद्बहिर्निर्गता इति कथनम् ...	९५४
१४५	विदुरप्रेषितेन पुरुषेण पाण्डवेभ्यः नौकाप्रदर्शनम् ...	९५७
	निषादेन नाविकेन साभिज्ञानं विदुरवाक्येन पाण्डवानां नावा गङ्गातारणम् ...	९५९
	भीमेन युधिष्ठिरादीनां वहनेन दक्षिणदिग्गमनम् ...	९६०
१४६	भीमेन मातृभ्रातृणां वहनेन रात्र्यामेव चतुर्विंशति-योजनपर्यन्तदूरगमनम् ...	९६१
	पाण्डवानामध्वगमनेन पिपासया निद्रया च परिश्रमः...	९६२
	भीमेन सरोवरे जलं निपीय स्नात्वा च पद्मपत्रैरुत्तरीयेण च बद्ध्वा पानीयमानीय भ्रातृभ्यो मात्रे च दानाय यतनम्	९६३
	भीमस्य सुप्तान् भ्रातॄन् मातरञ्च विलोक्य प्रलापः, जागरणञ्च ...	९६४

हिडिम्बवधपर्व

१४७	हिडिम्बप्रेरितायास्तद्भगिन्या हिडिम्बायाः पाण्डव-समीपगमनम् ...	९६७
	हिडिम्बया भीमसेनरूपसन्दर्शनेन कामनया मनसि चिन्तनम् ...	९६८
	हिडिम्बया मानुषं वपुरास्थाय भीमसमीपमागत्य स्वकामावेदनम् ...	९६९
	भीमहिडिम्बीसंवादः ...	९७१
१४८	पाण्डवान् प्रति प्रेषितया हिडिम्बया विलम्बिते हिडिम्बस्य तत्रागमनम् ...	९७२

अध्यायः		पुटम्
१४८	हिडिम्बाया भ्रातुर्दर्शनेन भीत्या भीमं प्रति उक्तिः ...	९७३
	हिडिम्बां प्रति भीमेन न भेतव्यं त्वया, अहमेनं हनिष्यामीति सान्त्वनम् ...	९७४
	हिडिम्बेन स्वभगिनीसन्तर्जनम् ...	९७५
	हिडिम्बस्य भीमं प्रत्याद्रवणम् ...	,,
१४९	भीमहिडिम्बयोर्युद्धम्-पाण्डवप्रबोधश्च ...	,,
१५०	कुन्तीहिडिम्बीसंवादः ...	९८०
	हिडिम्बीवार्तया भीमं हिडिम्बेन युद्ध्यमानं ज्ञातवतां युधिष्ठिरादीनां तत्र गमनम् ...	९८२
	हिडिम्बवधाय भीमार्जुनसंवादः ...	,,
	हिडिम्बस्य भीमेन वधः ...	१८४
१५१	हिडिम्ब्या भीमे स्वकामावेदनम् ...	९८७
	हिडिम्बाया भीमेन निराकरणम् ...	,,
	युधिष्ठिरेण भीमं प्रति हिडिम्बीविषये स्त्रीवधो न कार्य इति कथनम् ...	,,
	हिडिम्बया कुन्तीं प्रति विनयेन स्वस्या धर्मज्ञत्वस्य भविष्यज्ज्ञत्वस्य च प्रकटनम् ...	,,
	हिडिम्बाया धर्मज्ञतां ज्ञात्वा तदङ्गीकरणे भीमं प्रति कुन्त्या अनुमतिः ...	९९०
	हिडिम्बां प्रति भीमेन सह वर्तने युधिष्ठिरेण समयकरणम्	,,
१५२	हिडिम्बया सह पाण्डवानां शालिहोत्रसरोगमनम् ...	९९१
	हिडिम्बीग्रहणे भीमं प्रति कुन्त्या आज्ञा ...	९९२
	हिडिम्ब्या सह भीमस्य समयकरणम् ...	९९३
	हिडिम्ब्या सह भीमस्य रमणीयदेशेषु विहृत्य सायाह्ने शालिहोत्राश्रमं प्रति तया सह पुनरागमनम् ...	९९४
१५३	व्यासस्य शालिहोत्रसरसि पाण्डवानुद्दिश्यागमनम् ...	९९६
	व्यासेन पाण्डवानामाश्वासनम् ...	,,
	व्यासेन कुन्त्या आश्वासनम् ...	९९७
	व्यासस्य प्रतिनिवर्तनञ्च ...	९९८

अध्यायः		पुटम्
	घटोत्कचोत्पत्तिः ...	९९९
	घटोत्कचनामप्राप्तिहेतुकथनम् ...	१०००
	घटोत्कचस्य पाण्डवचिन्तनसमकालमागमिष्यामीति प्रतिज्ञायोत्तरदिशागमनम् ...	१००१
	हिडिम्बाया भीमेन निवर्तनम् ...	,,
	पाण्डवानां शालिहोत्राश्रमाद्गमनम् ...	१००२
	व्यासस्य पुनरपि पाण्डवसमीपागमनम् ...	,,
	व्यासेन एकचक्रायां ब्राह्मणगृहे पाण्डवानां निवासानुज्ञा	१००३

बकवधपर्व

१५४	एकचक्रायां भिक्षाऽटतः पाण्डवान् दृष्ट्वा पौराणां वितर्कः	१००४
	भीमस्य कुम्भकारान्महत्तरपात्रलाभः ...	१००६
	एकचक्रायां गृहस्वामिनो ब्राह्मणस्य सभार्यस्य क्रन्दनम्	१००७
	ब्राह्मणाक्रन्दनश्रवणेन कुन्त्याः भीमानुमत्या ब्राह्मणान्तर्गृहप्रवेशः ...	१००८
	ब्राह्मणपरिदेवनम् ...	,,
१५५	ब्राह्मणं प्रति तत्पत्नीवाक्यम् ...	१०१३
१५६	ब्राह्मणं प्रति तत्कन्यावाक्यम् ...	१०१९
	ब्राह्मणं प्रति बालस्य वचनम् ...	१०२१
१५७	कुन्त्या रोदनकारणे पृष्टे ब्राह्मणेन बकवृत्तान्तकथनम् ...	१०२२
१५८	कुन्त्या ब्राह्मणाय बकं प्रति स्वपुत्रप्रेषणकथनम् ...	१०२६
	ब्राह्मणप्रार्थनया कुन्त्युक्त्या च भीमेन बकमुद्दिश्य गमनाङ्गीकारः ...	१०२८
१५९	भीमं हृष्टं ज्ञात्वा युधिष्ठिरेण मातरं प्रति भीमस्य हर्षकारणप्रश्नः ...	१०२९
	कुन्त्या भीमप्रभावकथनेन युधिष्ठिराश्वासनम् ...	१०३०
	भीमस्य बकवनगमनम् ...	१०३४
	भीमेन शकटस्थान्नभोजनम् ...	,,
	बकवधे भीमवचनम् ...	१०३७

अध्यायः		पुटम्
१७२	वसिष्ठेन संवरणस्य स्वराष्ट्रप्रापणम् ...	१०९६
	संवरणस्य तपत्या सह स्वपुरगमनेन वर्षेण सस्याद्युद्गमः	,,
१७३	गन्धर्वेण अङ्गारवर्णनाम्ना चित्ररथेन अर्जुनाय वसिष्ठ-माहात्म्यकथनपूर्वकं पाण्डवानां पुरोहितसङ्ग्रहणोपदेशः	१०९७
	विश्वामित्रस्य मृगयाप्रसङ्गेन वसिष्ठाश्रमगमनम् ...	१०९९
	विश्वामित्रस्य सपरिवारस्य वसिष्ठेनातिथिसत्कारः ...	११००
	विश्वामित्रेण वसिष्ठधेनुयाचनम् ...	११०१
	वसिष्ठविश्वामित्रयोर्धेनुनिमित्तं विवादः ...	११०२
	विश्वामित्रस्य पराजयः ...	११०६
	विश्वामित्रस्य तपसा ब्राह्मणत्वप्राप्तिः ...	११०७
१७४	कल्माषपादराजोपाख्यानम् ...	११०८
	कल्माषपादं प्रति वसिष्ठपुत्रेण शक्तिना शापदानम् ...	११०९
	कल्माषपादशरीरे किङ्करनामकराक्षसस्य विश्वामित्राज्ञया प्रवेशः ...	१११०
	कल्माषपादेन ब्राह्मणाय क्षुधिताय निशि नरमांसं वा आनीय दातव्यमिति सूदस्याज्ञा ...	१११९
	कल्माषपादस्य सूदद्वारा नरमांसदानेन क्रुद्धेन ब्राह्मणेन शापदानम् ...	१११२
	कल्माषपादेन रक्षसाऽऽविष्टेन वसिष्ठपुत्रस्य शक्तेर्हननं, भक्षणं च ...	१११३
	कल्माषपादेन अन्येषामपि वसिष्ठपुत्राणां हननम् ...	,,
	पुत्रशोकेन वसिष्ठस्य प्राणत्यागार्थमनेकधा प्रयतनम् ...	,,
१७५	वसिष्ठस्य पुनर्गङ्गापतनादिना प्राणत्यागासम्भवेन आश्रमं प्रत्यागमनम् ...	१११४
	शक्तिभार्यामदृश्यन्तीनाम्नीं गर्भवतीं ज्ञात्वा वसिष्ठस्य आत्मघातान्निवर्तनम् ...	१११६
	कल्माषपादस्य वसिष्ठादृश्यन्त्योर्भक्षणाय अभिद्रवणम्	१११७
१७६	कल्माषपादस्य वसिष्ठेन शापान्मोक्षणम् ...	१११८

अध्यायः		पुटम्
वसिष्ठात् कल्माषपादपत्न्यां गर्भसम्भवः	...	११२०
कल्माषपादस्य वसिष्ठादश्मकनामकपुत्रोत्पत्तिः	...	११२१
१७७ पराशरोत्पत्तिः	...	,,
पराशरनामनिर्वचनम्	...	११२२
पराशरेण वसिष्ठस्य अदृश्यन्तीसमीपे तातेत्यामन्त्रणेन दुःखितया तया तव पिता रक्षसा भक्षितः पितामहोऽयमिति कथनेन पराशरस्य सर्वलोकविनाशप्रयत्नः	...	,,
वसिष्ठेन पराशरस्य सर्वलोकविनाशप्रयत्नं वारयता और्वोपाख्यानकथनम्	...	,,
कृतवीर्यवंश्यैः क्षत्रियैर्धनार्थं भृगुवंश्यानां ब्राह्मणानां हननम्	...	११२३
क्षत्रियभीत्या कयाचिद्ब्राह्मण्या ऊरौ धृतं गर्भं हन्तुं क्षत्रियाणामुद्यमः	...	,,
और्वस्य ऊरुं भित्त्वा निर्गतस्य तेजसाऽन्धीभूतानां क्षत्रियाणां ब्राह्मणीं प्रति शरणगमनम्	...	११२४
१७८ ब्राह्मणीवाक्येन और्वं प्रति शरणागतानां चक्षुःप्राप्तिः	...	११२५
और्वेण लोकविनाशाय तपसि कृते तस्य तत्पितृकृततपोनिवारणम्	...	११२६
और्वेण स्वपितृवाक्येन क्रोधस्य समुद्रे त्यागः	...	११२९
और्वोपाख्यानकथनेन वसिष्ठेन पराशरस्य सर्वलोकविनाशप्रयत्नान्निवारणम्	...	११३०
गन्धर्वेणार्जुनाय पराशरस्य राक्षसनाशाय यागकरणकथनम्	...	११३१
पराशरसमीपे पुलस्त्यस्य राक्षससत्रसमापनप्रार्थनम्	...	११३२
पराशरेण राक्षससत्राग्नेः हिमवत उत्तरस्मिन् पार्श्वे त्यागः		११३३
१७९ कल्माषपादभार्यायां वसिष्ठेन पुत्रोत्पादनकारणं पृष्टवन्तमर्जुनं प्रति पुनर्गन्धर्वेण कल्माषपादकथाकथनम्	...	,,

अध्यायः		पुटम्
१७९	कल्माषपादेन शक्तिशापाद्राक्षसाविष्टेन वने मिथुनत्वाय सङ्गतयोः ब्राह्मणयोर्मध्ये पुंसो भक्षणम् ...	११३४
	कल्माषपादस्य ब्राह्मण्या शापः ...	११३६
	कल्माषपादेन ब्राह्मणीप्रसादनेन तव भार्यां वसिष्ठेन सङ्गम्य वंशकरं पुत्रं जनयिष्यतीति वरदानम् ...	,,
	कल्माषपादस्य वसिष्ठेन शापे मोचिते तत्पत्न्या सम्भोगोद्योगे ब्राह्मणीशापस्मारणेन राज्ञा स्वभार्यायां वसिष्ठनियोजनम् ...	,,
१८०	अर्जुनेनानुरूपपुरोहितसम्पादनं पृष्टेन गन्धर्वेण धौम्यवरणाभ्यनुज्ञा ...	११३७
	गन्धर्वायार्जुनेनाग्नेयास्त्रदानम् ...	११३८
	धौम्यस्य उत्कचकतीर्थे पाण्डवैः पौरोहित्याय वरणम्...	,,

स्वयंवरपर्व

१८१	द्रौपदीस्वयंवरं शृण्वतां राज्ञां पाण्डवानाञ्च द्रुपदपुरप्रवेशनम् ...	११४०
	धृष्टद्युम्नेन लक्ष्यवेधपणकथनम् ...	११४५
१८२	द्रौपदीं प्रति धृष्टद्युम्नेन स्वयंवरं प्रत्यागतानां राज्ञांनामकथनम् ...	११४६
	पाण्डवान् ब्राह्मणमध्यस्थान् विज्ञाय श्रीकृष्णेन बलरामाय कथनम् ...	११५१
	राज्ञां केषाञ्चिद्धनुर्दर्शनेन धनुःपूरणे नैराश्यम् ...	११५२
	शिशुपालादीनां धनुःपूरणे भङ्गः ...	११५३
	अर्जुनस्य धनुःपूरणेऽपेक्षा ...	११५५
१८३	धनुरारोपणायोत्थितमर्जुनं प्रति ब्राह्मणानां शुभाशंसनम्	११५६
	अर्जुनेन धनुरारोपणपूर्वकं लक्ष्यवेधः ...	११५८
	द्रौपद्या अर्जुनकण्ठे मालाप्रक्षेपः ...	११६०

अध्यायः		पृष्ठम्
	राजसु क्रोधाद् द्रुपदहननार्थमागतेषु राज्ञां सम्मुखे भीमार्जुनयोस्तज्जीभूय स्थितयोस्ततोः कृष्णबलरामयोस्संवादः ...	११६१
१८४	अर्जुनेन स्वयंवरे कर्णपराजयः ...	११६६
	भीमेन शल्यपराजयः ...	११७०
	युधिष्ठिरेण दुर्योधनपराजयः ...	११७१
	पाण्डवैरन्येषाञ्च राज्ञां पराजयः ...	११७२
१८४	राजभिः पुनर्युद्धाय निश्चये कृते श्रीकृष्णेन युद्धनिवारणेन राज्ञां स्वस्वालयगमनम् ...	११७३
	द्रौपद्या सह भीमार्जुनयोः कुलालगृहप्रवेशः ...	११७४
१८५	भीमार्जुनाभ्यां कुन्त्यै द्रौपद्याः भिक्षेत्यावेदने कुन्त्या पञ्चानां सहभोजनानुज्ञा ...	११७५
	कुन्त्यां पश्चाद्द्रौपदीदर्शनेन चिन्तान्वितायां युधिष्ठिरार्जुनयोस्संवादः ...	११७६
	द्वैपायनवचनस्मरणेन पञ्चानां द्रौपदी भार्येति युधिष्ठिरनिश्चयः ...	११७८
	जनमेजयेन कृष्णस्य कार्मुकानारोपणे कारणे पृष्टे पाण्डवार्थमिति वैशम्पायनस्योत्तरम् ...	,,
	कुलालशालां प्रति श्रीकृष्णस्यागमनम् ...	११७९
१८६	पाण्डवावासे धृष्टद्युम्नस्य निलीयावस्थानम् ...	११८२
	भीमाद्यानीतस्य भैक्षस्य कुन्त्याज्ञया द्रौपद्या परिवेषणम् ...	,,
	पाण्डववृत्तान्तं सर्वं ज्ञात्वा धृष्टद्युम्नस्य प्रतिनिवर्तनम् ...	११८४
	द्रुपदेन धृष्टद्युम्नं प्रति द्रौपदी केन हृतेति प्रश्नः ...	११८५

वैवाहिकपर्व

१८७	धृष्टद्युम्नेन भीमार्जुनाभ्यां द्रौपदी हृतेति कथनम् ...	११८६

अध्यायः		पृष्ठम्
१८७	द्रुपदेन तत्त्वविवित्सया पाण्डवान् प्रति पुरोहितप्रेषणम्	११८९
	द्रुपदपुरोहितेन युधिष्ठिरं प्रति जातिकुलादिप्रश्नः ...	११९०
	युधिष्ठिरेण द्रुपदपुरोहितं प्रति जातिकुलादिप्रश्नो न कर्तुं युक्त इति कथनम् ...	११९१
	पाण्डवानां द्रुपदप्रहितदूतोक्त्या कुन्त्या सह द्रुपदगृहगमनम् ...	११९२
	द्रुपदेन पाण्डवपरीक्षणार्थमनेकविधवस्तुसम्पादनम् ...	११९३
	द्रौपद्या सह कुन्त्या अन्तःपुरप्रवेशः ...	११९४
	पाण्डवानां भोजनानन्तरं साङ्ग्रामिकवस्तुपूर्णप्रदेशे प्रवेशः	११९५
१८८	द्रुपदप्रश्ने युधिष्ठिरेण स्वेषां पाण्डवत्वकथनम् ...	११९६
	द्रौपद्याः पञ्चपतीत्वे द्रुपदस्य विवादः ...	११९९
	व्यासागमनम् ...	१२०१
	एकस्याः बहुभार्यात्वे शङ्कमानान् द्रुपदादीन् प्रति व्यासेन स्वस्वाभिप्रायकथनानुज्ञा ...	,,
	द्रुपदादिभिः स्वस्वमते कथिते व्यासेनास्य विवाहस्य धर्म्यत्वकथनम् ...	१२०२
१८९	नालायन्या उपाख्यानम् ...	१२०४
	नालायन्या मौद्गल्यस्य स्थविरस्य पत्युराराधनम् ...	१२०५
	नालायन्याराधनतुष्टेन मौद्गल्येन आत्मनः पञ्चरूपस्वीकारेण तस्यां रमणम् ...	१२०६
	नालयनी तव दुहिता द्रौपदी जातेति द्रुपदं प्रति व्यासस्योक्तिः ...	१२०८
	नालायन्या रुद्रात् पञ्चपतीत्ववरप्राप्तिः ...	१२१०
१९०	पञ्चेन्द्रोपाख्यानम् ...	१२१२
	बलरामकेशवद्रौपदीनामुत्पत्तिकथा ...	१२१८
	द्रुपदेन व्यासदत्तदिव्यदृष्ट्या पाण्डवद्रौपदीपूर्वरूपदर्शनम् ...	१२२०

अध्यायः पृष्ठम्
१९१ नितन्तुनामकराजर्षिपुत्राणां पञ्चानां भौमाश्वीनाम्न्या
एकया राजपुत्र्या पतित्वेन वरणम् ... १२२१
द्रौपद्या देवतांशत्वस्य व्यासेन कथनम् ... १२२३
युधिष्ठिरादिभिः क्रमेण द्रौपद्याः पाणिग्रहणम् ... १२२६
१९२ द्रौपदीं प्रति कुन्त्या आशीर्वादः ... १२३१
श्रीकृष्णप्रेषितालङ्कारादीनां पाण्डवैस्स्वीकारः १२३२

विदुरागमनपर्व

१९३ पाण्डवानां द्रौपदीविवाहं चारद्वारा श्रुतवद्भिः
अन्यै राजभिर्भीष्मधृतराष्ट्रादीनां धिक्कारः ... १२३३
पाण्डवान् प्रति धार्तराष्ट्राणाम्मन्त्रालोचनम् ... १२३४
पाण्डवा हन्तव्या इति शकुनेरुक्तिः ... १२३५
पाण्डवानां हन्तुमशक्यत्वात्तैस्सह सन्धिः
कर्तव्य इति सौमदत्तेरुक्तिः ... १२३६
१९४ पाण्डवा हन्तव्या एवेति कर्णस्योक्तिः ... १२३९
दुर्योधनादीनां पाञ्चालनगरं प्रति युद्धार्थं गमनम् ... १२४०
द्रुपदपुत्रयोस्सुमित्रप्रियदर्शनयोः कर्णत्रयद्रथाभ्यां हननम् १२४२
अर्जुनेन कर्णत्रयद्रथपुत्रयोर्वधः ... ,,
अर्जुनेन कर्णदुर्योधनादीनां पराजयः ... १२४४
पराजितानां दुर्योधनादीनां हास्तिनपुरगमनम् ... १२४५
श्रीकृष्णबलरामयोः पाञ्चालपुरे वासः ... १२४६
१९५ विदुरात् ज्ञातपाण्डववृत्तान्तेन धृतराष्ट्रेण द्रौपद्यान-
यनार्थमाज्ञापनम् ... १२४८
धृतराष्ट्रसमीपे कर्णदुर्याधनयोर्भाषणम् ... १२५२
धृतराष्ट्रदुर्योधनसंवाद ... १२५३
दुर्योधनं प्रति कर्णेनोक्तं श्रुतवतो धृतराष्ट्रस्य
भीष्मादिभिस्सह मन्त्रणम् ... १२५८
भीष्मेण दुर्योदनादिसमीपे पाण्डवेभ्योऽर्धराज्यं
दातव्यमिति स्वाभिप्रायकथनम् ... १२५९

अध्यायः		पृष्ठम्
१९६	पाण्डवास्संविभज्या इति द्रोणवचनम् ...	१२६१
	कर्णेन विनिन्दवृत्तान्तकथनम् ...	१२६३
	द्रोणेन मदुक्तं न क्रियते चेत् कुरवो विनङ्क्ष्यन्तीत्युक्तिः ...	१२६४
	विदुरेण भीष्मद्रोणोक्तमेवावश्यं करणीयमिति धृतराष्ट्रं प्रत्युक्तिः ...	१२६५
१९७	धृतराष्ट्राज्ञया विदुरस्य द्रुपदनगरगमनम् ...	१२६९
	विदुरेण पाञ्चालनगरे श्रीकृष्णादीनां समीपे धृतराष्ट्रसन्देशकथनम् ...	१२७२
	पाण्डवानां हास्तिनपुरं प्रति गमनाय श्रीकृष्ण-द्रुपदयोरभ्यनुज्ञा ...	१२७४
	पृथाविदुरसंवादः ...	१२७५
	द्रुपदेन पाण्डवेभ्यः पारिबर्हदानम् ...	१२७६
	पाण्डवानां हास्तिनपुरप्रवेशः ...	१२७७
	पाण्डवानां हास्तिनपुरे भीष्मादिवन्दनपुरस्सरं गृहप्रवेशः ...	१२७८

राज्यलाभपर्व

१९८	धृतराष्ट्रेण युधिष्ठिरस्यार्धराज्येऽभिषेकः ...	१२७९
	पाण्डवानां खाण्डवप्रस्थगमनम् ...	१२८५
	विश्वकर्मणः कृष्णचिन्तनेन इन्द्राज्ञया खाण्डव प्रस्थागमनम् ...	१२८६
	विश्वकर्मणा इन्द्रप्रस्थपुरनिर्माणम् ...	१२८७
	युधिष्ठिरस्य इन्द्रप्रस्थपुरप्रवेशः ...	१२९०
	युधिष्ठिरेण विश्वकर्मद्वैपायनश्रीकृष्णबलरामादीनां विशेषतस्सम्माननेन प्रस्थापनम् ...	१२९२
१९९	पाण्डवानां समीपे नारदागमनम् ...	१२९४
	नारदेन सुन्दोपसुन्दवृत्तान्तोपक्षेपः ...	१२९९
२००	सुन्दोपसुन्दयोर्ब्रह्मणो वरलाभः ...	१३०१

अध्यायः		पुटम्
	सुन्दोपसुन्दयोर्दिग्विजयः, कुरुक्षेत्रे निवासश्च ...	१३०४
	सुन्दोपसुन्दकृतोपद्रवस्य ब्रह्मणे देवादिभिः निवेदनम् ...	१३०८
	सुन्दोपसुन्दवधार्थं ब्रह्मणाऽऽज्ञप्तेन विश्वकर्मणा तिलोत्तमासृष्टिः ...	१३०९
	तिलोत्तमया ब्रह्माज्ञास्वीकारः ...	१३१०
	तिलोत्तमया ब्रह्मादिप्रदक्षिणकाले इन्द्रादिदेवानामवस्थानरीतिः ...	१३११
	तिलोत्तमायास्सुन्दोपसुन्दसमीपागमनम् ...	१३१२
	तिलोत्तमायां सकामयोस्सुन्दोपसुन्दयोः परस्परं गदाप्रहारेण मरणम् ...	१३१५
	तिलोत्तमायै ब्रह्मणा वरदानम् ...	१३१६
	पाण्डवैः नारदोक्तां सुन्दोपसुन्दकथां श्रुतवद्भिः तत्समक्षं द्रौपदीविषये समयकरणम् ...	१३१७
	अर्जुनवनवासपर्व	
२०१	तस्करैः कस्यचिद्ब्राह्मणस्य गोहरणम् ...	१३१८
	अर्जुनस्य चोरितानां गवां प्रत्याज्ञिहीर्षया धनुर्ग्रहणार्थं द्रौपदीयुधिष्ठिराधिष्ठिते आयुधागारे प्रवेशः ...	१३२०
	अर्जुनेन चोरेभ्यः प्रत्याहृता गा ब्राह्मणाय दत्वा यथासमयं तीर्थयात्रागमनम् ...	१३२२
२०२	अर्जुनस्य ब्राह्मणैस्सह तीर्थाटनकाले गङ्गायामवतरणम्	१३२५
	अर्जुनस्य गङ्गायामुलूप्या नागकन्यया ग्रहणेन नागलोकगमनम् ...	१३२७
	अर्जुनेन संवादपूर्वकमुलूप्याः परिग्रहः ...	१३२८
	इरावत उत्पत्तिः ...	१३३०
२०३	अर्जुनस्य मणलूरुपुरगमनम् ...	१३३२
	अर्जुनेन पुत्रिकापुत्रकधर्मेण चित्राङ्गदापरिग्रहः ...	१३३३
२०४	अर्जुनस्य सौभद्रतीर्थे स्नानकाले ग्राहेण ग्रहणम् ...	१३३

अध्यायः		पुटम्
२०४	वन्दानाम्न्या ग्राहरूपं परित्यज्य स्वीरूपं प्राप्तया अर्जुनाय स्वेषां ब्राह्मणेन शापदानकथनम् ...	१३३६
	वन्दया ब्राह्मणप्रसादनेन स्वेषां शापमोचनप्रकारस्य नारदनिदेशेन सौभद्रतीर्थागमनस्य च अर्जुनं प्रति कथनम् ...	१३३७
	अर्जुनेन वन्दया कथितवृत्तान्तश्रवणेन ग्राहरूपाणामन्यासामप्यप्सरसां तीर्थेभ्य उद्धरणेन तासां स्वस्वरूपप्राप्तिः ...	१३४०
	अर्जुनस्य पुनर्मणलूरुपुरगमनम् ...	,,
	बभ्रुवाहनस्य चित्राङ्गदायामर्जुनाजननम् ...	,,
	अर्जुनेन बभ्रुवाहनं श्वशुराय चित्रवाहनाय समर्प्य गोकर्णक्षेत्रगमनम् ...	१३४१
२०५	अर्जुनस्य प्रभासतीर्थगमनम् ...	१३४२
	अर्जुनस्य स्मृतिपथागतसुभद्रारूपलावण्यादिचिन्तनात् परिव्राजकवेषस्वीकारेण तस्या हरणे निश्चयः ...	१३४३
	अर्जुनस्य चिन्तितज्ञानेन हसता श्रीकृष्णेन सहशायिन्या सत्यभामया हासकारणे पृष्टे तां प्रति अर्जुनवृत्तान्तकथनम् ...	,,
	कृष्णेन सत्यभामां शयने विहाय प्रभासतीर्थं प्रति गमनम् ...	१३४५
	अर्जुनेन सम्भाष्य कृष्णस्य द्वारकां प्रति पुनरागमनम्...	१३४६

सुभद्राहरणपर्व

२०६	कृष्णादीनामुत्सवार्थं रैवतकपर्वतं प्रति गमनम् ...	१३४७
	कृष्णेन रैवतके परिव्राजकरूपार्जुनदर्शनम् ...	१३४९
	अर्जुनस्य सुभद्रादर्शनेन तस्यां सञ्जातदृच्छयस्य यतिरूपेण सुभद्राहरणे कृष्णानुज्ञालाभः ...	१३५०
	कृष्णार्जुनाभ्यां दूतप्रेषणेन युधिष्ठिरस्याप्यनुज्ञालाभः ...	१३५१

अध्यायः		पुटम्
२०७	अर्जुनस्य यतिरूपस्य द्वारकोपवने वासः ...	१३५२
	यादवैर्यतिरूपस्यार्जुनस्य द्वारकोपवने दर्शनम् ...	,,
	यादवैर्यतेरत्र क्व वा निवासो युक्तस्यादिति पृष्टे सुभद्रागृहे वसत्विति रामोक्तिः ...	१३५३
	कृष्णेन यतेः कन्यागृहे वासो न युक्त इति कथनम् ...	१३५४
	बलरामेण पुनः कन्यागृहे स्थापयेति चोदितेन कृष्णेन अर्जुनस्य यतेः सुभद्रागृहे स्थापनम् ...	१३५६
	सुभद्रया यतौ अर्जुनलक्षणदर्शनेन शङ्कया यतिं प्रति अर्जुनादिकुशलप्रश्नः ...	१३५९
	अर्जुनेन तत्त्वे कथिते मोहितायां सुभद्रायां देवक्या आश्वासनम् ...	१३६०
	सुभद्राया गूढं विवाहचिकीर्षया यतिं सुभद्रागृहे संस्थाप्य कृष्णेन महादेवपूजाव्याजेन सर्वैर्यादवैस्सह अन्तर्द्वीपगमनम् ...	१३६३
२०८	सुभद्राविवाहः ...	१३६६
	अर्जुनस्य सुभद्रया सह कृष्णरथमास्थाय खाण्डवप्रस्थं गन्तुं यत्नः ...	१३७२
२०९	अर्जुनस्य द्वारकाया बहिर्निर्गमनकाले विपृथुसेनया सह युद्धम् ...	१३७६
	अर्जुनेन सह युद्धं कुर्वाणं स्वसैन्यं निवर्त्य विपृथुना अर्जुनस्य सत्कारः ...	१३७८
	अर्जुनस्य सुभद्रया सह इन्द्रप्रस्थं प्रति गमनारम्भः ...	१३८०
	सैनिकानां द्वारकागमनेन वृत्तान्तं श्रुतवता सभापालेन भेरीसन्ताडनम् ...	१३८१
	भेरीताडनेन वृष्ण्यन्धकानां सन्नाहः ...	,,
	युद्धोद्युक्तानां यादवानां बलरामवाक्यान्निवृत्तिः ...	१३८२
	अर्जुने बलरामस्य कोपः ...	,,

अध्यायः		पृष्ठम्
	हरणहारिकपर्व	
२१०	कृष्णेन बलरामस्य सान्त्वनम् ...	१३८४
	अर्जुनं प्रत्यानेतुं यादवानां गमनम् ...	१३८७
	अर्जुनं विपृथुवाक्याद्दूरगतं ज्ञात्वा यादवानां प्रति निवर्तनम् ...	,,
	अर्जुनस्य इन्द्रप्रस्थं प्रति गमनम् ...	१३८८
	अर्जुनेन सुभद्राया गोपीवेषेण द्रौपदीसमीपप्रेषणम् ...	१३८९
	सुभद्रायाः प्रणामकाले पृथाद्रौपदीभ्यां आशीर्वादः ...	१३९०
	अर्जुनेन स्वपुरप्रवेशानन्तरं भ्रातृभ्यः स्वकृततीर्थयात्रावृत्तान्तकथनम् ...	१३९१
२११	कृष्णानुमत्याऽर्जुनस्सुभद्रां जहारेति पौराणामूहः ...	१३९३
	अर्जुनमिन्द्रप्रस्थं प्राप्तं ज्ञात्वा यादवैस्सह श्रीकृष्णस्य इन्द्रप्रस्थं प्रत्यागमनम् ...	१३९४
	कृष्णमागतं श्रुत्वा युधिष्ठिरेण प्रतिग्रहाय नकुलसहदेवप्रेषणम् ...	१३९५
	युधिष्ठिरेण कृष्णबलरामसत्कारः ...	१३९६
	सुभद्राविवाहमहोत्सवानुष्ठानम् ...	१३९७
	कृष्णबलरामाभ्यां सुभद्रायै यौतकदानम् ...	,,
	युधिष्ठिरेण पूजितानां बलरामादीनां द्वारकां प्रति गमनम् ...	१४००
	कृष्णस्य परं खाण्डवप्रस्थे वासः ...	१४०१
२१२	अभिमन्यूत्पत्तिः ...	,,
	द्रौपद्याः युधिष्ठिरादिभ्यः पञ्चपुत्रोत्पत्तिः ...	१४०३
	अभिमन्युप्रभृतीनां अर्जुनात् शस्त्राभ्यासः ...	१४०४
	खाण्डवदाहपर्व	
२१३	युधिष्ठिरस्य राज्यपरिपालनप्रकारवर्णनम् ...	१४०५
	अर्जुनस्य श्रीकृष्णेन सह जलक्रीडार्थं यमुनां प्रति गमनम्	१४०७

अध्यायः		पुटम्
११३	कृष्णेन खाण्डववनदर्शनं तच्छ्राशदर्शनञ्च ...	१४०८
२१४	कृष्णार्जुनयोः स्त्रीभिस्सह विहरणम् ...	१४०९
	अग्नेः ब्राह्मणरूपस्य श्रीकृष्णार्जुनसमीपं प्रत्यागमनम् ..	१४१०
	खाण्डववनदाहार्थं कृष्णार्जुनौ प्रत्यग्नेः प्रार्थना ...	१४११
	अग्नेः किमर्थं खाण्डवदिधक्षेति जनमेजयस्य प्रश्नः ...	१४१२
	श्वेतक्युपाख्यानस्य वैशम्पायनेन कथनम् ...	१४१३
	श्वेतकिना राज्ञा शतवार्षिकसत्रकरणाय ऋत्विजां प्रार्थनम् ...	,,
	श्वेतकिं प्रति ऋत्विग्भिः रुद्रसकाशं गच्छेत्युक्तिः ...	१४१४
	श्वेतकितपसा प्रीतेन रुद्रेण द्वादशवत्सरान् सन्ततं वसुधारयाऽग्नेः प्रीणने याजयिष्यामीत्युक्तिः ...	१४१५
	श्वेतकिना वसुधारयाऽग्नेः प्रीणनेन रुद्रेण-दुर्वाससः याजनार्थं प्रेषणम् ...	१४१५
	श्वेतकिना दुर्वासःपौरोहित्येन सत्रकरणं समापनञ्च ...	१४१६
	श्वेतकिसत्रेणाग्नेर्विकारजननेन तच्छान्त्यर्थं ब्रह्मसमीपगमनम् ...	१४१८
	ब्रह्मणाऽग्नेः खाण्डवदाहानुज्ञा ...	,,
	खाण्डवदाहार्थमग्नेर्गमने सप्तकृत्वः अग्निप्रशमनम् ...	१४१९
	खाण्डवदाववदाहार्थं पुनरप्यग्नेर्ब्रह्मसमीपगमने नरनारायणयोः कृष्णार्जुनरूपेणावतीर्णयोस्तन्निधौ याचस्वेति ब्रह्मणा कथनम् ...	१४२०
	अर्जुनेनाग्नेस्सकाशाद्दिव्यानां रथाश्वधनुरादीनां याचनम्	१४२१
	अग्निना वरुणध्यानेन वरुणेनाहृतानां रथादीनामर्जुनाय दानम् ...	,,
	अग्निना श्रीकृष्णाय सुदर्शनकौमोदक्योश्च दानम् ...	१४२२
	अग्नेः खाण्डवदाहारम्भः ...	१४२६
२१५	खाण्डवदाहं दृष्ट्वा सस्तैर्देवैः प्रार्थितेनेन्द्रेण जलवर्षणम्	१४२८
	इन्द्राभिवृष्टस्य जलस्यार्जुनेन निवारणम् ...	१४२९

अध्यायः पृष्ठम्
तक्षकभार्यायाः पुत्रमश्वसेनं निगीर्य आकाशोत्पतनकाले अर्जुनेन तस्याशिरश्छेदः ... १४३०
तक्षकसुतस्याश्वसेनस्य इन्द्रेण मोचनम् ... ,,
पावकान्मुमुक्षूणां नागादीनां कृष्णार्जुनाभ्यां मारणम् १४३१
इन्द्रस्य सदेवस्य कृष्णाभ्यां सह युद्धम् ... १४३३

मयदर्शनपर्व

२१६ अर्जुनेन इन्द्रे देवैस्सह पराजिते आकाशवाणीश्रवणेन इन्द्रस्य निवृत्तिः ... १४३६
खाण्डवदाहकाले मये निर्गमनाय उद्युक्ते श्रीकृष्णेन तस्य वधोद्योगे च मयस्यार्जुनं प्रति शरणागतिः ... १४४०
मयस्य शरणागत्या अर्जुनेन मोचनम् ... १४४१
खाण्डवदाहेऽपि अश्वसेनादीनामदाहस्य वैशम्पायनेन कथनम् ... ,,
२१६ शार्ङ्गकाणां मोचनकारणे जनमेजयेन पृष्टे वैशम्पायनेन मन्दपालोपाख्यानकथनारम्भः ... ,,
मन्दपालस्य तपसा पितृलोकगमनेऽपि देवाज्ञया प्रजोत्पादनार्थं पुनर्भूमावागमनम् ... १४४२
मन्दपालेन शार्ङ्ग्यां जरितायां पुत्रचतुष्टयोत्पादनम्... १४४३
जरितां पुत्रैस्सह खाण्डवे विसृज्य लपितानाम्न्या अन्यया सङ्गतस्य मन्दपालस्य विप्ररूपाग्निदर्शनम्... १४४४
मन्दपालेन खाण्डवदिधक्षुमग्निं प्रति पुत्ररक्षणार्थं स्तोत्रेण तस्माद्वरलाभः ... ,,
अग्निना खाण्डवदाहे उपक्रान्ते जरितायाः स्वपुत्रैस्सह संवादः ... १४४६
२१७ जरितायाः पुत्रैस्सह संवादानन्तरं स्थानान्तरगमनम्... १४४९
जरितार्यादीनां चतुर्णां शार्ङ्गकाणां परस्परं संवादः ... १४५१
शार्ङ्गकैः कृतेन स्तोत्रेण प्रसन्नेनाग्निना तेभ्योऽभयदानम् १४५२

अध्यायः		पुटम्
	शार्ङ्गकाणां प्रार्थनया अग्निना मार्जाराणां दाहः ...	१४५५
२१८	मन्दपाले पुत्रांश्चिन्तयति लपितायास्सासूयवचनम् ...	१४५६
	मन्दपाले खाण्डवाग्निशमनानन्तरं पुत्रादिदिदृक्षया आगच्छति तस्य भार्यया पुत्रैश्च उपालम्भः ...	१४५८
	मन्दपालस्य पुत्राश्वासनपूर्वकं सर्वैस्सहान्यत्र गमनम्...	१४६०
	इन्द्रेण देवगणैस्सहागत्य कृष्णार्जुनाभ्यां वरं प्रदाय-स्वलोकगमनम् ...	१४६१
	कृष्णार्जुनाभ्यामनुज्ञां प्राप्याग्नेर्गमनानन्तरं कृष्णार्जुन-मयानां नदीकूले उपवेशनम् ...	१४६२

॥ आदिपर्वणि द्वितीयसंपुटम् ॥

॥ अष्टत्रिंशदधिकशततमोऽध्यायः ॥

(अथ जतुगृहदाहपर्व ॥ ८ ॥)

पाण्डवानां वारणावतयात्रार्थं धृतराष्ट्रानुज्ञा ॥ १ ॥

वैशंपायनः—

कणिङ्कस्य मतं ज्ञात्वा कार्त्स्न्येन भरतर्षभ ।
दुर्योधनश्च कर्णश्च शकुनिस्सौबलस्तथा ॥ १

दुश्शासनचतुर्थास्ते मन्त्रयामासुरेकतः ।
ततो दुर्योधनो राजन् धृतराष्ट्रमभाषत ॥ २

दुर्योधनः—

पाण्डवेभ्यो भयं नास्ति विधत्स्व यदनन्तरम् ॥ २॥

वैशंपायनः—

[1]धृतराष्ट्रः कणिङ्कस्य श्रुत्वा वाक्यमुवाच ह ।
यथा न वाच्यतां पुत्र गच्छामः कुरु तत्तथा ॥ ३॥

---

1. क-ख-ग—धृतराष्ट्रस्तु वचनं श्रुत्वा सुमहदप्रियम् ।
उवाच मतिमान् वाक्यं सुयोधनमरिन्दमम् ॥
ज्ञात्यन्धश्चाप्यहं तात पाण्डुना पूजितो भृशम् ।
राज्ञानो यद्यपि श्रेष्ठा धर्महेतोर्भवन्ति हि ॥
प्रज्ञाचक्षुरनेत्रत्वाद् अशक्तो राष्ट्रगोपने ।
न चान्धं प्रतिचक्राणि प्रतिव्यूहन्ति सङ्गरे ॥
अर्थशास्त्रं मयाऽधीतं साङ्गा वेदाश्च पुत्रक ।
धार्तराष्ट्र स्वयं राज्ञा योद्धव्यं धर्मकाङ्क्षिणा ॥

रणे च मृत्युस्स्वर्गाय राजन्यस्य विधीयते ।
पुत्रसंक्रामितश्रीर्वा वानाय वनमाश्रयेत् ॥
ज्येष्ठोऽयमिति राज्ये च स्थापितो विकलोऽपि सन् ।
निर्जित्य परराष्ट्राणि पाण्डुर्मह्यं न्यवेदयत् ॥
तस्य पुत्रा गुणैः ख्याता अर्थे च कृतनिश्चयाः ।
कृतार्था लब्धलक्षाश्च पाण्डुपुत्रा महारथाः ॥
धर्मे च नीतिशास्त्रे च तथा च निरतास्सदा ।
पौरज्ञानपदानां च प्रीतिरेषु विशेषतः ॥
कथं नामोत्सहे वत्स नगराच्च विवासितुम् ॥

दुर्योधनः —

पौरज्ञानपदैस्सार्धं विप्रा जल्पन्ति नित्यशः ।
ते वयं पाण्डवं श्रेष्ठं तरुणं वृद्धशीलिनम् ।
राजानमभिपिञ्चामः सत्यं करुणवेदिनम् ॥
स हि वृद्धानमात्यांश्च ज्ञातींश्चापि महायशाः ।
सत्कृत्य नित्यं पूजार्हान् पाण्डवः पूजयिष्यति ॥
पितामहं शान्तनवं धृतराष्ट्रं च सर्वशः ।
सपुत्रं विविधैर्भोगैर् वासयिष्यति मानितः ॥
इत्येवं विलपन्ति स्म वदन्ति च जना मुहुः ।
राजन् दुःखशताविष्टाः पौराश्शतसहस्रशः ॥
तेषां श्रुत्वा तु वाक्यानि पौराणामशिवानि च ।
युधिष्ठिरानुरक्तानां परितप्स्यामि भारत ॥
धृतराष्ट्रस्तु पुत्रस्य श्रुत्वा वाक्यमुवाच ह ।
यथा न वाच्यतां पुत्र गच्छेम च तथा कुरु ॥
एवं तस्य वचश्श्रुत्वा प्रविश्य च गृहं महत् ।
प्राणाधिकं भीमसेनं कृतविद्यं धनञ्जयम् ॥
दुर्योधनो लक्षयित्वा पर्यतप्यत दुर्मतिः ।
तथा वैकर्तनः कर्णः शकुनिश्चापि सौबलः ॥
अनेकैरप्युपायैस्तैर् जिघांसन्ति स्म पाण्डवान् ।
पाण्डवाश्चापि तत्सर्वं प्रतिचक्रुर्यथाबलम् ॥

उद्भावनमकुर्वाणा विदुरस्य मते स्थिताः ।
गुणैस्समुदितान् दृष्ट्वा पौराः पाण्डुसुतांस्तदा ॥
कथयांचक्रिरे सर्वान् गुणान् संसत्सु भारत ।
राज्यप्राप्तिश्च संप्राप्ता ज्येष्ठं पाण्डुसुतं तदा ॥
कथयन्ति स्म संभूय चत्वरेषु सभासु च ।
प्रज्ञाचक्षुरचक्षुष्मान् धृतराष्ट्रो जनेश्वरः ॥
राज्यमप्राप्तवान् पूर्वं स कथं नृपतिर्भवेत् ।
तथा भीष्मश्शान्तनवः सत्यसन्धो दृढव्रतः ॥
प्रत्याख्याय तदा राज्यं नाद्य जातु ग्रहीष्यति ।
ते वयं पाण्डवश्रेष्ठं तरुणं वृद्धशालिनम् ॥
अभिषिञ्चाम साध्वत्र सत्यं करुणवेदिनम् ।
स हि भीष्मं शान्तनवं धृतराष्ट्रं च बुद्धिमान् ॥
सपुत्रं विविधैर्भोगैर् योजयिष्यति पूजयन् ।
तेषां दुर्योधनश्श्रुत्वा तानि वाक्यानि भाषताम् ॥
युधिष्ठिरानुरक्तानां पर्यतप्यत दुर्मतिः ।
सन्तप्यमानो दुष्टात्मा तेषां वाचो न चक्षमे ॥
ईर्ष्यया चापि सन्तप्तो धृतराष्ट्रमुपागमत् ।
ततो विरहितं दृष्ट्वा पितरं प्रतिपूज्य च ॥
उक्त्वा पाण्डोः पुरावृत्तं पश्चादिदमुवाच ह ।
श्रुता मे ह्यल्पका वाचः पौराणामशिवा गिरः ॥
आगतोऽहं महाप्राज्ञ पादमूलं वचश्शृणु ।
त्वामनादृत्य भीष्मं च पतिमिच्छन्ति पाण्डवम् ॥
साम्ये मतिश्च भीष्मस्य न च राज्यं बुभूषति ।
तस्य पुत्रो ध्रुवं प्राप्तस् तस्य तस्येति चापरः ॥
ते वयं राजवंशेन हीनास्सह सुतैरपि ।
अवज्ञाता भविष्यामो लोकस्य जगतीपते ॥
सततं निरयं प्राप्ताः परपिण्डोपजीविनः ।
न भवेम यथा राजन् तथा शीघ्रं विधीयताम् ॥
अतस्त्वमपि राजेन्द्र राजवंशो भविष्यसि ।

यदि हि त्वं पुरा राज्ये भवानास्थापितो नृपः ॥
ध्रुवं लप्स्यामहे राज्यं वयमप्यवशेन ते ।
स तथा कुरु कौरव्य रक्षया वंश्या यथा वयम् ॥
संप्राप्तुमः स्वयं राज्यं मन्त्रयस्व सहानुगैः ॥

इत्यादिपर्वणि संभवपर्वणि षडशीतितमोऽध्यायः ॥

॥ अथ सप्ताशीतितमोऽध्यायः ॥

वैशम्पायनः—

धृतराष्ट्रस्तु पुत्रस्य श्रुत्वा वचनमप्रियम् ।
मुहूर्तमिव संचिन्त्य दुर्योधनमथाब्रवीत् ॥
धर्मनित्यस्सदा पाण्डुर् ममासीत्प्रियकृत्तथा ।
सर्वेषु ज्ञातिषु तथा मयि चासीद्विशेषतः ॥
नाहं किञ्चिद्विजानामि भोजनादि चिकीर्षितम् ।
निवेदयति नित्यं हि मम राज्यं धृतव्रतः ॥
तस्य पुत्रा यथा पाण्डुस् तथा धर्मपरायणाः ।
गुणवान् लोकविख्यातः पाराशर्यो च स संमतः ॥
स कथं शक्यतेऽस्माभिर् अपाकर्तुं बलादितः ।
पितृपर्यागताद् राज्यात् स सहायो विशेषतः ॥
भ्राता हि पाण्डुनाऽमात्या बलं च सततं धृतम् ।
धृताः पुत्राश्च पौत्राश्च तेषामपि विशेषतः ॥
ते पुरा सत्कृतास्तात पाण्डुना कौरवा जनाः ।
कथं युधिष्ठिरस्यार्थे न नो हन्युस्सबान्धवान् ॥

दुर्योधनः—

ध्रुवमेतन्महाराज भावितं दोषमात्मनि ।
दृष्ट्वा प्रकृतयः पूर्वम् अर्थमानेन योजिताः ॥
ध्रुवमस्मत्सहायास्ते भविष्यन्ति न संशयः ।

अर्थिवर्गस्सहामात्यो ह्यत्संस्थो हि महीपते ॥
स भवान् पाण्डवानाशु विवासयितुमर्हति ।
मृदुनैवाभ्युपायेन नगरं वारणावतम् ॥
यदा प्रतिष्ठितं राज्यं भविष्यति मयि स्थिरम् ।
तथा कुन्ती सहापत्या पुनरेष्यति पार्थिव ॥

धृतराष्ट्रः—

दुर्योधन ममाप्येतद्धृदि संपरिवर्तते ।
न प्रार्थयेऽस्य पापत्वान्नैवास्य विवृणोम्यहम् ॥
न च भीष्मो न च द्रोणो न क्षत्ता न च गौतमः ।
निर्वास्यमानान् कौन्तेयान् अनुमंस्यन्ति कर्हिचित् ॥
समा हि कौरवेयाणां वयमेते च पुत्रक ।
नैते विषममिच्छेयुर् धर्मयुक्ता मनस्विनः ॥
ते वयं पाण्डवेयानाम् एतेषां च महात्मनाम् ।
कथं न वाच्यतां तात गच्छेम जगतस्तथा ॥

दुर्योधनः—

मध्यस्थस्सततं भीष्मो द्रोणपुत्रो मयि स्थितः ।
यतस्सुतस्ततो द्रोणो भविता नात्र संशयः ॥
कृपश्शारद्वतश्चैव यत एते ततस्ततः ।
द्रोणं च भागिनेयं च न स त्यजति कर्हिचित् ॥
क्षत्ताऽर्थलुब्धश्चास्माकं प्रच्छन्नस्तु यतः परे ।
न चैकस्स समर्थोऽस्मान् पाण्डवार्थे प्रबाधितुम् ॥
सुविस्रब्धः पाण्डुपुत्रान् सह माता विवासय ।
वारणावतमद्यैव नात्र दोषो भविष्यति ॥
विनिद्राकारणं ह्येतद्धृदि शल्यमिवार्पितम् ।
शोकपावकसंभूतं कर्मणाऽनेन नाशय ॥

इत्यादिपर्वणि संभवपर्वणि सप्ताशीतितमोऽध्यायः ॥

[1]ततो दुर्योधनो राजन् सर्वास्तु प्रकृतीश्शनैः ।
अर्थमानप्रदानेन स जग्राह सहानुजः ॥ ४॥
[2]धृतराष्ट्रप्रयुक्तास्तु केचित्कुशलमन्त्रिणः ।
कथयाञ्चक्रिरे रम्यं नगरं वारणावतम् ॥ ५॥
अयं समाजस्सुमहान् रमणीयतरो भुवि ।
उपस्थितः पशुपतेर् नगरे वारणावते ॥ ६॥
सर्वरत्नसमाकीर्णे पुण्यदेशे मनोरमे ।
इत्येवं धृतराष्ट्रस्य वचनाच्चक्रिरे कथाः ॥ ७॥
[3]कथ्यमाने तदा रम्ये नगरे वारणावते ।

---

1. ब-कोशे—शृणु कालगतिं राजन् दुर्लङ्घ्यां ससुरासुरैः ।
यया ब्रह्मादयस्सर्वे विप्रमुह्यन्ति निर्जराः ॥
राज्यं भोगस्सुखं प्रीतिर् ऐश्वर्यमतुलं महत् ।
आयुर्धर्मार्थकामाश्च सर्वं मे पाण्डवा इति ॥
इत्थं निश्चितचित्तस्य धृतराष्ट्रस्य सा मतिः ।
दुष्पुत्र दुर्बोधवशाद् अन्यथाऽभूदहो नृप ॥
ततो दुर्योधनो राजन् सर्वान्नाः प्रकृतीस्सुधीः ।
अर्थमानप्रदानेन वाचा रञ्जनया सदा ॥
कर्णङ्कानुमतो भूत्वा सहग्रामस्सहानुजः ।
न रुरोधान्यथा सर्वे कान्तेयेषु कदाचन ॥
सर्वमेवं विदित्वैव पाण्डवा निर्मलाशयाः ।
विदुराज्ञां पुरस्कृत्य चेरुरज्ञातवन्नृप ॥

2. क-ख-ग-कोशेषु— युयुत्सुमपनीयैकं धार्तराष्ट्रास्सहोदराः ।
[अधिकः पाठः]

3. ब-कोशे —राजवीथ्यां पण्यवीथ्यां नगरे तत्र सर्वशः ।
[अधिकः पाठः]

गमने पाण्डुपुत्राणां जज्ञे तत्र मतिर्नृप ॥ ८॥
[1]यदा त्वाशङ्कितमतिर् जातकौतूहली इति ।
[2]उवाचैतानिति तदा पाण्डवानम्बिकासुतः ॥ ९॥

धृतराष्ट्रः—

अधीतानि च शास्त्राणि युष्माभिरिह कृत्स्नशः ।
अस्त्राणि च तथा द्रोणाद् गौतमाच्च विशेषतः ॥ १०॥

इदमेवं गते तातश् चिन्तयामि समन्ततः ।
रक्षणे व्यवहारे च राज्यस्य सततं हिते ॥ ११॥

इमे हि पुरुषास्तात कथयन्ति पुनः पुनः ।
रमणीयतरं लोके नगरं वारणावतम् ॥ १२॥

ते तं हि यदि मन्यध्वम् उत्सवं वारणावते ।
सगणास्सानुयात्राश्च विहरध्वं यथाऽमराः ॥ १३॥

ब्राह्मणेभ्यश्च रत्नानि नटेभ्यश्च विशेषतः ।

---

1. घ-कोशे—ज्ञात्वा स तेषां मतिमान् पार्थानां निश्चितं मतम् ।
[अधिकः पाठः]

2. घ-कोशे—वदत्यशङ्कितमतिर् अज्ञातं विदुरादिभिः ।
अर्थातुरस्य मर्त्यस्य गुरुबन्धुभवं न हि ॥
श्रुत्वा पुत्रवचः प्रीतः प्रज्ञाचक्षुरनर्थवित् ।
दुर्मेधास्त्वतिलुब्धेन पुत्रेणातिविभेदितः ॥
को हि नाम न भिद्येत भिद्यमानो मनीषिभिः ।
स्वार्थैकनिष्ठितमतिर् अज्ञातात्माहितः पशुः ॥
आहूय पाण्डवाञ्शुद्धान् अशुद्धमनसा नृप ।
[अधिकः पाठः]

संप्रदध्वं यथाकामं देवा इव सुवर्चसः ॥ १४॥

कंचित्कालं विहृत्यैवम् अवाप्य च परां मुदम् ।
इहैव हास्तिनपुरे सुखेन पुनरेष्यथ ॥ १५॥

निवसध्वं च तत्रैव पुरेक्षणपरायणाः ।
वैलक्षण्यं हि तत्रैव भविष्यति परंतपाः ॥ १६॥

नगरं पुनरेवैनम् अथायास्यथ पाण्डवाः ॥ १७

वैशम्पायनः—

धृतराष्ट्रस्य तं कामम् अबुध्यत युधिष्ठिरः ।
आत्मनश्चासहायत्वं तथेति प्रत्युवाच ह ॥ १८

ततो भीष्मं महाप्राज्ञं विदुरं च महामतिम् ।
द्रोणं च बाह्लिकं चैव सोमदत्तं च कौरवम् ॥ १९

कृपमाचार्यपुत्रं च गान्धारीं च यशस्विनीम् ।
[1]युधिष्ठिरश्शनैर्दीनम् उवाचेदं वचस्तथा ॥ २०

युधिष्ठिरः—

रमणीये जनाकीर्णे नगरे वारणावते ।
सगणास्तात वत्स्यामो धृतराष्ट्रस्य शासनात् ॥ २१

प्रसन्नमनसस्सर्वे पुण्या वाचो विमुञ्चत ॥ २१॥

1. क-ग—सर्वा मातृरुपस्पृष्ट्वा विदुरस्य च योषितः । [अधिकः पाठः]

[1]आशीर्भिर्वर्धितानस्मान् न पापं प्रसहिष्यते ॥ २२

वैशम्पायनः—

एवमुक्तास्तु ते सर्वे पाण्डुपुत्रेण कौरवाः ।
प्रसन्नवदना भूत्वा तेऽन्ववर्तन्त पाण्डवान् ॥ २३
स्वस्त्यस्तु वः पथि सदा भूतेभ्यश्चैव सर्वशः ।
मा वोचंस्त्वशुभं किंचित् सर्वतः पाण्डुनन्दनान् ॥ २४
[2]ते तथा वर्धिता वृद्धै राज्यलाभाय पाण्डवाः ।
कृत्वा सर्वाणि कार्याणि प्रययुर्वारणावतम् ॥ २५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि अष्टत्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥
॥ ८ ॥ जतुगृहदाहपर्वणि प्रथमोऽध्यायः3 ॥ १ ॥
[अस्मिन्नध्याये २५ श्लोकाः]

---

1. घ—दैवयोगाद्वने जाता बाल्येऽस्माकं पिता मृतः ।
वयं ते वर्धितास्तत्र ऋषिभिस्तत्त्वदर्शिभिः ॥
मुनयोऽस्मान् समादाय दत्त्वा युष्मासु ते गताः
मातरः पितरो यूयम् अस्माकं गुरुसत्तमाः ॥
अनाथानां च बालानाम् अनन्यानां पितामह ।
गतिर्हि यूयमस्माकं प्रज्ञाचक्षुर्भवानपि ॥
अस्मासु स्नेहबाहुल्याद् उत्सवार्थं नृपोत्तम ।
देवस्य त्रिपुरारातेर् अस्मान् संप्रेषयत्यसौ ॥
पश्यन्तु पितुरस्माकं स्नेहं प्रीतिं च सौहृदम् ।
विशेषेण स्वपुत्रेभ्यो निहत्यास्मान् पितामह ॥ [अधिकः पाठः]
2. घ—क्षमावतां हि युष्माकं सम्पदस्तन्तु सर्वदा । [अधिकः पाठः]
3. क-ग-घ—सम्भवपर्वणि अष्टाशीतितमोऽध्यायः—
ख—सम्भवपर्वणि एकोननवतितमोऽध्यायः—

॥ ऊनचत्वारिंशदधिकशततमोऽध्यायः ॥

दुर्योधनादेशात् पुरोचनेन वारणावते जतुगृहनिर्माणम् ॥ १ ॥

वैशम्पायनः—

धृतराष्ट्रप्रयुक्तेषु पाण्डवेषु महात्मसु ।
दुर्योधनः परं हर्षम् आजगाम दुरात्मवान् ॥ १

[1]ततस्तु सूतपुत्रश्च कर्णो दुर्योधनस्तथा ।
दहने सहपुत्रायाः कुन्त्या मतिमकुर्वत ॥ २

मन्त्रयित्वा स तैस्सार्धं दुरात्मा धृतराष्ट्रजः ।
स पुरोचनमेकान्तम् आनीय भरतर्षभ ॥ ३

गृहीत्वा दक्षिणे पाणौ सचिवं वाक्यमब्रवीत् ॥ ३॥

दुर्योधनः—

ममेयं वसुसंपूर्णा पुरोचन वसुन्धरा ।
यथैव भविता तात तथा त्वं द्रष्टुमर्हसि ॥ ४॥

न हि मे कश्चिदन्योऽस्ति विश्वासिततरस्त्वया ।
सहायो मेऽसि सन्धाय मन्त्रयेयं यथा त्वया ॥ ५॥

संरक्ष तात मन्त्रं च सपत्नांश्च ममोद्धर ॥ ६

1. घ—भाविकर्मबलादेव पाण्डवानां त्रनेश्वर ।
वारणावतसंयानम् अनुमेने पितामहः ॥ [अधिकः पाठः]

निपुणेनाभ्युपायेन तव वक्ष्यामि तच्छृणु ॥ ६॥
पाण्डवा धृतराष्ट्रेण प्रेषिता वारणावतम् ।
उत्सवे विहरिष्यन्ति धृतराष्ट्रस्य शासनात् ॥ ७॥
स त्वं रासभयुक्तेन स्यन्दनेनाशुगामिना ।
वारणावतमद्यैव यथा यासि तथा कुरु ॥ ८॥
तत्र गत्वा चतुःशालं गृहं परमसंवृतम् ।
आयुधागारमाश्रित्य कारयेथा महाधनम् ॥ ९॥
शणसर्जरसादीनि यानि द्रव्याणि कानि चित् ।
आग्नेयान्यत्र कुड्येषु तानि सर्वाणि दापय ॥ १०॥
[1]एरण्डजेन संमिश्रं मधूच्छिष्टेन चैव हि ।
सर्पिषा च सतैलेन लाक्षया चाप्यनल्पया ॥ ११॥
मृत्तिकां मिश्रयित्वा च लेपं कुड्येषु दापय ॥ १२
[2]शाणवंशकटं दारुयन्त्राणि विविधानि च ।
वेश्मनस्तस्य सर्वत्र निक्षिपेथास्समन्ततः ॥ १३
यथा च तत्र शङ्केरन् परीक्षन्तोऽपि पाण्डवाः ।
आग्नेयमिति तत्कार्यम् अपि चान्येऽपि मानवाः ॥ १४
वेश्मन्येवं कृते तत्र कृत्वा तान् परमार्चितान् ।
वासयेथाः पाण्डवेयान् कुन्तीं च ससुहृज्जनाम् ॥ १५

1. क-ख-ग—बल्वजेन चः घ—पल्वजेन च
2. क-ग-घ—शणान्सर्जरसांल्लाक्षांस्तृणानि

तत्रासनानि मुख्यानि यानानि शयनानि च ।
विधातव्यानि पाण्डूनां यथा तुष्येच्च मे पिता ॥ १६
ततो रमेरन् विश्वस्ता नगरे वारणावते ।
तथा सर्वं विधातव्यं यावत् कालस्य पर्ययः ॥ १७
[1]ज्ञात्वा परमविश्वस्तान् नितरामकुतोभयान् ।
[2]अग्निस्तस्य त्वया देयो द्वारतस्तस्य वेश्मनः ॥ १८
दग्धानेवं स्वके गेहे दाहिताः पाण्डवा इति ।
ज्ञातयो न वदिष्यन्ति पाण्डवार्थाय केचन ॥ १९

वैशम्पायनः—

स तथेति प्रतिज्ञाय कौरवाय पुरोचनः ।
प्रायाद्रासभयुक्तेन नगरं वारणावतम् ॥ २०
[3]स गत्वा त्वरितं राजन् दुर्योधनमते स्थितः ।
यथोक्तं राजपुत्रेण तथा चक्रे पुरोचनः ॥ २१
यथाऽऽज्ञप्तं नृपतिना कौरवेण यशस्विना ।
एषां तु पाण्डवेयानां गृहं रौद्रमकारयत् ॥ २२

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि ऊनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥
॥ ८ ॥ जतुगृहदाहपर्वणि द्वितीयोऽध्यायः[4] ॥ २ ॥
[अस्मिन्नध्याये २२ श्लोकाः]

---

1. क-ख-ग—तु तान्सुविश्वस्ताञ्शयानान
2. क-ख-ग—वेश्मनस्तस्य दातव्यो द्वारदेशे हुताशनः ।
3. घ—भीष्मादिभिरविज्ञातं नगरं वारणावतम् । [अधिकः पाठः]
4. घ-कोशे—नास्त्यध्यायसमाप्तिः

॥ चत्वारिंशदधिकशततमोऽध्यायः ॥

हास्तिनपुरं त्यक्त्वा वारणावतं गच्छता युधिष्ठिरेण अनुगच्छतां पौराणां निवर्तनम् ॥१॥ म्लेच्छभाषया युधिष्ठिरं प्रति विदुरस्योपदेशः ॥२॥

वैशम्पायनः—

पाण्डवास्तु रथान् युक्त्वा सदश्वैरनिलोपमैः ।
प्रयास्यन्तस्तु भीष्मस्य पादौ जगृहुरार्तवत् ॥ १

राज्ञश्च धृतराष्ट्रस्य द्रोणस्य च महात्मनः ।
अन्येषां चैव वृद्धानां विदुरस्य कृपस्य च ॥ २

स्तुवन् सर्वान् कुरून् वृद्धान् अभिवाद्य धृतव्रताः ।
[1]समालिङ्ग्य समानान् वै बालैश्चाप्यभिवादिताः ॥ ३

सर्वानन्यांस्तथाऽऽपृच्छ्य यथार्हमितौजसः ।
[2]प्रकृतीरपि सर्वाश्च प्रययुर्वारणावतम् ॥ ४

विदुरश्च महाप्राज्ञस् तथाऽन्ये कुरुपुङ्गवाः ।
पौराश्च पुरुषव्याघ्रान् अन्वयुश्शोककर्शिताः ॥ ५

[3]ततः केचिच्चावदन् स्म ब्राह्मणा निर्भयास्तदा ॥ ५॥

---

1. घ— सोमदत्तं च बाह्लीकम् अभिवाद्य धृतव्रताः ।
समांश्चापि परिष्वज्य बालैश्चाप्यभिवन्दिताः ॥ [अधिकः पाठः]
2. क-ख-ग—शोचन्तः पाण्डवास्सर्वे कुरून् कृत्वा प्रदक्षिणम् ।
[अधिकः पाठः]
3. क-ख-ग-घ—तत्र केचिद्ब्रुवन्ति स्म नागरा

पौराः—

[1]धृतराष्ट्रो महीपालो न च धर्मं प्रपश्यति ।
न हि पापमपापात्मा रोचयिष्यति पाण्डवः ॥ ६॥
भीमो वा बलिनां श्रेष्ठः कौन्तेयो वा धनञ्जयः ।
कुत एव महाप्राज्ञौ माद्रीपुत्रौ करिष्यतः ॥ ७॥
यद्राज्यं पितृतः प्राप्तं धृतराष्ट्रः प्रबाधते ॥ ८
अधर्मं विपुलं क्षन्तुं भीष्मोऽयमनुवर्तते ।
विवास्यमानानस्थाने स कौन्तेयान्नरर्षभान् ॥ ९
पितेव हि [2]समोऽस्माकम् अभूच्छान्तनवः पुरा ।
[3]विचित्रवीर्यो राजर्षिः पाण्डुश्च कुरुनन्दनः ॥ १०
स तस्मिन्पुरुषव्याघ्रे दिष्टभावं गते सति ।
[4]राजपुत्रानिमान् बालान् धृतराष्ट्रो न मृष्यति ॥ ११
[5]ते वयं सर्वमेवेदं त्यक्त्वा ह्याशु पुरोत्तमम् ।

---

1. क-ख-ग—शोचमानान् पाण्डुपुत्रान् अतीव पुरुषर्षभ ।
विषमं पश्यते राजा सर्वथा तमसा वृतः॥[अधिकः पाठः]
2. क-ख-ग-घ—नृपो
3. घ—अधुनाऽस्मानभूद्वृद्धः शत्रुरेवाभवद्ध्रुवम् । [अधिकः पाठः]
4. घ—अन्धस्य धृतराष्ट्रस्य राज्यानर्हस्य दुर्मतेः ।
कोऽनुबन्धोऽस्य राज्यस्य पाण्डुवीर्यार्जितस्य च ॥
प्रत्याख्याय वयं सर्वे धृतराष्ट्रं सपुत्रकम् ।
पाण्डवं स्थापयिष्यामो धर्मराजं युधिष्ठिरम् ॥ [अधिकः पाठः]
5. क-ख-ग—वयमेवममृष्यन्तस्सर्व एव पुरोत्तमात् ।

दारानादाय गच्छामो यत्र याति युधिष्ठिरः ॥ १२

[1]वैशम्पायनः—

तांस्तथा वादिनः पौरान् दुःखितान् शोककर्शितान् ।
उवाच परमप्रीतो धर्मराजो युधिष्ठिरः ॥ १३

युधिष्ठिरः—

पिता मान्यो गुरुश्रेष्ठो यदाह पृथिवीपतिः ।
अशङ्कमानैस्तत्कार्यम् अस्माभिरिति नो व्रतम् ॥ १४

भवन्तस्सुहृदोऽस्माकं अस्मान् कृत्वा प्रदक्षिणम् ।
आशीर्भिरभिनन्द्यास्मान् निवर्तध्वं यथागृहम् ॥ १५

यदा तु कार्यमस्माकं भवद्भिरुपपत्स्यते ।
तदा करिष्यथ मम प्रियाणि च हितानि च ॥ १६

वैशम्पायनः—

ते तथेति प्रतिज्ञाय कृत्वा वै तान् प्रदक्षिणम् ।
आशीर्भिश्चाभिनन्द्यैताञ् जग्मुर्नगरमेव ह ॥ १७

पौरेषु तु निवृत्तेषु विदुरस्सर्वधर्मवित् ।
[2]अनुगच्छन् स कौन्तेयं बोधयंश्चेदमब्रवीत् ॥ १८

विदुरः—

प्राज्ञः कुशलवृत्तश्च सम्यग्धर्मार्थदर्शिवान् ।

1. घ—तत्रैव याम सर्वेऽत्र स नोऽस्माकं परा गतिः । [अधिकः पाठः]
2. क-ख-ग—बोधयन् पाण्डवश्रेष्ठमिदं वचनमब्रवीत् ।

विज्ञायेदं तथा कुर्याद् आपदं निस्तरेद्यथा ॥ १९

अलोहं निशितं शस्त्रं शरीरपरिकृन्तनम् ।
ये वदन्ति न तान् घ्नन्ति प्रतिघातविदस्तथा ॥ २०

कक्षघ्नं शिशिरघ्नं च महाकुक्षिविलौकसम् ।
न सहेतेति चात्मानं यो रक्षति स जीवति ॥ २१

नाचक्षुर्वेत्ति पन्थानं नाचक्षुर्वेत्ति वै दिशः ।
नाधृतिर्भूतिमाप्नोति बुध्यस्वैनं प्रबोधितः ॥ २२

नानाग्नैर्दत्तमादत्ते धीरश्शस्त्रमलोहजम् ।
श्वाविद्वरणमासाद्य प्रमुच्येत हुताशनात् ॥ २३

परं मार्गान् विजानाति नक्षत्रैर्विन्दतेऽनिशम् ।
आत्मना चात्मनः पञ्च पीडयन् न स पीडयते ॥ २४

वैशम्पायनः—

अनुशिष्ट्वा च गत्वा च कृत्वा चैनान् प्रदक्षिणम् ।
[1]पाण्डवानभ्यनुज्ञाय विदुरः प्रययौ गृहान् ॥ २५

निवृत्ते विदुरे चापि भीष्मे पौरजने तथा ।
अजातशत्रुमामन्त्र्य कुन्ती वचनमब्रवीत् ॥ २६

कुन्ती—

क्षत्ता यदब्रवीद्वाक्यं जनमध्येऽब्रुवन्निव ।

1. ख—अभिवाद्य ततः कुन्तीं रुदन् पाण्डुमचिन्तयत् ।
ग—अभिवाद्यततः कुन्तीं दर्शं पाण्डोरचिन्तयत् ॥ [अधिकः पाठः]

त्वया च तत्तथेत्युक्तं जानीमो न च तद्वयम् ॥ २७
यदि तच्छक्यमस्माभिश् श्रोतुं न च सुदोषवत् ।
श्रोतुमिच्छामि तत्सर्वं संवादं तव तस्य च ॥ २८

युधिष्ठिरः—

[1]विषादमेश्च बोद्धव्यम् इति मां विदुरोऽब्रवीत् ।
पन्थाश्च विदितः कश्चित् स्याच्छुद्ध इति चाब्रवीत् ॥ २९
जितेन्द्रियश्च वसुधां प्राप्स्यतीति च माऽब्रवीत् ।
विज्ञातमिति तत्सर्वं प्रत्युक्तो विदुरो मया ॥ ३०

वैशम्पायनः—

अष्टमेऽहनि रोहिण्यां प्रयाताः फाल्गुनस्य ते ।
वारणावतमासाद्य ददृशुर्नागरं जनम् ॥ ३१

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥
॥ ८ ॥ जतुगृहदाहपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
[अस्मिन्नध्याये ३१ श्लोकाः]

॥ एकचत्वारिंशदधिकशततमोऽध्यायः ॥

पाण्डवानां वारणावतप्रवेशः ॥

वैशम्पायनः—

ततस्सर्वाः प्रकृतयो नगराद्वारणावतात् ।
सर्वमङ्गलसंयुक्ता [2]यथाशास्त्रमलङ्कृताः ॥ १

1. अ—विषादं तेऽन्ववोद्धव्यं 2. क-ख-ग—वस्त्रशस्त्रैरलङ्कृताः ।

श्रुत्वाऽऽगतान् पाण्डवेयान् नानायानैस्सहस्रशः ।
अभिजग्मुर्नरश्रेष्ठाश् श्रुत्वैव परया मुदा ॥ २

ते समासाद्य कौन्तेयान् वारणवतगा जनाः ।
कृत्वा जयाशिषस्सर्वे परिवव्रुर्युधिष्ठिरम् ॥ ३

तैर्वृतः पुरुषव्याघ्रो धर्मराजो युधिष्ठिरः ।
विवभौ देवसङ्काशो वज्रपाणिरिवामरैः ॥ ४

सत्कृतास्तत्र पौरैश्च पौरान् सत्कृत्य चानघाः ।
अलङ्कृतजनाकीर्णं विविशुर्वारणावतम् ॥ ५

ते प्रविश्य पुरीं वीरास् तूर्णं जग्मुरथो गृहान् ।
ब्राह्मणानां महीपाल रतानां स्वेषु कर्मसु ॥ ६

नगराधिकृतानां च गृहाणि रथिनां तदा ।
उपतस्थुर्नरश्रेष्ठा वैश्यशूद्रगृहाण्यपि ॥ ७

अर्चिताश्च नरैः पौरैः पाण्डवा भरतर्षभ ।
जग्मुरावसथं पश्चात् पुरोचनपुरस्कृताः ॥ ८

तेभ्यो भक्ष्यान्नपानानि शयनानि शुभानि च ।
आसनानि च मुख्यानि प्रददौ स पुरोचनः ॥ ९

तत्र ते सत्कृतास्तेन सुमहार्हपरिच्छदाः ।
उपास्यमानाः पुरुषैर् ऊषुः पुरनिवासिभिः ॥ १०

दशरात्रोषितानां तु तत्र तेषां पुरोचनः ।

निवेशयामास गृहं शिवाख्यमशिवं तदा ॥ ११

ततस्ते पुरुषव्याघ्रा ददृशुस्सपरिच्छदाः ।
पुरोचनस्य वचनात् कैलासमिव गुह्यकाः ॥ १२

तत्त्वगारमभिप्रेक्ष्य सर्वकर्मोपशोभितम् ।
उवाचाग्नेयमित्येवं भीमसेनं युधिष्ठिरः ॥ १३

जिघ्रन् सम्यग्वसागन्धं सर्पिर्जतुविमिश्रितम् ।
युधिष्ठिरः—
कृतं हि व्यक्तमाग्नेयम् इदं वेश्म परन्तप ॥ १४

मृदेषा व्यक्तमाग्नेयैर् द्रव्यैर्मिश्रस्य वेश्मनः ।
शणसर्जरसोपेता ह्यालिप्ता गृहभित्तिषु ॥ १५

मुञ्जबल्वजवंशादि नूनं सर्वं घृतोक्षितम् ।
शणबल्वजकार्पासवंशदारुकटान्यपि ॥ १६

आग्नेयान्यत्र क्षिप्तानि परितो वेश्मनस्तथा ।
शिल्पिभिस्सुभृतैरग्नेर् विनीतैर्वेश्म निर्मितम् ॥ १७

विश्वस्तानिह नः पापो दग्धुकामः पुरोचनः ।
इमां तु वै महाबुद्धिर् विदुरो दृष्टवान् किल ॥ १८

[1]इमामेवापदं पार्थ तदाऽहं प्रतिबोधितः ।

1. क-ग—आपदं तेन मां पार्थ सर्वां बोधितवांस्तदा
अ—अतस्तेन तदा पार्थ सर्वान् बोधितवांस्तदा ।

[1]ते वयं बोधितास्तेन बुद्धिमन्तोऽशिवं गृहम् ॥ १९

अनार्यैस्सुकृतं गूढैर् दुर्योधनवशानुगैः ॥ १९॥

भीमसेनः—

यदिदं गृहमाग्नेयं विहितं मन्यते भवान् ।
तत्रैव साधु गच्छामो यत्र पूर्वोषिता वयम् ॥ २०॥

[2]इह यत्तैर्निराकारैर् वस्तव्यमिति रोचते ।

---

1. घ—अस्माकं भागधेयेन विदुरेण महात्मना। [अधिकः पाठः]
2. क-ख-घ—दर्शयित्वा पृथग्गन्तुं न कार्यं प्रतिभाति मे ।
अशुभं वा शुभं वापि तैर्वयम् सहैव तु ॥
अद्यप्रभृति चास्मासु गतेषु भयविह्वलः ।
रूढमूलो भवेद्राज्ये धार्तराष्ट्रो जनेश्वरः ॥
तदीयं च भवेद्राज्यं तदीयास्युः प्रजा इमाः ।
तस्मात्सहैव वत्स्यामो गलन्यस्तपदा वयम् ॥
अस्माकं कालमाज्ञाय राज्यमाच्छिद्य शत्रुतः ।
अर्धं पैतृकमस्माकं सुखं भोक्ष्याम शाश्वतम् ॥
धार्तराष्ट्रवचोऽस्माभिः किमर्थमनुमन्यते ॥
[अधिकः पाठः]
ग-घ—तेभ्यो भीत्याऽन्यतो गन्तुं दौर्बल्यं ते कुतो नृप ॥
[अधिकः पाठः]
क-ग—आपत्सु रक्षिताऽस्माकं विदुरोऽस्मि महामतिः ।
मध्यस्थ एव गाङ्गेयो राज्यभोगपराङ्मुखः ॥
बाह्लिकप्रमुखा वृद्धा मध्यस्था एव सर्वदा ।
अस्मदीयो भवेद्द्रोणः फल्गुनप्रेमसंयुतः ॥
तस्मात्सहैव वस्तव्यं न गन्तव्यं पृथङ् नृप ।
अथवाऽस्मासु ते कुर्युः किमशङ्काः पराक्रमम् ॥
क्षुद्राः कपटिनो धूर्ता आगूमो मनुजेश्वर ।

तुष्टैरिव विचिन्वद्भिर् गतिमन्यां ब्रवीमि वः ॥ २१॥
आकारं यदि जानीयाद् अस्माकं हि पुरोचनः ।
क्षिप्रकारी ततो भूत्वा प्रसह्यापि दहेत्ततः ॥ २२॥

पूर्वतोऽनुवृत्तम्—

किं न कुर्युः पुरा मह्यं किं न दत्तं पुरा विषम् ॥
आशीविषैर्महाघोरैः सर्पैस्तैः किं न दंशितः ।
प्रमाणकोट्यां संनह्य निद्रापरवशे मयि ॥
सर्पैर्दृष्टिविषैर्घोरैर् गङ्गायां शूलसन्ततौ ।
किं नैनं पातितो भूप तदा किं मृतवानहम् ॥
आपत्सु तासु घोरासु दुष्प्रयुक्तासु पापिभिः ।
अस्मानरक्षद्यो देवो जगद्यस्य वशे स्थितम् ॥
चराचरात्मकस्सोऽद्य यातः क्व नु नृपोत्तम ।
यावत्सोढव्यमस्माभिस् तावत्सोढास्म यत्नतः ॥
यदा न रक्ष्यतेऽस्माभिस् तदा पश्याम नो हितम् ।
किं द्रष्टव्यं तदास्माभिर् विगृह्य तरसा बलात् ॥
सान्त्ववादेन दानेन भेदेनापि यतामहे ।
अर्धराज्यस्य संप्राप्त्यै ततो दण्डः प्रशस्यते ॥
तस्मात् सहैव वस्तव्यं तन्मनोर्पितशल्यवत् ।
दर्शयित्वा पृथक् क्वापि न गन्तव्यं सुभीतवत् ॥

ध—युधिष्ठिरः—

इह यस्तैर्निराकारः कृतोऽस्मासु वृकोदर ॥
इति किन्नवयमेतावान् किमतः परमापतेत् ॥
विचारयन्तो जाग्रन्तः प्राणिभिर्हितकाङ्क्षिभिः ।
इहैव वस्तव्यमिति मन्मनो रोचतेऽनुज ॥
इष्टैरिह विचिन्वद्भिर् गतिमन्यां सुखप्रदाम् ।
इतः परं ते किं कुर्युः जिज्ञासुभीरुभीरुवत् ॥

[अधिकः पाठः]

नायं बिभेत्युपक्रोशाद् अधर्माच्च पुरोचनः ।
तथा च वर्तते मन्दः सुयोधनमते स्थितः ॥ २३॥

अपि चास्मासु दग्धेषु भीष्मः कुरुपितामहः ।
न कुप्येत किमर्थं वा कौरवान् कोपयेन्न सः ॥ २४॥

तथा हि सह दग्धेषु विदुरस्स पितामहः ।
धर्मो नेहेति कुप्येत तथाऽन्ये कुरुपुङ्गवाः ॥ २५॥

उपपन्नं तु दग्धेषु कुलवंशोऽनुकीर्तितः ।
कुप्येरन् यदि धर्मज्ञास् तथा ये कुरुपुङ्गवाः ॥ २६॥

वयं तु यदि दाहाद्वै बिभ्यतः प्रद्रवेमहि ।
स्पर्शैर्नो घातयेत् सर्वान् राज्यलुब्धस्सुयोधनः ॥ २७॥

अपदस्थान् पदे तिष्ठन् अपक्षान् पक्षसंस्थितः ।
हीनकोशान् महाकोशः प्रयोगैर्घातयेद्ध्रुवम् ॥ २८॥

तदस्माभिरिमं पापं तं च पापं सुयोधनम् ।
वञ्चयद्भिर्निवस्तव्यं छन्नं वीर क्वचित्क्वचिन् ॥ २९॥

ते वयं मृगयाशीलाश् चराम वसुधामिमाम् ।
तथा नो विदिता मार्गा भविष्यन्ति पलायतां ॥ ३०॥

भौमं च विलमद्यैव कारयामस्सुसंवृतम् ।
गूढोच्छ्वासं ततस्तत्र हुताशस्संप्रधक्ष्यति ॥ ३१॥

द्रवतोऽत्र यथा चास्मान् न बुध्येत पुरोचनः ।
पौरो वाऽपि जनः कश्चित् तथा कार्यमतन्द्रितैः ॥ ३२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि एकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥
॥ ८ ॥ जतुगृहदाहपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
[अस्मिन्नध्याये ३२॥ श्लोकाः]

॥ द्विचत्वारिंशदधिकशततमोऽध्यायः ॥

खनकेन सुरङ्गाकरणम् ॥ १ ॥

वैशम्पायनः—

विदुरस्य सुहृत् कश्चित् खनकः कुशलः क्वचित् ।
विविक्ते पाण्डवान् राजन् इदं वचनमब्रवीत् ॥ १

प्रहितो विदुरेणास्मि खनकः कुशलो भृशम् ।
पाण्डवानां प्रियं कार्यम् इति किं करवाणि वः ॥ २

प्रच्छन्नं विदुरेणोक्तं पाण्डव म्लेच्छभाषया ।
त्वया च तत्तथेत्युक्तम् एतदाश्वासकारणम् ॥ ३

1वैशम्पायनः—

उवाच तं सत्यधृतिः कुन्तीपुत्रो युधिष्ठिरः ॥ ३॥

---

1. क-ख-ग—प्रतिपादय विश्वासादिति किं करवाणि वः ।
कृष्णपक्षचतुर्दश्यां रात्र्यामाशु पुरोचनः ॥

युधिष्ठिरः—

अभिजानामि सौम्य त्वां सुहृदं विदुरस्य वै ।
प्रथमाप्तं प्रियं भक्तं सदा प्रियहितैषिणम् ॥ ४॥
न विद्यते कवेः किंचिद् अविज्ञातं प्रयोजनम् ।
यथा नस्स तथाऽसि त्वं निर्विशेषा वयं त्वयि ॥ ५॥
भवतश्च यथा तस्य पालयास्मान् यथा कविः ॥ ६
इदं शरणमाग्नेयं मदर्थमिति मे मतिः ।
पुरोचनेन विहितं धार्तराष्ट्रस्य शासनात् ॥ ७
स पापः कोशवांश्चैव ससहायश्च दुर्मतिः ।
अस्मानपि च दुष्टात्मा नित्यकालं प्रबाधते ॥ ८
स भवान् मोचयत्वस्मान् उत्पन्नाद्वै हुताशनात् ।
अस्मास्विह च दग्धेषु सकामस्स्यात्सुयोधनः ॥ ९
समृद्धमायुधागारम् इदं तस्य दुरात्मनः ।
वप्रान्तं निष्प्रतीकारम् आश्लिष्येह कृतं महत् ॥ १०
इदं तदशुभं नूनं तस्य कर्म चिकीर्षितम् ।
प्रागेव विदुरो वेद तेनास्मानन्ववोधयत् ॥ ११

पूर्वतोऽनुवृत्तम्—

भवनस्य निशि द्वारि प्रदास्यति हुताशनम् ।
माता सह प्रदग्धव्याः पाण्डवाः पुरुषर्षभाः ॥
इति व्यवसितं पार्थ धृतराष्ट्रस्य मे श्रुतम् ।

[अधिकः पाठः]

सेयमापदनुप्राप्ता क्षत्ता यां दृष्टवान् पुरा ।
पुरोचनस्याविदितं अस्मांस्त्वं विप्रमोचय ॥ १२

वैशम्पायनः—

स तथेति प्रतिश्रुत्य खनको यत्नमास्थितः ।
परिखामुत्किरन्नाम चकार सुमहाबिलम् ॥ १३
[1]समीपे वेश्मनस्तस्य चक्रे नातिमहन्मुखम् ।
कवाटयुक्तमज्ञातं समं भूम्याश्च भारत ॥ १४
पुरोचनभयाच्चैव व्यदधात् संवृतं मुखम् ॥ १४॥
स तस्मिन् हि गृहद्वारि वसत्यशुभधीस्सदा ।
ततस्ते सायुधास्सर्वे वसन्ति स्म क्षपां नृप ॥ १५॥
दिवा चरन्ति मृगयां पाण्डवेया वनाद्वनम् ।
विश्वस्तवदविश्वस्ता वञ्चयन्तः पुरोचनम् ॥ १६॥
अतुष्टास्तुष्टवद्राजन् ऊषुः परमदुःखिताः ॥ १७
न चैनानन्वबुध्यन्त नरा नगरवासिनः ।
अन्यत्र विदुरामात्यात् तस्मात् खनकसत्तमात् ॥ १८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥
॥ ८ ॥ जतुगृहदाहपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
[अस्मिन्नध्याये १८ श्लोकाः ।]

---

1. क-ख-ग-घ—चक्रे च वेश्मनस्तस्य मध्ये

॥ त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥

रात्रौ कुन्त्या अन्नादिना ब्राह्मणपूजनम् ॥ १ ॥ भीमेन जतुगृहस्यादीपनम् ॥ २ ॥ तस्य कुन्तीं भ्रातॄंश्चादाय सुरङ्गाद्वारा बहिर्निर्गमनम् ॥ ३ ॥

वैशम्पायनः—

तांस्तु दृष्ट्वा सुमनसः परिसंवत्सरोषितान् ।
विश्वस्तानिति संप्रेक्ष्य हर्षं चक्रे पुरोचनः ॥ १

पुरोचने तथा हृष्टे कौन्तेयोऽथ युधिष्ठिरः ।
भीमसेनार्जुनौ तौ च यमौ प्रोवाच धर्मवित् ॥ २

युधिष्ठिरः—

अस्मानयं सुविश्वस्तान् वेत्ति पापः पुरोचनः ।
वञ्चकोऽयं नृशंसात्मा कालं मन्ये पलायने ॥ ३

जातुषागारमादीप्य दग्ध्वा चैव पुरोचनम् ।
षट् प्राणिनो निधायेह द्रवामोऽनुपलक्षिताः ॥ ४

वैशम्पायनः—

अथ दानापदेशेन कुन्ती ब्राह्मणभोजनम् ।
चक्रे निशि महाराज आजग्मुस्तत्र योषितः ॥ ५

ता विहृत्य यथाकामं भुक्त्वा पीत्वा च भारत ।
जग्मुर्निशि गृहानेव समनुज्ञाप्य माधवीम् ॥ ६

पुरोचनप्रणिहिता पृथां स्म खलु सेवते ।
निषादी दुष्टहृदया नित्यमन्तरचारिणी ॥ ७

निषादी पञ्चपुत्रा तु तस्मिन् भोज्ये यदृच्छया ।
पुराभ्यासकृतस्नेहा सखी कुन्त्यास्सुतैस्सह ॥ ८

आनीय मधुमूलानि फलानि विविधानि च ।
अन्नार्थिनी समभ्यागात् सपुत्रा कालचोदिता ॥ ९

[1]सपापा पञ्चपुत्रा च सा पृथायास्सखी मता ॥ ९॥

सा पीत्वा मदिरां तत्र सपुत्रा मदविह्वला ॥ १०

सा हि सर्वैस्सुतै राजंस् तस्मिन्नेव निवेशने ।
सुष्वाप विगतज्ञाना मृतकल्पा नराधिप ॥ ११

अथ प्रवाते तुमुले निशि सुप्ते जने विभो ।
तदुपादीपयद्भीमश् शेते यत्र पुरोचनः ॥ १२

पूर्वमेव बिलं शोध्य भीमसेनो महामतिः ।
पाण्डवैस्सहितः कुन्तीं प्रावेशयत तद्बिलम् ॥ १३

दत्त्वाऽग्निं सहसा भीमो निर्जगाम बिलेन सः ॥ १३॥

[2]ततः प्रवाते सुमहान् छब्दश्चैव विभावसोः ।
प्रादुरासीत्ततस्सर्वो बुबुधे स जनव्रजः ॥ १४॥

---

1. अ-क-ख-ग—कोशेषु इदमर्धं नास्ति ।
2. घ—गृहस्थं द्रव्यसंजातं निर्जगाम बिलेन सः । [अधिकः पाठः]

पौराः—

दुर्योधनप्रयुक्तेन पापेनाकृतबुद्धिना ।
गृहमात्मविनाशाय कारितं दाहितं च तत् ॥ १५॥

अहो धिग्धृतराष्ट्रस्य बुद्धिर्नातिसमञ्जसी ।
यश्शुचीन् पाण्डवान् बालान् दाहयासास निर्घृणः ॥ १६॥

दिष्ट्या त्विदानीं पापात्मा दग्ध्वा दग्धः पुरोचनः ।
अनागसस्सुविश्वस्तान् यो ददाह नरोत्तमान् ॥ १७॥

वैशम्पायनः—

एवं ते विलपन्ति स्म वारणावतगा जनाः ।
परिवार्य गृहं सर्वे रात्रौ तस्थुस्समन्ततः ॥ १८॥

पाण्डवाश्चापि ते सर्वे सह मात्रा परन्तपाः ।
बिलेन तेन महता जग्मुर्वनमलक्षिताः ॥ १९॥

[1]ते तु निद्रोपरोधेन साध्वसेन च पाण्डवाः ।
न शेकुस्त्वरिता गन्तुं सह कुन्त्या नराधिप ॥ २०॥

भीमसेनस्तु राजेन्द्र भीमवेगपराक्रमः ।
जगाम सर्वानादाय भ्रातॄन् मातरमेव च ॥ २१॥

स्कन्धमारोप्य जननीं यमावङ्केन वीर्यवान् ।

1. घ—ते तु निद्रानिरोधेन सहसा न च पाण्डवाः

[1-2]पार्थौ गृहीत्वा पाणिभ्यां भ्रातरौ सुमहाबलौ ॥ २२॥

तरसा पादपान् भञ्जन् महीं पद्भ्यां विदारयन् ।
[3]स जगामाशु तेजस्वी वातरंहा वृकोदरः ॥ २३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥

॥ ८ ॥ जतुगृहदाहपर्वणि षष्ठोऽध्यायः ॥ ६ ॥

[अस्मिन्नध्याये २३॥ श्लोकाः]

॥ चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥

पौरैः पाण्डवानां दाहं निश्चित्य धृतराष्ट्राय दूतमुखेन पाण्डववृत्तान्तनिवेदनम् ॥ १ ॥ तच्छ्रवणेन ज्ञातिभिस्सह धृतराष्ट्रेण कुन्त्यादीनां उदकदानम् ॥ २ ॥ भीष्मविदुरयोस्संवादः ॥ ३ ॥

वैशम्पायनः—

अथ रात्र्यां व्यतीतायां सशोको नागरो जनः ।
तत्राजगाम त्वरितो दिदृक्षुः पाण्डुनन्दनान् ॥ १

निर्वापयन्तो ज्वलनं ते जना ददृशुस्तदा ।

---

1. क-घ—गङ्गातीरवनं प्राप्य वहन् प्रायात् स मारुतिः ।[अधिकः पाठः]
2. घ—बिलेन योजनं दूरं गत्वा सिद्धवटे शुभे ।
निचेरुर्वटमूलेषु निद्रामुद्रितलोचनाः ।
बिलान्निर्गत्य तरसा भ्रातॄन् मातरमेव च ॥ [अधिकः पाठः]
3. घ—अव्यक्तवनमार्गस्सन् भञ्जन् गुञ्जलतातरून् ॥ [अधिकः पाठः]

जातुषं तद्गृहं दग्धम् अमात्यं च पुरोचनम् ॥ २

नूनं दुर्योधनेनेदं विहितं पापकर्मणा ।
पाण्डवानां विनाशाय इत्येवं चुक्रुशुर्जनाः ॥ ३

विदितं धृतराष्ट्रस्य धार्तराष्ट्रो न संशयः ।
दग्धवान् पाण्डवान् बालान् न ह्येतत् प्रतिषिद्धवान् ॥ ४

नूनं शान्तनवो भीष्मो न धर्ममनुवर्तते ।
द्रोणश्च विदुरश्चैव कृपश्चान्ये च कौरवाः ॥ ५

[1]ते वयं धृतराष्ट्राय प्रेषयामो दुरात्मने ।
संवृत्तस्ते परः कामः पाण्डवान् दग्धवानसि ॥ ६

ततो व्यपोहमानास्ते पाण्डवार्थे हुताशनम् ।
निषादीं ददृशुर्दग्धां पञ्चपुत्रामनागसीम् ॥ ७

[2]खनकेन तु तेनैव वेश्म शोधयता बिलम् ।
पांसुभिः प्रत्यपिहितं पुरुषैस्तैर्न लक्षितम् ॥ ८

ततस्ते प्रेषयामासुर् धृतराष्ट्रस्य नागराः ।

---

1. घ—नावेक्षन्ते हतं धर्मं धर्मज्ञा अप्यहो विधे ।
श्रुतवन्तो हि विद्वांसो धनवद्वशगा अहो ॥
साधूननाथान् धर्मिष्ठान् सत्यव्रतपरायणान् ।
नावेक्षन्ते महान्तोऽपि दैवं तेषां परायणम् ॥ [अधिकः पाठः]

2. क ग घ—इतः पश्यत कुन्तीयं दग्धा शेते यशस्विनी ।
पुत्रैस्सहैव वार्ष्णेयी हन्त पश्यत नागराः ॥
[अधिकः पाठः]

पाण्डवानग्निना दग्धान् अमात्यं च पुरोचनम् ॥ ९

श्रुत्वा तु धृतराष्ट्रस्तद् राजा सुमहदप्रियम् ।
विनाशं पाण्डवेयानां विललाप सुदुःखितः ॥ १०

[1]धृतराष्ट्रः—

अद्य पाण्डुर्मृतो राजा भ्राता मम सुदुर्लभः ।
तेषु वीरेषु दग्धेषु मात्रा सह विशेषतः ॥ ११

गच्छन्तु पुरुषाश्शीघ्रं नगरं वारणावतम् ।
संस्कारयन्तु तान् वीरान् कुन्तीं राजसुतां तु ताम् ॥ १२

ये च तत्र मृतास्तेषां सुहृदोऽर्चन्तु तानपि ।
कारयन्तु च कुल्यानि शुभ्राणि च बृहन्ति च ॥ १३

मम दग्धा महात्मानः कुलवंशविवर्धनाः ॥ १३॥

एवं गते मया शक्यं यद्यत् कारयितुं वरम् ।
पाण्डवानां च कुन्त्याश्च तत्सर्वं क्रियतां धनैः ॥ १४॥

वैशम्पायनः—

समेतास्तु ततस्सर्वे भीष्मेण सह कौरवाः ।
धृतराष्ट्रस्सपुत्रश्च गङ्गामभिमुखा ययुः ॥ १५॥

एकवस्त्रा निरानन्दा निराभरणवेष्टनाः ।

---

1. क ग—अन्तर्दहनमनाश्वासं बहिर्दुःखसमाकुलः ।
अन्तश्शीतो बहिश्चोष्णो ग्रीष्मेऽगाधह्रदो यथा ॥
[अधिकः पाठः]

उदकं कर्तुकामा वै पाण्डवानां महात्मनाम् ॥ १६॥

एवं गत्वा ततश्चक्रे ज्ञातिभिः परिवारितः ।
उदकं पाण्डुपुत्रेभ्यो धृतराष्ट्रोऽम्बिकासुतः ॥ १७॥

चुक्रुशुः कुरवस्सर्वे भृशं शोकसमन्विताः ।
[1]विदुरस्त्वल्पशश्शोकं चक्रे वेद हि तत्परम् ॥ १८॥

ततः प्रव्यथितो भीष्मः पाण्डुराजसुतान् मृतान् ।
सह मात्रेति तच्छ्रुत्वा विललाप रुरोद च ॥ १९॥

भीष्मः—

हा युधिष्ठिर हा भीम हा धनञ्जय हा यमौ ।
हा पृथे सह पुत्रैस्त्वम् एकरात्रेण [2]हन्यसे ॥ २०॥

मात्रा सह कुमारास्ते सर्वे तत्रैव संस्थिताः ।
न हि तौ नोत्सहेयातां भीमसेनधनञ्जयौ ॥ २१॥

तरसा वेगितात्मानौ निर्भेत्तमपि मन्दिरम् ।
परासुत्वं न पश्यामि पृथायास्सह पाण्डवैः ॥ २२॥

1. क-ग—विदुरो धृतराष्ट्रस्य ज्ञानन् सर्वं मनोगतम् ।
केनायं विधिना सृष्टः कौटिल्यकपटालयः ॥
इत्येवं चिन्तयन् प्राज्ञो विदुरो विदुषां वरः ।
लोकानां दर्शयन् दुःखं दुःखितस्सह बन्धुभिः ॥
मनसा चिन्तयन्पार्थान् कियद्दूरं गमिष्यति ।
सहिता पाण्डवैः पुत्रैर् इति चिन्तापरोऽभवत् ॥
[अधिकः पाठः]

2. क-ख-ग—स्वर्गता

सर्वथा विकृतं नीतं यदि ते निधनं गताः ॥ २३
धर्मराजस्स निर्दिष्टो ननु विप्रैर्युधिष्ठिरः ॥ २३॥
पृथिव्यां च रथिश्रेष्ठो भविता स धनञ्जयः ॥ २४
सत्यव्रतो धर्मदत्तस् सत्यवाक्छुभलक्षणः ।
कथं कालवशं प्राप्तः पाण्डवेयो युधिष्ठिरः ॥ २५
आत्मानमुपमां कृत्वा परेषां वर्तते तु यः ।
सह मात्रा तु कौरव्यः कथं कालवशं गतः ॥ २६
पालितश्च चिरं कालं फलकाले यथा द्रुमः ।
भग्नस्स्याद्वायुवेगेन तथा राजा युधिष्ठिरः ॥ २७
यौवराज्येऽभिषिक्तेन पितुर्येनाहृतं यशः ।
आत्मनश्च पितुश्चैव सत्यधर्मस्य वृत्तिभिः ॥ २८
स ब्रह्मण्यः परप्रेक्षी हृदि शोकं निधाय मे ।
कालेन स हि संभग्नो धिक् कृतान्तमनर्थकम् ॥ २९
यश्च सा वनवासेन क्लेशिता दुःखभागिनी ।
पुत्रगृध्नुतया कुन्ती न भर्तारं मृता त्वनु ॥ ३०
अल्पकालं कुले जाता भर्तुः प्रीतिमवाप या ।
दग्धाऽद्य सह पुत्रैस्सा असंपूर्णमनोरथा ॥ ३१
एतच्च चिन्तयानस्य व्यथितं बहुधा मनः ।
अवधूय च मे देहं हृदयेऽग्निरुदीर्यते ॥ ३२

पीनस्कन्धश्चारुबाहुर् मेरु[1]कुञ्जसमो युवा ।
मृतो भीम इति श्रुत्वा मनो न श्रद्दधाति मे ॥ ३३

[2]अनिन्द्यानि च यो गच्छन् क्षिप्रहस्तो दृढायुधः ।
प्रपत्तिमांल्लघ्वलक्षो रथयानविशारदः ॥ ३४

दूरपाती त्वसंभ्रान्तो महावीर्यो महास्त्रवित् ।
अदीनात्मा नरव्याघ्रश् श्रेष्ठस्सर्वधनुष्मताम् ॥ ३५

येन प्राच्यास्ससौवीरा दाक्षिणात्याश्च निर्जिताः ।
ख्यापितं येन शूरेण त्रिषु लोकेषु पौरुषम् ॥ ३६

यस्मिञ्जाते विशोकाऽभूत् कुन्ती पाण्डुश्च वीर्यवान् ।
पुरन्दरसमो जिष्णुः कथं कालवशं गतः ॥ ३७

कथं तावृषभस्कन्धौ सिंहविक्रान्तगामिनौ ।
मर्त्यधर्ममनुप्राप्तौ यमावरिनिबर्हणौ ॥ ३८

[3]वैशम्पायनः -

1. क-ख-ग-घ—कूट 2. ख-ग-घ—अतित्यागी च योगी च
3. क-ग-घ—क्व गता वत्सा मां वृद्धं विहाय भृशमातुरम् ।
हा म्नुषे वत्से वाष्णेयि निधाय हृदि मे शुचम् ॥
वारणावतयात्रायां के म्यूर्वे शकुनाः पथि ।
एवमल्पायुषो लोके भविष्यन्ति पृथासुताः ॥
संशप्ता इति कैर्यूयं वत्सान् दर्शय मे विधे ।
ममैव नाथा मन्नाथा मम नेत्राणि पाण्डवाः ॥
हा पाण्डवा मे हा व सा हा सिंहशिशवो मम ।
मातङ्गा हा ममोत्तुङ्गा हा ममानन्दवर्धनाः ॥

[1]तस्य विक्रन्दितं श्रुत्वा उदकं च प्रसिञ्चतः ।
देशं कालं समाज्ञाय विदुरः प्रत्यभाषत ॥ ३९

मा शोचीस्त्वं नरव्याघ्र जहि शोकं महाव्रत ।
न तेषां विद्यते पापं प्राप्तकालं कृतं मया ॥ ४०

एतच्च तेभ्य उदकं विप्रसिञ्च न भारत ।
सोऽब्रवीत् किञ्चिदुत्सार्य कौरवाणामशृण्वताम् ॥ ४१

क्षत्तारमुपसंगृह्य बाष्पोत्पीडकलस्वरः ॥ ४१॥

[2]भीष्मः—

कथं ते तात जीवन्ति पाण्डोः पुत्रा महारथाः ।
कथमस्माद्विधः पक्षः पाण्डोर्न हि निपातितः ॥ ४२॥

कथं मत्प्रमुखास्सर्वे प्रमुक्ता महतो भयात् ।
जननी गरुडेनेव कुमारास्ते समुद्धृताः ॥ ४३॥

पूर्वतोऽनुवृत्तम्—

मम हीनस्य युष्माभिः सर्वे लोकास्तमोवृताः ।
कदा द्रष्टास्मि कौन्तेयांस् तरुणादित्यवर्चसः ॥

दृष्ट्वा युष्मान् कदा रंस्ये पूर्ववन्मम नन्दनाः ।
का गतिर्मे क्व वत्स्यामि कुतो द्रक्ष्यामि मे शिशून् ॥
हा युधिष्ठिर हा भीम हा फल्गुन हा यमौ ।
मा गच्छत निवर्तध्वं मयि कोपं विमुञ्चत ॥

[अधिकः पाठः]

1. घ—श्रुत्वा तत्क्रन्दितं तस्य तिलोदं च प्रसिञ्चतः ।
2. घ—मन्दं मन्दमुवाचेदं स्नुषादीसंभवो नृप ॥ [अधिकः पाठः]

वैशम्पायनः—

एवमुक्तस्तु कौरव्य कौरवाणामशृण्वताम् ।
आचचक्षे स धर्मात्मा भीष्मायाद्भुतकर्मणे ॥ ४४॥

विदुरः—

धृतराष्ट्रस्य शकुने राज्ञो दुर्योधनस्य च ।
विनाशे पाण्डुपुत्राणां कृतो मतिविनिश्चयः ॥ ४५॥

तत्राहमपि च ज्ञात्वा तस्य पापस्य निश्चयम् ।
तं जिघांसुरहं चापि तेषामनुमते स्थितः ॥ ४६॥

ततो जतुगृहं गत्वा दहनेऽस्मिन् नियोजिते ।
पृथायाश्च सपुत्राया धार्तराष्ट्रस्य शासनात् ॥ ४७॥

ततः खनकमाहूय सुरङ्गां वै विले तदा ।
सगुहां कारयित्वा ते कुन्त्या पाण्डुसुतास्तदा ॥ ४८॥

निष्क्रामिता मया पूर्वं मा स्म शोके मनः कृथाः ॥ ४९
ततस्तु नावमारोप्य सहपुत्रां पृथामहम् ।
दत्त्वाऽभयं सपुत्रायै कुन्त्यै गृहमदाहयम् ॥ ५०
तस्मात्ते मा स्म भूद्दुःखं मुक्ताः पापात्तु पाण्डवाः ।
निर्गताः पाण्डवा राजन् मात्रा सह परन्तपाः ॥ ५१
अग्निदाहान्महाघोरान्मया तस्मादुपायतः ।
मा शोकं कार्षी राजंस्त्वं जीवन्त्येव च पाण्डवाः ॥ ५२

प्रच्छन्ना विचरिष्यन्ति यावत्कालस्य पर्ययः ॥ ५२॥

तस्मिन् युधिष्ठिरं काले द्रक्ष्यन्ति भुवि भूमिपाः ।
विमलं कृष्णपक्षान्ते जगच्चन्द्रमिवोदितम् ॥ ५३॥

न तस्य नाशं पश्यामि यस्य भ्राता धनञ्जयः ।
भीमसेनश्च दुर्धर्षौ माद्रीपुत्रौ च भारत[1] ॥ ५४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४ ॥

॥ ८ ॥ जतुगृहदाहपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

[अस्मिन्नध्याये ५४॥ श्लोकाः]

॥ पञ्चचत्वारिंशदधिकशततमोऽध्यायः ॥

विदुरप्रेषितेन पुरुषेण साभिज्ञानं पाण्डवेभ्यो गङ्गायां नौकाप्रदर्शनम् ॥ १ ॥ निषादेन नाविकेन पुनरभिज्ञाननिवेदनेन पाण्डवानां नावा गङ्गानिस्तारणम् ॥ २ ॥ ततस्तेषां भीमेन सह त्वरितगमनम् ॥ ३ ॥

वैशम्पायनः—

पाण्डवाश्चापि निर्गम्य नगराद्वारणावतात् ।

---

1. क-ख-ग-घ—ततस्संहृष्टसर्वाङ्गो भीष्मो विदुरमब्रवीत् ।
युक्तं चैवानुरूपं च कृतं तात शुभं त्वया ॥
वयं विमोक्षिता दुःखात् पाण्डुपक्षो न नाशितः ।
एवमुक्त्वा विवेशाथ पुरं जनशताकुलम् ॥
कुरुभिस्सहितो राज्ञा नागरैश्च पितामहः ॥

अथाम्बिकेयस्सामात्यः सकर्णस्सहसौबलः ॥
सात्यजः पार्थनाशस्य स्मरंस्तथ्यं जहर्ष च ।
भीष्मस्तु राजदुर्धर्षो विदुरश्च महामतिः ॥
जहर्षाते स्मरन्तौ तौ जातुषाग्नेर्विमोचनम् ।
सत्यशीलगुणाचारै रागैर्जानपदोद्भवैः ॥
द्रोणाद्यस्तु धर्मैश्च तेषां तान् मोचितान् विदुः ।
शौर्यलावण्यमाहात्म्यै रूपैः प्राणबलैरपि ॥
स्वस्थान् पार्थानमन्यन्त पौरजानपदास्तदा ।
अन्ये जनाः प्राकृताश्च स्त्रियश्च बहुधा तथा ॥
शङ्कमाना वदन्ति स्म दग्धा जीवन्ति वा न वा ॥

॥ इति सम्भवपर्वणि चतुर्नवतितमोऽध्यायः ॥

॥ अथ पञ्चनवतितमोऽध्यायः ॥

वैशम्पायनः—

क-ग पाण्डवान् महतो दाहान्मोचयित्वा महामते ।
म्रियमाणं महाक्लेशैर् भवान् सां समजीवयत् ॥
प्रच्छन्ना विचरिष्यन्तो यथोक्तं भवता तदा ।
न व्यक्तं तत्त्वया तात यत्र कुत्रापि न क्वचित् ॥
इतोऽपि प्रेषयित्वाऽऽप्तान् योगक्षेमं विचारय ।
दूराद्दूरतरं पार्थान् प्रस्थापय वनाद्वनम् ॥
तत्र तत्र प्रेषयित्वा दूतानाप्तान् शुभांस्तव ।
योगक्षेमं पाण्डवानां गूढं सम्यग्विचारय ॥
भीष्मेणेत्थं समादिष्टो विदुरः खनकं पुनः ।
गुप्तं तं प्रेषयामास खनकं जनमेजय ॥
सोऽपि गत्वा पृथापुत्रान् दृष्ट्वा सिद्धवटे तदा ।
म्लेच्छभाषां वदन्नेव विदुरेण पुरेरिताम् ॥
रात्रौ पाण्डुसुतान् दृष्ट्वा सान्त्वयित्वा वचोऽब्रवीत् ।

जवेन प्रययुर्वीरा दक्षिणां दिशमाश्रिताः ॥ १

एतस्मिन्नेव काले तु यथासंप्रत्ययं कविः ।
[1]विदुरः प्रेषयामास तद्वनं पुरुषं शुचिम् ॥ २

स गत्वा तु वनोद्देशे वने प्रैक्षत पाण्डवान् ।
सह मात्रा नरव्याघ्रान् अनयज्जाह्नवीं ततः ॥ ३

पूर्वतोऽनुवृत्तम—

खनकः—

आयुष्मद्भिर्न भेतव्यं भवद्भिः कौरवा न हि ।
जानन्ति जीवतो युष्मान् निश्चितोऽभूद्धवन्मृतौ ॥
जानाति युष्मान् गाङ्गेयो विदुरेण प्रबोधितः ।
शनैश्शनैश्च गन्तव्यं न भीत्या त्वरया न च ॥
दक्षिणां दिशमाश्रित्य वटकाननमुत्तमम् ।
विद्यते भारतश्रेष्ठास् तत्र गच्छन्तु निर्भयाः ।
सर्वप्रवास एतावान् भवतां पुण्यशीलिनाम् ।
क्षमावतां च युष्माकं सुखोदर्को भविष्यति ॥
इत्याह विदुरो युष्मान् मया तत्कथितं शुभाः ।
युष्मभ्यं यामि भद्रं वो गच्छतारिष्टमार्गतः ॥

वैशम्पायनः—

निवृत्ते खनकेत्वित्थं पाण्डवा जनमेजय ।
किमकुर्वत ते सर्वे शृणु राजन् पितामहाः ॥

[अधिकः पाठः]

(इतः परं—पाण्डवाश्चापि निर्गम्य नगराद्वारणावतात्-इत्यारम्भो-मूले दृश्यते)

1. घ—श्रुत्वा तं खनकेनोक्तं कौन्तेयोदन्तमादितः ।
आत्मनः पाण्डवानां च विश्वास्यं ज्ञानपूर्वकम् ।
गङ्गासन्तरणार्थाय ज्ञानाभिज्ञानवाचकम् ॥ [अधिकः पाठः]

विदितं तन्महाबुद्धेर् विदुरस्य महात्मनः ।
तत्रस्थस्यापि चारेण पापानां वै चिकीर्षितम् ॥ ४
ततो धर्मविदाऽनेन प्रहितः पुरुषश्शिवः ॥ ४॥
सर्वगां जवनां नावं युक्तारित्रां पताकिनीम् ।
शिवे भागीरथीतीरे विश्वास्यैर्मनुजैर्वृताम् ॥ ५॥
पाण्डवान् दर्शयामास वचनं चेदमब्रवीत् ॥ ६

पुरुषः—

क्षत्तव्यं शिशिरघ्नं च महाकुक्षीबिलौकसम् ।
बोद्धव्यमिति यत्प्राह विदुरस्तदिदं तदा ॥ ७
तेन मां प्रेषितं विद्धि विश्वस्तं वै महात्मना ।
अब्रवीच्च महाबाहुर् विदुरस्सर्वधर्मवित् ॥ ८
अधिक्षिपन् धार्तराष्ट्रं सभ्रातृकमुदारधीः ।
कर्णं च दुर्मतिं क्रूरं शकुनिं चापि सौबलम् ॥ ९
दुर्योधनः कुलस्यास्य कीर्तिधर्मविनाशनः ।
गान्धारराजसहितः पितरं पातयिष्यति ॥ १०
राजा चाप्यपरीजानन् स्नेहबद्धो दुरात्मसु ।
धृतराष्ट्रः परीतात्मा धर्मं त्यजति शाश्वतम् ॥ ११

वैशम्पायनः—

पाण्डवाश्च तथा गत्वा गङ्गायास्तीरमुत्तमम् ।

निषादाधिपतिं वीरा दाशं परमधार्मिकम् ॥ १२
दीपिकाभिः कृतालोकं मार्गमाणं च पाण्डवान् ।
ददृशुः पाण्डवेयास्ते नाविकं त्वरयाऽन्वितम् ॥ १३
निषादस्तत्र कौन्तेयान् अभिज्ञानं न्यवेदयत् ।
विदुरस्य महाबुद्धेर् म्लेच्छभाषादि यत्तदा । १४

नाविकः --

विदुरेणास्मि सन्दिष्टो दत्वाऽऽशु तद्धनं महत् ।
गङ्गातीरे निविष्टस्त्वं पाण्डवांस्तारयेस्त्विति ॥ १५
सोऽहं चतुर्दशीमद्य गङ्गाया अविदूरतः ।
चारैरन्वेषयाम्यस्मिन् वने मृगगणान्विते ॥ १६
प्रभाववन्तो भद्रं वो नावमारुह्य गम्यताम् ॥ १६॥
युक्तारित्रपताकां वै निर्मितां मन्दिरोपमाम् ।
इमां वारिपथे युक्तां तथैव सुखगामिनीम् ॥ १७॥
मोचयिष्यामि वस्सर्वान् मृत्युपाशात् समातृकान् ॥ १८
ततस्तान् व्यथितान् सर्वान् सह मात्रा परन्तपान् ।
नावमारोप्य गङ्गायां प्रयातां पुनरब्रवीत् ॥ १९
विदुरो मूर्ध्न्युपाघ्राय परिष्वज्य च वो मुहुः ।
अरिष्टं गच्छताव्यग्राः पन्थानमिति चाब्रवीत् ॥ २०
इत्युक्त्वा तान् समारोप्य तारयामास पाण्डवान् ।
इत्युक्तास्सह मात्रा ते तस्मान्मुक्ता महाभयात् ॥ २१

गङ्गामुत्तीर्य कौन्तेया वनं जग्मुर्यथागतम् ॥ २१॥
ततस्तां तत्र तीर्त्वा तु गङ्गां भागीरथीं नदीम् ।

जवेन प्रययुर्वीरा दक्षिणां दिशमास्थिताः ॥ २२॥
विहाय निद्रां पन्थानं नक्षत्रैर्दक्षिणामुखाः ।

गाहमाना वनं राजन् गहनं प्रतिपेदिरे ॥ २३॥
ततश्श्रान्ताः पिपासार्ता निस्स्मृताः पाण्डुनन्दनाः ।

पुनरूचुर्महावीर्यं भीमसेनमिदं वचः ॥ २४॥
इतः कष्टतरं किंनु यद्वयं गहने वने ।

दिशश्च न प्रजानीमो गन्तुं चैव न शक्नुमः ॥ २५॥
तं च पापं न जानीमो यदि दग्धः पुरोचनः ।

कथं नु विप्रमुच्येम भयादस्मादलक्षिताः ॥ २६॥
शीघ्रमस्मानुपादाय तथैव व्रज भारत ।

त्वं हि नो बलवानेको यथा सततगस्तथा ॥ २७॥
इत्युक्तो धर्मराजेन भीमसेनो महाबलः ।

आदाय कुन्तीं भ्रातॄंश्च जगामाशु महाबलः ॥ २८॥

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि पञ्चचत्वारिंशदधिकशततमोऽध्यायः ॥ १४५ ॥

॥ ८ ॥ जतुगृहदाहपर्वणि अष्टमोऽध्यायः ॥ ८ ॥

[अस्मिन्नध्याये २८॥ श्लोकाः]

॥ षट्चत्वारिंशदधिकशततमोऽध्यायः ॥

तृषार्तान् मातरं भ्रातॄंश्च न्यग्रोधमूले स्थापयित्वा जलानयनाय भीमस्य गमनम् ॥ १ ॥ जलमानीयागतस्य सुप्तान् मात्रादीन् पश्यतो भीमस्य प्रलापः ॥ २ ॥

वैशम्पायनः—

तेन विक्रमता तूर्णम् ऊरुवेगसमीरितः ।
प्रववावनिलो राजन् शुचिशुक्रागमे यथा ॥ १

स मृद्नन् पुष्पितांश्चैव फलिनश्च वनस्पतीन् ।
आरुजन् दारुगुल्मांश्च पथस्तस्य समीपगान् ॥ २

तथा वृक्षान् भञ्जमानो जगामामितविक्रमः ॥ २॥
[1]तस्य वेगेन पञ्चानां मूर्च्छेव समजायत ॥ ३

[2]असकृच्चापि संतीर्य पारावारं भुजप्लवाः ।
[3]पथा प्रच्छन्नमासेदुर् धार्तराष्ट्रभयात्तदा ॥ ४

कृच्छ्रेण मातरं ह्येकां सुकुमारीं यशस्विनीम् ।
अवहत्तत्र पृष्ठेन रोधस्सु विषमेषु च ॥ ५

1. क-ग-घ—तस्य कक्षद्वयोद्भूतपवनध्वनिरुत्थितः ।
गुम्भिताशेषदिग्भागश् शुश्रुवेऽतिभयङ्करः ॥ [अधिकः पाठः]
2. घ—मातरं च वहन् भ्रातॄन् अश्रमेण समीरजः । [अधिकः पाठः]
3 क-ख-ग—पार्थाः

अगमच्च वनोद्देशम् अल्पमूलफलोदकम् ।
क्रूरपक्षिमृगं घोरं सायं समुपचक्रमुः ॥ ६
घोरा समभवत् सन्ध्या दारुणा मृगपक्षिणः ।
अप्रकाशा दिशस्सर्वाश् शनैरासंस्ततस्तदा ॥ ७
ते श्रमेण च कौन्तेयास् तृष्णया च प्रपीडिताः ।
नाशक्नुवंस्ततो गन्तुं निद्रया च प्रवृद्धया ॥ ८
शीर्णपर्णफलैर्वृक्षैर् बहुगुल्मक्षुपद्रुमैः ।
प्रभग्नायनभूयिष्ठे श्वदंष्ट्राबहुले सदा ॥ ९
[1]न्यविशन्त हि ते तत्र निरास्वादे महावने ॥ ९॥
रात्र्यामेव गतास्तत्र चतुर्विंशतियोजनम् ॥ १०
अथ तृष्णापरिम्लाना कुन्ती वचनमब्रवीत् । १०॥

कुन्ती—

माता सती पाण्डवानां पञ्चानां मध्यतस्स्थिता ।
तृषया परितप्ताऽस्मि अनाथेव महावने ॥ ११॥

वैशम्पायनः—

[2]तच्छ्रुत्वा भीमसेनस्तु मातृवाक्यं प्रकम्पितः ।
कारुण्येन मनश्चक्रे गमनायाथ सत्वरः ॥ १२॥

---

1. क-ग—अतीव गहनं घोरं दुर्विज्ञेयपथं क्वचित् । [अधिकः पाठः]
2. क-ग—इतः परमहं शक्ता न गन्तुं च पदात् पदम् ।
शयिष्ये वृक्षमूलेऽस्य धार्तराष्ट्रा हरन्तु माम् ॥
शृणु भीम वचो मह्यं तव बाहुबलात् पुरः ।
स्थातुं न शक्ताः कौरव्याः किं बिभेषि पृथासुत ॥
[अधिकः पाठः]

[1]ततो भीमो वनं घोरं प्रविश्य विजनं महत् ।
न्यग्रोधं विपुलच्छायं रमणीयमुपाद्रवत् ॥ १३॥

तत्र निक्षिप्य तान् सर्वान् उवाच भरतर्षभः ।
पानीयं मृगये यावत् तावद्विश्रम्यतामिह ॥ १४॥

एते रुवन्ति मधुरं सारसा जलचारिणः ।
ध्रुवमत्र जलस्थानम् अर्हतीति मतिर्मम ॥ १५॥

अनुज्ञातस्स गच्छेति भ्रात्रा ज्येष्ठेन भारत ।
जगाम तत्र यत्र स्म रुवन्ति जलचारिणः ॥ १६॥

अपश्यत् पद्मिनीखण्डमण्डितं स सरोवरम् ॥ १७
स तत्र पीत्वा पानीयं स्नात्वा च भरतर्षभः ।
उत्तरीयेण पानीयम् आजहार परन्तपः ॥ १८
पद्मजानामनेकैश्च पत्रैर्बध्वा जलाशयात् ।
गव्यूतिमात्रादागत्य त्वरितो मातरं प्रति ॥ १९
[2]स सुप्तां मातरं प्रेक्ष्य भ्रातॄंश्च वसुधातले ।

---

1. क-ग—अन्ये रथा न मे सन्ति भीमसेनाद्दते भुवि ।
धार्तराष्ट्राद्भृथा भीरो न मां स्रप्तुमिहेच्छसि ॥
भीमपृष्ठस्थिता चेत्थं दूयमानेन चेतसा ।
साश्रुध्वनि रुदन्ती सा निद्रावशमुपागता ॥ [अधिकः पाठः]

2. क-ग—भ्रातॄंश्च मातरं चैव जलं शीतमपाययत् ।
पीतोदकास्ते सर्वेऽपि परिश्रमवशात् पुनः ।
निद्रापहृतधैर्याश्च सुषुपुर्भृशविह्वलाः ॥ [अधिकः पाठः]

[1]भृशं दुःखपरीतात्मा विललाप वृकोदरः ॥ २०

भीमसेनः—

शयनेषु परार्ध्येषु प्रसुप्ता वारणावते ।
नाधिजग्मुस्तदा निद्रां तेऽद्य सुप्ता महीतले ॥ २१
स्वसारं वसुदेवस्य शत्रुसङ्घविमर्दिनः ।
भोजराजसुतां कुन्तीं सर्वलक्षणपूजिताम् ॥ २२
स्नुषां विचित्रवीर्यस्य भार्यां पाण्डोर्महात्मनः ।
प्रासादशयनां नित्यं पुण्डरीकान्तरप्रभाम् ॥ २३
सुकुमारतरां स्त्रीणां महार्हशयनोचिताम् ।
शयानामद्य पश्यामि पृथिव्यां हन्त भो विधे ॥ २४
धर्मादिन्द्राच्च वायोश्च सुषुवे या सुतानिमान् ।
सेयं भूमौ परिश्रान्ता शेते प्राकृतवत् कथम् ॥ २५
[2]अयं नीलाम्बुदप्रख्यो नरेष्वप्रतिमो भुवि ।

---

1. क-ग-घ—महारौद्रे वने घोरे वृक्षमूले सुशीतले ।
विक्षिप्तकरपादांश्च दीर्घाच्छ्वासमहारवान् ॥
ऊर्ध्ववक्त्रान् महाकायान् पद्मेन्द्रानिव भूतले ।
अज्ञातवृक्षनित्यस्थप्रेतराक्षससाध्वसान् ।
दृष्ट्वैवं भृशशोकार्तो विललापानिलात्मजः ॥
[अधिकः पाठः]

2. क-ख-ग—किं नु दुःखतरं द्रष्टुं मया शक्यमतः परम् ।
योऽहमद्य नरव्याघ्रान् पश्यामि धरणीं गतान् ॥
क्षिप्तु लोकेषु वै राजन् धर्मनित्योऽर्हति प्रभुः ।
सोऽयं भूमौ परिश्रान्तः शेते प्राकृतवत् कथम् ॥
[अधिकः पाठः]

शेते प्राकृतवद्भूमौ ततो दुःखतरं नु किम् ॥ २६

इमौ नीलोत्पलश्यामौ नरेष्वप्रतिमौ भुवि ।
अश्विनाविव देवानाम् आश्विनौ रूपसंपदा ॥ २७

तौ तु प्राकृतवच्चोभौ प्रसुप्तौ धरणीतले ।
ज्ञातयो यस्य नैव स्युर् विषमाः कुलपांसनाः ॥ २८

स जीवेत् सुखितो लोके ग्रामद्रुम इवैकजः ॥ २८॥
एको वृक्षो हि यो ग्रामे भवेत् पर्णफलान्वितः ।

चैत्यो भवति निर्ज्ञातिर् अर्चनीयस्सुपूजितः ॥ २९॥
येषां च बहवश्शूरा ज्ञातयो धर्मवत्सलाः ।

ते जीवन्ति चिरं लोके भवन्ति च निरामयाः ॥ ३०॥
बलवन्तस्समृद्धार्था मित्रबान्धवनन्दनाः ।

जीवन्त्यन्योन्यमाश्रित्य द्रुमाः काननजा इव ॥ ३१॥
वयं च धृतराष्ट्रेण सपुत्रेण दुरात्मना ।

[1]विवासिताश्च दग्धाश्च क्षत्तुर्बुद्धिपराक्रमात् ॥ ३२॥
तस्मान्मुक्ता वयं दाहाद् इमं वृक्षमुपाश्रिताः ।

कां दिशं प्रतिपत्स्यामः प्राप्ताः क्लेशमनुत्तमम् ॥ ३३॥

---

1. क. ग—राज्यलुब्धेन मूर्खेण दुर्मन्त्रिसहितेन च ।
धृष्टेनाधर्मशीलेन स्वार्थनिष्ठैकबुद्धिना ॥ [अधिकः पाठः]

नातिदूरेण नगरं वनादस्माद्धि लक्षये ।
जागर्तव्ये स्वपन्तीमे हन्त जागर्म्यहं स्वयम् ॥ ३४॥
प्राइयन्तीमे जलं पश्चात् प्रतिबुद्धा जितक्रमाः ॥ ३५

वैशम्पायनः—

इति भीमो विनिश्चित्य जागर्ति स्म प्रयत्नवान् ॥ ३५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम् आदिपर्वणि षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥

॥ ८ ॥ जतुगृहदाहपर्वणि नवमोऽध्यायः ॥ ९ ॥

[अस्मिन्नध्याये ३५॥ श्लोकाः]

॥ जतुगृहदाहपर्व समाप्तं ॥

॥ सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥

॥ हिडिम्बवधपर्व ॥

हिडिम्बप्रेरितायाः तद्भगिन्या हिडिम्बायाः पाण्डवसमीपगमनम् ॥ १ ॥ भीमे कामार्तायां हिडिम्बायाः भीमं प्रति वाक्यम् ॥ २ ॥ भीम-हिडिम्बीसंवादः ॥ ३ ॥

वैशम्पायनः—

तत्र तेषु शयानेषु हिडिम्बो नाम राक्षसः ।
अविदूरे वनात्तस्मात् सालवृक्षमुपाश्रितः ॥ १
क्रूरो मानुषमांसादो महावीर्यो महाबलः ।

[1]आघ्राय मानुषं गन्धं भगिनीमिदमब्रवीत् ॥ २

[2]उपपन्नं चिरस्याद्य भक्षो मम मनःप्रियः ।
जिघ्रतः प्रस्रुतस्नेहाज् जिह्वा पर्येति मे मुखम् ॥ ३

अष्टौ दन्तास्सितास्तीक्ष्णाश् चिरस्य बत दुस्सहाः ।
देहेषु मज्जयिष्यामि स्निग्धेषु पिशितेषु च ॥ ४

आक्रम्य मानुषं कण्ठम् आच्छिद्य धमनीमपि ।
उष्णं नवं प्रपास्यामि फेनिलं रुधिरं बहु ॥ ५

गच्छ जानीहि के त्वेते शेरते वनमाश्रिताः ॥ ५॥

मानुषो बलवान् गन्धो घ्राणं तर्पयतीव मे ॥ ६

हत्वैतान् मानुषानेतान् आनयाशु ममान्तिकम् ।
अस्मद्विषयसुप्तेभ्यो नैतेभ्यो भयमस्ति ते ॥ ७

ततो मांसानि संस्कृत्य मानुषाणि यथेष्टतः ।
सहितौ भक्षयिष्यावः कुरु क्षिप्रं वचो मम ॥ ८

ततस्तुष्टौ प्रनृत्यावः प्रगीतौ तलतालकौ ॥ ८॥

---

1. क-ख-ग—विरूपरूपः पिङ्गाक्षः करालो भीमदर्शनः ।
पिशितेप्सुः क्षुधार्तश्च जिघ्रन् गन्धं यदृच्छया ॥
ऊर्ध्वाङ्गुलिस्स कण्डूयन् धुन्वन् रूक्षाञ्शिरोरुहान् ।
जृम्भमाणो महावक्त्रः पुनः पुनरवेक्ष्य च ।
तुष्टो मानुषमांसस्य महाकायो महाबलः ॥
[अधिकः पाठः]

2. घ—उपपन्नरसांश्चाद्य भक्ष्यान् मम मनःप्रियान् । [अधिकः पाठः]

वैशंपायनः—

एवमुक्ता हिडिम्बेन हिडिम्बी राक्षसी तदा ।
भ्रातुर्वचनमाज्ञाय त्वरमाणैव राक्षसी ॥ ९॥

आप्रुत्याप्रुत्य च तरून् अगच्छत् पाण्डवान् प्रति ।
भ्रातुर्वचनमाज्ञाय त्वरमाणैव राक्षसी ॥ १०॥

जगाम तत्र यत्र स्म शेरते पाण्डवा वने ॥ ११

ददर्श तत्र सा गत्वा पाण्डवान् पृथया सह ।
शयानान् भीमसेनं च जाग्रतं [1]मापराजितम् ॥ १२

उपास्यमानान् भीमेन रूपयौवनशालिना ।
सुकुमारांश्च पार्थान् सा व्यायामेन च कर्शितान् ॥ १३
दुःखेन संप्रयुक्तांश्च सहज्येष्ठान् प्रमाथिना ॥ १३॥

रौद्री सती राजपुत्रं दर्शनीयप्रदर्शनम् ।
दृष्ट्वैव भीमसेनं सा सालस्कन्धमिवोद्गतम् ॥ १४॥

राक्षसी कामयामास रूपेणाप्रतिमं भुवि ॥ १५
अन्तर्गतेन मनसा चिन्तयामास राक्षसी ॥ १५॥

अयं श्यामो महाबाहुः सिंहस्कन्धो महाद्युतिः ।
कम्बुग्रीवः पुष्करक्षो भर्ता युक्तो भवेन्मम ॥ १६॥

नाहं भ्रातु[2]र्वशे जातु कुर्यां क्रूरमसांप्रतम् ॥ १७

1 क-ख-ग—च्चा; घ—तम 2. क-ख-घ—र्वचो

पतिहेतुर्हि बलवान् न तथा भ्रातृसङ्गमः ॥ १७॥
मुहूर्तमपि चाद्याहं प्राप्नुयां तृप्तिमुत्तमाम् ।
भर्त्रा त्वहमनेनैव मोदिष्ये बहुलास्समाः ॥ १८॥
हिडिम्बी तु महारौद्रा तथा भरतसत्तम ।
उत्सृज्य राक्षसं रूपं मानुषं रूपमास्थिता ॥ १९॥
सा कामरूपिणी रूपं कृत्वा मदनमोहिता ।
उपतस्थे महात्मानं भीमसेनमनिन्दिता ॥ २०॥
इङ्गिताकारकुशला सोपासर्पच्छनैश्शनैः ।
विनम्यमानेव लता सर्वाभरणभूषिता ॥ २१॥
शनैश्शनैस्स तां भीमः समीपमुपसर्पतीम् ।
वीक्षमाणस्तथाऽपश्यत् तन्वीं पीनपयोधराम् ॥ २२॥
चन्द्राननां पद्मनेत्रां नीलकुञ्चितमूर्धजाम् ।
कृष्णां सुपाण्डुरैर्[1] वस्त्रैर् बिम्बोष्ठीं चारुदर्शनाम् ॥ २३॥
दृष्ट्वा तां रूपसंपन्नां भीमो विस्मयमागतः ॥ २४
उपचारगुणैर्युक्ता ललितैर्[2] भावसंस्थितैः ।
समीपमुपसंप्राप्य भीमं साऽथ वरानना ॥ २५
वचो वचनवेलायाम् इदं प्रोवाच पाण्डवम् ॥ २५॥
लज्जया नम्यमानेव सर्वाभरणभूषिता ।

1. क-ख-घ-ग—दन्तै 2. क-ख-ग—हास; घ—हासंसंमितैः

स्मितपूर्वमिदं वाक्यं भीमसेनमथाब्रवीत् ॥ २६॥

हिडिम्बी—

कुतस्त्वमसि संप्राप्तः कश्चासि पुरुषर्षभ ।
क इमे शेरते चेह पुरुषा देवरूपिणः ॥ २७॥

केयं च बृहती श्यामा सुकुमारी तवानघ ।
शेते वनमिदं प्राप्य विश्वस्ता स्वगृहे यथा ॥ २८॥

नेदं जानीथ गहनं वनं राक्षससेवितम् ।
वसति ह्यत्र पापात्मा हिडिम्बो नाम राक्षसः ॥ २९॥

तेनाहं प्रेषिता भ्रात्रा दुष्टभावेन रक्षसा ।
बिभक्षयिषता मांसं युष्माकममरोपम ॥ ३०॥

साऽहं त्वामिह संप्रेक्ष्य देवगर्भसमप्रभम् ।
नान्यं भर्तारमिच्छामि सत्यमेतद्ब्रवीमि ते ॥ ३१॥

एतद्विज्ञाय धर्मज्ञ युक्तं मयि समाचर ।
कामोपहतचित्तां हि भजमानां भजस्व माम् ॥ ३२॥

त्रास्येऽहं त्वां महाबाहो राक्षसात् पुरुषादकात् ।
वत्स्यावो गिरिशृङ्गेषु भर्ता भव ममानघ ॥ ३३॥

इच्छामि वीर भद्रं ते मम प्राणान् विहासिषुः ।
त्वया ह्यहं परित्यक्ता न जीवेयमरिन्दम ॥ ३४॥

अन्तरिक्षचरी चास्मि कामरूपधराऽपि च ।

अतुलामाप्नुहि प्रीतिं तत्र तत्र मया सह ॥ ३५॥

भीमसेनः—

एष ज्येष्ठो मम भ्राता मान्यः परमको गुरुः ।
अनिविष्टश्च तन्नाहं परिविद्यां कथंचन ॥ ३६॥

मातरं भ्रातरं ज्येष्ठं कनिष्ठानपरानिमान् ।
परित्यजेद्धि कोन्वद्य भयादपि च राक्षसि ॥ ३७॥

को हि सुप्तानिमान् भ्रातॄन् दत्त्वा राक्षसभोजनम् ।
मातरं च नरो गच्छेत् कामार्त इव मद्विधः ॥ ३८॥

हिडिम्बी—

एकं त्वां मोक्षयिष्यामि सह मात्रा परन्तप ।
सोदरानुत्सृजैनांस्त्वम् आरोह जघनं मम ॥ ३९॥

भीमसेनः—

नाहं जीवितुमाशंसे भ्रातॄनुत्सृज्य राक्षसि ।
यथाश्रद्धं व्रजैका हि विप्रियं मे प्रभाषसे ॥ ४०॥

राक्षसी—

न तेऽप्रियं चिकीर्षामि सर्वानेतान् प्रबोधय ।
मोक्षयिष्यामि वः कामं राक्षसात् पुरुषादकात् ॥ ४१॥

1भीमसेनः—

सुखसुप्तानिमान् भ्रातॄन् मातरं चैव राक्षसि ।

1. घ—बोधयिष्यामि जननीं भ्रातॄंस्तव महात्मनः । [अधिकः पाठः]

न भयाद्बोधयिष्यामि भ्रातुस्तव दुरात्मनः ॥ ४२॥

न हि मे राक्षसा भीरु सोढुं शक्ताः पराक्रमम् ।
न मनुष्या न गन्धर्वा न यक्षाश्चारुलोचने ॥ ४३॥

गच्छ वा तिष्ठ वा भद्रे यद्वाऽपीच्छासि तत्कुरु ।
तं वा प्रेषय तन्वङ्गि राक्षसं पुरुषादकम् ॥ ४४॥

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥
॥ ९ ॥ हिडिम्बवधपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[अस्मिन्नध्याये ४४॥ श्लोकाः]

अष्टचत्वारिंशदधिकशततमोऽध्यायः

पाण्डवान् प्रति प्रेषितया हिडिम्ब्या विलम्बिते हिडिम्बस्य तत्रागमनम् ॥ १ ॥

वैशम्पायनः—

तां विदित्वा चिरगतां हिडिम्बो राक्षसेश्वरः ।
अवतीर्य द्रुमात्तस्माद् आजगामाथ पाण्डवान् ॥ १

लोहिताक्षो महाबाहुर् ऊर्ध्वकेशो महाबलः ।
मेघश्यामो महावर्ष्मा तीक्ष्णदंष्ट्रोज्ज्वलाननः ॥ २

तलं तलेन संहत्य बाहू विक्षिप्य चासकृत् ।

उद्वृत्तनेत्रस्संक्रुद्धो दन्तान् दन्तेषु निष्कषन् ॥ ३

कोऽद्य मे भोक्तुकामस्य विघ्नं चरति दुर्मतिः ।
न बिभेति हिडिम्बी च प्रेषिता किमनागता ॥ ४

तमापतन्तं दृष्ट्वैव तथारूपं भयङ्करम् ।
हिडिम्ब्युवाच वित्रस्ता भीमसेनमिदं वचः ॥ ५

हिडिम्बी—

आपतत्येष दुष्टात्मा संक्रुद्धः पुरुषादकः ।
त्वं चापि भ्रातृभिस्सार्धं यद्ब्रवीमि तथा कुरु ॥ ६

अहं कामगमा चैव रक्षोबलसमन्विता ।
आरुहेमां मम श्रोणिं नेष्यामि त्वां विहायसा ॥ ७

प्रबोधयैनान् सोदर्यान् मातरं च नरर्षभ ।
सर्वानेव गमिष्यामि गृहीत्वा व्योमसक्तवत् ॥ ८

भीमसेनः

मा भैस्त्वं विपुलश्रोणि नैव किञ्चिन्मयि स्थिते ।
अहमेनं हनिष्यामि पश्यन्त्यास्ते सुमध्यमे ॥ ९

नायं प्रतिबलो भीरु राक्षसापशदो मम ।
सोढुं युधि परिस्पन्दम् अशक्तास्सर्वराक्षसाः ॥ १०

पश्य बाहू सुवृत्तौ मे हस्तिहस्तोपमौ शुभौ ।

ऊरू परिघसङ्काशौ संहतं चाप्युरो मम ॥ ११

विक्रमं मे महेन्द्रस्य यथा द्रक्ष्यसि शोभने ।
माऽवमंस्थाः पृथुश्रोणि मत्वा मामिह मानुषम् ॥ १२

हिडिम्बी—

नावमन्ये नरव्याघ्र त्वामहं देवरूपिणम् ।
दृष्टापदानास्तु मया मानुषेष्विह राक्षसाः ॥ १३

वैशम्पायनः—

तथा संजल्पतस्तस्य भीमसेनस्य भारत ।
वाचश्शुत्वा ततः क्रुद्धो राक्षसः पुरुषादकः ॥ १४

[1]पुंस्कामां शङ्कमानश्च चुकोप स निशाचरः ॥ १४॥

संक्रुद्धो राक्षसस्तस्या भगिन्याः कुरुसत्तम ।
विस्फार्य विपुले नेत्रे ततस्तामिदमब्रवीत् ॥ १५॥

हिडिम्बः—

कस्मान्मे भोक्तुकामस्य विघ्नं चरसि दुर्मते ।
न बिभेषि हिडिम्बे किं कामाद्वै विप्रमोहिता ॥ १६॥

---

1. क-ख-ग—अवेक्षमाणस्तस्याश्च हिडिम्बो मानुषं वपुः ।
स्रग्दामभूषितशिखां समग्रेन्दुनिभाननाम् ॥
सुभ्रूनासाक्षिकेशान्तां सुकुमारनखत्वचम् ।
सर्वाभरणसंयुक्तां सुसूक्ष्माम्बरधारिणीम् ॥
भगिनीं मानुषं रूपं बिभ्रतीं सुमनोहरम् [अधिकः पाठः]
ग—स ददर्शाग्रतस्तस्य भीमस्य पुरुषादकः ॥ [अधिकः पाठः]

धिक् त्वां पुरुषकामां वै मम विप्रियकारिणीम् ।
कुलस्य राक्षसेन्द्राणां सर्वेषामयशस्करीम् ॥ १७॥
यानिमानाश्रिताऽकार्षीर् विप्रियं सुमहन्मम ।
एष तानाशु सर्वांस्तु हनिष्यामि त्वया सह ॥ १८॥

वैशम्पायनः—

एवमुक्त्वा हिडिम्बीं स हिडिम्बो लोहितेक्षणः ।
वधायाभिपपातैनान् दन्तान् दन्तेषु निष्कषन ॥ १९॥
गर्जन्तमेवं विजने भीमसेनोऽभिवीक्ष्य तम् ।
रक्षन् प्रबोधं भ्रातॄणां मातुश्च परवीरहा ॥ २०॥
आपतन्तं च संप्रेक्ष्य भीमः प्रहरतां वरः ।
भर्त्सयामास तेजस्वी तिष्ठ तिष्ठेति चाब्रवीत् ॥ २१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि अष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥

॥ ९ ॥हिडिम्बवधपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

अस्मिन्नध्याये २१॥ श्लोकाः]

॥ एकोनपञ्चाशदधिकशततमोऽध्यायः ॥

भीमहिडिम्बयोर्युद्धम् ॥ १ ॥

वैशम्पायनः—

भीमसेनस्तु तं दृष्ट्वा राक्षसं प्रहसन्निव ।
भगिनीं प्रति सङ्क्रुद्धम् इदं वचनमब्रवीत् ॥ १

किं ते प्रियं हिडिम्बैतैः सुखसुप्तैः प्रबोधितैः ।
मामासादय दुर्बुद्धे तरसा त्वं नराशन ॥ २

राक्षस त्वमिमां चैव न स्त्रियं हन्तुमर्हसि ।
विशेषतोऽनपकृते परेणापकृते सति ॥ ३

न हीयं स्ववशा बाला मां तु कामयतेऽद्य वै ।
प्रेषितैषा ह्यनङ्गेन शरीरान्तरचारिणा ॥ ४

भगिनी तव दुर्बुद्धे राक्षसानां यशोहर ।
त्वन्नियोगेन चायाता रूपं मम निरीक्ष्य च ॥ ५

कामयत्येवमवशा नैषा दूषयते कुलम् ॥ ५॥

[1]अनङ्गेन कृते दोषे नेमां त्वमिह राक्षस ।
मयि तिष्ठति दुष्टात्मन् भगिनीं हन्तुमर्हसि ॥ ६॥

[2]समागच्छ मया सार्धम् एकैनैको नराशन ।
[3]अहमेव तु नेष्यामि त्वामद्य यमसादनम् ॥ ७॥

अद्य ते तलनिष्पिष्टं सिंहेनेव बलीयसा ।
[4]अद्य गात्राणि गृध्राश्च बला गोमायवस्तथा ॥ ८॥

---

1. घ—हन्तुमर्हसि दुर्बुद्धे चरश्रेत् संहर स्मरम् । [अधिकः पाठः]
2. घ—मदर्थं कामबाणार्तां त्वामहं हन्मि राक्षस । [अधिकः पाठः]
3. क-ख-ग—अद्य ते तलनिष्पिष्टं शिरो राक्षस दीर्यताम् ।
4. घ—शतधा भेदमायाति पूर्णकुम्भ इवाश्मनि ।
कुञ्जरस्येव निष्पिष्टं सिंहेनेव बलीयसा ॥
[अधिकः पाठः]

कर्षन्तु भुवि संहृष्टा निहतस्य मया मृधे ॥ ९

क्षणेनाद्य करिष्यामि वनं निहतकण्टकम् ।
पुरस्ताद्दूषितं नित्यं त्वया भक्षयता वनम् ॥ १०

अद्य त्वां भगिनी पापं कृष्यमाणं मया भुवि ।
द्रक्ष्यत्यद्रिप्रतीकाशं सिंहेनेव महाद्विपम् ॥ ११

निरावाधास्त्वयि हते मया राक्षसपांसन ।
वनमेतच्चरिष्यन्ति पुरुषा वनचारिणः ॥ १२

राक्षसः—

गर्जितेन भृशं किं ते कत्थनेन च मानव ।
कृत्वा तु कर्मणा सर्वं कत्थेथा मा चिरं कृथाः ॥ १३

बलिनं मन्यसे यस्माद् आत्मानं सपराक्रमम् ।
ज्ञास्यसेऽद्य मयाऽऽगम्य बलहीनं ततो भुवि ॥ १४

नेमांस्तावद्धनिष्यामि स्वपन्त्वेते यथासुखम् ।
एष त्वामेव दुर्बुद्धे हनिष्येऽप्रियवादिनम् ॥ १५

पीत्वा तवासृग्गात्रेभ्यस् ततः पश्चादिमानपि ।
हनिष्यामि ततः क्षुद्राम् इमां विप्रियकारिणीम् ॥ १६

वैशंपायनः—

एवमुक्त्वा [1]महाबाहुः संनद्धः पुरुषादकः ।

1. घ—ऽभ्यद्रवद्भीमः संक्रुद्धो भैरवं नदन् ।

अभ्यधावत् सुसंक्रुद्धो भीमसेनमरिन्दमम् ॥ १७

[1]तस्याभिपततस्तूर्णं भीमो भीमपराक्रमः ।
वेगेन प्रसृतं बाहुं निजग्राह हसन्निव ॥ १८

निगृह्य तं बलाद्भीमो विस्फुरन्तं चकर्ष ह ।
तस्मादेशाद्धनूंष्यष्टौ सिंहः क्षुद्रमृगं यथा ॥ १९

तदा स राक्षसः क्रुद्धः पाण्डवेन बलाद्धृतः ।
भीमसेनं समालिङ्ग्य व्यनदद्भैरवं स्वनम् ॥ २०

पुनर्भीमो बलादेव विचकर्ष महाबलः ।
मा शब्दस्सुखसुप्तानां भ्रातॄणां मे भवेदिति ॥ २१

[2]अन्योन्यं तौ समालिङ्ग्य विचकर्षतुरोजसा ।
राक्षसो भीमसेनश्च विक्रमं चक्रतुः परम् ॥ २२

[3]बभञ्जतुर्महावृक्षांल्लताश्च विचकर्षतुः ।

---

1. घ-विवृत्तास्यो विवृत्ताक्षो भुजमुद्यम्य वेगवान् । [अधिकः पाठः]
2. क-ख-ग-घ हस्ते गृहीत्वा तद्भक्षो दूरमन्यत्र नीतवान् ।
पुच्छे गृहीत्वा तुण्डेन गरुडः पन्नगं यथा ॥
[अधिकः पाठः]
3. क-ख ग-घ—भङ्क्त्वा वृक्षान् महाशाखांस्ताडयामासतुस्तदा ।
सालतालतमालाम्रवटार्जुनविभीतकान् ॥ १
न्यग्रोधप्लक्षखर्जूरपनसानश्मकण्टकान् ।
एतानन्यान् महावृक्षान् उत्खाय तरसाऽखिलान् ॥ २
उत्खायान्योन्यरोषेण ताडयामासतू रणे ।
यदाऽभवद्वनं सर्वं निर्वृक्षं वृक्षसङ्कुलम् ॥ ३

प्रमत्ताविव सङ्क्रुद्धौ मातङ्गौ षष्टिहायनौ ॥ २३

पादपानुद्वहन्तौ तावूरुवेगेन वेगितौ ।
स्फोटयन्तौ लताजालान्यूरुभ्यां प्राप्य सर्वतः ॥ २४

वित्रासयन्तौ शब्देन सर्वतो मृगपक्षिणः ।
बलेन बलिनौ मत्तावन्योन्यवधकाङ्क्षिणौ ॥ २५

भीमराक्षसयोर्युद्धं तदाऽवर्तत दारुणम् ॥ २५॥
[1]ऊरुबाहुपरिक्षेपात् कर्षन्तावितरेतरम् ।

उत्कर्षणं विकर्षणम् अपकर्षणमेव च ॥ २६॥
ततश्शब्देन महता गर्जन्तौ तौ परस्परम् ।

पाषाणसंघट्टनिभैः प्रहारैरभिजघ्नतुः ॥ २७॥
अन्योन्यं तौ समालिङ्ग्य विकर्षन्तौ परस्परम् ॥ २८

पूर्वतोऽनुवृत्तम्—

तदा शिलाश्च कुञ्जांश्च वृक्षान् कण्टकिनस्तथा ।
ततस्तौ गिरिशृङ्गाणि पर्वतांश्चाभ्रलेलिहान् ॥ ४
शिलाश्च गण्डपाषाणान् उत्खायादाय वैरिणौ ।
विक्षेपतुरुपर्याजावन्योन्यमरणेषिणौ ॥ ५
तद्वनं परितः पञ्चयोजनं निर्महीरुहम् ।
निर्लताकुञ्जपाषाणपर्वतं चक्रतुस्तदा ॥ ६
तयोर्युद्धेन राजेन्द्र तद्वनं भीमरक्षसोः ।
मुहूर्तेनाभवत्कूर्मपृष्ठवच्चक्षुषामप्रणम् ॥ [अधिकः पाठः]

1. क-ग—पुरा देवासुरे युद्धे वृत्रवासवयोरिव । [अधिकः पाठः]

[1]तयोश्शब्देन महता विबुद्धास्ते नरर्षभाः ।
सह मात्राऽथ ददृशुर् हिडिम्बीमग्रतस्स्थिताम् ॥ २९

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि एकोनपञ्चाशदधिकशततमोऽध्यायः ॥ १४९ ॥

॥ ९ ॥ हिडिम्बवधपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

[अस्मिन्नध्याये २९ श्लोकाः]

॥ पञ्चाशदधिकशततमोऽध्यायः ॥

कुन्तीहिडिम्बीसंवादः १ ॥ हिडिम्बीवार्तया भीमं हिडिम्बेन युध्यमानं ज्ञातवतां कुन्त्यादीनां तत्र गमनम् ॥ २ ॥ हिडिम्बवधः ॥ ३ ॥

वैशम्पायनः—

प्रबुद्धास्ते हिडिम्बाया रूपमालोक्य शोभनम् ।
विस्मिताः पुरुषव्याघ्रा बभूवुः पृथया सह ॥ १

ततः कुन्ती समीक्ष्यैनां विस्मिता रूपसंपदा ।
उवाच मधुरं वाक्यं सान्त्वपूर्वमिदं शनैः ॥ २

कुन्ती—

कस्य त्वं सुरगर्भाभे का वाऽसि वरवर्णिनि ।
केन कार्येण सुभगे कुतश्चागमनं तव ॥ ३

---

1. क-ख-घ—बाहुयुद्धमभूद्घोरं बलिवासवयोरिव ।
युद्धसंरम्भनिर्गच्छत्फूत्कारख्वनिस्वनम् ॥ [अधिकः पाठः]

यदि वाऽसि वनस्यास्य देवता यदि वाऽप्सराः ।
आचक्ष्व मम तत्सर्वं किमर्थं चेह तिष्ठसि ॥ ४

हिडिम्बी—

यदेतत्पश्यसि वनं नीलमेघनिभं महत् ।
निवासो राक्षसस्यैष हिडिम्बस्य ममैव च ॥ ५

तस्य मां राक्षसेन्द्रस्य भगिनीं विद्धि भामिनि ।
भ्रात्रा संप्रेषितामार्ये त्वां सपुत्रां जिघांसता ॥ ६

क्रूरबुद्धेरहं तस्य वचनादागता त्विह ।
अद्राक्षं हेमवर्णाभं तव पुत्रं वृकोदरम् ॥ ७

ततोऽहं सर्वभूतानां भावे विचरता शुभे ।
चोदिता तव पुत्रार्थं मन्मथेन वशानुगा ॥ ८

ततो वृतो मया भर्ता तव पुत्रस्त्वनिन्दिते ।
अपनेतुं व्यवसितो न चैवं शकितो मया ॥ ९

चिरायमाणां मां ज्ञात्वा ततोऽयं पुरुषादकः ।
स्वयमेवागतो हन्तुम् इमान् सर्वांस्तवात्मजान् ॥ १०

स तेन तव पुत्रेण मम कान्तेन धीमता ।
बलादितो विनिष्पिष्य अपकृष्टो महात्मना ॥ ११

[1]विकर्षन्तौ महावेगौ गर्जन्तौ च परस्परम् ।
पश्य त्वं युधि विक्रान्तौ तावेतौ नरराक्षसौ ॥ १२

---

1. क ख ग—निष्पिषन्तौ

वैशम्पायनः—

ततस्तस्या वचश्श्रुत्वा उत्पपात युधिष्ठिरः ।
अर्जुनो नकुलश्चैव सहदेवश्च वीर्यवान् ॥ १३

तौ ते ददृशुरासक्तौ विकर्षन्तौ परस्परम् ।
काङ्क्षमाणौ जयं चैव सिंहाविव रणोत्कटौ ॥ १४

तावन्योन्यं समाश्लिष्य [1]निष्पतन्तौ परस्परम् ।
दावाग्निधूमसङ्काशं चक्रतुः पार्थिवं रजः ॥ १५

वसुधारेणुसंवीतौ वसुधाधरसन्निभौ ।
बिभ्राजेते यथा शैलौ नीहारेणाभिसंवृतौ ॥ १६

ते पश्यन्तो महद्युद्धं सर्वे व्यथितचेतसः ॥ १६॥

राक्षसेन बलाद् भीमं क्लिश्यमानं निरीक्ष्य च ।
चिरप्रयुद्धौ दृष्ट्वा च अन्योन्यवधकाङ्क्षया ॥ १७॥

उवाचेदं वचः पार्थः प्रहसन्निव भारत ॥ १८

अर्जुनः—

भीम मा भैर्महाबाहो न त्वां बुध्यामहे वयम् ।
समेतं भीमरूपेण प्रसुप्ताश्श्रमकर्शिताः ॥ १९

साहाय्येऽस्मि स्थितः पार्श्वे योधयिष्यामि राक्षसम् ।
नकुलस्सहदेवश्च मातरं गोपयिष्यतः ॥ २०

1. क-ख-ग—निष्पिपन्तौ

भीमः—

उदासीनो निरीक्षस्व न कार्यस्संभ्रमस्त्वया ।
न जात्वयं पुनर्जीवेन्मद्भुजान्तरमागतः ॥ २१

[1]अयमस्मांस्तु नो हन्याज् जातु वै पार्थ राक्षसः ।
जीवन्तं न प्रमोक्ष्यामि मा भैषीर्भरतर्षभ ॥ २२

अर्जुनः—

पूर्वरात्रे प्रबुद्धोऽसि भीम क्रूरेण रक्षसा ।
क्षपा व्युष्टा न चेदानीं समाप्नोषि महारणम् ॥ २३

किमनेन चिरं भीम जीवता दुष्टचारिणा ।
नान्तरेण चिरं स्थातुम् इह शक्यं परन्तप ॥ २४

पुरा संरज्यते प्राची पुरा सन्ध्या प्रवर्तते ।
रौद्रे मुहूर्ते रक्षांसि भवन्ति बलवन्ति च ॥ २५

त्वरस्व भीम मा लीला जहि रक्षो विभीषणम् ।
पुरा विकुरुते मायां भुजयोस्सारमर्पय ॥ २६

माहात्म्यमात्मनो वेत्थ नराणां हितकाम्यया ।
रक्षो जहि यथा शक्रः पुरा वृत्रं महाहवे ॥ २७

अथवा मन्यसे भारं त्वमिमं राक्षसं युधि ।

1. क ग-घ—भुजयोरन्तरं प्राप्तो भीमसेनस्य राक्षसः ।
अमुक्त्वा पार्थ वीर्येण मृतो माभूदिति ध्वनिः ॥
[अधिकः पाठः]

आतिष्ठे तव साहाय्यं शीघ्रमेव तु हन्यताम् ॥ २८

[1]अथवा ह्यहमेवैनं हनिष्यामि वृकोदर ।
कृतकर्मा परिश्रान्तः साधु तावदुपारम ॥ २९

वैशंपायनः—

अर्जुनेनैवमुक्तस्तु भीमो भीमस्य रक्षसः ।
उत्क्षिप्य भ्रामयत्तूर्णं देहं शतगुणाधिकम् ॥ ३०

इति चोवाच संक्रुद्धो भ्रामयन राक्षसं तु सः ।
भीमसेनो महाबाहुर् अभिगर्जन् मुहुर्मुहुः ॥ ३१

भीमसेनः—

वृथा मांसैर्वृथा पुष्टो वृथा वृद्धो वृथामतिः ।
वृथा मरणमर्हस्त्वं वृथैव विनशिष्यसि ॥ ३२

क्षममेतत् करिष्यामि यथा वनमकण्टकम् ।
न पुनर्मानुषान् हत्वा भक्षयिष्यसि राक्षस ॥ ३३

वैशंपायनः—

इत्युक्त्वा भीमसेनस्तं निष्पिष्य धरणीतले ।
बाहुभ्यामवपीडयाशु पशुमारममारयत् ॥ ३४

[2]स मार्यमाणो भीमेन ननाद विपुलं स्वनम् ।
पूरयंस्तद्वनं सर्वं जलार्द्र इव दुन्दुभिः ॥ ३५

---

1. अ—कथं वा
2. अ—अथैनमाक्षिप्य बलात् पशुवच्चाप्यमारयत् । [अधिकः पाठः]

भुजाभ्यां योक्त्रयित्वा तु बलवान् पाण्डुनन्दनः ।
समुद्गृह्य शिरश्चास्य सग्रीवं तदुपाक्षिपत् ॥ ३६

[1]तस्य निष्कर्णनयनं निर्जिह्वं रुधिरोक्षितम् ।
[2]प्रपीडं भीमसेनेन शिरो विदशनं बभौ ॥ ३७

प्रसारितभुजोद्वृष्टो भिन्नमांसत्वगन्तरः ।
कबन्धभूतस्तत्रासीद् अद्रिर्वज्रहतो यथा ॥ ३८

हिडिम्बं निहतं दृष्ट्वा प्रहृष्टास्तत्र पाण्डवाः ।
हिडिम्बी चैव संप्रेक्ष्य निहतं राक्षसं रणे ॥ ३९

अदृष्टाश्चैव ये तस्यास् समेता भूतवादिकाः ।
पूजयन्ति स्म संहृष्टास् साधु साध्विति पाण्डवम् ॥ ४०

भ्रातरश्चापि संहृष्टा युधिष्ठिरपुरोगमाः ।
अपूजयन् नरव्याघ्रं भीमसेनमरिन्दमम् ॥ ४१

अभिपूज्य महात्मानं भीमं भीमपराक्रमम् ।
पुनरेवार्जुनो वाक्यम् उवाचेदं वृकोदरम् ॥ ४२

अर्जुनः—

अदूरे नगरं मन्ये वनादस्मादहं प्रभो ।
शीघ्रं गच्छाम भद्रं ते न नो विद्यात् सुयोधनः ॥ ४३

---

1. क-ख-ग-घ—ततो भित्त्वा शिरश्चास्य सग्रीवं तदुदाक्षिपत् । [अधिकः पाठः]

2. क-ख-ग—प्रविद्धं ; घ—प्राविध्य भीमसेनश्च ।

वैशम्पायनः—

ततस्सर्वे तथेत्युक्त्वा माता सह महारथाः ।
प्रययुः पुरुषव्याघ्रा हिडिम्बी चैव राक्षसी ॥ ४४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यामादिपर्वणि पञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥
॥ ९ ॥ हिडिम्बवधपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
[अस्मिन्नध्याये ४४ श्लोकाः]

॥ एकपञ्चाशदधिक शततमोऽध्यायः ॥

हिडिम्बीवधे प्रवृत्तस्य भीमस्य युधिष्ठिरकृतं निवारणम् ॥ १ ॥ हिडिम्बया स्वस्य धर्मज्ञत्वस्य भविष्यज्ज्ञत्वस्य च प्रकटनम् ॥ २ ॥ हिडिम्बाया धर्मिष्ठतां ज्ञात्वा तदङ्गीकरणे भीमं प्रति कुन्त्या आज्ञा ॥ ३ ॥

वैशम्पायनः—

सा [1]तानेवापतत्तूर्णं भगिनी तस्य रक्षसः ।
अब्रुवाणा हिडिम्बी तु राक्षसी पाण्डवान् प्रति ॥ १

अभिवाद्य ततः कुन्तीं धर्मराजं च पाण्डवम् ।
अभिपूज्य च तान् सर्वान् भीमसेनमभाषत ॥ २

हिडिम्बा—

अहं ते दर्शनादेव मन्मथस्य वशं गता ।
क्रूरं भ्रातृवशं हित्वा सा त्वामेवानुरुन्धती ॥ ३

1. क-ख-ग-घ—ततो न्यपतत्

राक्षसे रौद्रसङ्काशे तवापश्यं विचेष्टितम् ।
अहं शुश्रूषुरिच्छेयं तव गात्रं निषेवितुम् ॥ ४

भीमसेनः—

स्मरन्ति वैरं रक्षांसि मायामास्थाय मोहिनीम् ।
हिडिम्बि व्रज पन्थानं मा त्वं भ्रातॄनिषेवितम् ॥ ५

युधिष्ठिरः—

क्रुद्धोऽपि पुरुषव्याघ्र भीम मा च स्त्रियं वधीः ।
शरीरगुप्त्यभ्यधिकं धर्मं गोपाय पाण्डव ॥ ६

वधाभिप्रायमवधीस् त्वं महाबलराक्षसम् ।
रक्षसस्तस्य भगिनी किं नः क्रुद्धा करिष्यति ॥ ७

वैशम्पायनः—

हिडिम्बी तु ततः कुन्तीम् अभिवाद्य कृताञ्जलिः ।
युधिष्ठिरं तु कौन्तेयम् इदं वचनमब्रवीत् ॥ ८

हिडिम्बी—

आर्ये जानासि यद्दुःखम् इह स्त्रीणामनङ्गजम् ।
तदिदं मामनुप्राप्तं भीमसेनकृतं शुभे ॥ ९

साऽहं तत् परमं दुःखं [1]सहे कालप्रतीक्षया ।
सोऽयमभ्यागतः कालो भविता मे सुखावहः ॥ १०

मया ह्युत्सृज्य सुहृदो ज्ञातीन् स्वं धर्ममेव च ।

1. अ—सेहे

वृतोऽयं पुरुषव्याघ्रस् तव पुत्रः पतिश्शुभः ॥ ११

वरेणानेन तु विना नाहं जीवितुमुत्सहे ।
तदर्हसि कृपां कर्तुं मयि त्वं वरवर्णिनि ॥ १२

त्वं मां मूढेति वा मत्वा भक्तां वाऽनुगतेति वा ।
भर्त्राऽनेन महाभागे योजयस्व सुतेन ते ॥ १३

तमुपादाय गच्छेयं यथेष्टं देवरूपिणम् ।
पुनश्चैवानयिष्यामि विस्रम्भं कुरु मे शुभे ॥ १४

अहं समुपलप्स्ये प्राङ् मद्भ्रातुरुपवर्जनात् ॥ १४॥

ततस्सोऽभ्यपतद्रात्रौ भीमसेनजिघांसया ॥ १५

यथा यथा विक्रमते यथा चरति तिष्ठते ।
तथा तथा समाधाय पाण्डवं काममोहिता ॥ १६

न यातुधान्यहं त्वार्ये न चास्मि रजनीचरी ।
[1]कन्या रक्षस्सु साध्व्यस्मि राज्ञि सालकटङ्कटी ॥ १७

पुत्रेण तव संयुक्ता युवतिर्देववर्णिनी ।
सर्वान् वोऽहमुपस्थास्ये पुरस्कृत्य वृकोदरम् ॥ १८

अप्रमत्ता प्रमत्तेषु शुश्रूषुरसकृत्त्वहम् ।
वृजिनं तारयिष्यामि दासीवच्च नरर्षभ ॥ १९

पृष्ठेन वः प्रवक्ष्यामि क्षणेन गतिमीप्सिताम् ।

1. ब—ईशा रक्षस्सु साध्व्यस्मि राज्ञा

एवं ब्रुवन्ती हि तथा प्रत्याख्याता क्रियां प्रति ॥ २०
लभ्यान् दुष्कृतिनो लोकान् गमिष्येऽहं न संशयः ॥ २०॥
अहं हि मनसा ध्यात्वा सर्वं वेत्स्यामि सर्वदा ।
[1]आपन्निस्तरणे प्राणान् धारयेद्येन केनचित् ॥ २१॥
सर्वमापत्सु कर्तव्यं तद्धर्ममनुपश्यताम् ।
आपत्सु यो धारयति स वै धर्मविदुत्तमः ॥ २२॥
व्यसनं ह्येव धर्मस्य धर्मिणामापदुच्यते ।
पुण्यम् प्राणान् धारयति पुण्यं वै प्राणधारणम् ॥ २३॥
येन येन चरेद्धर्मं तस्मिन् गर्हा न विद्यते ।
महतोऽत्र स्त्रियं कामाद् बाधितां त्राहि मामपि ॥ २४॥
धर्मार्थकाममोक्षेषु दयां कुर्वन्ति साधवः ।
तं तु धर्ममिति प्राहुर् मुनयो धर्मवत्सलाः ॥ २५॥
दिव्यज्ञानेन पश्यामि अतीतानागतानहम् ।
तस्माद्वक्ष्यामि वश्रेय आसन्नं सर उत्तमम् ॥ २६॥
अद्यासाद्य सरस्स्नात्वा विश्रम्य च वनस्पतौ ।
श्वः प्रभाते महद्भूतं प्रादुर्भूतं जगत्पतिम् ॥ २७॥
व्यासं कमलपत्राक्षं दृष्ट्वा शोकं विहास्यथ ॥ २८
धार्तराष्ट्राद्विवासश्च दहनं वारणावते ।

---

1. क-ख-ग-घ—यूयं प्रसादं कुरुत भीमसेनो भजेत माम् ॥
[अधिकः पाठः]

त्राणं च विदुरात्तुभ्यं विदितं ज्ञानचक्षुषा ॥ २९
आवासे शालिहोत्रस्य स च वासं विधास्यति ॥ २९॥
वर्षवातातपसह अयं पुण्यो वनस्पतिः ॥ ३०
पीतमात्रे तु पानीये क्षुत्पिपासे विनश्यतः ॥ ३०॥
तपसा शालिहोत्रेण सरो वृक्षश्च निर्मितः ॥ ३१
कादम्बास्सारसा हंसाः कुरर्यः कुररैस्सह ।
रुवन्ति मधुरं गीतं गान्धर्वस्वनमिश्रितम् ॥ ३२

वैशम्पायनः—

तस्यास्तद्वचनं श्रुत्वा कुन्ती वचनमब्रवीत् ।
युधिष्ठिरं महाप्राज्ञं सर्वशास्त्रविशारदम् ॥ ३३

कुन्ती—

त्वं हि धर्मभृतां श्रेष्ठ मयोक्तं शृणु भारत ।
राक्षस्येषा हि वाक्येन धर्मं वदति साधु वै ॥ ३४
भावेन दुष्टा भीमं सा किं करिष्यति राक्षसी ।
भजतां पाण्डवं वीरम् अपत्यार्थं यदीच्छसि ॥ ३५

युधिष्ठिरः—

एवमेतद्यथाऽऽत्थ त्वं हिडिम्बे नात्र संशयः ।
स्थातव्यं तु त्वया धर्मे यथा ब्रूयास्सुमध्यमे ॥ ३६
नित्यं कृताह्निका स्नाता कृतशौचा सुरूपिणी ।

स्नातं कृताह्निकं भद्रे कृतकौतुकमङ्गलम् ॥ ३७
भीमसेनं भजेथास्त्वम् उदिते वै दिवाकरे ॥ ३७॥

अहस्सु विचरानेन यथाकामं मनोजवा ।
आनेतव्यस्त्वया भद्रे भीमसेनस्त्वयं निशि ॥ ३८॥

प्राक्सन्ध्यातो विमोक्तव्यो रक्षितव्यश्च नित्यशः ।
एवं रमस्व भीमेन यावद्गर्भस्य वेदनम् ॥ ३९॥

एष ते समयो भद्रे शुश्रूषयश्चाप्रमत्तया ।
नित्यानुकूलया भूत्वा कर्तव्यं शोभनं त्वया ॥ ४०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि एकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥
॥ ९ ॥ हिडिम्बवधपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
अस्मिन्नध्याये ४०॥ श्लोकाः]

॥ द्विपञ्चाशदधिकशततमोऽध्यायः ॥

हिडिम्बया सह पाण्डवानां शालिहोत्रसरोगमनम् ॥१॥ समयकरण-पूर्वं भीमेन हिडिम्ब्याः परिग्रहः ॥ २ ॥ रमणीयेषु प्रदेशेषु भीमेन सह क्रीडित्वा सायाह्ने शालिहोत्राश्रमं प्रति हिडिम्बानिवर्तनम् ॥ ३ ॥

वैशम्पायनः

युधिष्ठिरेणैवमुक्ता कुन्त्या चाङ्केऽधिरोपिता ।
भीमार्जुनान्तरगता यमाभ्यां च पुरस्कृता ॥ १

तिर्यग्युधिष्ठिरे याति हिडिम्बा भीमगामिनी ॥ १॥
शालिहोत्रसरो रम्यम् आसेदुस्ते जलार्थिनः ॥ २

तत्तथेति प्रतिज्ञाय हिडिम्बा राक्षसी तदा ।
वनस्पतितलं गत्वा परिमृज्य यथा गृहान् ॥ ३

पाण्डवानां च वासं सा कृत्वा पर्णमयं तथा ।
आत्मनश्च तथा कुन्त्या एकोद्देशे चकार सा ॥ ४

पाण्डवास्तु ततस्स्नात्वा शुद्धास्सन्ध्यामुपास्य च ।
तृषिताः क्षुत्पिपासार्ता जलमात्रेण वर्तयन् ॥ ५

शालिहोत्रस्ततो ज्ञात्वा क्षुधार्तान् पाण्डवांस्तदा ।
मनसा चिन्तयामास पानीयं भोजनं महत् ॥ ६

ततस्ते पाण्डवास्सर्वे विश्रान्ताः पृथया सह ॥ ६॥

यथा जतुगृहे वृत्तं राक्षसेन कृतं च यत् ।
कृत्वा कथा बहुविधाः कथान्ते पाण्डुनन्दनम् ॥ ७॥
कुन्ती राजसुता वाक्यं भीमसेनमथाब्रवीत् ॥ ८

कुन्ती—

यथा पाण्डुस्तथा मान्यस् तव ज्येष्ठो युधिष्ठिरः ।
अहं धर्मविधानेन मान्या गुरुतरी तव ॥ ९

तस्मात् पाण्डुहितार्थं मे युवराज हितं कुरु । ९॥
निकृता धार्तराष्ट्रेण पापेनाकृतबुद्धिना ।

दुष्कृतस्य प्रतीकारं न पश्यामि वृकोदर ॥ १०॥
तस्मात् कतिपयाहेन योगक्षेमं भविष्यति ॥ ११

क्षेमं दुर्गमिमं वासं वसिष्यामो यथासुखम् ॥ ११॥
इदमद्य महद्दुःखं धर्मकृच्छ्रं वृकोदर ॥ १२

दृष्ट्वैव त्वां महाप्राज्ञ अनङ्गाभिप्रचोदिता ।
युधिष्ठिरं च मां चैव वरयामास धर्मतः ॥ १३

धर्मार्थं देहि पुत्रं त्वं स नश्श्रेयः करिष्यति ।
प्रतिवाक्यं तु नेच्छामि ह्यावाभ्यां वचनं कुरु ॥ १४

वैशम्पायनः—
तथेति तत् प्रतिज्ञाय भीमसेनोऽब्रवीदिदम् ।

भीमसेनः—
शासनं ते करिष्यामि वेदशासनमित्यपि ॥ १५

वैशम्पायनः—
समक्षं भ्रातृमध्ये तु भीमसेनोऽब्रवीदिदम् ॥ १५॥

भीमसेनः—
शृणु राक्षसि सत्येन समयं ते वदाम्यहम् ॥ १६
यावत्कालेन भवति अपत्योत्पादनं शुभे ।
तावत्कालं चरिष्यामि त्वया सह सुमध्यमे ॥ १७

विशेषतो मत्सकाशे मा प्रकाशय नीचताम् ।
उत्तमस्त्रीगुणोपेता भजेथा वरवर्णिनि ॥ १८

वैशम्पायनः—

सा तथेति प्रतिज्ञाय हिडिम्बी राक्षसी तदा ।
गताऽहनि निवेशेषु भोज्यं राजार्हमानयत् ॥ १९

सा कदाचिद्विहारार्थं हिडिम्बी कामचारिणी ।
भीमसेनमुपादाय ऊर्ध्वमाचक्रमे ततः ॥ २०

वनेषु च सशैलेषु देवतायतनेषु च ।
मृगपक्षिविघुष्टेषु रमणीयेषु सर्वतः ॥ २१

कृत्वा सा परमं रूपं सर्वाभरणभूषिता ।
संजल्पन्ती सुमधुरं रमयामास पाण्डवम् ॥ २२

तथैव वनदुर्गेषु पर्वतद्रुमसानुषु ।
सरस्सु रमणीयेषु पद्मोत्पलवनेषु च ॥ २३

नदीद्वीपप्रदेशेषु [1]मणिहेमयुतेषु च ।
पत्तनेषु च रम्येषु महासालवनेषु च ॥ २४

देवारण्येषु पुण्येषु तापसायतनेषु च ।
[2]गुह्यकानां निवासेषु कुलपर्वतसानुषु ॥ २५

सर्वर्तुफलवृक्षेषु मानसेषु वनेषु च ।
बिभ्रती परमं रूपं रमयामास पाण्डवम् ॥ २६

---

1. क-ख-ग—वैदूर्यसिकतेषु च; घ-वैदूर्यविकृतेषु च ।
2. ख—सुतीर्थवनतोयासु तथा गिरिनदीषु च ।
सागरस्य प्रदेशेषु मणिहेमयुतेषु च ॥ [अधिकः पाठः]

यथा च सुकृती स्वर्गे मोदतेऽप्सरसा सह ।
स तथा परमप्रीतस् तया रेमे महाद्युतिः ॥ २७

शुभं हि जघनं तस्यास् सुवर्णमणिमेखलम् ।
न ततर्प मुदा मृद्नन् भीमसेनो मुहुर्मुहुः ॥ २८

रमयन्ती ततो भीमं तत्र तत्र मनोजवा ।
सा रेमे तेन संहर्षाद् अतृप्यन्ती मुहुर्मुहुः ॥ २९

अहस्सु विचरन्ती सा निशाकालेषु पाण्डवम् ।
आनीय वै स्वके गेहे दर्शयामास मातरम् ॥ ३०

भ्रातृभिस्सहितो नित्यं स्वपते पाण्डवस्तदा ॥ ३०॥

कुन्त्याः परिचरन्ती सा तस्याः पार्श्वे वसन्निशाम् ।
कामांश्च मुखवासादीन् आनयिष्यति भोजनम् ॥ ३१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥

॥ ९ ॥ हिडिम्बवधपर्वणि षष्ठोऽध्यायः ॥ ६ ॥

[अस्मिन्नध्याये ३१॥ श्लोकाः ।]

॥ त्रिपञ्चाशदधिकशततमोऽध्यायः ॥

व्यासागमनम् । ॥१॥ तेन कुन्त्या आश्वासनम् । ॥२॥ व्यासस्य प्रति निवर्तनं च ॥३॥ घटोत्कचोत्पत्तिः ॥४॥ पाण्डवानां एकचक्रा प्रवेशः ॥ ५॥

वैशम्पायनः—

तस्यां रात्र्यां व्यतीतायाम् आजगाम महाव्रतः ।
पाराशर्यो महाप्राज्ञो दिव्यदर्शी महातपाः ॥ १

तेऽभिवाद्य महात्मानं कृष्णद्वैपायनं तदा ।
तस्थुः प्राञ्जलयस्सर्वे सस्नुषा चैव माधवी ॥ २

व्यासः—

मयेदं मनसा पूर्वं विदितं भरतर्षभाः ।
यथा तु तैरधर्मेण धार्तराष्ट्रैर्विवासिताः ॥ ३

तद्विदित्वाऽस्मि संप्राप्तश् चिकीर्षुः परमं हितम् ।
न विषादो हि वः कार्यस् सर्वमेव सुखाय वः ॥ ४

सुहृदां रञ्जनं कर्म पुरा कृतमरिन्दमाः ।
तस्य सिद्धिरियं प्राप्ता मा शोचत परन्तपाः ॥ ५

समाप्ते दुष्कृते ते च यूयं चैव न संशयः ।
स्वराष्ट्रे विहरिष्यन्तो भविष्यथ सबान्धवाः ॥ ६

समाप्ते वत्सरे सर्वे यूयं चैव न संशयः ॥ ६॥

दीनतो बालतश्चैव स्नेहं कुर्वन्ति बान्धवाः ।
तस्मादभ्यधिकस्स्नेहो युष्मासु मम संप्रति ॥ ७॥
स्नेहपूर्वं चिकीर्षामि हितं यत्तन्निबोधत ॥ ८
वसतेह प्रतिच्छन्ना ममागमनकाङ्क्षिणः ।
एतद्वै शालिहोत्रस्य तपसा निर्मितं सरः ॥ ९
रमणीयमिदं तोयं क्षुत्पिपासाश्रमापहम् ॥ ९॥
कार्यार्थिनस्तु षण्मासान् विहरध्वं यथासुखम् ॥ १०

वैशम्पायनः—

एवं स तान् समाश्वास्य व्यासः पार्थानरिन्दमान् ।
स्नेहात्तु संपरिष्वज्य कुन्तीमाश्वासयत् प्रभुः ॥ ११
स्नुषे मा [1]रोदि मा रोदीत्येवं व्यासोऽब्रवीद्वचः ॥ ११॥

व्यासः

जीवपुत्रे सुतस्त्वेऽयं धर्मनित्यो युधिष्ठिरः ।
पृथिव्यां पार्थिवान् सर्वान् प्रशासिष्यति धर्मराट् ॥ १२॥
धर्मेण जित्वा पृथिवीम् अखिलां धर्मविद्वशी ।
स्थापयित्वा वशे सर्वां सपर्वतवनां शुभाम् ॥ १३॥
भीमसेनार्जुनबलाद् भोक्ष्यत्ययमसंशयम् ॥ १४
पुत्रास्तव च माद्र्याश्च पञ्चैते पुरुषोत्तमाः ।
स्वराष्ट्रे विहरिष्यन्ति सुखं सुमनसस्तदा ॥ १५

1. क-ख-ग-घ—रोद मारोदेत्येवं

यक्ष्यन्ति च नरव्याघ्रा विजित्य पृथिवीमिमाम् ।
राजसूयाश्वमेधाद्यैः क्रतुभिर्भूरिदक्षिणैः ॥ १६
अनुगृह्य सुहृद्वर्गं धनेन च [1]बलेन च ।
पितृपैतामहं राज्यम् आहरिष्यन्ति ते सुताः ॥ १७
[2]स्नुषा कमलपत्राक्षी नाम्ना कमलमालिनी ।
वशवर्तिनी तु भीमस्य पुत्रमेषा जनिष्यति ॥ १८
तेन पुत्रेण कृच्छ्रेषु भविष्यथ च तारिताः । १८॥
इह मासं प्रतीक्षध्वम् आगमिष्याम्यहं पुनः ।
देशकालौ विदित्वैव यास्यध्वं परमां मुदम् ॥ १९॥

वैशम्पायनः—

स तैः प्राञ्जलिभिस्सर्वैस् तथेत्युक्तो जनाधिप ।
जगाम भगवान् व्यासो यथागतमृषिः प्रभुः ॥ २०॥
गते भगवति व्यासे पाण्डवा विगतज्वराः ।
ऊषुस्तत्र च षण्मासान् वटवृक्षे यथासुखम् ॥ २१॥
शाकमूलफलाहारास् तपः कुर्वन्ति पाण्डवाः ॥ २२
अनुज्ञाता [3]महाराज ततः कमलमालिका ॥ २२॥

---

1. क-ख-घ—सुबेन च
2. घ—वैशम्पायनः—
इत्युक्त्वा स महाबुद्धिर्व्यासः कमललोचनः । [अधिकः पाठः]
3. क-ख-ग—तदा राजन् ततः कमलपालिका ।

रमयन्ती सदा भीमं तत्र तत्र मनोजवा ।
दिव्याभरणवस्त्राङ्गी दिव्यस्रगनुलेपना ॥ २३॥

एवं भ्रातॄन् सप्त मासान् हिडिम्बाऽवासयद्वने ।
पाण्डवान् भीमसेनार्थं राक्षसी कामरूपिणी ॥ २४॥

सुखं स विहरन् भीमस् तं कालं प[1]रिणामयत् ॥ २५

ततोऽलभत सा गर्भं राक्षसी कामरूपिणी ।
अतृप्ता भीमसेनस्य सप्तमासोपसंगता ॥ २६

प्रजज्ञे राक्षसी पुत्रं भीमसेनान्महाबलात् ।
विरूपाक्षं महावक्त्रं शङ्कुकर्णं विभीषणम् ॥ २७

भीमरूपं सुताम्राक्षं तीक्ष्णदंष्ट्रं महारथम् ।
महेष्वासं महावीर्यं महासत्वं महाजवम् ॥ २८

महाकायं महाकालं महापादं महाभुजम् ।
अमानुषं मानुषजं भीमवेगमरिन्दमम् ॥ २९

[2]बालोऽपि विक्रमं प्राप्तो मानुषेषु विशांपते ।
सर्वास्त्रेषु परं वीरः प्रकर्षमगमद्बली ॥ ३०

सद्यो हि गर्भं राक्षस्यो लभन्ते प्रसवन्ति च ।

---

1. क-ख-ग—र्यं
2. क-ख-ग-घ—यः पिशाचानतीत्यान्यान् बभूवाति स मानुषान् ।
[अधिकः पाठः]

कामरूपधराश्चैव भवन्ति बहुरूपिणः ॥ ३१
प्रणम्य विकचः पादावगृह्णात् स पितुस्तदा ।
मातुश्च परमेष्वासस् तौ च नामास्य चक्रतुः ॥ ३२
घटोऽहमुत्कचोऽस्मीति मातरं सोऽभ्यभाषत ।
अभवत्तेन नामास्य घटोत्कच इति स्म ह ॥ ३३
अनुरक्तश्च तानासीत् पाण्डवान् स घटोत्कचः ।
[1]तेषां च दयितो नित्यम् आत्मभूतो बभूव ह ॥ ३४
घटोत्कचो महाकायः पाण्डवान् पृथया सह ।
अभिवाद्य यथान्यायम् अब्रवीच्च प्रसाद्य तान् ॥ ३५
किं करोम्यहमार्याणां निःशङ्कं वदतानघाः ।
इति ब्रुवन्तं भैमसेनिं कुन्ती वचनमब्रवीत् ॥ ३६

कुन्ती—

त्वं कुरूणां कुले जातस् साक्षाद्भीमसुतो ह्यसि ।
ज्येष्ठपुत्रस्तु पञ्चानां साहाय्यं कुरु पुत्रक ॥ ३७

वैशम्पायनः—

पृथयाप्येवमुक्तस्तु प्रणम्यैवं वचोऽब्रवीत् ॥ ३७॥
यथा हि रावणो लोके इन्द्रजिद्वा महाबलः ।
तेषां वीर्यसमो वीर्ये विशिष्टश्चाभवं नृषु ॥ ३८॥

---

1. क-ग—विकीर्णकेशो घटते पित्रोरग्रे यतस्ततः ।
पुरतः पाण्डवानां च तेनासौ च घटोत्कचः ॥[अधिकः पाठः]

कृत्यकाल उपस्थास्ये [1]पितृनिति घटोत्कचः ।
आमन्त्र्य राक्षसश्रेष्ठः प्रतस्थे चोत्तरां दिशम् ॥ ३९॥
स हि सृष्टो भगवता शक्तिहेतोर्महात्मना ।
कर्णस्याप्रतिवीर्यस्य विनाशाय महात्मनः ॥ ४०॥

भीमसेनः—

सहवासो मया जीर्णस् त्वया कमलमालिके ।
पुनर्द्रक्ष्यसि राज्यस्थान् इत्यभाषत तां तदा ॥ ४१॥

हिडिम्बा—

यदा मे त्वं स्मरेः कान्त रिरंसू रहसि प्रभो ।
तदा तव वशं भूय आगन्तास्म्याशु भारत ॥ ४२॥

वैशम्पायनः—

इत्युक्त्वा सा जगामाशु भावमासज्य पाण्डवे ।
हिडिम्बा समयं स्मृत्वा स्वां गतिं प्रत्यपद्यत ॥ ४३॥
ततस्ते पाण्डवास्सर्वे शालिहोत्राश्रमे सदा ।
पूजितास्तेन वन्येन तमामन्त्र्य महामुनिम् ॥ ४४॥
जटाः कृत्वाऽऽत्मनस्सर्वे वल्कलाजिनवाससः ।
कुन्त्या सह महात्मानो बिभ्रतस्तापसं वपुः ॥ ४५॥
ब्राह्मं वेदमधीयाना वेदाङ्गानि च सर्वशः ।

---

1. क-ग-घ—भवत्स्मरणमात्रतः ।
महत्कृच्छ्रे वने दुर्गे पितृनिति घटोत्कचः॥[अधिकः पाठः]

नीतिशास्त्रं च धर्मज्ञ धर्मज्ञानं च पाण्डवाः ॥ ४६॥
शालिहोत्रप्रसादेन लब्ध्वा प्रीतिमनुत्तमाम् ॥ ४७

ते वनेन वनं गत्वा घ्नन्तो मृगगणान् बहून् ।
अतिक्रम्य ययू राजंस् त्वरमाणा महारथाः ॥ ४८

मत्स्यांस्त्रिगर्तान् पाञ्चालान् कीचकानां वनान्यपि ।
रमणीयान् वनोद्देशान् प्रेक्षमाणास्सरांसि च ॥ ४९

क्वचिद्वहन्तो जननीं त्वरमाणा महारथाः ।
क्वचिच्छन्नेन गच्छन्तस् ते जग्मुः पृथया सह ॥ ५०
पथि द्वैपायनं सर्वे ददृशुस्तं पितामहम् ॥ ५०॥

अभिप्रणम्य शिरसा पाराशर्यमुपेत्य च ।
ते पादौ जगृहुस्तस्य सह मात्रा परन्तप ॥ ५१॥

व्यासः—

तदाश्रमान्निर्गमनं मया ज्ञातं परन्तपाः ।
घटोत्कचस्य चोत्पत्तिं ज्ञात्वा प्रीतिरवर्धत ॥ ५२॥

इदं नगरमभ्याशे रमणीयं निरामयम् ।
वसतेह प्रतिच्छन्ना ममागमनकाङ्क्षिणः ॥ ५३।

वैशम्पायनः—

एवं स तान् समाश्वास्य व्यासः पार्थानरिन्दमान् ।

एकचक्रामभिगतां कुन्तीमाश्वासयत् प्रभुः ॥ ५४॥

व्यासः—

कुर्यान्न केवलं धर्मं दुष्कृतं च [1]तथा नरः।
सुकृतं दुष्कृतं लोके न कर्ता [2]नापि शोभने ॥ ५५॥

अवश्यं लभते कर्ता फलं वै पुण्यपापयोः।
दुष्कृतस्य फलेनैवं प्राप्तं व्यसनमुत्तमम् ॥ ५६॥

तस्मान्माधवि मानार्हे मा च शोके मनः कृथाः ॥ ५७

वैशम्पायनः—

एवमुक्त्वा निवेश्यैनान् ब्राह्मणस्य निवेशने।
जगाम भगवान् व्यासो यथाकाममृषिः प्रभुः ॥ ५८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि त्रिपञ्चाशदधिकशततमोऽध्यायः ॥ १५३ ॥

॥ ९ ॥ हिडिम्बवधपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

[अस्मिन्नध्याये ५८ श्लोकाः]

॥ हिडिम्बवधपर्व समाप्तम् ॥

---

1. अ—नराधमः 2. क-ख-ग-ङ—नास्ति

॥ चतुःपञ्चाशदधिकशततमोऽध्यायः ॥

(बकवधपर्व)

एकचक्रायां भिक्षामटतः पाण्डवान् दृष्ट्वा पौराणां वितर्कः ॥ १ ॥ कुम्भकाराद्भीमस्य महत्तरपात्रलाभः ॥ २ ॥ सभार्यस्य तद्गृहस्वामिनो ब्राह्मणस्य क्रन्दितं श्रुतवत्याः कुन्त्याः भीमानुमत्या ब्राह्मणान्तर्गृहप्रवेशः ॥ ३ ॥ ब्राह्मणप्रलापः ॥ ४ ॥

---

[1]वैशम्पायनः—

एकचक्रां गताः पार्था ब्राह्मणस्य निवेशने ।
[2]रमणीयानि पश्यन्तो वनानि विविधानि च ॥ १
पार्थिवानपि चोद्देशान् सरितश्च सरांसि च ।
चेरुर्भैक्षं सदा ते तु सर्व एव विशांपते ॥ २
युधिष्ठिरं च कुन्तीं च चिन्तयन्त उपासते ॥ २॥

---

1. क-ग—जनमेजयः—
एकचक्रां गताः पार्थाः कुन्तीपुत्रा महाबलाः ।
अतः परं द्विजश्रेष्ठ किमकुर्वत कर्शिताः ॥
वैशम्पायनः—
एकचक्रां गताः पार्था ब्राह्मणाकारशोभिताः ।
ऊषुस्ते सुचिरं कालं ब्राह्मणस्य निवेशने ॥ [अधिकः पाठः]
2. ख—अतः परं द्विजश्रेष्ठ किमकुर्वत पाण्डवाः ।
वैशम्पायनः—
एकचक्रां गतास्ते तु पुत्राः कुन्त्या महाबलाः ।
ऊषुस्तस्य चिरं कालं ब्राह्मणस्य निवेशने ॥ [अधिकः पाठः]

भैक्षं चरन्तस्तु तदा जटिला ब्रह्मचारिणः ।
बभूवुर्नागराणां ते स्वगुणैः प्रियदर्शनाः ॥ ३॥

नागराः—

दर्शनीया द्विजाश्शुद्धा देवगर्भोपमाश्शुभाः ।
भैक्षानर्हाश्च राज्यार्हास् सुकुमारास्तपस्विनः ॥ ४॥

[1]सर्वलक्षणसंपन्ना भैक्षं नार्हन्ति नित्यशः ।
कार्यार्थिनश्चरन्तीति तर्कयन्त इति ब्रुवन् ॥ ५॥
बन्धूनामागमान्नित्यम् उपचिन्त्य तु नागराः ।
भाजनानि च पूर्णानि भक्ष्यभोज्यैरकारयन् ॥ ६॥
मौनव्रतेन संयुक्ता भैक्षं गृह्णन्ति पाण्डवाः ॥ ७
माता चिरगतान् दृष्ट्वा शोचन्तीति च पाण्डवाः ।
[2]त्वरमाणा निवर्तन्ते मातृगौरवयन्त्रिताः ॥ ८
[3]निवेदयन्ति स्म सदा भैक्षं कुन्त्यै च ते निशि । ८॥

---

1. क-ग-घ—नैते यथार्थतो विप्रास् सुकुमारास्तपस्विनः ।
चरन्ति भूमौ प्रच्छन्नाः कस्माच्चित् कारणादिह ॥
[अधिकः पाठः]

2. क-ख-ग—दुःखाश्रुपूर्णनयना लिखन्त्यास्ते महीतलम् ।
भिक्षित्वा द्विजगेहेषु चिन्तयन्तश्च मातरम् ॥
[अधिकः पाठः]

3: घ—मात्रे निवेदयन्ति स्म कुन्त्यै भैक्षं दिवानिशम् ।

[1]तया विभक्तान् भिक्षाशान् भुञ्जते स्म पृथक् पृथक् ॥ ९

अर्धं तु भुञ्जते वीरास् सह मात्रा परन्तपाः ।
अर्धं सर्वस्य भैक्षस्य भीमो भुङ्क्ते महाभुजः ॥ १०

[2]स वैवर्ण्यं च काश्यं च जगामातृप्तिकारितम् ॥ १०॥

[3]तथैव वसतां तेषां ततो राजन् महात्मनाम् ।
अतिचक्राम सुमहान् कालोऽथ भरतर्षभ ॥ ११॥

भीमोऽपि क्रीडयित्वा तु मिथो ब्राह्मणबन्धुषु ।
कुम्भकारेण संबन्धालेभे पात्रं बृहत्ततः ॥ १२॥

[4]स ददाति महत् पात्रं भीमाय प्रहसन्निव ।
तस्याद्भुतं कर्म कृत्वा महान्तं भारमाददे ॥ १३॥

तस्य भारशतगुणः कुम्भकारमतोषयत् ॥ १४

[5]चक्रे चक्रे च मृद्भाण्डान् आददे भैक्षमाहरन् ।
तदादायागतं दृष्ट्वा हसन्ति प्रहसन्ति च ॥ १५

---

1. घ—सर्वं सम्भूय भैक्षान्नं मातृदत्तं पृथक् पृथक् ।
विभज्य भुञ्जते पञ्च ते यथाभागं पृथक् पृथक् ॥
2. क-ग-घ—न चाशितं च भवति कल्याणाङ्गभृतः पुरा । [अधिकः पाठः]
3. क-ग-घ—आज्यबिन्दुर्यथा वह्नौ महति ज्वलिते यथा ।
तथाऽर्धभागं भीमस्य भिक्षान्नस्य नृपोत्तम॥[अधिकःपाठः]
4. घ—कुम्भकारोऽददात् पात्रं महत्कृत्वाऽतिमात्रकम् ।
प्रहसन् भीमसेनाय विस्मितस्तस्य कर्मणा ॥ [अधिकः पाठः]
5. घ—यान् स कुरुते भाण्डान् सपुत्रश्शरदश्शतम् ॥ [अधिकः पाठः]

भक्ष्यभोज्यानि विविधान्यादाय प्रक्षिपन्ति च ।
एवमेष सदा भुक्त्वा मात्रे वदति वै रहः ॥ १६

न चाशितोऽस्मि भवति [1]कलवाण्या हृतं पुरा ॥ १६॥

[2]ततः कदाचिद्भैक्षाय गतास्ते पृथया सह ।
सङ्गत्य भीमसेनस्तु तत्रास्ते पृथया सह ॥ १७॥

अथार्तिजं महाशब्दं ब्राह्मणस्य निवेशने ।
भृशमुत्पतितं क्रूरं कुन्ती शुश्राव भारत ॥ १८॥

रोरूयमाणांस्तान् सर्वान् परिदेवयतश्च सा ।
कारुण्यात् साधुभावाच्च कुन्ती राजन् न चक्षमे ॥ १९॥

मथ्यमानेव दुःखेन हृदयेन पृथा ततः ।
उवाच भीमं कल्याणी कृपान्वितमिदं वचः ॥ २०॥

कुन्ती—

वसामस्सुसुखं पुत्र ब्राह्मणस्य निवेशने ।
अज्ञाता धार्तराष्ट्राणां सत्कृता वीतमन्यवः ॥ २१॥

सा चिन्तये सदा पुत्र ब्राह्मणस्यास्य किं न्वहम् ।
कदा प्रियं करिष्यामि यत्कुट्यामुषिता [3]वयम् ॥ २२॥

एतावान् पुरुषस्तात कृतं यस्मिन् न नश्यति ।

1. क-ग-घ—कल्याणान्नभृतः पुरा ; ख—कल्याण्या हृतवान् पुरा।
2. घ—इति पृष्टस्सदा पौरैः क्षुधितः किल पाण्डवः। [अधिकः पाठः]
3. घ—स्सुखम्।

यावच्च कुर्यादन्योऽस्य कुर्यादभ्यधिकं ततः ॥ २३॥

तथेदं ब्राह्मणस्यास्य दुःखमापतितं ध्रुवम् ।
[1]तत्रास्य यदि साहाय्यं कुर्यां साधु कृतं भवेत् ॥ २४॥

भीमसेनः—

ज्ञायतामस्य यद्दुःखं यतश्चैव समुत्थितम् ।
विदित्वा व्यवसिष्यामि यद्यपि स्यात् सुदुष्करम् ॥ २५॥

वैशम्पायनः—

तथैव कथयन्तौ तौ भूयश्शुश्रुवतुस्स्वनम् ।
आर्तिजं तस्य दुःखस्य सभार्यस्य विशांपते ॥ २६॥

अन्तर्गृहं ततस्तस्य ब्राह्मणस्य महात्मनः ।
विवेश त्वरिता कुन्ती बद्धवत्सेव सौरभी ॥ २७॥

ततस्तं ब्राह्मणं तत्र भार्यया च सुतेन च ।
दुहित्रा चैव सहितं ददर्श विनताननम् ॥ २८॥

ब्राह्मणः—

[2]धिगिदं जीवितं लोके गतसारमनर्थकम् ।
दुःखमूलं पराधीनं भृशमप्रियभावि च ॥ २९॥

जीविते परमं दुःखं जीविते परमो ज्वरः ॥ ३०
[3]जीविते वर्तमानस्य द्वन्द्वानामागमो ध्रुवः ॥ ३०॥

---

1. क-ग—कुर्यांसा सुकृतं ; ख-घ—कुर्याम सुकृतं ।
2. क-ख-ग-घ—नल
3. घ—जीवितं परमं दुःखं जीवितं परमेश्वरः ।

एकात्मना च धर्मार्थौ कामश्च न निषेव्यते ।
एतैश्च विप्रयोगेऽपि दुःखं परमकं मतम् ॥ ३१॥

आहुः केचित् परं मोक्षं स च नास्ति कथंचन ।
अर्थप्राप्तौ च नरकं कृत्स्नमेवोपपद्यते ॥ ३२॥

अर्थेप्सुता परं दुःखम् अर्थप्राप्तौ ततोऽधिकम् ।
जातस्नेहस्य चार्थेषु विप्रयोगे महत्तरम् ॥ ३३॥

[1]तदिदं जीवितं प्राप्य स्वल्पकालं महाभयम् ।
त्यागोऽप्ययं मया प्राप्तो भार्यया सहितेन च ॥ ३४॥

न हि योगं प्रपश्यामि येन मुच्येयमापदः ।
पुत्रदारेण वा सार्धं प्राद्रवेयमनामयम् ॥ ३५॥

उदितं हि मया पूर्वं न स्वार्थं वेत्थ ब्राह्मणि ।
क्षेमं यतस्ततो गन्तुं त्वया तु मम न श्रुतम् ॥ ३६॥

इह जाता विवृद्धाऽस्मि पिता माता ममेति वै ।
उक्तवत्यसि दुर्मेधे याच्यमाना मयाऽसकृत् ॥ ३७॥

स्वर्गतश्च पिता वृद्धस् तथा माता चिरं तव ।
बान्धवा भूतपूर्वाश्च तत्र वासे तु का रतिः ॥ ३८॥

न भोजनं विरुद्धं स्यान्न स्त्रीदेशो निबन्धनः ।

---

1. क-ख-ग—यावन्तो यस्य संयोगा द्रव्यैरिष्टैर्भवन्त्युत ।
तावन्तोऽस्य निखन्यन्ते हृदये शोकः ॥

[अधिकः पाठः]

सुदूरमपि कार्यार्थे [1]व्रजेद्गरुडवासवत् ॥ ३९॥

सोऽयं ते बन्धुकामाया अशृण्वन्त्या वचो मम ।
सेयमापदनुप्राप्ता भुङ्क्ष्व ब्राह्मणि तत्फलम् ॥ ४०॥

[2]अथवा त्वद्विनाशाय न हि शक्ष्यामि कंचन ।
परित्यक्तुमहं बन्धुं स्वयं शीघ्रं नृशंसवत् ॥ ४१॥

सहधर्मचरीं दासीं तथा मातृसमां सदा ।
सखीं च विहितां देवैर् नित्यं परमिकां रतिम् ॥ ४२॥

मात्रा पित्रा विरहितां सदा दाक्षिण्यभागिनीम् ।

1. क-ख-ग—व्रजेत्प्राज्ञस्तु हंसवत् ॥
2. क-ग-घ—उपस्थितं तु कल्याणि यथेष्टमनुभूयताम् ।
ब्राह्मणी—
मामेव प्रेषय त्वं तु बकाय करमद्य वै ॥
द्विजः—
त्यागोऽयं मम संप्राप्तो मम वा मे सुतस्य वा ।
तव वा तव पुत्र्याश्च अस्य वासस्य तत्फलम् ।
न शृणोषि वचो मह्यं तत्फलं भुङ्क्ष्व भामिनि ।
अथवाऽहं न शक्ष्यामि स्वयं मनुं सुतं मम ।
एकं त्यक्तुं न शक्नोसि भवतीं च सुतामपि ।
[अधिकः पाठः]
ख—उपस्थितं तु कल्याणि यथेष्टमनुभूयताम् ।
ब्राह्मणी—
मामेव प्रेषय त्वं तु बकाय करमद्य वै ।
द्विजः—
बन्धुप्रणाशसंप्राप्तो भृशं दुःखकरो मम । [अधिकः पाठः]

वरयित्वा यथान्यायं मन्त्रवत् परिणीय च ॥ ४३॥

कुलीनां शीलसंपन्नाम् अपत्यजननीमथ ।
त्वामहं जीवितस्यार्थे साध्वीमनपकारिणीम् ॥ ४४॥

परित्यक्तुं न शक्ष्यामि भार्यां नित्यमनुव्रताम् ॥ ४५
कुत एव परित्यक्तुं पुत्रं शक्ष्याम्यहं [1]सुताम् ।

[2]भर्तुरर्थाय निक्षिप्तां न्यासं धात्रा महात्मना ॥ ४६

यस्यां दौहित्रजाँल्लोकान् आशंसे पितृभिस्सह ॥ ४६॥
स्वयमुत्पादितां बालां कथमुत्स्रष्टुमुत्सहे ॥ ४७

[3]मन्यन्ते केचिदधिकं स्नेहं पुत्रे पितुर्नराः ।
कन्यायां केचिदपरे मम तुल्यावुभौ मतौ ॥ ४८

---

1. क-ख-ग-घ—स्वयम्
2. क-ख-ग-घ—अप्राप्तयौवनं बालम् अज्ञातव्यञ्जनाकृतिम्।
प्रार्थयेऽहं परां प्रीतिं यस्मिन् स्वर्गफलानि च ॥
दयितं मे कथं बालम् अहं त्यक्तुमिहोत्सहे ।
यस्य जातस्य पितरो मुखं दृष्ट्वा दिवं गताः ॥
अहं मुक्तः पितृऋणाद्यस्य जातस्य तेजसा ।
तमहं ज्येष्ठपुत्रं मे कुलनिस्तारकं भुवि ॥
मम पिण्डोदकनिधिं कथं त्यक्ष्यामि पुत्रकम् ।
कुत एव परित्यक्तुं पुत्रीं शक्ष्याम्यहं स्वयम् ॥
3. घ—मेधाविनीमदोषां तां शुश्रूषुमनहंकृताम् ।
तामिमां मे सुतां बालां नाहमुत्स्रष्टुमुत्सहे ॥ [अधिकः पाठः]

यस्यां लोके प्रतिष्ठा च वरं नित्यमथो सुखम् ।
अपापां तां कथं बालाम् उत्स्रष्टुमहमुत्सहे ॥ ४९

काङ्क्षमाणा रतिं चेह सुखानि च बहूनि च ।
उत्पादयत्यपत्यानि धर्मकामार्थहेतवे ॥ ५०

[1]आत्मानमपि चोत्सृज्य गते प्रेतवशं मयि ।
त्यक्ता ह्येते मया [2]व्यक्तं नेह शक्ष्यन्ति जीवितुम् ॥ ५१

एषां चान्यतमत्यागो नृशंसो गर्हितो बुधैः ।
[3]स कृच्छ्रामहमापन्नो न शक्तस्तर्तुमापदम् ॥ ५२

अहो धिक् कां गतिं त्वद्य गमिष्यामि सबान्धवः ।
सर्वैस्सह मृतं श्रेयो न च मे जीवितुं क्षमम् ॥ ५३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि चतुःपञ्चाशदधिकशततमोऽध्यायः ॥ १५४ ॥

॥ १० ॥ बकवधपर्वणि प्रथमोऽध्यायः ॥ १ ॥

[अस्मिन्नध्याये ५३ श्लोकाः]

---

1. ख—मेधाविनीमदोषां च शुश्रूषुं निरहङ्कृताम् ।
तामिमां मे सुतां बालां कथमुत्स्रष्टुमुत्सहे ॥ [अधिकः पाठः]
2. क-ख-ग-घ—सर्वे
3. क-ख-ग-घ—आत्मत्यागे कृते चेमे मरिष्यन्ति मया विना ।
[अधिकः पाठः]

॥ पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥

ब्राह्मणं प्रति तत्पत्नीवाक्यम्॥ १ ॥

ब्राह्मणी—

न सन्तापस्त्वया कार्यः प्राकृतेनेव कर्हिचित् ।
न हि सन्तापकालोऽयं विशेषात् पुरुषस्य ह ॥ १

अवश्यं निधनं सर्वैर् गन्तव्यमिह मानवैः ।
अवश्यं करणीयार्थे संतापो नैव विद्यते ॥ २

भार्या पुत्रश्च दुहिता सर्वमात्मार्थमिष्यते ।
व्यथां च जहि बुद्ध्या त्वं स्वयं यास्यामि तत्र च ॥ ३

एतद्धि परमं नार्याः कार्यं लोके सनातनम् ।
प्राणानपि परित्यज्य भर्तुर्हि हितमाचरेत् ॥ ४

तच्च तत्र कृतं कर्म तवापीदं सुखावहम् ।
भवत्यमुत्र चाक्षय्यं लोकेऽस्मिंश्च यशस्करम् ॥ ५

एष चैव गुरुर्धर्मो यं प्रवक्ष्याम्यहं तव ।
[1]कामश्च तव धर्मश्च [2]भूयानर्थः प्रदृश्यते ॥ ६

यदर्थमिष्यते भार्या प्राप्तस्सोऽर्थस्त्वया मयि ॥ ६॥

1. क-ख-ग-घ—अर्थश्च 2. क-ख-ग-घ—भूयानत्र

कुमारश्चैव कन्या च कृताऽहमनृणा त्वया ॥ ७
समर्थः पोषणे वापि सुतयो रक्षणे तथा ।
न त्वहं सुतयोरशक्ता तथा रक्षणपोषणे ॥ ८
ममापि त्वद्विहीनायाः सर्वकामार्थमानद ।
कथं स्यातां युतौ बालौ वृत्तिर्वापि कथं भवेत् ॥ ९
कथं हि विधवा बाला बालपुत्रा विना त्वया ।
मिथुनं जीवयिष्यामि स्थिता साधुगते पथि ॥ १०
अहंकृतावलिप्तैश्च प्रार्थ्यमानामिमां सुताम् ।
अयुक्तैस्तव संबन्धैः [1]प्रार्थ्यमाना दुरात्मभिः ॥ ११
[2]स्थातुं पथि न शक्ष्यामि सज्जनेष्टे द्विजोत्तम ॥ ११॥
स्त्रीजन्म गर्हितं नाथ लोके दुष्टजनाकुले ।
मातापित्रोर्वशे कन्या प्रौढा भर्तृवशे तथा ॥ १२॥
अभावे चानयोः पुत्रे स्वतन्त्रा स्त्री विगर्हिता ॥ १३
अनाथत्वं स्त्रियो द्वारं दुष्टानां विवृतं हि तत् ।
[3]वस्त्रखण्डं घृताक्तं हि यथा संकृष्यते श्वभिः ॥ १४

---

1. क-ख-ग-घ—कथं शक्ष्यामि रक्षितुम् ॥
2. क-ख-ग-घ—उत्सृष्टमामिषं भूमौ प्रार्थयन्ति यथा खगाः ।
प्रार्थयन्ति जनास्सर्वे वीरहीनां तथा स्त्रियम् ।
साऽहं विचाल्यमाना हि प्रार्थ्यमाना दुरात्मभिः ॥
[अधिकः पाठः]
3. क-ग-घ—दृष्ट्वा तथाऽबलाऽनाथा प्रार्थितैश्चार्थगर्वितैः ।[अधिकः पाठः]

कथं तव सुतं चेमम् एकं बालमसंस्कृतम् ।
पितृपैतामहे मार्गे नियन्तुमहमुत्सहे ॥ १५

कथं शक्ष्यामि बालेऽस्मिन् गुणानाधातुमीप्सितान् ।
अनाथे सर्वतो लुप्ते यथा त्वं धर्मदर्शनः ॥ १६

सुतामपि च ते बालाम् अनाथां परिभूय माम् ।
अनर्हाः प्रार्थयिष्यन्ति शूद्रा वेदश्रुतिं यथा ॥ १७

तां चेदहं न दित्सेयं त्वद्गुणैरुपबृंहिताम् ।
प्रमथ्यैनां हरेयुस्ते [1]हविर्ध्वाङ्क्षा इवाध्वरे ॥ १८

संप्रेक्षमाणाः पुत्रीं ते नानुरूपमिवात्मनः ॥ १८॥
अनर्हवशमापन्नाम् इमां चापि सुतां तव ॥ १९
अवलिप्तैर्नरैर्दृष्ट्वा [2]मरिष्यामि न संशयः ॥ १९॥
[3]तौ च हीनौ मया बालौ त्वया चैव तथाऽऽत्मजौ ।
विनङ्क्ष्येतां न सन्देहो मत्स्याविव जलक्षये ॥ २०॥

त्रितयं सर्वथा ब्रह्मन् विनाशिष्यत्यसंशयम् ।

---

1. क-ग—कोऽस्याः कर्ता भवेदिति ।
पश्यन्त्या मे हरन्त्येव क्रोशन्त्याश्चापि निस्त्रपाः ।
अनाथत्वात् सुतां विद्वन् हविर्ध्वाङ्क्षा इवाध्वरे ॥
2. अ-घ—च
3. ख—मृते त्वयि मयाऽवश्यं सहागमनमिष्यते ।
मृते भर्तरि नारीणां सुखलेशो न विद्यते ॥ [अधिकः पाठः]

त्वया विहीनं तस्मात्त्वं मां परित्यक्तुमर्हसि ॥ २१॥

इष्टा ह्येषा कुलस्त्रीणां पूर्वं भर्तुः परा गतिः ।
अनिष्टमिह पुत्राणां विषये परिवर्तितुम् ॥ २२॥

[1]मितं ददाति हि पिता मितं माता मितं सुतः ।
अमितस्य हि दातारं का पतिं नाभिनन्दति ॥ २३॥

परित्यक्तस्सुतश्चैव दुहितेयं तथा मया ।
बान्धवाश्च परित्यक्तास् त्वदर्थं जीवितं च मे ॥ २४॥

यज्ञैस्तपोभिर्नियमैर् दानैश्च विविधैस्तथा ।
विशेष्यते स्त्रिया भर्तुर् नित्यं प्रियहितेप्सुता ॥ २५॥

तदिदं यच्चिकीर्षामि धर्म्यं परमकं मतम् ।
इष्टं चैव हितं चैव तव चैव कुलस्य च ॥ २६॥

इष्टानि वाप्यपत्यानि द्रव्याणि सुहृदः प्रियाः ।
आपद्धर्मप्रमोक्षाय भार्या चापि मनस्विनी ॥ २७॥

एकतो वा कुलं कृत्स्नम् आत्मा वा कुलवर्धनः ।
न समं सर्वमेवेति बुधानामेष निश्चयः ॥ २८॥

---

3. क-ग-घ—हरिद्राञ्जनपुष्पादिसौमङ्गल्ययुता सती ।
मरणं याति या भर्तुस् तद्दत्तजलपायिनी ॥
भर्तृपादार्पितमनास् सा याति गिरिजापदम् ।
गिरिजायास्सखी भूत्वा मोदते नगकन्यया ॥
[अधिकः पाठः]

[1]स कुरुष्व मया कार्यं तारयात्मानमात्मना ।
अनुजानीहि मामार्य [2]सुतौ ते परिरक्ष वै ॥ २९॥

[3]अवध्यास्स्त्रिय इत्याहुर् धर्मज्ञा धर्मनिश्चये ।
धर्मज्ञान् राक्षसानाहुर् न हन्यात् स च मामपि ॥ ३०॥

निस्संशयं वधः पुंसां स्त्रीणां संशयितो वधः ।
अतो मामेव धर्मज्ञ प्रस्थापयितुमर्हसि ॥ ३१॥

भुक्तं प्रियाण्यवाप्तानि धर्मश्च चरितो मया ।
[4]त्वत्प्रसूतिः प्रिया प्राप्ता मा तप्स्ये त्यज्य जीवितम् ॥ ३२॥

[5]समीक्ष्य तदहं सर्वं व्यवसायं करोमि च ।
उत्सृज्यापि च मामार्य [6]वेत्स्यस्यन्यामपि स्त्रियम् ॥ ३३॥

ततः प्रतिष्ठितो धर्मो भविष्यति पुनस्तव ।

---

1. क-ग—उभयोः कोऽधिको विद्वन्नात्मानैवाधिकः कुलात् ।
आत्मनो विद्यमानत्वाद् भुवनानि चतुर्दश ॥
विद्यन्ते द्विजशार्दूल आत्मा रक्ष्यस्सदा त्वया ।
आत्मन्यविद्यमाने चेत् तस्य नास्तीह किञ्चन ।
एतज्जगदिदं सर्वम् आत्मना न समं किल ॥ [अधिकः पाठः]
2. क-ग-घ—त्वं सुतौ परिरक्ष मे ।
3. क-ग-घ—किञ्चान्यच्छृणु मे नाथ यद्वक्ष्यामि हितं तव ।
श्रुत्वाऽवधार्यतां तन्मे ततस्ते तद्धितं कुरु॥[अधिकः पाठः]
4. क-ग-घ—त्वच्छुश्रूषणसंभूता कीर्तिश्चाप्यतुला मम । [अधिकः पाठः]
5. क-ख-ग-घ—जातपुत्रा च वृद्धा च प्रियकामा च ते सदा ।
[अधिकः पाठः]
6. घ—स्त्रियमन्यां यदीच्छसि ।

[1]न चाप्यधर्मः कल्याण बहुपत्नीकता नृणाम् ॥ ३४॥
स्त्रीणां त्वधर्मस्सुमहान् भर्तुः पूर्वस्य लङ्घने ॥ ३५
एतत्सर्वं समीक्ष्य त्वम् आत्मत्यागं च गर्हितम् ।
आत्मानं तारय ब्रह्मन् कुलं च मम दारकौ ॥ ३६

वैशम्पायनः—

एवमुक्तस्तया भर्ता तां समालिङ्ग्य भारत ।
मुमोच बाष्पं शनकैस् सभार्यो भृशदुःखितः ॥ ३७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥ १५५ ॥
॥ १० ॥ बकवधपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[अस्मिन्नध्याये ३७ श्लोकाः]

॥ षट्पञ्चाशदधिकशततमोऽध्यायः ॥

ब्राह्मणं प्रति तत्कन्यावाक्यम् ॥ १ ॥ बालस्य वचनम् ॥ २ ॥

वैशम्पायनः—

तयोर्दुःखितयोर्वाक्यम् अतिमात्रं निशम्य सा ।
भृशं दुःखपरीताङ्गी कन्या तावभ्यभाषत ॥ १

1. क-ग-घ—वहस्व कुलजां कन्यां धर्मस्ते भविता पुनः ।
अनाश्रमी न तिष्ठेत क्षणमात्रमपि द्विजः ॥ [अधिकः पाठः]

कन्या—

किमिदं भृशदुःखार्तौ रोरवीथो ह्यनाथवत् ।
ममापि श्रूयतां किंचित् तच्छ्रुत्वा क्रियतां क्षमम् ॥ २

धर्मतोऽहं परित्याज्या युवयोर्नात्र संशयः ।
त्यक्तव्यां मां परित्यज्य त्रातं सर्वं मयैकया ॥ ३

इत्यर्थमिष्यतेऽपत्यं तारयिष्यति मामिति ।
अस्मिन्नुपस्थिते काले [1]तरतं प्लवया मया ॥ ४

इह वा तारयेद्दुःखाद् उत वा प्रेत्य तारयेत् ।
[2]सर्वथा तारयेत् पुत्र आत्मा वै पुत्र उच्यते ॥ ५

आकाङ्क्षन्तीह दौहित्रान् यदि नित्यं पितामहाः ।
तान् स्वयं वै परित्रास्ये रक्षन्ती जीवितं पितुः ॥ ६

भ्राता हि मम बालोऽयं गते लोकान्तरं त्वयि ।
अचिरेणैव कालेन विनशिष्यत्यसंशयः ॥ ७

तातेऽपि हि गते स्वर्गं विनष्टे च ममानुजे ।
पिण्डः पितॄणां व्युच्छिद्येत् तत् तेषामप्रियं भवेत् ॥ ८

पित्रा त्यक्ता तथा मात्रा भ्रात्रा चैव न संशयः ।
दुःखाद्दुःखतरं प्राप्य म्रियेयमतथोचिता ॥ ९

1. घ—तारितं व्यसनं मया ।
2. क-ख-ग-घ—पुन्नाम्नो नरकात्त्राणात् तनयः पुत्र उच्यते ।

[अधिकः पाठः]

त्वयि रोगविनिर्मुक्ते माता भ्राता च मे शिशुः ।
सन्तानश्चैव पिण्डश्च प्रतिष्ठास्यत्यसंशयम् ॥ १०

आत्मा पुत्रस्सखा भार्या कृच्छ्रं तु दुहिता किल ।
स कृच्छ्रान्मोचयात्मानं मां च धर्मेण योजय ॥ ११

अनाथा कृपणा बाला यत्र कचन शायिनी ।
भविष्यामि त्वया तात विहीना कृपणा [1]वद ॥ १२

अतस्त्वहं करिष्यामि कुलस्यास्य विमोक्षणम् ।
फलसंस्था भविष्यामि कृत्वा कर्म सुदुष्करम् ॥ १३

अथवा यास्यसे तत्र त्यक्त्वा मां द्विजसत्तम ।
पीडिताऽहं भविष्यामि तच्चावेक्षस्व मामपि ॥ १४

अतोऽस्मदर्थं धर्मार्थं प्रसवार्थं च सत्तम ।
आत्मानं परिरक्षस्व त्यक्तव्यां मां परित्यज ॥ १५

अवश्यकरणीयेऽर्थे मा स्म कालव्यतिक्रमः ।
त्वया दत्तेन तोयेन भविष्यति हितं च मे ॥ १६

किन्तु तस्मात्परं दुःखं यद् वयं स्वर्गते त्वयि ।
याचमानाः परादन्नं परिधावेमहि श्ववत् ॥ १७

त्वयि रोगविनिर्मुक्ते क्लेशादस्मात् सबान्धवे ।
अमृतेव सती लोके भविष्यामि सुखान्विता ॥ १८

1. क-ख-घ—वत

इत्येतदुभयं तात निशम्य तव यद्धितम् ।
तद्व्यवस्य तथाऽम्बाया हितं स्वस्य सुतस्य च ॥ १९

मातापित्रोः पुनः पुत्रा भवितारो गुणान्विताः ।
न तु पुत्रस्य पितरौ पुनर्जातु भविष्यतः ॥ २०

वैशम्पायनः—

एवं बहुविधं तस्या निशम्य परिदेवितम् ।
पिता माता च सा चैव कन्या प्ररुरुदुस्त्रयः ॥ २१

तथा प्ररुदितान् सर्वान् निशम्य तु सुतस्तयोः ।
उत्फुल्लनयनो बालः कलमव्यक्तमब्रवीत् ॥ २२

मा पिता रोद मा मातर् मा [1]स्वस इति पुनः पुनः ।
प्रहसन्निव सर्वांस्तान् एकैकं सोपसर्पति ॥ २३

ततस्स तृणमादाय प्रहृष्टः पुनरब्रवीत् ।
अनेन तं हनिष्यामि राक्षसं पुरुषादनम् ॥ २४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि षट्पञ्चाशदधिकशततमोऽध्यायः ॥ १५६ ॥

॥ १० ॥ बकवधपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

[अस्मिन्नध्याये २४ श्लोकाः ।]

---

1. क-ख-ग-घ—स्वसश्च पुनः पुनः

॥ सप्तपञ्चाशदधिकशततमोऽध्यायः ॥

कुन्त्या रोदनकारणप्रश्ने ब्राह्मणेन बकवृत्तान्तकथनम् ॥ १ ॥

वैशम्पायनः—

तथाऽपि तेषां दुःखेन परीतानां निरीक्ष्य च ।
तथा ब्रुवन्तं तं बालं हर्षस्समभवत्तदा ॥ १

इदमन्तरमित्येव कुन्ती समुपसृत्य तान् ।
गतासूनमृतेनेव सान्त्वयामास वै गिरा ॥ २

कुन्ती—

कुतोमूलमिदं दुःखं ज्ञातुमिच्छामि तत्त्वतः ।
तद्विदित्वाऽपकर्षेयं शक्यं चेदं परीक्षितुम् ॥ ३

ब्राह्मणः—

उपपन्नं सतामेतद् यद्ब्रवीषि तपोधने ।
न तु दुःखमिदं शक्यं मानुषेण व्यपोहितुम् ॥ ४

तथाऽपि तत्त्वमाख्यास्ये एतद्दुःखस्य संभवम् ।
शक्यं वा यदि वाऽशक्यं शृणु भद्रे यथातथम् ॥ ५

समीपे नगरस्यास्य बको नामेह राक्षसः ।
इतो गव्यूतिमात्रेऽस्ति यमुनागह्वरे गुहा ॥ ६

तस्यां घोरस्स वसति जिघांसुः पुरुषादकः ।

बको नाम स नाम्ना वै दुष्टात्मा राक्षसाधमः ॥ ७

ईशो जनपदस्यास्य पुरस्य च महाबलः ।
[1]तेनोपसृष्टा नगरी वर्षमद्य त्रयोदशम् ॥ ८

[2]स पुष्टो मानुषैर्मांसैर् दुर्बुद्धिः पुरुषादकः ।
तेनेयं पुरुषादेन भक्ष्यमाणा दुरात्मना ॥ ९

अनाथा नगरी नाथं त्रातारं नाधिगच्छति । ९॥
गुहायां च वसंस्तत्र बाधते सततं जनम् ।

स्त्रियो बालांश्च वृद्धांश्च यूनश्चापि दुरात्मवान् ॥ १०॥
अत्र मन्त्रैश्च होमैश्च भोजनैश्चापि राक्षसः ।

ईडितो द्विजमुख्यैश्च पूजितश्च दुरात्मवान् ॥ ११॥
यदा च सकलानेवं प्रसूदयति राक्षसः ।

तदैनं ब्राह्मणास्सर्वे समये समयोजयन् ॥ १२॥
माऽस्मान् कामाद्वधी रक्षो दास्यामस्ते सदा वयं ।

[3]पर्यायेण यथाकामम् इह मांसोदनं प्रभो ॥ १३॥

---

1. क-ख-ग-घ—माथिकः कामरूपी स राक्षसो वै महाबलः ।
[अधिकः पाठः]

2. क-ख-ग-घ-तत्कृते परचक्राच्च भूतेभ्यश्च न नो भयम्[अधिकः पाठः]

3. क-ख-ग-घ—अन्नं मांससमायुक्तं तिलचूर्णसमन्वितम् ।
सर्पिषा च समायुक्तं व्यञ्जनैश्च विभूषितम् ॥
[अधिकः पाठः]

[1]स्रजश्चित्रास्तिलान् पिण्डाँल्लाजापूपसुरासवान् ।
[2]शृताशृतान् पानकुम्भान् स्थूलमांसं शृताशृतम् ॥ १४॥
वनमाहिषवाराहभाल्लूकं च शृताशृतम् ।
रक्तकुम्भांश्च विवसान् अन्यांश्च विविधान् बहून् ॥ १५॥
[3]अद्यसिद्धैस्समायुक्तैस् तिलचूर्णैस्समाकुलान् ।
कुलाः कुलाच्च पुरुषं बलीवर्दौ च कालकौ ॥ १६॥
[4]प्राप्स्यसि त्वमसंक्रुद्धो रक्षोभागं प्रकल्पितम् ।
तिष्ठेह समयेऽस्माकम् इत्ययाचन्त तं द्विजाः ॥ १७॥
बाढमित्येव तद्रक्षस् तद्वचः प्रत्यगृह्णत ।
परचक्रान्न बिभ्यच्च रक्षणं स करोति च ॥ १८॥
तस्मिन् भागे विनिर्दिष्टे चास्थितस्समयं बली ।
एकैकं चैव पुरुषं संप्रयच्छन्ति वेतनम् ॥ १९॥
[5]स वारो बहुभिर्वर्षैर् भविष्यत्यसुखाय वै ॥ २०
तद्विमोक्षाय ये चापि यतन्ते पुरुषाः क्वचित् ।

---

1. घ—पिण्डलाजांस्तथाऽपूपांश् चूर्णा बहुविधोदनम् ।
2. घ—शृताशृतानि मांसानि पानपूर्णघटानपि ॥
3. सद्यस्सिद्धसमायुक्तं तिलचूर्णैस्समाकुलम् ।
4. घ—एवं भागं प्रदास्यामः समये इव तिष्ठति ॥
5. घ—ईशो जनपदस्यास्य पुरस्य च महाबलः ।
पुष्टो मानुषमांसेन कुबुद्धिः पुरुषादकः ।
रक्षत्यसुररक्षांस्यत्यम् इमं जनपदं बली ॥ [अधिकः पाठः]

सपुत्रदारांस्तान् हत्वा तद्रक्षो भक्षयिष्यति ॥ २१

नगरं चैव देशं च रक्षो बलसमन्वितम् ।
[1]रक्षत्यसुरराण्मित्यम् इमं जनपदं बली ॥ २२

वेत्रकीयगृहे राजा ह्येवं न्यायामुपाश्रितः ।
अनामयं जनस्यास्य न करोतीह शाश्वतम् ॥ २३

एतदर्हा वयं नूनं वसामो दुर्बलाश्रये ॥ २३॥

सत्सु चान्येषु देशेषु कुराजविषये रताः ॥ २४

ब्राह्मणाः कस्य वक्तव्याः कस्य वा च्छन्दचारिणः ॥ २४॥

गुणैरेते वसन्त्येव कामगाः पक्षिणो यथा ॥ २५

राजानं प्रथमं विन्देत् ततो भार्यां ततो धनम् ।
राजन्यसति लोकेऽस्मिन् कुतो भार्या कुतो धनम् ॥ २६

त्रयेण सञ्चयेनेह ज्ञातीन् पुत्रांश्च धारयेत् ।
विपरीतं मया त्वेतत् त्रितयं समुपार्जितम् ॥ २७

ते त्विमामापदं प्राप्य भृशं तप्स्यामहे वयम् ।
सोऽयमस्माननुप्राप्तो वारः कुलविनाशनः ॥ २८

भोजनं पुरुषं पेयं प्रदेयं वेतनं मया ॥ २८॥

न च मे विद्यते वित्तं संक्रेतुं पुरुषं क्वचित् ।
सुहृज्जनं प्रदातुं च न शक्ष्यामि कथञ्चन ॥ २९॥

1. अ-कोशे इदमर्धं नास्ति; घ-कोशे

गतिं चान्यां न पश्यामि तस्मान्मोक्षाय राक्षसात् ।
सोऽहं दुःखार्णवे मग्नो महत्यसुकरे भृशम् ॥ ३०॥

सहैवाहं गमिष्यामि बान्धवैरद्य राक्षसम् ।
ततो नस्सहितान् रक्षस् सर्वानेवोपभोक्ष्यति ॥ ३१॥

दुःखमूलमिदं भद्रे मयोक्तं प्रश्नतोऽनघे ॥ ३२

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्याम्
आदिपर्वणि सप्तपञ्चाशदधिकशततमोऽध्यायः ॥ १५७ ॥
॥ १० ॥ बकवधपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
[अस्मिन्नध्याये ३२ श्लोकाः]

॥ अष्टपञ्चाशदधिकशततमोऽध्यायः ॥

कुन्त्या बकं प्रति स्वपुत्रप्रेषणकथनम् ॥ १ ॥

कुन्ती—

न विषादस्त्वया कार्यो भयादस्मात् कथञ्चन ।
उपायः परिदृष्टोऽत्र तस्मान्मोक्षाय राक्षसात् ॥ १

नैव स्वयं सपुत्रस्य गमनं तत्र रोचये ॥ १॥

एकस्तव सुतो बालः कन्या चैका तपस्विनी ।
न चैतयोस्तथा पत्न्या गमनं तत्र रोचये ॥ २॥

मम पञ्च सुता ब्रह्मंस् तेषामेको गमिष्यति ।
स्वदर्थं बलिमादाय तस्य पापस्य रक्षसः ॥ ३॥

ब्राह्मणः—

नाहमेतत् करिष्यामि जीवितार्थं कथञ्चन ।
ब्राह्मणस्यातिथेश्चैव स्वार्थे प्राणैर्वियोजनम् ॥ ४॥

न त्वेतद्धर्मनित्यानां कुलीनानां सुदुष्करम् ।
यद्ब्राह्मणार्थं विसृजेद् आत्मानमपि चात्मजम् ॥ ५॥

आत्मनस्तु वधश्रेयो बोद्धव्यमिति रोचये ।
ब्रह्मवध्यात्मवध्याभ्यां श्रेयानात्मवधो मम ॥ ६॥

ब्रह्मवध्या परं पापं निष्कृतिर्नात्र विद्यते ।
अबुद्धिपूर्वं कृत्वाऽपि प्रत्यवायो हि बुध्यते ॥ ७॥

न त्वहं वधमाकाङ्क्षे स्वयमेवात्मनश्शुभे ।
परैः कृते वधे पापं न किंचिन्मम विद्यते ॥ ८॥

अभिसंधौ कृते तस्मिन् ब्राह्मणस्य वधे मया ।
निष्कृतिं न हि पश्यामि नृशंसं क्षुद्रमेव च ॥ ९॥

आगतस्य गृहे त्यागस् तथैव शरणार्थिनः ।
याचमानस्य च वधो नृशंसं परमं मतम् ॥ १०॥

कुर्याच्च निन्दितं कर्म न नृशंसं कथञ्चन ।
इति पूर्वे महात्मानः प्राहुर्धर्मविदो जनाः ॥ ११॥

श्रेयसे सह दारेण विनाशोऽद्य मम स्वयम् ।
ब्राह्मणस्य वधं नाहम् अनुमंस्ये कथञ्चन ॥ १२॥

कुन्ती—
ममाप्येषा मतिर्ब्रह्मन् विप्रा रक्ष्या इति स्थिता ।
न चाप्यनिष्टः पुत्रो मे यदि पुत्रशतं भवेत् ॥ १३॥
न चासौ राक्षसश्शक्तो मम पुत्रविनाशने ।
वीर्यवान् मन्त्रसिद्धश्च तेजस्वी च सुतो मम ॥ १४॥
राक्षसाय च तत्सर्वं प्रापयिष्यति भोजनम् ।
मोक्षयिष्यति चात्मानम् इति मे निश्चिता मतिः ॥ १५॥
समागताश्च वीरेण दृष्टपूर्वाश्च राक्षसाः ।
बलवन्तो महाकाया निहताश्चाप्यनेकशः ॥ १६॥
न त्विदं केपुचिद्ब्रह्मन् व्याहर्तव्यं कथञ्चन ।
विद्यार्थिनो हि मे पुत्रान् विप्रकुर्युः कुतूहलात् ॥ १७॥
गुरुणा चाननुज्ञातो ग्राहयेद्यस्सुतो मम ।
न कुर्यात्तस्य तत् कार्यम् इत्युवाच गुरुर्हितम् ॥ १८॥

वैशम्पायनः—
एवमुक्तस्तु पृथया स विप्रो भार्यया सह ।
हृष्टस्संपूजयामास तद्वाक्यममृतोपमम् ॥ १९॥
ततः कुन्ती च विप्रश्च सहितावनिलात्मजम् ।
तमब्रूतां कुरुष्वेति प्रतिजज्ञे तथेति सः ॥ २०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि अष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥
॥ १० ॥ बकवधपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
[अस्मिन्नध्याये २०॥ श्लोकाः]

॥ एकोनषष्ट्यधिकशततमोऽध्यायः ॥

भीमसेनप्रभावकथनेन कुन्त्या कृतं युधिष्ठिराश्वासनम् ॥ १ ॥ भीमेन बकवनगमनं शकटस्थान्नभोजनं च ॥ २ ॥ बकवधे भीमवचनम् ॥ ३ ॥

वैशम्पायनः—

[1]प्रतिज्ञातेऽथ भीमेन करिष्यामीति भारत ।
आजग्मुस्सहिताःसर्वे भैक्षमादाय पाण्डवाः ॥ १

भीमसेनं ततो दृष्ट्वा आपूर्णबदनं तथा ।
बुबोध धर्मराजस्तु हृषितं भीममच्युतम् ॥ २

हर्षितुं कारणं यत्तन्मनसाऽचिन्तयद्गुरुः ॥ २॥
स समीक्ष्य तदा राजञ् श्रोतुकामो विशांपतिः ।
आकारेणैव तं ज्ञात्वा पाण्डुपुत्रो युधिष्ठिरः ॥ ३॥
रहस्समुपविश्यैकस् ततः पप्रच्छ मातरम् ॥ ४

युधिष्ठिरः—

किं चिकीर्षत्ययं कर्म भीमो भीमपराक्रमः ।
भवत्यनुमते कच्चित् स्वयं कर्तुमिहेच्छति ॥ ५

कुन्ती—

ममैव वचनादेव करिष्यति परन्तपः ।
ब्राह्मणार्थे महत् कृत्यं मोक्षाय नगरस्य च ॥ ६

1. घ—करिष्यामीति भीमेन प्रतिज्ञातेऽथ भारत ।

[1]युधिष्ठिरः—

किमिदं साहसं तीक्ष्णं भवत्या दुष्करं कृतम् ।
परित्यागं हि पुत्रस्य न प्रशंसन्ति साधवः ॥ ७

कथं परसुतस्यार्थे स्वसुतं त्यक्तुमिच्छसि ।
लोकवृत्तविरुद्धं च पुत्रत्यागः कृतस्त्वया ॥ ८

यस्य बाहू समाश्रित्य सुखं सर्वे स्वपामहे ।
राज्यं चापहृतं क्षुद्रैर् आजिहीर्षामहे पुनः ॥ ९

यस्य दुर्योधनो वीर्यं चिन्तयन्नमितौजसः ।
न शेते वसतीस्सर्वा दुःखाच्छकुनिना सह ॥ १०

यस्य वीरस्य वीर्येण मुक्ता जतुगृहाद्वयम् ।
अन्येभ्यश्चैव पापेभ्यो निहतश्च पुरोचनः ॥ ११

यस्य बाहू समाश्रित्य वसुपूर्णां वसुन्धराम् ।
[2]इमां मन्यामहे प्राप्तां निहत्य धृतराष्ट्रजान् ॥ १२

तस्य व्यवसितस्यागो बुद्धिमास्थाय कां त्वया ।
कच्चिन्न दुःखैर्बुद्धिस्ते विप्लुता गतचेतसः ॥ १३

कुन्ती—

युधिष्ठिर न संतापः कार्यः प्रति वृकोदरम् ।

---

1. क-ग—बकाय कल्पितं पुत्र महान्तं बलिमुत्तमम् ।
भीमो भुनक्ति संपुष्टम् अप्येकाहं तपस्सुत ॥ [अधिकः पाठः]
2. घ—भोक्तुमिच्छामहे मातः निस्सपत्ना महात्मनः । [अधिकः पाठः]

न चायं बुद्धिदौर्बल्याद् व्यवसायः कृतो मया ॥ १४

न च शोकेन बुद्धिर्मे विप्लुता गतचेतना ॥ १४॥

[1]दृष्ट्वा वीरस्य विक्रान्तं तदा जतुगृहे महत् ।

हिडिम्बस्य वधाच्चैवं विश्वासोऽ[2]यं वृकोदरे ॥ १५॥

बाह्वोर्बलं हि भीमस्य नागायुतसमं महत् ।

येन यूयं गजप्रख्या निर्व्यूढा वारणावतात् ॥ १६॥

वृकोदराद्बलीहान्यो न जातो न जनिष्यति ।

योऽभ्युदीयाद्युधि श्रेष्ठम् अपि वज्रधरं स्वयम् ॥ १७॥

जातमात्रः पुरा चैव ममाङ्कात् पतितो गिरौ ।

शरीरगौरवाद्यस्य शिला गात्रैर्विचूर्णिता ॥ १८॥

तदहं प्रज्ञया ज्ञात्वा बलं भीमस्य पाण्डव ।

प्रतिकारे च विप्रस्य ततः कृतवती मतिम् ॥ १९॥

न च मोहान्न चाज्ञानान्न च लोभान्नच भ्रमात् ।

इदं व्यवसितं वीर बुद्धिपूर्वमिदं कृतम् ॥ २०॥

---

1. क-ख-ग- इह विप्रस्य भवने वयं पुत्र सुखोषिताः ।
तस्य प्रतिक्रिया तात मयैषा प्रसमीक्ष्यते ॥
एतावानेव पुरुषः कृतं यस्मिन्न नश्यति ।
ब्राह्मणार्थे महान् धर्मो जानामीत्थं वृकोदरे ॥
[अधिकः पाठः]

2. क-ख-ग-घ—मे

अर्थौ द्वावपि निर्वृत्तौ युधिष्ठिर भविष्यतः ।
प्रतीकारश्च वासस्य धर्मश्च चरितो महान् ॥ २१॥

यो ब्राह्मणस्य साहाय्यं कुर्यादर्थेषु केषु चित् ।
क्षत्रियस्स शुभाँल्लोकान् आप्नुयादिति [1]निश्चितम् ॥ २२॥

क्षत्रियः क्षत्रियस्यैव कुर्वाणो वधमोक्षणम् ।
विपुलां कीर्तिमाप्नोति लोकेऽस्मिंश्च परत्र च ॥ २३॥

वैश्यस्यैव च साहाय्यं कुर्वाणः क्षत्रियो भुवि ।
स सर्वेष्वपि लोकेषु प्रजा रक्षयते ध्रुवम् ॥ २४॥

शूद्रं तु मोक्षयेच्छत्रुं उद्विग्नं शरणार्थिनम् ।
प्राप्नोतीह कुले जन्म सह्यं राजसत्कृते ॥ २५॥

एवं हि भगवान् व्यासः पुरा कौरवनन्दन ।
प्रोवाच सुतरां प्राज्ञ तस्मादेतद्विकीर्षितम् ॥ २६॥

युधिष्ठिरः—

उपपन्नमिदं मातस् त्वया यद्बुद्धिपूर्वकम् ।
आर्तस्य ब्राह्मणस्यैवम् अनुक्रोशादिदं कृतम् ॥ २७॥

ध्रुवमेष महाबाहुर् विजित्य पुरुषादकम् ।
आगन्ता नगरं चैव तस्मात् पापाद्विमोक्ष्यते ॥ २८॥

यथा चैव न नो विद्युर् नरा नगरवासिनः ।

---

1. क-ख-ग-घ—नश्श्रुतम्

तथाऽयं ब्राह्मणो वाच्यः परिगृह्य च यत्नतः ॥ २९॥

वैशम्पायनः—

युधिष्ठिरेण संमन्त्र्य ब्राह्मणार्थमरिन्दम ।
कुन्ती प्रविश्य तान् सर्वान् सान्त्वयमास भारत ॥ ३०॥

[1]अथ रात्र्यां व्यतीतायां भीमसेनो महाबलः ।
ब्राह्मणं समुपागम्य वाक्यमेतदुवाच ह ॥ ३१॥

भीमसेनः—

आपदस्त्वां मोचयेयं सपुत्रं ब्राह्मण प्रियम् ।
मा भैषी राक्षसात्तस्मान्मां ददातु बलिं भवान् ॥ ३२॥

इह मामाशितं कर्तुं प्रयतस्व भवद्गृहे ।
अथात्मानं प्रदास्यामि तस्मै घोराय रक्षसे ॥ ३३॥

त्वरध्वं किं विलम्बध्वं मा चिरं कुरुतानघाः ।
व्यवस्येयं मम प्राणैर् युष्मान् रक्षितुमद्य वै ॥ ३४॥

वैशम्पायनः—

एवमुक्तस्तु भीमेन ब्राह्मणो भरतर्षभ ।
सुहृदां तत् समाख्याय ददावन्नं सुसंस्कृतम् ॥ ३५॥

पिशितोदनमाजह्रुर् अथास्मै पुरवासिनः ।
सघृतं सोपदंशं च सूपैर्नानाविधैस्सह ॥ ३६॥

---

1. क-ख-ग-घ—कोशेषु अत्र अध्यायसमाप्तिः दृश्यते ॥

तदाऽशित्वा भीमसेनो मांसानि विविधानि च ।
मोदकानि च मुख्यानि चित्रोदनचयान् बहून् ॥ ३७॥

ततोऽपिबद्दधिघटान् सुबहून् द्रोणसम्मितान् ॥ ३८
तस्य भुक्तवतः पौरा यथावत् समुपार्जितम् ।

उपजह्रुर्भृतभागं समृद्धमनसस्तदा ॥ ३९
ततो रात्र्यां व्यतीतायां सव्यञ्जनदधिप्लुतम् ।

समारुह्यान्नसंपूर्णं शकटं स वृकोदरः ॥ ४०
प्रययौ तूर्यनिर्घोषैः पौरैश्च परिवारितः ॥ ४०॥

आत्मानमेषोऽन्नभूतो राक्षसाय प्रदास्यति ।
तरुणोऽप्रतिरूपश्च दृढ औदरिको युवा ॥ ४१॥

वाग्भिरेवंप्रकाराभिस् स्तूयमानो वृकोदरः ।
चुचोद स बलीवर्दौ युक्तौ सर्वाङ्गकालकौ ॥ ४२॥

वादित्राणां प्रणादेन ततस्तं पुरुषादकम् ।
अभ्यगच्छत् सुसंहृष्टस् सर्वत्र मनुजैर्वृतः ॥ ४३॥

संप्राप्य स च तं देशम् एकाकी समुपाययौ ।
पुरुषादभयाद्भीतस् तत्रैवासीज्जनव्रजः ॥ ४४॥

स गत्वा [1]दूरमध्वानं दक्षिणामभितो दिशम् ।
यथोपदिष्टमुद्देशे ददर्श विपुलं द्रुमम् ॥ ४५॥

1. क-ख-ग-घ—दीर्घ

केशमज्जास्थिमेदोभिर् बाहूरुचरणैरपि ।
आर्द्रैश्शुष्कैश्च संकीर्णम् अभितोऽथ वनस्पतिम् ॥ ४६॥

गृध्रकङ्कबलच्छन्नं गोमायुगणसङ्कुलम् ।
उग्रगन्धमचक्षुष्यं श्मशानमिव दारुणम् ॥ ४७॥

तं प्रविश्य महावृक्षं चिन्तयामास वीर्यवान् ॥ ४८
यावन्न दृश्यते रक्षो बकस्तु बलदर्पितः ॥ ४८॥

रुचिरं विविधैर्भोज्यैर् अन्नैर्गिरिनिभैरिदम् ॥ ४९
शकटं सूपसंपूर्णं यावद्दृक्ष्यति राक्षसः ।
तावदेवेह भोक्ष्येऽहं दुर्लभं हि पुनर्भवेत् ॥ ५०
विप्रकीर्येत सर्वं हि प्रयुद्धे मयि रक्षसा ॥ ५०॥

अभोज्यं च शवं स्पृष्ट्वा निगृहीते बके भवेत् ॥ ५१
स त्वेवं भीमकर्मा तु भीमसेनोऽभिलक्ष्य च ।
उपविष्टश्शनैरन्नं भुङ्क्ते स्म परमं परम् ॥ ५२
तं ततस्सर्वतोऽपश्यन् द्रुमानारुह्य नागराः ॥ ५२॥

नारक्षो बलिमश्नीयाद् एवं बहु च मानवाः ।
भुङ्क्ते ब्राह्मणरूपेण बकोऽयमिति चाब्रुवन् ॥ ५३॥
स तं हसति तेजस्वी तदन्नमुपयुज्य च ।
आसाद्य च वनं तस्य रक्षसः पाण्डवो बली ॥ ५४॥
आजुहाव ततो नाम्ना तदन्नमुपयोजयन् ॥ ५५

ततस्स राक्षसश्श्रुत्वा भीमसेनस्य तद्वचः ।
आजगाम सुसंक्रुद्धो यत्र भीमो व्यवस्थितः ॥ ५६

महाकायो महावेगो दारयन्निव मेदिनीम् ।
त्रिशिखां भ्रुकुटिं कृत्वा संदश्य दशनच्छदम् ॥ ५७

भुञ्जानमन्नं तं दृष्ट्वा भीमसेनं स राक्षसः ।
विवृत्य नयने क्रुद्ध इदं वचनमब्रवीत् ॥ ५८

बकः—

कोऽयमन्नमिदं भुङ्क्ते मदर्थमुपकल्पितम् ।
पश्यतो मम दुर्बुद्धिर् यियासुर्यमसादनम् ॥ ५९

वैशम्पायनः—

भीमसेनस्तु तच्छ्रुत्वा प्रहसन्निव भारत ।
राक्षसं तमनादृत्य भुङ्क्त एव पराङ्मुखः ॥ ६०

ततस्स भैरवं कृत्वा समुद्यम्य करावुभौ ।
अभ्यद्रवद्भीमसेनं जिघांसुः पुरुषादकः ॥ ६१

तथाऽपि परिभूयैनं नेक्षमाणो वृकोदरः ।
राक्षसं भुङ्क्त एवान्नं पाण्डवः परवीरहा ॥ ६२

अमर्षेण तु संपूर्णः कुन्तीपुत्रस्य राक्षसः ।
जघान पृष्ठे पाणिभ्याम् उभाभ्यां पृष्ठतस्स्थितः ॥ ६३

तथा बलवता भीमः पाणिभ्यां भृशमाहतः ।

नैवावलोकयामास भुङ्क्त एव पराङ्मुखः ॥ ६४

[1]ततस्स भूयस्संक्रुद्धो वृक्षमादाय राक्षसः ।
ताडयिष्यंस्तदा भीमं पुनरभ्यद्रवद्बली ॥ ६५

न्यस्तं क्रुद्धेन तं वृक्षं प्रतिजग्राह वीर्यवान् ।
सव्येन पाणिना भीमो दक्षिणेना[2]पि भुक्तवान् ॥ ६६

[3]ततो भीमश्शनैर्भुक्त्वा तदन्नं पुरुषर्षभ ।
वार्युपस्पृश्य संहृष्टस् तस्थौ गिरिरिवाचलः ॥ ६७

[4]भुजवेगं तथाऽऽस्फोटं क्ष्वेलितं च महास्वनम् ।
कृत्वाऽऽह्वयत संक्रुद्धो भीमसेनोऽथ राक्षसम् ॥ ६८

[5]भीमसेनः--

बहुकालं सुपुष्टं ते शरीरं राक्षसाधम ।

---

1. क ग घ—भीमोदरगताः पिण्डास्सान्तरालाः परश्शतम् ।
रक्षःपाणिप्रहारेण संश्लिष्टा एकपिण्डवत् ॥
[अधिकः पाठः]

2. क ख ग व—प्यभुङ्क्त ह ।

3. क ग घ शकटान्नं ततो भुक्त्वा रक्षसः पाणिना सह ।
गृह्णन्निव महावृक्षं निश्शेषं पर्वतोपमम् ॥
भीमसेनो हसन्निव भुक्त्वा त्यक्त्वा च राक्षसम् ।
पीत्वा दधिघटान् पूर्णान् घृतकुम्भाञ्शतं शतम् ॥
[अधिकः पाठः]

4. क-ग—स्थित्वा मुहूर्तं विश्राम्य वीरासनमुपाश्रितः ।
भ्रामयन्तं महावृक्षम् आयान्तं भीमदर्शनम् ।
दृष्ट्वोत्थायाहवे वीरः सिंहनादं विनादयन् ॥ [अधिकः पाठः]

5. क-ग घ—उवाचाशनिशब्देन ध्वनिना भीषयन्निव । [अधिकः पाठः]

[1]मद्बाहुबलमाश्रित्य न त्वं [2]भूयो भविष्यसि ॥ ६९
अद्य मद्बाहुनिष्पिष्टो गमिष्यसि यमक्षयम् ॥ ६९॥

अद्यप्रभृति स्वप्स्यन्ति वेत्रकीयनिवासिनः ।
निरुद्विग्नाः पुरस्यास्य कण्टके सूद्धृते मया ॥ ७०॥

अद्य युद्धे शरीरं ते कङ्कगोमायुवायसाः ।
मया हतस्य खादन्तु विकर्षन्तु च भूतले ॥ ७१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि एकोनषष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥
॥ १० ॥ बकवधपर्वणि षष्ठोऽध्यायः ॥ ६ ॥
[अस्मिन्नध्याये ७१॥ श्लोकाः]

॥ षष्ट्यधिकशततमोऽध्यायः ॥

बकभीमयोर्युद्धम् ॥ १ ॥ भीमेन बकवधश्च ॥ २ ॥

वैशम्पायनः—

एवमुक्त्वा सुसंक्रुद्धः पार्थो बकजिघांसया ।
उपाधावद्बकश्चापि पार्थं पार्थिवसत्तम ॥ १
महाकायो महावेगो दारयन्निव मेदिनीम् ।
विरूपरूपः पिङ्गाक्षो भीमसेनमभिद्रवत् ॥ २

1. क-ग-घ—द्विपचतुष्पन्मांसैश्च बहुभिश्चौदनावलैः । [अधिकः पाठः]
2. क-ख-ग-घ—भूयस्त्वशिष्यसि

त्रिशिखां भ्रुकुटीं कृत्वा संदश्य दशनच्छदम् ॥ २॥
ततस्स भूयस्संक्रुद्धो वृक्षमादाय राक्षसः ।
ताडयिष्यंस्तदा भीमं [1]तरसाऽभ्यद्रवद्बली ॥ ३॥
क्षिप्रं क्रुद्धेन तं वृक्षं प्रतिजग्राह वीर्यवान् ।
सव्येन पाणिना भीमः प्रहसन्निव भारत ॥ ४॥
[2]ततस्स पुनरुद्यम्य वृक्षान् बहुविधान् बली ।
प्राहिणोद्भीमसेनाय तस्मै तांश्चैव पाण्डव ॥ ५॥
[3]वृक्षयुद्धमभूद्भीमं महीरुहविनाशनम् ।
सुघोरं वै महाराज बकपाण्डवयोस्तदा ॥ ६॥
नाम विश्राव्य तु बकस् समभिद्रुत्य पाण्डवम् ।
भुजाभ्यां परिजग्राह भीमसेनं महाबलम् ॥ ७॥
भीमसेनोऽपि तद्रक्षः परिगृह्य महाभुजः ।
विष्फुरन्तं महावेगं विचकर्ष बलाद्बली ॥ ८॥
स कृष्यमाणो भीमेन कर्षमाणश्च पाण्डवम् ।

---

1. क-ख-ग-घ—सहसा
2. क-ख-घ—तद्रक्षःप्रहितं वृक्षं महाशाखं वनस्पतिम्।
गृहीत्वा पाणिनैकेन सव्येनोद्यम्य चेतरम्।
रक्षोवदनमुद्वीक्ष्य भ्रुकुटीविकटाननम्।
दर्शयन् राक्षसे दन्तान् प्रजहासाशनिस्वनः॥
[अधिकः पाठः]
3. क-ख-घ—सर्वानपोहयद्वृक्षान् स्वस्य हस्तस्थशाखया।

समयुध्यत तीव्रेण क्रमेण पुरुषादकः ॥ ९॥

तयोर्वेगेन महता पृथिवी समकम्पत ।
पादपांश्च महाकायांश् चूर्णयामासतुस्तदा ॥ १०॥

जग्राह भीमः पाणिभ्यां गृहीत्वा चैनमाक्षिपत् ॥ ११
आक्षिप्तो भीमसेनेन पुनरेवोत्थितो हसन् ॥ ११॥

तत आलिङ्ग्य चैवैनं न्यहनद्वसुधातले ॥ १२
भीमोऽप्यतर्जयच्चैनं समाश्वसिहि चेत्यपि ॥ १२॥

आस्फोटयामास बली उत्तिष्ठेति च सोऽब्रवीत् ॥ १३

समुत्पत्य ततः क्रुद्धो रूपं कृत्वा महत्तरम् ।
विरूपस्सहसा तस्थौ तर्जयित्वा वृकोदरम् ॥ १४

अहसद्भीमसेनोऽथ राक्षसं भीमदर्शनम् ॥ १४॥

भीमसेनस्तु जग्राह ग्रीवायां भीमदर्शनम् ।
[1]भुजाभ्यां जानुनैकेन पृष्ठे समभिपीडयन् ॥ १५॥

[2]ततः क्रुद्धो विसृज्यैनं स भीमस्तस्य रक्षसः ।
स्वां कटीमीषदुत्क्षिप्य बाहू चैव परामृशत् ॥ १६॥

तस्य बाहू समादाय त्वरमाणो वृकोदरः ।

---

1. ध—असौ गृहीत्वा पाणिभ्यां पृष्ठतश्च व्यवस्थितः ।
जानुभ्यां पीडयित्वाऽथ पातयामास भूतले ॥
2. ध—पुनः क्रुद्धो विसृज्यैनं राक्षसं क्रोधदीपितम् ।

उत्क्षिप्य चावधूयैनं पातयन् बलवान् भुवि ॥ १७॥

तं तु वामेन पादेन क्रुद्धो भीमपराक्रमः ।
[1]उरस्येनं समाजघ्ने भीमस्तु पतितं भुवि ॥ १८॥

सुसङ्क्रुद्धस्समुत्पत्य भीममभ्यहनद्भृशम् ।
[2]व्यात्ताननो दीप्तजिह्वो बाहुमुद्यम्य दक्षिणम् ॥ १९॥

तेनाभिद्रुत्य क्रुद्धेन भीमो मूर्ध्नि समाहतः ॥ २०

मुष्टिना जानुना चैव वामे पार्श्वे समर्पितः ।
एवं निहन्यमानस्सन् राक्षसेन बलीयसा ॥ २१

रोषेण महताऽऽविष्टो भीमो भीमपराक्रमः ।
ततः क्रुद्धस्समुत्पत्य भीमो जग्राह राक्षसम् ॥ २२

तावन्योन्यं पीडयन्तौ पुरुषादवृकोदरौ ।
मत्ताविव महानागावन्योन्यं विचकर्षतुः ॥ २३

बाहुविक्षेपशब्दैश्च भीमराक्षसयोस्तदा ।
वेत्रकीयपुरी सर्वा वित्रस्ता समपद्यत ॥ २४

तयोर्वेगेन महता तत्र भूमिरकम्पत ॥ २४॥

1. घ—क्रुद्धस्सोऽपि समुत्क्षिप्य वेगेन महता रुषा ।
उद्धृत्य पाणियुगलं भीमस्योरस्यताडयत् ॥ [अधिकः पाठः]
2. घ—व्यात्ताननेन घोरेण लम्बजिह्वेन रक्षसा ।
दक्षिणं बाहुमुद्यम्य तेनाभिद्रुत्य वेगतः ॥

पादपान् वीरुधश्चैव चूर्णयामासतुश्च तौ ॥ २५

समागतौ च तौ वीरावन्योन्यवधकाङ्क्षिणौ ।
[1]अश्मभिः पादवेगैश्च चूर्णयामासतुस्तदा ॥ २६

[2]अथ तं लोलयित्वा तु भीमसेनो महाबलः ।
[3]अगृह्णात् परिरभ्यैनं भुजाभ्यां भरतर्षभ ॥ २७

जानुभ्यां परिजग्राह भीमसेनो बकं बलात् ।
[4]विस्फुरन्तं महाकायं विचकर्ष महाबलः ॥ २८

विकृष्यमाणो भीमेन कर्षंश्च युधि पाण्डवम् ।

---

1. क-ग-घ—गिरिभिर्गिरिशृङ्गैश्च पाषाणैः पर्वतच्युतैः ।
[अधिकः पाठः]

2. क-ग-घ—आयामविस्तराभ्यां च परितो योजनत्रयम् ॥
निर्महीरुहपाषाणं गिरिकुञ्जलतावलिम् ।
चक्रतुर्युद्धदुर्मत्तौ कूर्मपृष्ठोपमां महीम् ।
मुहूर्तमेवं संयुध्य समं रक्षःकुरूत्तमौ ॥
ततो रक्षोविनाशाय मतिं कृत्वा वृकोदरः ।
दन्तान् कटिकटीकृत्य दृष्ट्वा च दशनच्छदम् ॥
नेत्रे संवृत्य विकटं तिर्यक्प्रैक्षत राक्षसम् ॥
[अधिकः पाठः]

3. ग-घ—अथ जानुप्रहारैश्च मुष्टिभिर्वज्रसन्निभैः ।
घोरैः पादप्रहारैश्च क्षोभयामास राक्षसम् ॥ [अधिकः पाठः]

4. घ—भग्नोरुबाहुसक्थिश्च विस्रंसद्देहबन्धनः ।
प्रस्वेदो दीर्घनिश्वासो निर्यज्जिह्वाक्षितारकः ॥
अजाण्डस्फोटनं कुर्वन्नाक्रोशाशनिसन्निभैः ।
भूमौ निपत्य लुलुठे दण्डाहत इवोरगः ॥ [अधिकः पाठः]

समयुज्यत तीव्रेण श्रमेण पुरुषादकः ॥ २९

हीयमानं तु तदा रक्षस् समीक्ष्य भरतर्षभः ।
निष्पीड्य भूमौ पद्भ्यां वै समाजघ्ने वृकोदरः ॥ ३०

ततोऽस्य जानुना पृष्ठम् अवपीड्य बलादिव ।
बाहुना परिजग्राह दक्षिणेन शिरोधराम् ॥ ३१

सव्येन च कटीदेशे वासस्यादाय पाण्डवः ।
बभञ्ज तत्तदा रक्षो नदन्तं भैरवान् रवान् ॥ ३२

[1]ततोऽस्य रुधिरं वक्त्रात् प्रसुस्राव विशांपते ।
हन्यमानस्य भीमेन तस्य घोरस्य रक्षसः ॥ ३३

ततो भीमस्तमादाय गतासुं पुरुषादकम् ।
नगरद्वारमुद्दिश्य पादावादाय चाक्षिपत् ॥ ३४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि षष्ट्यधिकशततमोऽध्यायः ॥ १६० ॥

॥ १० ॥ बकवधपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

[अस्मिन्नध्याये ३४ श्लोकाः]

---

1. घ—निक्षिप्य भूमौ पाणिभ्यां तरसा निष्पिपेष ह ।
नदन्तं भैरवं रावान् विसृजन्तं जलं मलम् ॥ [अधिकः पाठः]

॥ एकषष्ट्यधिकशततमोऽध्यायः ॥

बकवधानन्तरं समागतानां तत्परिवाराणां भीमेन समयकरणम् ॥ १ ॥ नगरद्वारदेशे बकशरीरं निधाय ब्राह्मणगृहमानीय भीमेन कुन्त्यादीन्प्रति बकवृत्तान्तकथनम् ॥ २ ॥ मृतबकदर्शनार्थं पौराणां गमनम् ॥३॥ बकवधेन पौराणां भीमसेवनम् ॥ ४ ॥

वैशम्पायनः—

तेन शब्देन वित्रस्तो जनस्सर्वोऽथ रक्षसः ।
निष्पपात गृहाद्राजन् सहैव परिचारिभिः ॥ १

[1]ततस्तु निहतं दृष्ट्वा राक्षसेन्द्रं महाबलम् ।
बकाः परमसंत्रस्ता भीमं शरणमाययुः ॥ २

तान् भीतान् विगतज्ञानान् भीमः प्रहरतां वरः ।
सान्त्वयामास बलवान् समये च न्यवेशयत् ॥ ३

न हिंस्या मानुषा भूयो युष्माभिरिह कर्हि चित् ।
हिंसतां च वधश्शीघ्रम् एवमेव भविष्यति ॥ ४

तस्य तद्वचनं श्रुत्वा तानि रक्षांसि भारत ।
एवमस्त्विति तं प्राहुर् जगृहुस्समयं च तम् ॥ ५

1. क-ग-घ—पौराः परमसन्त्रस्ता बकस्य परिचारकाः ।
आरामोद्यानचैत्यस्थाः क्षुद्रदेवालयाश्रिताः ॥
[अधिकः पाठः]

[1]सगणस्तु बकभ्राता प्राणमत्पाण्डवं तदा ॥ ५॥

[2]ततः प्रभृति रक्षांसि तत्र सौम्यानि भारत ।
नगरे प्रत्यदृश्यन्त नरैर्नगरवासिभिः ॥ ६॥

ततो भीमस्तमादाय गतासुं पुरुषादकम् ।
निष्कर्णनेत्रं निर्जिह्वं निस्संज्ञं कण्ठपीडनात् ॥ ७॥

कुर्वन्तं बहुधा चेष्टां सनादं समकर्षत ॥ ८

[3]स एव राक्षसो नूनं पुनरायाति नः पुरीम् ।
सबालवृद्धाः पुरुषा इति भीताः प्रदुद्रुवुः ॥ ९

द्वारदेशे विनिक्षिप्य नगरस्य जगाम तम् ॥ ९॥

ततस्स भीमस्तं हत्वा गत्वा ब्राह्मणवेश्म तत् ।
बलीवर्दौ च शकटं ब्राह्मणाय न्यवेदयत् ॥ १०॥

[4]आचचक्षेऽथ तत्सर्वं रात्रौ युद्धमभूद्यथा ॥ ११

---

1. क-ग घ—तत्पुरोपवनोद्याने चैत्यारामान् विसृज्य ते ।
विभीतककपित्थार्कप्लक्षशाल्मलिकाननम् ।
प्रपेदिरे भयत्रस्ता भीतसाध्वसकातराः ॥ [अधिकः पाठः]
2. क-ग-घ—यमुनातीरमुत्सृज्य प्रपेदे पितृकाननम् ॥ [अधिकः पाठः]
3. क ख-ग—आच्छिद्य बाहू पादौ च शिरश्च स वृकोदरः ।
द्वारेषु चतुर्षु क्षिप्त्वा पुनरागात् स मारुतिः ॥
[अधिकः पाठः]
4. क-ग-घ—तूष्णीमन्तर्गृहं गच्छेत्यभिधाय द्विजोत्तमम् ।
मातृभ्रातृसमक्षं च गत्वा शयनमेत्य च ॥ [अधिकः पाठः]

[1]ततो नरा विनिष्क्रम्य नागराः काल्यमेव तु ।
ददृशुर्निहतं भूमौ राक्षसं रुधिरोक्षितम् ॥ १२
तमद्रिकूटप्रतिमं विनिकीर्णं भयावहम् ॥ १२॥
एकचक्रां पुनर्गत्वा प्रवृत्तिं प्रददुः पुरे ॥ १३
ततस्सहस्रशो राजन् नरा नगरवासिनः ।
तत्राजग्मुर्बकं द्रष्टुं सस्त्रीका [2]वृद्धबालकाः ॥ १४
[3]ततस्ते विस्मितास्सर्वे कर्म दृष्ट्वाऽतिमानुषम् ।
[4]दैवतान्यर्चयामासुस् सर्वाण्येव विशांपते ॥ १५
ततः परीक्षयामासुः कस्य वारोऽद्य भोजने ।
ज्ञात्वा चागम्य तं विप्रं पप्रच्छुः सर्वमेव तत् ॥ १६
पृच्छमानो बहुविधं रक्षमाणश्च पाण्डवान् ।
उवाच नागरान् सर्वान् काश्यपो नामतस्तदा ॥ १७

ब्राह्मणः—

[5]आज्ञापितं मामनिशं रुदन्तं सह बन्धुभिः ।

---

1. क-ग-घ—अक्षितोऽस्यद्य जननि तृप्तिर्मे दशवार्षिकी । [अधिकः पाठः]
2. क-ख-ग-घ—वृद्धकुमारकाः
3. क-ग—ददृशुस्ते बकं सर्वे विशिरःपाणिपादकम् ।
निश्शृङ्गवृक्षं निर्गुल्मं विनिकीर्णं गिरिं यथा॥ [अधिकः पाठः]
4. क-ग—विस्मितोत्फुल्लनयनास्तज्जन्यासक्तनासिकाः । [अधिकः पाठः]
5. घ—अद्य मे रक्षसो वारः पूर्वैर्युक्तापितो मम ।
ग्रामसाधारणेनैव सूचकेन पुरारुकसः ॥ [अधिकः पाठः]

ददर्श ब्राह्मणः कश्चिन्मन्त्रसिद्धो महाबलः ॥ १८

परिपृच्छथ स मां पूर्वं परिक्लेशं पुरस्य च ।
अब्रवीद्ब्राह्मणश्रेष्ठ आश्वास्य प्रहसन्निव ॥ १९

प्रापयिष्याम्यहं तस्मा इदमन्नं दुरात्मने ।
मन्निमित्तं भयं चापि न कार्यमिति वीर्यवान् ॥ २०

स तदन्नमुपादाय गतो बकवनं प्रति ।
तेन नूनं भवेदेतत् कर्म लोकहितं कृतम् ॥ २१

ततस्ते ब्राह्मणास्सर्वे क्षत्रियाश्च सुविस्मिताः ।
वैश्याश्शूद्राश्च मुदिताश् चक्रुर्ब्रह्ममहं तदा ॥ २२

ततो जानपदास्सर्व आजग्मुर्नगरं प्रति ।
तमद्भुततमं द्रष्टुं पार्थास्तत्रैव चाभवन् ॥ २३

वेत्रकीयगृहे सर्वे परिवार्य वृकोदरम् ।
विस्मयादभ्यगच्छंस्तं भीमं भीमपराक्रमम् ॥ २४

न वै न संभवेत्सर्वं ब्राह्मणेषु महात्मसु ।
इति सत्कृत्य तं पौराः परिवव्रुस्समन्ततः ॥ २५

अयं त्राताऽर्थिनस्सर्वान् पितेव परमार्थवित् ।
अस्य शुश्रूष[1]या पादौ प्रतिवारमुपास्महे ॥ २६

पशुमद्यधिमच्चास्य वारं भक्तमुपाहरन् ॥ २६॥

1. क-ख-ग घ—वः पादौ परिचारा उपास्महे ।

तस्मिन् हते ते पुरुषा भीतास्ते तमबोधयन् ॥ २७

ततस्संप्राद्रवन् पार्थास् सह मात्रा परन्तपाः ।
आगच्छन्नेकचक्रां ते पाण्डवास्संशितव्रताः ॥ २८

वैदिकाध्ययने युक्ता जटिला ब्रह्मचारिणः ।
अवसंस्ते च तत्रापि ब्राह्मणस्य निवेशने ॥ २९

मात्रा सहैकचक्रायां दीर्घकालं सुखोषिताः ॥ २९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि एकषष्ट्यधिकशततमोऽध्यायः ॥ १६१ ॥

॥ १० ॥ बकवधपर्वणि अष्टमोऽध्यायः ॥ ८ ॥

[अस्मिन्नध्याये २९॥ श्लोकाः]

॥ समाप्तं बकवधपर्व ॥

॥ द्विषष्ट्यधिकशततमोऽध्यायः ॥

(चैत्ररथपर्व ॥)

ब्राह्मणगृहे प्रतिश्रयार्थमागतस्य कस्यचिद्ब्राह्मणस्य मुखात् पाण्डवानां द्रौपदीस्वयंवरश्रवणम् ॥ १ ॥ पाण्डवकृतधृष्टद्युम्नद्रौपदीसंभवप्रश्नस्य ब्राह्मणेनोत्तरकथनम् ॥ २ ॥

जनमेजयः—

ते तदा पुरुषव्याघ्रा निहत्य बकराक्षसम् ।
अत ऊर्ध्वं तदा ब्रह्मन् किमकुर्वत पाण्डवाः ॥ १

वैशम्पायनः—

तत्रैव न्यवसन् राजन निहत्य बकराक्षसम् ।
अधीयाना नरव्याघ्रा ब्राह्मणस्य निवेशने ॥ २

ततः कदाचित्काले तु ब्राह्मणस्संशितव्रतः ।
प्रतिश्रयार्थी तद्वेश्म ब्राह्मणस्यागमत्तदा ॥ ३

स सम्यक् पूजयित्वा तु विद्वान् विप्रर्षभस्तदा ।
ददौ प्रतिश्रयं तस्मै तदा सर्वातिथिर्वशी ॥ ४

ततस्ते पाण्डवास्सर्वे कुन्ती च भरतर्षभ ।
उपासाञ्चक्रिरे विप्रं कथयन्तं कथाश्शुभाः ॥ ५

कथयामास देशान् स तीर्थानि विविधानि च ।
राज्ञश्च विविधाकारान् पुराणि च वनानि च ॥ ६

स तत्राकथयद्विप्रः कथान्ते जनमेजय ।
पञ्चालेष्वद्भुताकारं याज्ञसेन्यास्स्वयंवरम् ॥ ७

धृष्टद्युम्नस्य चोत्पत्तिं द्रोणस्य च शिखण्डिनः ।
अयोनिजत्वं कृष्णाया द्रुपदस्य महामखे ॥ ८

तदद्भुततमं श्रुत्वा पाण्डवास्सत्यविक्रमाः ।
विस्तरेणैव पप्रच्छुः कथां तां पुरुषर्षभाः ॥ ९

पाण्डवाः—

कथं द्रुपदपुत्रस्य धृष्टद्युम्नस्य पावकात् ।
संभवो वेदिमध्ये च कथं कृष्णा व्यजायत ॥ १०

कथं द्रोणान्महेष्वासात् सर्वाण्यस्त्राण्यशिक्षयत् ।
धृष्टद्युम्नो महेष्वासः कथं द्रोणस्य मृत्युदः ॥ ११
कथं प्रियसखायौ तौ भिन्नौ कस्य कृतेऽनघ ॥ ११॥

वैशम्पायनः—

एवं तैश्चोदितो विप्रो राजन् स पुरुषर्षभैः ।
कथयामास तत्सर्वं द्रौपदीसंभवं तदा ॥ १२॥

ब्राह्मणः—

गङ्गाद्वारं प्रति महान् बभूवर्षिर्महातपाः ।
भरद्वाजो महाप्राज्ञस् सततं संशितव्रतः ॥ १३॥

सोऽभिषेक्तुं गतो गङ्गां पूर्वमेवागतां सतीम् ।
ददर्शाप्सरसं तत्र घृताचीमाप्लुतामृषिः ॥ १४॥

तस्या वायुर्नदीतीरे वसनं व्यहरत्तदा ।
अपकृष्टाम्बरां दृष्ट्वा तामृषिश्चकमे तदा ॥ १५॥

तस्यां संसक्तमनसः कौमारब्रह्मचारिणः ।
[1]तस्य रेतस्तु चस्कन्द तदृषिर्द्रोण आदधे ॥ १६॥

ततस्समभवद्द्रोणः कुमारस्तस्य धीमतः ।
अध्यगीष्ट च वेदांश्च वेदाङ्गानि च सर्वशः ॥ १७॥

भरद्वाजसखा ह्यासीत् पृषतो नाम पार्थिवः ।

1. क-ग-घ—पश्यतो योनिसंस्थानमन्यावयवसौष्ठवम् ।[अधिकः पाठः]

तस्यापि द्रुपदो नाम तदा समभवत्सुतः ॥ १८॥

स नित्यमाश्रमं गत्वा द्रोणेन सह पार्षतः ।
विक्रीडाध्ययनं चैव चकार क्षत्रियर्षभः ॥ १९॥

ततस्तु पृषतेऽतीते स राजा द्रुपदोऽभवत् ।
द्रोणोऽपि रामं शुश्राव दित्सन्तं वसु सर्वशः ॥ २०॥

वनं तु प्रस्थितं रामं भरद्वाजसुतोऽब्रवीत् ।
आगतं वित्तकामं मां विद्धि द्रोणं द्विजर्षभम् ॥ २१॥

रामः—

शरीरमात्रमेवाद्य ममैतदवशेषितम् ।
अस्त्राणि वा शरीरं वा ब्रह्मन्नन्यतरं वृणु ॥ २२॥

द्रोणः—

अस्त्राणि चैव सर्वाणि तेषां संहारमेव च ।
प्रयोगं चैव सर्वेषां दातुमर्हति मे भवान् ॥ २३॥

रामः—

तथेत्युक्त्वा ततस्तस्मै प्रददौ भृगुनन्दनः ।
प्रतिगृह्य तदा द्रोणः कृतकृत्योऽभवत्तदा ॥ २४॥

संप्रहृष्टमनाश्चापि रामात् सद्यो न्यवर्तत ।
ब्रह्मास्त्रं समनुज्ञाप्य नरेष्वभ्यधिकोऽभवत् ॥ २५॥

ततो द्रुपदमासाद्य भारद्वाजः प्रतापवान् ।
अब्रवीत्पुरुषव्याघ्र सखायं विद्धि मामिति ॥ २६॥

द्रुपदः—

नाश्रोत्रियश्रोत्रियस्य नारथी रथिनस्सखा ।
नाराजा पार्थिवस्यापि सखिपूर्वं किमिष्यते ॥ २७॥

ब्राह्मणः—

स विनिश्चित्य मनसा पाञ्चाल्यं प्रति बुद्धिमान् ।
जगाम कुरुमुख्यानां नगरं नागसाह्वयम् ॥ २८॥

तस्मै पार्थान् समादाय वसूनि विविधानि च ।
प्राप्ताय प्रददौ भीष्मश् शिष्यान् द्रोणाय धीमते ॥ २९॥

द्रोणश्शिष्यांस्ततस्सर्वान् इदं वचनमब्रवीत् ।
समानीय ततश्शिष्यान् द्रुपदस्यासुखाय वै ॥ ३०॥

आचार्यवेतनं किंचित् प्रदेयं परिवर्तते ।
कृतास्त्रैस्तत् प्रदेयं स्यात् तदृतं वदतानघाः ॥ ३१॥

ब्राह्मणः—

तथेत्युवाच तं पार्थः पादौ जग्राह बुद्धिमान् ॥ ३२
[1]यदा च पाण्डवास्सर्वे कृतास्त्राः कृतनिश्रमाः ।
ततो द्रोणोऽब्रवीद्भूयो वेतनार्थमिदं वचः ॥ ३३

द्रोणः—

पार्षतो द्रुपदो नाम क्षत्रवत्यां नरेश्वरः ।
तस्यापकृष्य तद्राज्यं मम शीघ्रं प्रदीयताम् ॥ ३४

1. क-ग—विद्यानिष्क्रयजं वित्तं किं देयं ब्रूहि मे गुरो ।
घ—स विद्यानिष्क्रयं वित्तं किं देयं ब्रूहि मे गुरो । [अधिकः पादः]

ब्राह्मणः—

धार्तराष्ट्रैश्च सहिताः पाञ्चालान पाण्डवा ययुः ॥ ३४॥

यज्ञसेनेन संगम्य कर्णदुर्योधनादयः ।
निर्जितास्सन्न्यवर्तन्त तथाऽन्ये क्षत्रियर्षभाः ॥ ३५॥

ततः पाण्डुसुताः पञ्च निर्जित्य द्रुपदं युधि ।
द्रोणाय दर्शयामासुर् बद्ध्वा ससचिवं तदा ॥ ३६॥

महेन्द्र इव दुर्धर्षो महेन्द्र इव दानवम् ।
महेन्द्रपुत्रः पाञ्चालं जितवानर्जुनस्तदा ॥ ३७॥

तद्दृष्ट्वा तु महावीर्यं फल्गुनस्यामितौजसः ।
व्यस्मयन्त जनास्सर्वे यज्ञसेनस्य बान्धवाः ॥ ३८॥

नास्त्यर्जुनसमो वीर्ये राजपुत्र इति ब्रुवन् ॥ ३९

द्रोणः—

प्रार्थयामि त्वया सख्यं पुनरेव नराधिप ।
नाराजा किल वै राज्ञस् सखा भवितुमर्हति ॥ ४०

अतः प्रयतितं राज्ये यज्ञसेन मया तव ॥ ४०॥

राजाऽसि दक्षिणे कूले भागीरथ्याहमुत्तरे ।
कन्याकुब्जे च काम्पिल्ये वसेथास्त्वं नरोत्तम ॥ ४१॥

ब्राह्मणैस्सहितो राजन्नहिच्छत्रे वसाम्यहम् ॥ ४२

असत्कारस्स सुमहान् मुहूर्तमपि तस्य तु ।

नापैति हृदयाद्ब्रह्मो दुर्मनास्स कृशोऽभवत् ॥ ४३

ब्राह्मणः—

अमर्षी द्रुपदो राजा कर्म[1]सिद्धान् द्विजोत्तमान् ।
अन्विच्छन् परिचक्राम ब्राह्मणावसथान् बहून् ॥ ४४

पुत्रजन्म परीप्सन् वै शोकोपहतचेतनः ।
[2]नास्ति श्रेष्ठं ममापत्यम् इति मत्वा विचिन्तयन् ॥ ४५

जातान् पुत्रान् स निर्वेदाद् धिग्बहूनिति चाब्रवीत् ।
निर्वेदश्चाथ तस्यासीद् द्रोणाप्रियचिकीर्षया ॥ ४६

प्रभावं विनयं शिक्षां द्रोणस्य चरितानि च ।
क्षात्रेण च बलेनास्य पराजेतुं हि नाशकत् ॥ ४७

अप्राप्तवान्नरश्रेष्ठो यतमानोऽपि भारत ।
अभितस्सोऽथ कल्माषीं गङ्गाकूले परिभ्रमन् ॥ ४८

ब्राह्मणावसथं पुण्यम् आससाद महीपतिः ॥ ४८॥

तत्र नात्यातकः कश्चिन्न चासीदव्रती द्विजः ॥ ४९

अधीयानौ महाभागौ सोऽपश्यत्संशितव्रतौ ।
याजोपयाजौ ब्रह्मर्षी श्राम्यन्तौ पृषतात्मजः ॥ ५०

संहिताध्ययने युक्तौ गोत्रतश्चापि काश्यपौ ।

1. क-ख-ग-घ—सिद्धिं द्विजोत्तमात् ।
2. क-ग—द्रोणेन वैरं द्रुपदो न सुष्वाप स्मरन् सदा । [अधिकः पाठः]

तरुणौ तौ युक्तरूपौ ब्राह्मणावृषिसत्तमौ ॥ ५१

स उपामन्त्रयामास सर्वकामैरतन्द्रितः ॥ ५१॥

स बुद्ध्वा बालबुद्धिं तु कनीयांसमुपह्वरे ।
प्रपेदे च्छन्दयन् कामैर् उपयाजं धृतव्रतम् ॥ ५२॥
पादशुश्रूषणे युक्तः प्रियवाक्सर्वकामदः ।
अर्चयित्वा यथान्यायम् उपयाजमुवाच ह ॥ ५३॥

यज्ञसेनः—

येन मे कर्मणा ब्रह्मन् पुत्रस्याद्रोणमृत्यवे ।
अर्जुनस्य तथा भार्या भवेद्या वरवर्णिनी ॥ ५४॥
उपयाज कृते तस्मिन् गवां दाताऽस्मि तेऽर्बुदं ॥ ५५
यदन्यत्ते द्विजश्रेष्ठ मनसस्सुप्रियं भवेत् ।
सर्वं तत्ते प्रदास्यामि न हि मेऽस्त्यत्र संशयः ॥ ५६

ब्राह्मणः—

इत्युक्तो नाहमित्येवं तमृषिः प्रत्यभाषत ।
आराधयिष्यन् द्रुपदस् स तं पर्यचरत् पुनः ॥ ५७
ततस्संवत्सरस्यान्ते द्रुपदं स द्विजोत्तमः ।
याजो द्रोणविनाशाय प्रतिजज्ञे तथाऽपि सः ॥ ५८
पाण्डोस्स्नुषार्थं कन्या च भवेदिति मतिर्मम ॥ ५८॥
तथेत्युक्त्वा तु तं यज्ञं पुत्रकामीयमारभत् ॥ ५९

गुर्वर्थ इति चाकामम् उपयाजश्चकार ह ॥ ५९॥
याजस्तु यजतां श्रेष्ठो हव्यवाहमतर्पयत् ॥ ६०
याजस्तु सवनस्यान्ते देवीमाह्वापयत्तदा ॥ ६०॥

याजः—

प्रेहि मां राज्ञि पृषति मिथुनं त्वामुपस्थितम् ।
कुमारश्च कुमारी च पतिवंशविवृद्धये ॥ ६१॥

देवी—

नालिप्तं वै मम मुखं पुण्यान् गन्धान् बिभर्मि च ।
न पत्नी तेऽस्मि सूत्यर्थं तिष्ठ याज मम प्रिये ॥ ६२॥

[1]याजः—

याजेन श्रपितं हव्यम् उपयाजेन मन्त्रितम् ।
कथं कामं न सन्दध्यात् पृषति प्रेहि तिष्ठ वा ॥ ६३॥

ब्राह्मणः—

एवमुक्त्वा तु याजेन हुते हविषि संस्कृते ।
उत्तस्थौ पावकात्तस्मात् कुमारो देवसन्निभः ॥ ६४॥
ज्वालावर्णो घोररूपः किरीटी वर्म चोत्तमम् ।
बिभ्रत् सखड्गस्सशरो धनुषा विनदन् मुहुः ॥ ६५॥
अध्यारोहद्दृढरथं तेन स प्रययौ तदा ॥ ६६

1. क-ग-घ—राज्ञ्या चैवमभिहितो यातो राज्ञीमुवाच ह ।
तत्सर्वं सहमानश्च ब्रह्मनेत्रोनिधिस्स्वयम्॥ [अधिकः पाठः]

ततः प्रणेदुः पाञ्चालाः प्रहृष्टास्साधु साध्विति ।
हर्षाविष्टांस्ततश्चैतान् नेयं सेहे वसुन्धरा ॥ ६७
भयापहो राजपुत्रः पाञ्चालानां यशस्करः ।
राज्ञश्शोकापहो जात एष द्रोणवधाय वै ॥ ६८
इत्युवाच महद्भूतम् अदृश्यं खेचरं तदा ॥ ६८॥
कुमारी चापि पाञ्चाली अर्जुनार्थे विनिर्मिता ।
सुभगा दर्शनीयाङ्गी वेदिमध्यात् समुत्थिता ॥ ६९॥
श्यामा पद्मपलाशाक्षी नीलकुञ्चितमूर्धजा ।
मानुषं विग्रहं कृत्वा श्रीस्साक्षाद्देववर्णिनी ॥ ७०॥
नीलोत्पलसमो गन्धो यस्याः [1]क्रोशात्प्रवायति ।
या बिभर्ति परं रूपं यस्या नास्ति समा भुवि ॥ ७१॥
सदृशी पाण्डुपुत्रस्य अर्जुनस्येति भारत ।
ऊचुः प्रहृष्टमनसो राजभक्तिपुरस्कृताः ॥ ७२॥
तां चापि जातां सुश्रोणीं वागुवाचाशरीरिणी ।
सर्वयोषिद्वरा कृष्णा क्षयं क्षत्रं निनीषति ॥ ७३॥
सुरकार्यमियं लोके करिष्यति सुमध्यमा ।
अस्या हेतोः क्षत्रियाणां महदुत्पत्स्यते भयम् ॥ ७४॥
तच्छ्रुत्वा सर्वपाञ्चालाः प्रणेदुर्सिंहसङ्घवत् ॥ ७५

1. क-ख-ग-घ—क्रोशात्;

पाञ्चालराजस्तां दृष्ट्वा हर्षादश्रूण्यवर्तयत् ।
परिष्वज्य सुतां कृष्णां स्नुषा पाण्डोरिति ब्रुवन् ॥ ७६
अङ्कमारोप्य पाञ्चालीं राजा हर्षमवाप सः ॥ ७६॥
तयोश्च नामनी चक्रुर् द्विजास्सम्पूर्णमानसाः ॥ ७७

धृष्टत्वादप्रधृष्यत्वाद् द्युम्नादुत्संभवादपि ।
धृष्टद्युम्नः कुमारोऽयं द्रुपदस्य भवत्विति ॥ ७८
कृष्णेत्येवाब्रुवन् कृष्णां कृष्णाऽभूत्सा हि वर्णतः ॥ ७८॥
तथा तन्मिथुनं जज्ञे द्रुपदस्य महामखे ॥ ७९

धृष्टद्युम्नस्तु पाञ्चालान् सिंहनादेन नादयन् ।
सोऽध्यारोहद्रथवरं तेन संप्रययौ गृहम् ॥ ८०
कृष्णा च शिविकां प्राप्य प्रविवेश निवेशनम् ॥ ८०॥
धृष्टद्युम्नं तु पाञ्चालीम् आनीय स्वं निवेशनम् ।
द्रोणं संपूज्य विधिवद् गुरुरित्येव धर्मतः ॥ ८१॥

परिदाय सुतं शिष्यं धृष्टद्युम्नं तु सोमकाः ।
आहू राज्ञः प्रसीदेति प्राब्रुवन् प्रियवादिनः । ८२॥
महाप्रभावो ब्रह्मर्षिर् ज्ञात्वा तस्य च संभवम् ॥

उपाकरोदस्त्रहेतोर् भारद्वाजः प्रतापवान् ॥ ८३॥

अमोक्षणीयं दैवं हि भावि मत्वा महामतिः ।
तथा तत्कृतवान् द्रोण आत्मकीर्त्यर्थकारणात् ॥ ८४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि द्विषष्ट्यधिकशततमोऽध्यायः ॥ १६२ ॥
॥ ११ ॥ चैत्ररथपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[अस्मिन्नध्याये ८४॥ श्लोकाः]

॥ त्रिषष्ट्यधिकशततमोऽध्यायः ॥

जनवार्तया दुर्योधनेन पाण्डवानां दाहं, स्वपुरोहितवचनेन नाशराहित्यं च, ज्ञातवता तेषां जीवने सन्दिहानेन द्रुपदेन उद्घोषितस्य पुत्रीस्वयंवरस्य कुन्तीं प्रति ब्राह्मणेन कथनम् ॥ १ ॥ युष्मासु तत्रागतेष्वीश्वरेच्छया त्वत्पुत्राणामन्यतमं पाञ्चाली वृणुयादपीत्युक्तवता ब्राह्मणेन सह पाण्डवानां पाञ्चालनगरं प्रति गमनम् ॥ २ ॥

ब्राह्मणः—

श्रुत्वा जतुगृहे वृत्तं ब्राह्मणास्सपुरोहिताः ।
पाञ्चालराजं द्रुपदम् इदं वचनमब्रुवन् ॥ १

धार्तराष्ट्रास्सहामात्या मन्त्रयित्वा परस्परम् ।
पाण्डवानां विनाशाय मतिं चक्रुस्सुदुष्कराम् ॥ २

दुर्योधनेन प्रहितः पुरोचन इति श्रुतः ।
वारणावतमासाद्य कृत्वा जतुगृहं महत् ॥ ३

तस्मिन् गृहे सुविश्वस्तान् पाण्डवान् पृथया सह ।
अर्धरात्रे महाराज दग्धवान् स पुरोचनः ॥ ४
अग्निना तु स्वयमपि दग्धः क्षुद्रो नृशंसकृत् ॥ ४॥
एतच्छ्रुत्वा सुसंहृष्टो धृतराष्ट्रस्सबान्धवः ॥ ५
श्रुत्वा तु पाण्डवान् दग्धान् धृतराष्ट्रोऽम्बिकासुतः ।
एतावदुक्त्वा करुणं धृतराष्ट्रस्तु मारिषः ॥ ६
अल्पशोकः प्रहृष्टात्मा शशास विदुरं तदा ॥ ६॥
पाण्डवानां महाप्राज्ञ कुरु पिण्डोदकक्रियाम् ॥ ७
अद्य पाण्डुर्हतः क्षत्तः पाण्डवानां विनाशने ।
तस्माद्भागीरथीं गत्वा कुरु पिण्डोदकक्रियाम् ॥ ८
अहो विधिवशादेव गतास्ते यमसादनम् ।
इत्युक्त्वा प्रारुदत्तत्र धृतराष्ट्रस्ससौबलः ॥ ९
श्रुत्वा भीष्मेण विधिवत् कृतवानौर्ध्वदेहिकम् ।
पाण्डवानां विनाशाय कृतं कर्म दुरात्मना ॥ १०
एतत्कार्यस्य कर्ता तु न दृष्टो न श्रुतः पुरा ।
एतद्वृत्तं महाराज पाण्डवान् प्रति नश्श्रुतम् ॥ ११
श्रुत्वा तु वचनं तेषां यज्ञसेनो महामतिः ।
यथा तज्जनकश्शोचेद् औरसस्य विनाशने ॥ १२
तथाऽतप्यत पाञ्चालः पाण्डवानां विनाशने ॥ १२॥

समाहूय प्रकृतयस् सहितास्सहबान्धवैः ।
कारुण्यादेव पाञ्चालः प्रोवाचेदं वचस्तदा ॥ १३॥

द्रुपदः—

अहो रूपमहो धैर्यम् अहो वीर्यं च शिक्षितम् ।
चिन्तयामि दिवारात्रम् अर्जुनं प्रति बान्धवाः ॥ १४॥
भ्रातृभिस्सहितो मात्रा सोऽदह्यत हुताशने ॥ १५
किमाश्चर्यमितो लोके कालो हि दुरतिक्रमः ।
मिथ्याप्रतिज्ञो लोकेषु किं वदिष्यामि सांप्रतम् ॥ १६
अन्तर्गतेन दुःखेन दह्यमानो दिवानिशम् ।
याजोपयाजौ सत्कृत्य याचितौ तौ मयाऽनघौ ॥ १७
भारद्वाजस्य हन्तारं देवैः चाप्यर्जुनस्य वै ।
लोकस्तद्वेद यच्चैव तथा याजेन वै श्रुतम् ॥ १८
याजेन पुत्रकामीयं हुत्वा चोत्पादितावुभौ ।
धृष्टद्युम्नश्च कृष्णा च मम तुष्टिकरावुभौ ॥ १९
किं करिष्यामि ते नष्टाः पाण्डवाः पृथया सह ॥ १९॥

ब्राह्मणः—

इत्येवमुक्त्वा पाञ्चालश् शुशोच परमातुरः ॥ २०
दृष्ट्वा शोचन्तमत्यर्थं पाञ्चालं गुरुरब्रवीत् ।
पुरोधास्सत्वसंपन्नस् सम्यग्विद्याविशेषवान् ॥ २१

गुरुः—

वृद्धानुशासने सक्ताः पाण्डवा धर्मचारिणः ।
तादृशा न विनश्यन्ति नैव यान्ति पराभवम् ॥ २२

मया दृष्टमिदं सत्यं शृणु[1]ष्व मनुजाधिप ।
ब्राह्मणैः कथितं सत्यं वेदेषु च मया श्रुतम् ॥ २३

बृहस्पतिमुखेनाथ पौलोम्या च पुरा श्रुतम् ।
नष्टमिन्द्रं बिसग्रन्थ्याम् उपश्रुत्या तु दर्शितम् ॥ २४

उपश्रुतिर्महाराज पाण्डवार्थे मया श्रुता ॥ २४॥

यत्र वा तत्र जीवन्ति पाण्डवास्ते न संशयः ॥ २५

मया दृष्टानि लिङ्गानि ध्रुवमेष्यन्ति पाण्डवाः ॥ २५॥

यन्निमित्तमिहायान्ति तच्छृणुष्व नराधिप ॥ २६

स्वयंवरः क्षत्रियाणां कन्यादाने प्रदर्शितः ।
स्वयंवरस्तु नगरे घुष्यतां राजसत्तम ॥ २७

यत्र वा निवसन्तस्ते पाण्डवाः पृथया सह ।
दूरस्था वा समीपस्थास् स्वर्गस्था वाऽपि पाण्डवाः ॥ २८

श्रुत्वा स्वयंवरं राजन् समेष्यन्ति न संशयः ।
तस्मात् स्वयंवरो राजन् घुष्यतां मा चिरं कृथाः ॥ २९

ब्राह्मणः—

श्रुत्वा पुरोहितेनोक्तं पाञ्चालः प्रीतिमांस्तदा ।

---

1. क-ख-ग-घ—स्वं

घोषयामास नगरे द्रौपद्यास्तु स्वयंवरम् ॥ ३०
पुष्यमासे तु रोहिण्यां शुक्लपक्षे शुभे तिथौ ।
दिवसैः पञ्चसप्तत्या भविष्यति स्वयंवरः ॥ ३१
देवगन्धर्वयक्षाश्च ऋषयश्च तपोधनाः ।
स्वयंवरं द्रष्टुकामा गच्छन्त्येव न संशयः ॥ ३२
तव पुत्रा महात्मानो दर्शनीया विशेषतः ।
यदृच्छया तु पाञ्चाली गच्छेद्वा मध्यमं पतिम् ॥ ३३
को हि जानाति लोकेषु प्रजापतिविधिं परम् ।
तस्मात् सपुत्रा गच्छेथा ब्राह्मणि यदि रोचते ॥ ३४
नित्यकालं सुभिक्षास्ते पाञ्चालास्तु तपोधने ॥ ३४॥
यज्ञसेनस्तु राजाऽसौ ब्रह्मण्यस्सत्यसङ्गरः ।
ब्रह्मण्या नागराश्चाथ ब्राह्मणाश्चातिथिप्रियाः ॥ ३५॥
नित्यकालं प्रदास्यन्ति आमन्त्रणमयाचितम् ॥ ३६
अहं च तत्र गच्छामि ममैभिस्सह शिष्यकैः ।
एकसार्थाः प्रयातास्मो ब्राह्मणि यदि रोचते ॥ ३७

वैशम्पायनः—

एतावदुक्त्वा वचनं ब्राह्मणो विरराम ह ॥ ३७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि त्रिषष्ट्यधिकशततमोऽध्यायः ॥ १६३ ॥
॥ ११ ॥ चैत्ररथपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[अस्मिन्नध्याये ३७॥ श्लोकाः]

---

1 क-ख-ग-घ—शुभम् ।

चतुष्षष्ट्यधिकशततमोऽध्यायः ॥

पाण्डवानां द्रुपदनगरप्रस्थानम् ॥ १ ॥ व्यासेन द्रौपदीवृत्तान्तकथनं च ॥ २ ॥

वैशम्पायनः—

[1]एवं श्रुत्वा तु कौन्तेया ब्राह्मणात् संशितव्रताः ।
मनसा द्रौपदीं जग्मुर् अनङ्गशरपीडिताः ॥ १

ततस्तां रजनीं राजन् छल्यविद्धा इवाभवन् ।
सर्वथाऽस्वस्थमनसो बभूवुस्ते महारथाः ॥ २

ततः कुन्ती सुतान् दृष्ट्वा विभ्रान्तान् हृतचेतसः ।
युधिष्ठिरमुवाचेदं वचनं सत्यवादिनी ॥ ३

कुन्ती—

चिररात्रोषितास्स्मेह ब्राह्मणस्य निवेशने ।
रममाणाः पुरे रम्ये लब्धभैक्षा युधिष्ठिर ॥ ४

यानीह रमणीयानि वनान्युपवनानि च ।
सर्वाणि तानि दृष्टानि पुनः पुनरिन्दम ॥ ५

[2]पुनर्दृष्टानि तान्येव प्रीणयन्ति न नस्तथा ।
भैक्ष च न तथा वीर लभ्यते कुरुनन्दन ॥ ६

1. क-ख-ग-घ—एतच्छ्रुत्वा ततस्सर्वे पाण्डवा भरतर्षभ ।
2. घ—तथा दृष्टानि तान्येव तथा न प्रीणयन्ति माम् ।

ते वयं साधु पञ्चालान् गच्छाम यदि मन्यसे ।
अपूर्वदर्शनं तात रमणीयं भविष्यति ॥ ७

सुभिक्षाश्चैव पाञ्चालाश् श्रूयन्ते शत्रुकर्शन ।
यज्ञसेनस्तु राजाऽसौ ब्रह्मण्य इति शुश्रुम ॥ ८

एकत्र चिरवासोऽयं क्षमो न च मतो मम ।
तस्मात्तत्रैव गच्छामो वयं तु यदि मन्यसे ॥ ९

युधिष्ठिरः—

भवत्या यन्मतं कार्यं [1]त्विहास्माकं परं हितम् ।
अनुजांस्तु न जानामि गच्छेयुर्नेति वा पुनः ॥ १०

वैशम्पायनः—

ततः कुन्ती भीमसेनम् अर्जुनं च यमौ तथा ।
उवाच गमनं ते च तां तथेत्यब्रुवंस्तथा ॥ ११

तत आमन्त्र्य तं विप्रं कुन्ती राजसुतैस्सह ।
प्रतस्थे नगरीं रम्यां द्रुपदस्य महात्मनः ॥ १२

वसत्सु तेषु प्रच्छन्नं पाण्डवेषु महात्मसु ।
आजगाम तदा द्रष्टुं व्यासस्सत्यवतीसुतः ॥ १३

तमागतमभिप्रेक्ष्य प्रत्युद्गम्य परन्तपाः ।
प्रणिपत्याभिवाद्यैनं तस्थुः प्राञ्जलयोऽग्रतः ॥ १४

1. क-ख-ग-घ—तद

समनुज्ञाप्य तान् सर्वान् आसीनान् मुनिरब्रवीत् ।
[1]प्रसन्नं पूजितः पार्थैः प्रीतिपूर्वमिदं वचः ॥ १५

व्यासः—

[2]अपि धर्मेण वर्तध्वं शास्त्रेणैव परन्तपाः ।
अपि विप्रेषु वः पूजा पूजार्हेषु यथाविधि ॥ १६

वैशम्पायनः—

अथ धर्मार्थवद्वाक्यम् उक्त्वा स भगवानृषिः ।
विचित्रास्तु कथास्तास्ताः पुनरेवेदमब्रवीत् ॥ १७

व्यासः—

आसीत्तपोनिधेः काचिद् ऋषेः कन्या मनस्विनी ।
विलग्नमध्या सुश्रोणी सुभ्रूस्सर्वगुणान्विता ॥ १८

कर्मभिस्स्वकृतैस्सा तु दुर्भगा समपद्यत ।
नाध्यगच्छम् पतिं सा तु कन्या रूपवती सती ॥ १९

तपस्तप्तुमथारेभे पत्यर्थमसुखं ततः ।
तोषयामास [3]महता तपसोग्रेण शङ्करम् ॥ २०

तस्या[4]स्तु भगवांस्तुष्टस् तामुवाच [5]तपस्विनीम् ।
वरं वरय भद्रं ते वरदोऽस्मि तवेप्सितम् ॥ २१

---

1. क-ग—प्रसभं; ख—प्रसह्यः
2. क-ग-घ—अपि धर्मेषु वर्तध्वे परेषु स्वेषु भूमिप ।
3. क-ख-ग-घ—तपसा भगवन्तं महेश्वरम् ।
4. क-ख-ग-घ—स्स 5. क-ख-ग-घ—यश

अथेश्वरमुवाचेदम् आत्मनस्सा हितं वचः ॥ २१॥
पतिं सर्वगुणोपेतम् इच्छामीति पुनः पुनः ॥ २२
तामथ प्रत्युवाचेदम् ईशानो वदतां वरः ।
पञ्च ते पतयो भद्रे भविष्यन्तीति शङ्करः ॥ २३
[1]प्रतिब्रुवाणामेकं मे पतिं देहीति शङ्करम् ।
पुनरेवाब्रवीदेनाम् इदं वचनमुत्तमम् ॥ २४
पञ्चकृत्वस्त्वयाप्युक्तः पतिं देहीत्यहं पुनः ॥ २४॥
देहमन्यं गतायास्ते यथोक्तं वै भविष्यति ॥ २५
द्रुपदस्य कुले जाता कन्या सा वररूपिणी ॥ २५॥
निर्दिष्टा भवतां पत्नी कृष्णा पार्षत्यनिन्दिता ॥ २६
पाञ्चालनगरीं तस्मात् प्रविशध्वं महाबलाः ॥ २६॥
सुखिनस्तामनुप्राप्य भविष्यथ न संशयः ॥ २७
राज्यं चैवागतं प्राप्ता इन्द्रप्रस्थं गमिष्यथ ॥ २७॥

वैशम्पायनः—

एवमुक्त्वा महाभागः पाण्डवानां पितामहः ।
पार्थानामन्त्र्य कुन्तीं च प्रातिष्ठत महातपाः ॥ २८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि चतुष्षष्ट्यधिकशततमोऽध्यायः ॥ १६४ ॥
॥ ११ ॥ चैत्ररथपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
[अस्मिन्नध्याये २८॥ श्लोकाः ।]

---

1. क-ग—एवमुक्ता ततः कन्या देवं वरदमीश्वरम् ।
एकमिच्छाम्यहं देव त्वत्प्रसादात् पतिं प्रभो॥[अधिकः पाठः]

॥ पञ्चषष्ट्यधिकशततमोऽध्यायः ॥

पाञ्चालनगरं गच्छतां पाण्डवानां मार्गे ब्राह्मणसंवादः ॥ १ ॥

वैशम्पायनः—

ततस्ते नरशार्दूला भ्रातरः पञ्च पाण्डवाः ।
प्रययुर्द्रौपदीं द्रष्टुं तञ्च देशं महोत्सवम् ॥ १

ते प्रयाता नरव्याघ्रा मात्रा सह परन्तपाः ।
ब्राह्मणान् ददृशुर्मार्गे गच्छतस्सहितान् बहून् ॥ २

तानूचुर्ब्राह्मणा राजन् पाण्डवान् ब्रह्मचारिणः ।
क्व भवन्तो गमिष्यन्ति कुतो वाऽऽगच्छतेति ह ॥ ३

युधिष्ठिरः—

आगतानेकचक्रायास् सोदर्यान् देवदर्शिनः ।
भवन्तोऽपि विजानन्तु सङ्गता मातृचारिणः ॥ ४

गच्छामोऽद्यैव पाञ्चालान् द्रुपदस्य निवेशनम् ।
स्वयंवरो महांस्तत्र भविता सुमहोत्सवः ॥ ५

ब्राह्मणाः—

एकसार्थं प्रयातास्म वयमप्यत्र गामिनः ।
तत्र ह्यद्भुतसङ्काशो भविता सुमहोत्सवः ॥ ६

यज्ञसेनस्य दुहिता द्रुपदस्य महात्मनः ।

वेदिमध्यात् समुत्पन्ना पद्मपत्रनिभेक्षणा ॥ ७

दर्शनीयाऽनवद्याङ्गी सुकुमारी यशस्विनी ।
धृष्टद्युम्नस्य भगिनी द्रोणशत्रोः प्रतापिनः ॥ ८

यो जातः कवची खड्गी सशरस्सशरासनः ।
सुसमिद्धे महाराजा पावके पावकप्रभः ॥ ९

स्वसा तस्यानवद्याङ्गी सुकुमारी यशस्विनी ।
नीलोत्पलसमो गन्धो यस्याः क्रोशात्प्रवायति ॥ १०

तां यज्ञसेनस्य सुतां स्वयंवरकृतक्षणाम् ।
संगच्छामो वयं द्रष्टुं तं च देशं महोत्सवम् ॥ ११

राजानो राजपुत्राश्च यज्वानो भूरिदक्षिणाः ।
स्वाध्यायवन्तश्शुचयो महात्मानो महाव्रताः ॥ १२

तरुणा दर्शनीयाश्च नानादेशसमागताः ।
महारथाः कृतास्त्राश्च समुपेष्यन्ति भूमिपाः ॥ २३

ते तत्र विविधं दानं विजयार्थं नरेश्वराः ।
प्रदास्यन्ति धनं गाश्च भक्ष्यं भोज्यं च सर्वशः ॥ १४

प्रतिगृह्य च तत्सर्वं दृष्ट्वा चैव स्वयंवरम् ।
अनुभूयोत्सवं चैव गमिष्यामो यथेप्सितम् ॥ १५

नटा वैतालिकाश्चैव नर्तकास्तत्र मागधाः ।

नियोधकाश्च देशेभ्यस् समेष्यन्ति महाबलाः ॥ १६

एवं कौतूहलं दृष्ट्वा भुक्त्वा च प्रतिगृह्य च ।
सहास्माभिर्महात्मानो रङ्गं प्रति निवत्स्यथ ॥ १७

दर्शनीयांश्च वस्सर्वान् देवरूपानिव स्थितान् ।
समीक्ष्य कृष्णा वरयेत् सङ्गम्यान्यतमं पतिम् ॥ १८

अयं भ्राता च वश्शीघ्रं दर्शनीयो महाभुजः ।
आरभ्यमानो विजयेत् सङ्गत्या द्रविणं महत् ॥ १९

युधिष्ठिरः—

परमं भोगमिच्छामो द्रष्टुं देशं महोत्सवम् ।
भवद्भिस्सहितास्सर्वे कन्यायास्तं स्वयंवरम् ॥ २०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि पञ्चषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥

॥ ११ ॥ चैत्ररथपर्वणि चतुर्थोऽध्यायः* ॥ ४ ॥

[अस्मिन्नध्याये २० श्लोकाः]

---

* घ-कोशे नास्त्यध्यायसमाप्तिः ।

॥ षट्षष्ट्यधिकशततमोऽध्यायः ॥

अर्धरात्रे पाण्डवानां गङ्गातीरगमनम् ॥ १ ॥ तत्र स्त्रीभिस्सह जलक्रीडां कुर्वता चित्ररथेन गन्धर्वेण सह अर्जुनस्य युद्धम् ॥ २ ॥ आग्नेयास्त्रेण दग्धाद्रथादधःपतितस्य तस्यार्जुनेन ग्रहणम् ॥ ३ ॥ गन्धर्वपत्न्या प्रार्थितस्य युधिष्ठिरस्याज्ञया गन्धर्वमोचनम् ॥ ४ ॥

वैशम्पायनः—

ते प्रतस्थुः पुरस्कृत्य मातरं भरतर्षभाः ।
समैरुदङ्मुखैर्मार्गैर् यथोद्दिष्टं [1]परन्तपाः ॥ १

ते गच्छन्तस्त्वहोरात्रं पाञ्चालनगरं प्रति ।
अभ्याजग्मुर्लोकनदीं गङ्गां भागीरथीं प्रति ॥ २

चन्द्रास्तमयवेलायाम् अर्ध[2]रात्रे समागते ।
ते च वारि निमज्जन्तस् तीर्थं सोमश्रवायणम् ॥ ३

उल्मुकं तु समुद्यम्य तेषामग्रे धनञ्जयः ।
प्रकाशार्थं ययौ तत्र रक्षार्थं च [3]धनञ्जयः ॥ ४

[4]अथ तत्र जले रम्ये विजने क्रीडयन् स्त्रियः ।
[5]ईर्ष्युर्गन्धर्वराजस्तु जलक्रीडामुपागतः ॥ ५

---

1. क-ख-ग—च भारत
2. क-ख-ग—रात्रसमागमे
3. क-ख-ग-घ—महारथः
4. क-ख-ग-घ—तत्र गङ्गाजले रम्ये विविक्ते
5. क-ख-ग-घ—तदा गन्धर्वराजश्च

शब्दं तेषां स शुश्राव नदीं समुपसर्पताम् ।
तेन शब्देन चाविष्टश् चुक्रोध सहसा बली ॥ ६

स दृष्ट्वा पाण्डवांस्तत्र सह मात्रा परन्तपान् ।
विष्फारयन् धनुर्घोरम् इदं वचनमब्रवीत् ॥ ७

अङ्गारवर्णः—

सन्ध्या संरज्यते घोरा पूर्वरात्रागमे च या ।
अशीतित्रुटिभिर्हीनांस् त्रीन् मुहूर्तान् प्रचक्षते ॥ ८

विहितान् कामचाराय यक्षगन्धर्वरक्षसाम् ।
शेषमन्यन्मनुष्याणां कामचारमिह स्मृतम् ॥ ९

लोभात् प्रचारं चरतस् तासु वेलासु वै नरान् ।
उपक्रम्य निगृह्णीमो राक्षसैस्सह बालिशान् ॥ १०

अहो निशां प्राप्नुवतो भूयिष्ठां पापचेतसः ।
[1]निघ्नन्त्येते नित्यमेव क्षणेषु नृपतीनपि ॥ ११

आराच्च तिष्ठतास्माकं समीपं नोपगच्छत ।
कस्मान्मां नाभिजानीथा प्राप्तं भागीरथीजलम् ॥ १२

अङ्गारवर्णं गन्धर्वं वित्त मां प्रबलाश्रयम् ।
अहं हि मानी चेर्ष्युश्च कुबेरस्य प्रियस्सखा ॥ १३

अङ्गारवर्णमिति च वचनं ख्यातितं मम ।

1. क-ख-ग-घ—गर्हाण्येतानित्यमेषु

अनुगङ्गं महच्चित्रम् अस्मिन् नित्यं वसाम्यहम् ॥ १४

न कौणपाश्शृङ्गिणो वा न च देवा न चारणाः ।
[1]इदं समुपसर्पन्ति किं मां समुपसर्पथ ॥ १५

अर्जुनः—

समुद्रे हिमवत्पार्श्वे नद्यामस्यां च दुर्मते ।
रात्रावहनि सन्धौ वा कस्य कृप्तः परिग्रहः ॥ १६

वयं च शक्तिसम्पन्ना अकाले त्वां च धृष्णुमः ।
अशक्ता भवने क्रूरान् युष्मानर्चन्ति मानवाः ॥ १७

पुरा हिमवतश्चैषा हेमशृङ्गाद्विनिस्सृता ।
गङ्गा प्रतिदिशं गत्वा सप्तधा प्रतिपद्यते ॥ १८

वेला भूत्वा चैकवप्रा शुचिराकाशगा पुनः ॥ १८॥
देवेषु गङ्गा गन्धर्व प्राप्नोत्यलकनन्दताम् ॥ १९

तथा पितॄन् वैतरणी दुस्तरा पापकर्मभिः ॥ १९॥
गङ्गा भुवि च गन्धर्व यदा द्वैपायनोऽब्रवीत् ॥ २०

असम्बाधा देवनदी सर्वेषां पावनी शुभा ॥ २०॥
कथमिच्छसि तां रोद्धुं नैष धर्मस्सनातनः ॥ २१

अनिवार्यमसम्बाधं तव वाचा कथं वयम् ।
न स्पृशेम यथाकामं पुण्यं भागीरथीजलम् ॥ २२

---

1. क-ख-ग-घ—कुबेरस्य यथोष्णीषं

वैशम्पायनः—

अङ्गारवर्णस्तच्छ्रुत्वा क्रुद्ध आयम्य कार्मुकम् ।
मुमोच सायकान् दीप्तान् अहीन् दीप्ताननानिव ॥ २३

उल्मुकं भ्रामयंस्तूर्णं पाण्डवश्चर्म चोत्तमम् ।
व्यपोवाह शरांस्तस्य सर्वानेव धनञ्जयः ॥ २४

अर्जुनः—

बिभीषिकां हि गन्धर्व नास्त्रज्ञेषु प्रयोजय ।
अस्त्रज्ञेषु प्रयुक्तेयं फेनवत् प्रविलीयते ॥ २५

मानुषान्न तु गन्धर्वान् सर्वान् गन्धर्व लक्षये ।
तस्मादस्त्रेण दिव्येन योत्स्येऽहं न तु मायया ॥ २६

तदिदं जातवेदास्तु प्रादादस्त्रं बृहस्पतेः ।
तस्मादगाद्भरद्वाजं गुरुपुत्रं शतक्रतोः ॥ २७

भरद्वाजात्ततो रामं भार्गवाच्च गुरुर्मम ।
स त्विदं मह्यमददाद् द्रोणो ब्राह्मणसत्तमः ॥ २८

वैशम्पायनः—

इत्युक्त्वा पाण्डवः क्रुद्धो गन्धर्वाय मुमोच ह ।
प्रदीप्तमस्त्रमाग्नेयं ददाहास्य रथं ततः ॥ २९

रथात्तु विप्लुतं तं तु गन्धर्वं सुमहाबलम् ।
अस्त्रतेजःप्रमूढं च प्रपतन्तमवाङ्मुखम् ॥ ३०

शिरोरुहेषु जग्राह माल्यवत्सु धनञ्जयः ॥ ३०॥
भ्रातॄन् प्रति चकर्षाथ सोऽस्त्रपातादचेतनम् ॥ ३१

युधिष्ठिरं तस्य भार्या प्रपेदे शरणार्थिनी ।
नाम्ना कुम्भीनसी नाम पतित्राणमभीप्सती ॥ ३२

गन्धर्वी—

त्राहि त्वं मां महाराज पतिं चेमं विमुञ्च मे ।
गन्धर्वीं शरणं प्राप्तां दीनां कुम्भीनसीं प्रभो ॥ ३३

वैशम्पायनः—

श्रुत्वाऽनुग्रहभावाच्च पार्थः पार्थमुवाच ह ॥ ३३॥

युधिष्ठिरः—

जितं युद्धे यशोहीनं स्त्रीनाथमपराक्रमम् ।
धनञ्जय महाबाहो मुञ्चेममरिसूदन ॥ ३४॥

अर्जुनः—

अङ्गेमां प्रतिपद्यस्व गच्छ गन्धर्व मा शुचः ।
प्रदिशत्यभयं तेऽत्र कुरुराजो युधिष्ठिरः ॥ ३५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥

॥ ११ ॥चैत्ररथपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

[अस्मिन्नध्याये ३५॥ श्लोकाः]

॥ सप्तषष्ट्यधिकशततमोऽध्यायः ॥

गन्धर्वप्रार्थनया आग्नेयास्त्रपरिवर्तनेन तस्माद्गान्धर्वास्त्रग्रहणानुमोदनम् ॥ १ ॥

गन्धर्वः—

जितोऽहं पूर्वकं नाम मुञ्चाम्यङ्गारवर्णताम् ।
यशोहीनं तु न श्लाघ्यं स्वं नाम जनसंसदि ॥ १

साध्विमं लब्धवाञ्छाभं यो हि दिव्यास्त्रधारिणम् ।
गन्धर्वं मायया चोर्ध्वम् इच्छामि परया वरम् ॥ २

अस्त्राग्निना विचित्रोऽयं दग्धो मे रथ उत्तमः ।
सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवम् ॥ ३

संभृता त्वेव विद्येयं तपसेह पुरा मया ।
निवेदयिष्ये तामद्य प्राणदाय महात्मने ॥ ४

संस्तम्भितं च तरसा जितं शरणमागतम् ।
योऽरिं संयोजयेत् प्राणैः कल्याणं किं न सोऽर्हति ॥ ५

चाक्षुषी नाम विद्येयं यां सोमाय ददौ मनुः ।
ददौ स विश्वावसवे मम विश्वावसुर्ददौ ॥ ६

सेयं कापुरुषं प्राप्ता गुरुदत्ता प्रणश्यति ।
आगमोऽस्या मया प्रोक्तस् तस्या वीर्यं निबोध मे ॥ ७

यच्चक्षुषा द्रष्टुमिच्छेत् त्रिषु लोकेषु किञ्चन ।

तत्पथे यादृशं चेच्छेत् तादृशं द्रष्टुमर्हति ॥ ८

समापद्येत षण्मासान् स्थितो विद्यां लभेदिमाम् ।
अन्वानेष्याम्यहं विद्यां स्वयं तुभ्यं व्रते कृते ॥ ९

विद्यया ह्यनया राजन् वयं नृभ्यो विशेषिणः ॥ ९॥
अनाहार्याश्च देवानाम् अनुभावात्प्रवर्तिनाम् ।

गन्धर्वजानामश्वानाम् अहं पुरुषसत्तम ॥ १०॥
भ्रातृभ्यस्तव तुभ्यं च पृथग्दाता शतं शतं ॥ ११

देवगन्धर्ववाहास्ते दिव्यगन्धा मनोजवाः ।
[1]क्षीणक्षीणा भवन्त्यन्ये न हीयन्ते च रंहसः ॥ १२

पुरा कृतं महेन्द्रस्य वज्रं वृत्रनिबर्हणे ।
दशधा शतधा चैव तच्छीर्णं वृत्रमूर्धनि ॥ १३

तस्या भागः पृथग्भूतस् सर्वभूतैरुपास्यते ।
लोके यत्साधनं किंचित् सा वै वज्रतनुस्स्मृता ॥ १४

ब्रह्म वज्रं ब्राह्मणानां क्षत्रियाणां रथं विदुः ।
वैश्यवज्रं तु वै सीरं शुश्रूषा हीनयोनिषु ॥ १५

साधनं क्षत्रधर्मस्य मनोज्ञा वाजिनस्स्मृताः ।
रथाङ्गं च रथाक्षेण धनुश्च भरतर्षभ ॥ १६

---

1. क-ख-ग-घ—क्षीणे क्षीणे

कामवर्णाः कामगमाः कामतस्समुपस्थिताः ।
इमे गन्धर्वजाः कामं पूरयिष्यन्ति मे हयाः ॥ १७

अर्जुनः—

यदि प्रीतेन दत्तं वा संशये जीवितस्य वा ।
विद्यां वित्तं शुभं वाऽपि न तद्गन्धर्व कामये ॥ १८

गन्धर्वः—

संयोगो वै प्रीतिकरस् स सत्सु प्रतिदृश्यते ।
जीवितस्य प्रदानेन प्रीतो विद्यां ददामि ते ॥ १९

त्वत्तो ह्यहं ग्रहीष्यामि अस्त्रमाग्नेयमुत्तमम् ।
तथैव सख्यं बीभत्सो चिराय भरतर्षभ ॥ २०

अर्जुनः—

अस्त्रेणास्त्रं वृणे वृत्तस् संयोगश्शाश्वतोऽस्तु मे ।
सखे गन्धर्व तद्ब्रूहि युष्मभ्यो यद्भयं त्यजे ॥ २१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि सप्तषष्ट्यधिकशततमोऽध्यायः ॥ १६७ ॥

॥ ११ ॥ चैत्ररथपर्वणि षष्ठोऽध्यायः ॥ ६ ॥

[अस्मिन्नध्याये २१ श्लोकाः]

॥ अष्टषष्ट्यधिकशततमोऽध्यायः ॥

गन्धर्वेण पाण्डवानां पुरोहितसम्पादनोपदेशः ॥ १ ॥

अर्जुनः—

कारणं ब्रूहि गन्धर्व किं तद्येन स्म धर्षिताः ।
यद्ब्रह्म विदुषस्सर्वे सन्तो रात्रावरिन्दमाः ॥ १

गन्धर्वः—

अनग्नयोऽनाहुतयो न च विप्रपुरस्कृताः ।
धर्षितास्स्थ ततो यूयं मया पाण्डवनन्दन ॥ २

यक्षराक्षसगन्धर्वपिशाचोरगपन्नगाः ।
धर्षयन्ति नरव्याघ्र न ब्राह्मणपुरस्कृतान् ॥ ३

जानता च मया तस्मात् तेजश्चाभिजनं च वः ।
इयं मतिमतां श्रेष्ठ धर्षितुं वै कृता मतिः ॥ ४

को हि वस्त्रिषु लोकेषु न वेद भरतर्षभ ।
स्वैर्गुणैर्विस्तृतं श्रीमद् यशोऽग्र्यं भूरिवर्चसाम् ॥ ५

यक्षराक्षसगन्धर्वाः पिशाचोरगपन्नगाः ।
विस्तारं कुरुवंशस्य श्रीमतः कथयन्ति ते ॥ ६

नारदप्रभृतीनां च महर्षीणां मया पुरा ।
श्रुतं कथयतां पार्थ कुरूणां वंशमादितः ॥ ७

स्वयं चापि मया दृष्टश् चरता सागराम्बराम् ।
इमां वसुमतीं कृत्स्नां प्रभावस्सुकुलस्य च ॥ ८

वेदे धनुषि चाचार्यम् अभिजानामि चार्जुन ।
विश्रुतं त्रिषु लोकेषु भारद्वाजं यशस्विनम् ॥ ९

सर्ववेदविदां श्रेष्ठं सर्वशस्त्रभृतां वरम् ।
द्रोणमिष्वस्त्रकुशलं धनुष्यङ्गिरसां वरम् ॥ १०

धर्मं वायुं च शक्रं च विजानाम्यश्विनावपि ।
पाण्डुं च नृपशार्दूलं षडेतान् कीर्तिवर्धनान् ॥ ११

पुत्रानेतानहं पार्थ देवमानुषसत्तमान् ॥ ११॥

दिव्यात्मानो महात्मानस् सर्वशस्त्रभृतां वराः ।
भवन्तो भ्रातरस्सर्वे शूराश्च चरितव्रताः ॥ १२॥

उत्तमां तु मनोवृत्तिं भवतां भावितात्मनाम् ।
जानन्नपि च वः पार्थ कृतवानिह धर्षणाम् ॥ १३॥

स्त्रीसकाशेषु कौरव्य न पुमान् क्षन्तुमर्हति ॥ १४

धर्षणामात्मनः पश्यन ब्राह्मद्रविणमाश्रितः ।
नक्तं च बलमस्माकं भूय एवाभिवर्धते ॥ १५

यतस्ततो मां कौन्तेय सदारं मन्युराविशत् ॥ १५॥

सोऽहं त्वयेह विजितस् सङ्ख्ये तापत्यनन्दन ॥ १६

येनेमं विधिना सर्वं कीर्त्यमानं निबोध मे ॥ १६।

ब्रह्मचर्यं परो धर्मस् स चापि नियतस्त्वयि ।
यस्मादस्मादहं पार्थ रणेऽस्मि विजितस्त्वया ॥ १७॥

यस्तु स्यात् क्षत्रियः कश्चिन् कामवृत्तः परन्तप ।
नक्तं च युधि युध्येत न स जीवेत् कथञ्चन ॥ १८॥

यस्तु स्यात् कामवृत्तोऽपि राजा राजीवलोचनः ।
जयेन्नक्तञ्चरान् सर्वान् स पुरोहितधूर्गतः ॥ १९॥

तस्मात्तापत्य यत्किञ्चिन्नृणां श्रेय इहेप्सितम् ।
तस्मिन् कर्मणि योक्तव्या दान्तात्मानः पुरोहिताः ॥ २०॥

वेदे षडङ्गे नियताश् शुचयस्सत्यवादिनः ।
धर्मात्मानः कृतात्मानस् स्युर्नृपस्य पुरोहिताः ॥ २१॥

जयश्च नियतो राज्ञस् स्वर्गश्च स्यादनन्तरम् ।
यस्य स्याद्धर्मविद्वाग्मी पुरोधाश्शीलवाञ्शुचिः ॥ २२॥

अलब्धस्य च लाभाय लब्धस्य परिरक्षणे ।
पुरोहितं प्रकुर्वीत राजा गुणसमन्वितम् ॥ २३॥

पुरोहितमते तिष्ठन् य इच्छेत् पृथिवीं नृप ।
प्राप्तुं मेरुवरोत्तंसां सागराम्बरधारिणीम् ॥ २४॥

न हि केवलशौर्येण तापत्याभिजनेन च ।
जयेदब्राह्मणः कश्चिद् भुवि भूमिपतिः क्वचित् ॥ २५॥

तस्मादेवं विजानीहि कुरूणां कीर्तिवर्धन ।
ब्राह्मणप्रमुखं राज्यं शक्यं पालयितुं चिरम् ॥ २६॥

इतिश्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि अष्टषष्ट्यधिकशततमोऽध्यायः ॥ १६८ ॥
॥ ११ ॥ चैत्ररथपर्वणि सप्तमोऽध्यायः ॥ ७ ॥
[अस्मिन्नध्याये २६॥ श्लोकाः]

॥ ऊनसप्तत्युत्तरशततमोऽध्यायः ॥

सूर्यकन्याया तपत्या उपाख्यानम्—स्वभक्ताय संवरणाय स्वकन्यां दातुं सवितुर्निश्चयः ॥ १ ॥ मृगयार्थं संवरणस्य गिरौ तपतीदर्शनेन कामोत्पत्तिः ॥ २ ॥ राज्ञि तया सह भाषितुं प्रवृत्ते तपत्या अन्तर्धानम् ॥ ३ ॥

अर्जुनः—

तापत्य इति यद्वाक्यम् उक्तवानसि मामिह ।
तदहं ज्ञातुमिच्छामि तापत्यार्थविनिश्चयम् ॥ १

तपती नाम का चैषा तापत्या यत्कृते वयम् ।
कौन्तेया हि वयं साधो यत्तदिच्छामि वेदितुम् ॥ २

वैशम्पायनः—

एवमुक्तस्स गन्धर्वः प्रत्युवाच यशस्विनम् ।
अर्जुनं त्रिषु लोकेषु विश्रुतं श्रुतीवद्वचः ॥ ३

गन्धर्वः—

हन्त ते कथयिष्यामि कथामतिमनोरमाम् ।
यथावदखिलां पार्थ धर्म्यां धर्मभृतां वर ॥ ४
उक्तवानस्मि यद्वाक्यं तापत्य इति यद्वचः ।
तत्तेऽहं कथयिष्यामि शृणुष्वैकमना नृप ॥ ५
य एष दिवि तेजस्वी नाकं व्याप्नोति तेजसा ।
सा तस्य तपती नाम बभूव सदृशी सुता ॥ ६
विवस्वतो वै कौन्तेय सावित्र्यवरजा विभो ।
विश्रुता त्रिषु लोकेषु तपती तपसा युता ॥ ७
न देवी नासुरी चैव न यक्षी न च किन्नरी ।
नाप्सरा न च गन्धर्वी तथारूपा न का चन ॥ ८
सुविभक्तानवद्याङ्गी [1]सुस्मितायतलोचना ।
स्वाचारा चैव साध्वी च सुवेषा चैव भामिनी ॥ ९
न तस्यास्सदृशं कञ्चित् त्रिषु लोकेषु भारत ।
भर्तारं सविता मेने रूपशीलकुलैश्रुतैः ॥ १०
संप्राप्तयौवनां पश्यन् देवो दुहितरं शुभाम् ।
अष्टवर्षां तु तां पश्यन् सविता रूपशालिनीम् ॥ ११
नोपलेभे ततश्शान्तिं संप्रदानं विचिन्तयन् ॥ ११॥
अथर्क्षपुत्रः कौन्तेय कुरूणामृषभो युवा ।

1. क-ख-ग-घ—स्वसि

सूर्यमाराधयामास नृपस्संवरणस्तदा ॥ १२॥
अर्घ्यमाल्योपहारैश्च शश्वत् स नृपतिस्तदा ।
नियमैरुपवासैश्च तपोभिर्विविधैरपि ॥ १३॥
शुश्रूषुरनहंवादी शश्वत् कौरवनन्दन ।
अंशुमन्तं समुद्यन्तं पूजयामास भक्तिमान् ॥ १४॥
ततः कृतज्ञो नृपतिं रूपेणासदृशं भुवि ।
तपत्यास्सदृशं मेने सूर्यस्संवरणं पतिम् ॥ १५॥
दातुमैच्छत् ततः कन्यां तस्मै संवरणाय ताम् ।
नृपोत्तमाय कौरव्य विश्रुताभिजनाय च ॥ १६॥
यथा हि दिवि दीप्तांशुः प्रभासयति तेज[1]सा ।
तथा भुवि महीपालो दीप्त्या संवरणोऽभवत् ॥ १७॥
यथाऽर्चयन्ति चादित्यम् उद्यन्तं ब्रह्मवादिनः ।
तथा संवरणं पार्थ ब्राह्मणावरजाः प्रजाः ॥ १८॥
स सोममति कान्तत्वाद् आदित्यमति तेजसा ।
बभूव नृपतिश्श्रीमान् सुहृदां दुर्हृदामपि ॥ १९॥
एवंगुणाय नृपते तथावृत्ताय नित्यशः ।
तस्मै दातुं मनश्चक्रे तपतीं तपनस्स्वयम् ॥ २०॥
स कदाचिदथो राजा श्रीमानुरुयशा भुवि ।

1. अ—नात्

चचार मृगयां पार्थ पर्वतोपवने किल ॥ २१॥

चरतो मृगयां तस्य क्षुत्पिपासाश्रमान्वितः ।
ममार राज्ञः कौन्तेय गिरावप्रतिमो हयः ॥ २२॥

स मृताश्वश्चरन् पार्थ पद्भ्यामेव गिरौ नृपः ।
ददर्शासदृशीं लोके कन्यामायतलोचनाम् ॥ २३॥

स एक एकामासाद्य कन्यां तामरिमर्दनः ।
तस्थौ नृपतिशार्दूलः पश्यन्नविचलेक्षणः ॥ २४॥

स हि तां तर्कयामास रूपतो नृपतिश्रियम् ।
पुनस्स तर्कयामास रवेर्भ्रष्टामिव प्रभाम् ॥ २५॥

गिरिप्रस्थे तु सा यस्मिन् स्थिता स्वसितलोचना ।
स स वृक्षलतागुल्मो हिरण्मय इवाभवत् ॥ २६॥

अवमेने स तां दृष्ट्वा सर्वप्राणभृतां स्त्रियः ।
अवाप्तं चात्मनो मेने स राजा चक्षुषः फलम् ॥ २७॥

जन्मप्रभृति यत्किञ्चिद् दृष्टवान् स महीपतिः ।
रूपं न सदृशं तस्यास् तर्कयामास किञ्चन ॥ २८॥

तया बद्धमनश्चक्षुः पाशैर्गुणमयैस्तदा ।
नातिचक्राम तं देशं बुबुधे न च किञ्चन ॥ २९॥

अस्या नूनं विशालाक्ष्यास् सदेवासुरमानुषम् ।

लोकं निर्मथ्य धात्रेदं रूपमाविष्कृतं कृतम् ॥ ३०॥
इति तां तर्कयामास रूपद्रविणसंपदा ।
कन्यामसदृशीं लोके नृपस्संवरणस्तदा ॥ ३१॥
तां च दृष्ट्वैव कल्याणीं कल्याणाभिजनो नृपः ।
जगाम मनसा चिन्तां काममार्गणपीडितः ॥ ३२॥
तुद्यमानस्सुतीव्रेण नृपतिर्मन्मथाग्निना ।
अप्रगल्भः प्रगल्भां ताम् उवाचाथ यशस्विनीम् ॥ ३३॥

संवरणः—

काऽसि कस्यासि रम्भोरु किमर्थं चेह तिष्ठसि ।
कथं च निर्जनेऽरण्ये चरस्येका शुचिस्मिते ॥ ३४॥
त्वं हि सर्वानवद्याङ्गी सर्वाभरणभूषिता ।
विभूषणमिवैतेषां भूषणानामभीप्सितम् ॥ ३५॥
न देवीं नासुरीं चैव न यक्षीं न च किन्नरीम् ।
न च भोगवतीं मन्ये न गन्धर्वीं न मानुषीम् ॥ ३६॥
या हि दृष्टा मया काश्चित् छ्रुताश्चापि वराङ्गनाः ।
न तासां सदृशीं मन्ये त्वामहं मत्त[1]गामिनि ॥ ३७॥

गन्धर्वः—

एष तां स महीपालो बभाषे न तु सा तदा ।
कामार्तं निर्जनेऽरण्ये प्रत्यभाषत किञ्चन ॥ ३८॥

1. क-ख-ग-घ—काशिनि

तथा लालप्यमानस्य पार्थिवस्यायतेक्षणा ।
सौदामिनीव चाभ्रेषु तत्रैवान्तरधीयत ॥ ३९॥

तामन्विच्छन् स नृपतिः परिचक्राम तत्तदा ।
वनं वनजपत्राक्षीं भ्रमन्नुन्मत्तवत्तदा ॥ ४०॥

अपश्यमानस्स तु तां बहु तत्र विलप्य च ।
निश्चेष्टः कौरवश्रेष्ठ मुहूर्तं स व्यतिष्ठत ॥ ४१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
॥ आदिपर्वणि ऊनसप्तत्युत्तरशततमोऽध्यायः ॥ १६९ ॥
॥ ११ ॥ चैत्ररथपर्वणि अष्टमोऽध्यायः ॥ ८ ॥
अस्मिन्नध्याये ४१॥ श्लोकाः]

॥ सप्तत्यधिकशततमोऽध्यायः ॥

भूतले पतितं राज्ञानं दृष्ट्वा तत्समीपे तपत्या आगमनम् ॥ १ ॥ तयोः संवादः ॥ २ ॥

गन्धर्वः—

अथ तस्यामदृश्यायां नृपतिर्भावमोहितः ।
पातनश्शत्रुसङ्घानां पपात धरणीतले ॥ १

तस्मिन्निपतिते भूमावथ सा चारु[1]वर्णिनी ।

1. क-ख-ग-घ—हासिनी

पुनः पीनायतश्रोणी दर्शयामास तं नृपम् ॥ २
आबभाषेऽथ कल्याणी वाचा मधुरया नृपम् ।
तं कुरूणां कुलकरं कामाभिहतचेतसम् ॥ ३

तपती—

उत्तिष्ठोत्तिष्ठ भद्रं ते न त्वमर्हस्यरिन्दम ।
मोहं नृपतिशार्दूल गन्तुमाविष्कृतं कृतम् ॥ ४

गन्धर्वः—

एवमुक्तस्स नृपतिर् वाचा मधुरया गिरा ।
ददर्श विपुलश्रोणीं तामेवाभिमुखे स्थिताम् ॥ ५
अथ तामसितापाङ्गीम् आबभाषे नराधिपः ।
मन्मथाभिपरीतात्मा सन्दिग्धाक्षरया गिरा ॥ ६

संवरणः—

साधु मामसितापाङ्गि कामार्तं मत्तकाशिनि ।
भजस्वेह यथा नाहं प्राणाञ्जह्यां शुचिस्मिते ॥ ७
त्वदर्थं हि विशालाक्षि मामयं निशितैश्शरैः ।
कामः कमलगर्भाभे प्रविविध्यन्न शाम्यति ॥ ८
दृष्टं स्रस्तमनाक्रन्दं भद्रे काममहाहिना ।
मां च पीनघनश्रोणि संजीवयितुमर्हसि ॥ ९
त्वदधीनाश्च मे प्राणाः किन्नरोद्गीतभाषिणि ।
चारुसर्वाङ्गवद्याङ्गी पद्मेन्दुसदृशानने ॥ १०
न ह्यहं त्वदृते भीरु शक्ष्ये जीवितुमात्मना ।

तस्मात् कुरु विशालाक्षि मय्यनुक्रोशमङ्गने ॥ ११

भक्तं मामसितापाङ्गे न परित्यक्तुमर्हसि ।
त्वं हि मां प्रीतियोगेन त्रातुमर्हसि भामिनि ॥ १२

गान्धर्वेण च मां भीरु विवाहेनैहि सुन्दरि ॥ १२॥

विवाहानां हि रम्भोरु गान्धर्वश्रेष्ठ उच्यते ॥ १३

कन्या—

नाहमीशाऽऽत्मनो राजन् कन्या पितृमती ह्यहम् ।
मयि चेदस्ति ते प्रीतिर् याचस्व पितरं मम ॥ १४

यथा हि ते मया प्राणास् संहृताश्च नरेश्वर ।
दर्शनादेव भूयस्त्वं तथा प्राणान् ममाहरः ॥ १५

न चाहमीशा देहस्य तस्मान्नृपतिसत्तम ।
समीपं नोपगच्छामि न स्वतन्त्रा हि योषितः ॥ १६

का हि सर्वेषु लोकेषु विश्रुताभिजनं नृपम् ।
कन्या नाभिलषेन्नाथं भर्तारं भक्तवत्सलम् ॥ १७

तस्मादेवं गते काले याचस्व पितरं मम ।
आदित्यं प्रणिपातेन तपसा नियमेन च ॥ १८

स चेत् कामयते दातुं तव मामरिमर्दन ।
भविष्याम्यथ ते राजन् सततं वशवर्तिनी ॥ १९

अहं हि तपती नाम सावित्र्यवरजा सुता ।
अस्य लोकप्रदीपस्य सवितुः क्षत्रियर्षभ ॥ २०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥
॥ ११ ॥ चैत्ररथपर्वणि नवमोऽध्यायः ॥ ९ ॥
अस्मिन्नध्याये २० श्लोकाः ।

॥ एकसप्तत्यधिकशततमोऽध्यायः ॥

तपत्यां मोहितस्य संवरणस्य सूर्योपासनसमये वसिष्ठस्यागमनम् ॥ १ ॥

गन्धर्वः—

एवमुक्त्वा ततस्तूर्णं जगामोर्ध्वमनिन्दिता ।
तपती तपतीत्येव विललापातुरो नृपः ॥ १
प्रास्खलच्चा[1]तुरो राजा पुनरुत्थाय धावति ।
धावमानस्तु तपतीम् अदृष्ट्वैव महीपते ॥ २
स तु राजा पुनर्भूमौ तत्रैव निपपात ह ॥ २॥
अमात्यस्सानुयात्रस्तु संददर्श महावने ।
क्षितौ निपतितं काले शक्रध्वजमिवोच्छ्रितम् ॥ ३॥
तं हि दृष्ट्वा महेष्वासं निरश्वं पतितं क्षितौ ।

1. क-ग-ग-घ -सकृत्

बभूव सोऽस्य सचिवस् संप्रदीप्त इवाग्निना ॥ ४॥

त्वरया चोपसङ्गृह्य स्नेहादागतसंभ्रमः ।
तं समुत्थापयामास नृपतिं काममोहितम् ॥ ५॥

भूतलाद्भूमिपालेशं पितेव पतितं सुतम् ॥ ६

प्रज्ञया तपसा चैव वृद्धः कीर्त्या दमेन च ।
अमात्यस्तं समुत्थाप्य बभूव विगतज्वरः ॥ ७

उवाच चैनं कल्याणं वाचा मधुरयोत्थितम् ।
मा भैर्मनुजशार्दूल भद्रं चास्तु तवानघ ॥ ८

क्षुत्पिपासाश्रमार्तं तु तर्कयामास तं नृपम् ।
पतितं पातनं सङ्ख्ये शात्रवाणां महीतले ॥ ९

वारिणाऽथ सुशीतेन शिरस्तस्यावसेचयत् ।
अस्पृशन्मकुटं राज्ञः पुण्डरीकसुगन्धिना ॥ १०

ततः प्रत्यागतप्राणस् तद्बलं बलवान्नृपः ।
सर्वं विसर्जयामास तमेकं सचिवं विना ॥ ११

ततस्तस्याज्ञया राज्ञो विप्रतस्थे महद्बलम् ।
स तु राजा गिरिप्रस्थे तस्मिन् पुनरुपाविशत् ॥ १२

स तु तस्मिन् गिरिवरे शुचिर्भूत्वा कृताञ्जलिः ।
आरिराधयिषुस्सूर्यं तस्थावूर्ध्वभुजः क्षितौ ॥ १३

जगाम मनसा चैवं वसिष्ठमृषिसत्तमम् ।

पुरोहितममित्रघ्नं तदा संवरणो नृपः ॥ १४

नक्तंदिवमथैकत्र स्थिते तस्मिञ्जनाधिपे ।
अथाजगाम विप्रर्षिस् तदा द्वादशमेऽहनि ॥ १५

स विदित्वैव नृपतिं तपत्या हृतमानसम् ।
दिव्येन चक्षुषा ज्ञात्वा भावितात्मा महानृषिः ॥ १६

तथा तु नियतात्मानं तं वै नृपतिसत्तमम् ।
आबभाषे स धर्मात्मा तस्यैवार्थचिकीर्षया ॥ १७

स तस्य मनुजेन्द्रस्य पश्यतो भगवानृषिः ।
ऊर्ध्वमाचक्रमे द्रष्टुं भास्करं भास्करद्युतिः ॥ १८

योजनानां तु नियुतं क्षणाद्गत्वा तपोधनः ।
सहस्रांशुं ततो विप्रः कृताञ्जलिरुपस्थितः ॥ १९

वसिष्ठोऽहमिति प्रीत्या स चात्मानं न्यवेदयत् ॥ १९॥

तमुवाच महातेजा विवस्वान् मुनिसत्तमम् ।
महर्षे स्वागतं तेऽस्तु कथयस्व यथेप्सितम् ॥ २०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि एकसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥

॥ ११ ॥ चैत्ररथपर्वणि दशमोऽध्यायः ॥ १० ॥

[अस्मिन्नध्याये २०॥ श्लोकाः]

॥ द्विसप्तत्यधिकशततमोऽध्यायः ॥

सूर्यनिकटं प्राप्य वसिष्ठेन आदित्यस्तुतिकरणम् ॥ १ ॥

गन्धर्वः—

योजनानां चतुःषष्टिं निमेषात् त्रिशतं तथा ।
अ श्वैर्गच्छति नित्यं यस् तत्पार्श्वस्थोऽब्रवीदिदम् ॥ १

वसिष्ठः—

अजाय लोकत्रयपावनाय
भूतात्मने गोपतये वृषाय ।
सूर्याय सर्गप्रलयालयाय
नमो महाकारुणिकोत्तमाय ॥ २

विवस्वते ज्ञानभृ[1]दन्तरात्मने
जगत्प्रदीपाय जगद्धितैषिणे ।
स्वयंभुवे दीप्तसहस्रचक्षुषे
सुरोत्तमायामिततेजसे नमः ॥ ३

नमस्सवित्रे जगदेकचक्षुषे
जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चनारायणशङ्करात्मने ॥ ४

1. अ—दन्तराय

सूर्यः—
स्तुतोऽस्मि वरदस्तेऽहं वरं वरय सुव्रत ।
स्तुतिस्त्वयोक्ता भक्तानां जप्येयं वरदोस्म्यहम् ॥ ५

वसिष्ठः—
यैषा ते तपती नाम सावित्र्यवरजा सुता ।
तां त्वां संवरणस्यार्थे वरयामि विभावसो ॥ ६
स हि राजा बृहत्कीर्तिर् धर्मार्थविदुदारधीः ।
युक्तस्संवरणो भर्ता दुहितुस्ते वियद्गम ॥ ७

गन्धर्वः—
इत्युक्तस्सविता तेन ददामीत्येव निश्चितः ।
प्रत्यभाषत तं विप्रं प्रतिनन्द्य दिवाकरः ॥ ८

सूर्यः—
वरस्संवरणो राज्ञां त्वमृषीणां वरो मुने ।
तपती योषितां श्रेष्ठा किमन्यत्रापवर्जनात् ॥ ९

गन्धर्वः—
ततस्सर्वानवद्याङ्गीं तपतीं तपनस्स्वयम् ।
ददौ संवरणस्यार्थे वासिष्ठाय महात्मने ॥ १०
प्रतिजग्राह तां कन्यां महर्षिस्तपतीं तदा ।
वसिष्ठोऽथ विसृष्टश्च पुनरेवाजगाम ह ॥ ११
यत्र विख्यातकीर्तिस्स कुरूणामृषभोऽभवत् ।
स राजा मन्मथाविष्टस् तद्गतेनान्तरात्मना ॥ १२
दृष्ट्वा तु देवकन्यां तां तपतीं चारुहासिनीम् ।

वसिष्ठेन सहायान्तीं संहृष्टोऽभ्यधिकं बभौ ॥ १३
कृच्छ्रे द्वादशरात्रे तु तस्य राज्ञस्समापिते ।
आजगाम विशुद्धात्मा वसिष्ठो भगवानृषिः ॥ १४
तपसाऽऽराध्य वरदं देवं गोपतिमीश्वरम् ।
लेभे संवरणो भार्यां वसिष्ठस्य च तेजसा ॥ १५
ततस्तस्मिन् गिरिश्रेष्ठे देवगन्धर्वसेविते ।
जग्राह विधिवत् पाणिं तपत्यास्स नरर्षभः ॥ १६
वसिष्ठेनाभ्यनुज्ञातस् तस्मिन्नेव धराधरे ॥ १६॥
सोऽकामयत राजर्षिर् विहर्तुं सह भार्यया ॥ १७
ततः पुरेषु राष्ट्रेषु वाहनेषु बलेषु च ।
आदिदेश महीपालस् तमेव सचिवं तदा ॥ १८
नृपतिं तं ह्यनुज्ञाप्य वसिष्ठोऽथापचक्रमे ।
स हि राजा गिरौ तस्मिन् विजहारामरोपमः ॥ १९
ततो द्वादशवर्षाणि काननेषु जलेषु च ॥
रेमे तस्मिन् गिरौ राजा सहितो भार्यया यदा ॥ २०
तस्य राज्ञः पुरे तस्मिन् समा द्वादश कृत्स्नशः ।
न ववर्ष सहस्राक्षो रहितेऽ[1]थ नृपे तदा ॥ २१
तत् क्षुधार्तैर्निरानन्दैश् शवभूतैस्तदा नरैः ।
अभवत् प्रेतराजस्य पुरं प्रेतैरिवावृतम् ॥ २२
ततस्तत्तादृशं दृष्ट्वा स एव भगवानृषिः ।

1. अ-ख-घ—स नरेश्वरे

अभ्यपद्यत धर्मात्मा वसिष्ठो नरसत्तमम् ॥ २३
तं च पार्थिवशार्दूलम् आनयामास तत्पुरम् ।
तपत्या सहितं तत्र वर्षे द्वादशमे गते ॥ २४
ततः [1]प्रवृष्टस्तत्रासीद् यथा[2]कालमरिन्दम ॥
तस्मिन्नृपतिशार्दूले प्रविष्टे नगरं पुनः ॥ २५
प्रववर्ष सहस्राक्षस् सस्यानि जनयन् प्रभुः ॥ २५॥
ततस्सराष्ट्रं मुमुदे तत् पुरं परया मुदा ।
तेन पार्थिवमुख्येन भावितं भावितात्मना ॥ २६॥
ततो द्वादश वर्षाणि पुनरीजे जनाधिपः ।
पत्न्या तपत्या सहितो यथा शच्या मरुत्पतिः ॥ २७॥
[3]एवमासीन्महाभागा तपती नाम पूर्विका ।
[4]सैषा वैवस्वती कन्या लब्धा संवरणेन ह ॥ २८॥
तस्यां स जनयामास कुरुं संवरणो नृपः ।
तपत्यां तपतां श्रेष्ठ तापत्यस्त्वं ततोऽर्जुन ॥ २९॥
कुरूद्भवा यतो यूयं कौरवाः कुरवस्तथा ।
पौरवा आजमीढाश्च भारता भरतर्षभ ॥ ३०॥
तापत्यमखिलं प्रोक्तं वृत्तान्तं तव पूर्विकम् ।
पुरोहितमुखा यूयं भुङ्क्ष्वं पृथिवीमिमाम् ॥ ३१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि द्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥
॥ ११ ॥ चैत्ररथपर्वणि एकादशोऽध्यायः ॥ ११ ॥
[अस्मिन्नध्याये ३१॥ श्लोकाः]

---

1. क-ङ-ग-घ –प्रहृष्टः 2. क-ख-ग-घ—कालं सुरारिहा
3. अ-कोशे—इमे चत्वारः श्लोका न दृश्यन्ते ।
4. घ—तव वैवस्वती पार्थ तापत्यस्त्वं यया मतः ।

॥ त्रिसप्तत्यधिकशततमोऽध्यायः ॥

गन्धर्वेण वसिष्ठमाहात्म्यकथनपूर्वकं पाण्डवानां पुरोहितसंग्रहणोपदेशः ॥ १ ॥ वसिष्ठाश्रमं प्राप्तस्य विश्वामित्रस्य वसिष्ठधेनुयाचनम् ॥ २ ॥ धेनुनिमित्तं तयोर्विवादः ॥ ३ ॥ विश्वामित्रपराजयश्च ॥ ४ ॥

वैशम्पायनः—

स गन्धर्ववचश्श्रुत्वा तत्तदा भरतर्षभ ।
अर्जुनः परया प्रीत्या पूर्णचन्द्र इवाबभौ ॥ १

उवाच च महाप्राज्ञो गन्धर्वं कुरुसत्तमः ॥ १॥

अर्जुनः—

जातकौतूहलोऽतीव वसिष्ठस्य तपोबलात् ॥ २
वसिष्ठ इति यस्यैतद् ऋषेर्नाम त्वयेरितम् ।
एतदिच्छाम्यहं श्रोतुं यथावत्तद्वदस्व मे ॥ ३
स एष गन्धर्वपते पूर्वेषां नः पुरोहितः ।
आसीदेतन्ममाचक्ष्व क एष भगवान् ऋषिः ॥ ४

गन्धर्वः—

ब्रह्मणो मानसः पुत्रो वसिष्ठोऽरुन्धतीपतिः ॥ ४॥
तपसा निर्जितौ शश्वद् अजेयावमरैरपि ।
कामक्रोधावुभौ यस्य चरणौ संववाहतुः ॥ ५॥

[1]यश्च नोच्छेदनं चक्रे कुशिकानामुदारधीः ।
विश्वामित्रापराधेन धारयन् मन्युमुत्तमम् ॥ ६॥
पुत्रव्यसनसंतप्तश् शक्तिमानपि यत् प्रभुः ॥ ७
विश्वामित्रविनाशाय मेने कर्म न दारुणम् ॥ ७॥
मृतांश्च पुनराहर्तुं शक्तः पुत्रान् यमक्षयात् ।
कृतान्तं नातिचक्राम वेलामिव महोदधिः ॥ ८॥
यं प्राप्य विजितात्मानं महात्मानं नराधिपाः ।
इक्ष्वाकवो महीपाला लेभिरे पृथिवीमिमाम् ॥ ९॥
पुरोहितवरं प्राप्य वसिष्ठमृषिसत्तमम् ।
ईजिरे क्रतुभिश्चापि नृपास्ते कुरुनन्दन ॥ १०॥
स हि तान् याजयामास सर्वान् नृपतिसत्तमान् ।
ब्रह्मर्षिः पाण्डवश्रेष्ठ बृहस्पतिरिवामरान् ॥ ११॥
यथा वसिष्ठेन सह स सौदासस्सुसङ्गतः ।
रक्षोभिर्विप्रमुक्तस्तु विश्वामित्रेण योजितैः ॥ १२॥
तथा द्विजसहायान् वै न गन्धर्वा न राक्षसाः ।
शक्ताः प्रार्थयितुं वीर मनसाऽपि महाबलाः ॥ १३॥

1. क-ख-ग-घ—यथा कामश्च क्रोधश्च निर्जितावजितौ नरैः ।
जितारयो जिता लोकाः पन्थानश्च जिता दिशः॥
[अधिकः पाठः]

तस्माद्धर्मप्रधानस्तु वेदशास्त्रप्रदीपितः ।
ब्राह्मणो गुणवान् कश्चित् पुरोधाः परिमृश्यताम् ॥ १४॥

क्षत्रियेण तु जातेन पृथिवीं जेतुमिच्छता ।
पूर्वं पुरोहितः कार्यः पार्थ राज्यविवृद्धये ॥ १५॥

महीं जिगीषता राज्ञा ब्रह्म कार्यं पुरस्कृतम् ।
तस्मात् पुरोहितः कश्चिद् गुणवानस्तु वो द्विजः ॥ १६॥

अर्जुनः—

किं निमित्तमभूद्वैरं विश्वामित्रवसिष्ठयोः ।
[1]वसिष्ठस्याश्रमे तत्र शंस तत्सर्वमेव मे ॥ १७॥

गन्धर्वः—

इदं वासिष्ठमाख्यानं पुराणं परिचक्षते ।
पार्थ सर्वेषु लोकेषु यथावत्तन्निबोध मे ॥ १८॥

कन्याकुब्जे महानासीत् पार्थिवो भरतर्षभ ।
गाधीति विश्रुतो लोके सत्यधर्मपरायणः ॥ १९॥

तस्य धर्मात्मनः पुत्रस् समृद्धबलवाहनः ।
विश्वामित्र इति ख्यातो बभूव रिपुनाशनः ॥ २०॥

स चचार सहामात्यो मृगयां सुमहावने ।
मृगान्निघ्नन् वराहांश्च चचार मरुधन्वसु ॥ २१॥

1. क-ख-ग-घ—वसतोराश्रमे

व्यायामार्तस्तु स तदा मृगलिप्सुः पिपासितः ।
आजगाम रथिश्रेष्ठो वसिष्ठस्याश्रमं प्रति ॥ २२॥

[1]वसिष्ठस्तु स तं दृष्ट्वा राजर्षिमतिथिं तदा ।
विश्वामित्रं सशिष्यो वै प्रतिजग्राह पूजया ॥ २३॥

पाद्येनार्घ्यप्रदानेन स्वागतेन च तं नृपम् ।
प्रतिजग्राह धर्मात्मा वन्येन हविषा तदा ॥ २४॥

तस्यैव कामधुग्धेनुर् वसिष्ठस्य महात्मनः ।
उक्ता नन्दिनि धत्स्वेति सा कामान् दुदुहे तदा ॥ २५॥

बाष्पाढ्यस्योदनस्यात्र राशयः पर्वतोपमाः ।
निष्टानानि च सूपांश्च दधिकुल्यास्तथैव च ॥ २६॥

कूपांश्च दधिसंपूर्णान् गुडानां राशयस्तथा ।
भोजनानि महार्हाणि तत्र तत्र सहस्रशः ॥ २७॥

इक्षून् मधूनि लाजांश्च मैरेयांश्च वरासवान् ।
वस्त्राणि च महार्हाणि कम्बलानि सहस्रशः ॥ २८॥

ग्राम्यारण्यौषधीश्चैव दुदुहे पय एव च ॥ २९
षड्रसं चामृतरसं रसायनमनुत्तमम् ॥ २९॥

भोजनीयानि पेयानि भक्ष्याणि विविधानि च ।
लेह्यान्यमृतकल्पानि चोष्याणि च तथाऽर्जुन ॥ ३०॥

1. घ—तमागतमभिप्रेक्ष्य वसिष्ठश्चेष्टभागृषिः ।

रत्नानि च महार्हाणि वासांसि विविधानि च ॥ ३१

[1]तैः कामैस्सर्वसंपन्नैः पूजितस्स महीपतिः ।
सामात्यस्सबलस्तत्र तुतोष सुभृशं तदा ॥ ३२

षडुन्नतां सुपार्श्वोरुं त्रिपृथुं पञ्चसंवृताम् ।
मण्डूकनेत्रां स्वाकारां पीनोधसमनिन्दिताम् ॥ ३३

[2]सुवालधिं शङ्कुकर्णां पीनश्रोणिपयोधराम् ।
पुष्टायतशिरोग्रीवां विस्मितस्सोऽभिवीक्ष्य ताम् ॥ ३४

अभ्यनन्दत् सदा नन्दीं वसिष्ठस्य यशस्विनीम् ।
अब्रवीच्च भृशं तुष्टो विश्वामित्र ऋषिस्तदा ॥ ३५

अर्बुदेन गवां ब्रह्मंस् तथा राज्येन वा पुनः ।
नन्दिनीं संप्रयच्छस्व भुङ्क्ष्व राज्यं महामुने ॥ ३६

वसिष्ठः—

देवताऽतिथिपित्रर्थे याज्यार्थे च पयस्विनी ।
अदेया नन्दिनी चेयं राज्येनापि तवानघ ॥ ३७

विश्वामित्रः—

रत्नं हि भगवन्नेतद् रत्नहारी च पार्थिवः ।

1. घ—यस्य यस्य च यः कामस् स स तेन स तर्पितः ।
2. क-ग-घ—अत्यायतशिरोग्रीवां सुपुष्टाङ्गीं सुयोनिकाम् ।
संभृतोभयपार्श्वोरुं दीर्घवालां पृथूदराम् ॥
दृष्ट्वा गुष्टिमुपेर्भूयो विस्मयाविष्टचेतनः । [अधिकः पाठः]

क्षत्रियोऽहं भवान् विप्रस् तपस्वाध्यायसाधनः ॥ ३८

ब्राह्मणेषु कुतो वीर्यं प्रशान्तेषु धृतात्मसु ।
अर्बुदेन गवां यस्त्वं न ददासि ममेप्सितम् ॥ ३९

स्वधर्मं न प्रहास्यामि स नेष्ये ते बलेन गाम् ॥ ३९॥

क्षत्रियोऽस्मि न विप्रोऽहं बाहुवीर्योऽस्मि धर्मतः ।
तस्माद्भुजबलेनेमां हरिष्यामीह पश्यतः ॥ ४०॥

वसिष्ठः—

अत्र हव्यं च कव्यं च प्राणयात्रा तथैव च ।
आयत्तमग्निहोत्रं च आतिथ्यं च न संशयः ॥ ४१॥

बहुना किं प्रलापेन न दास्ये कामदोहिनीम् ॥ ४२

बलस्थश्चासि राजा च बाहुवीर्यश्च क्षत्रियः ।
[1]यथेच्छसि तथा क्षिप्रं कुरु त्वं मा विचारय ॥ ४३

गन्धर्वः—

एवमुक्तस्तदा पार्थ विश्वामित्रो बलादिव ।
हंसचन्द्रप्रतीकाशां नन्दिनीं वै जहार गाम् ॥ ४४

सा तदा ह्रियमाणाऽपि विश्वामित्रबलैर्बलात् ।

---

1. क-ख-ग—रत्नद्वयं ब्राह्मणस्य नोपहार्यं नृपैर्भुवि ।
अग्निहोत्री च गौः पत्नी प्रजारणिरनुत्तमा ॥
[अधिकः पाठः]

कशादण्डप्रहारैश्च कालयमाना इतस्ततः ॥ ४५

ह्रियमाणा तथा तेन वसिष्ठस्याथ नन्दिनी ।
आगम्याभिमुखी पार्थ तस्थौ भगवदुन्मुखी ॥ ४६
भृशं संतप्यमानाऽपि नाजगामाश्रमात्ततः ॥ ४६॥
आश्रमान्नैव गच्छन्ती हुंकारावैर्ननाद च ॥ ४७
सा तु तेषां बलान्नन्दी बलानां भरतर्षभ ।
[1]विश्वामित्रभयोद्विग्ना वसिष्ठं समुपागमत् ॥ ४८

वसिष्ठः—

शृणोमि ते रवं भद्रे रुदन्त्या वै मुहुर्मुहुः ।
बलात् प्रयासि मे नन्दि क्षमयन् ब्राह्मणो ह्यहम् ॥ ४९

नन्दिनी—

[2]पाषाणदण्डैर्निहतां क्रन्दन्तीं मामनाथवत् ।
विश्वामित्रबलैर्घोरैर् भगवन् किमुपेक्षसे ॥ ५०

[3]गन्धर्वः—

एवं तस्यां तथा पार्थ धर्षितायां महा रेः ।
न चाक्षुभ्यत धैर्याच्च नैव कोपं स ..... ॥ ५१

---

1. घ—बलानि येषां निर्धूय छित्वा पाशनिबन्धनम् । [अधिकः पाठः]
2. क-ख-ग—उपेक्षसे कथं ब्रह्मन् भक्तां पादाब्जसेविनीम् ।
[अधिकः पाठः]
3. घ—वसिष्ठः—शृणोमि ते रवं भद्रे विनदन्त्या मुहुर्मुहुः ।
बलाद्धियसि मे नन्दि क्षमावान् ब्राह्मणोऽस्म्यहम् ॥

वसिष्ठः—

क्षत्रियाणां बलं वीर्यं ब्राह्मणानां क्षमा बलम् ।
क्षमा मां भजते यस्माद् गम्यतां यदि रोचते ॥ ५२

नन्दिनी—

किं नु त्यक्ताऽस्मि भगवन् यदेवं मां प्रभाषसे ।
न त्यक्ताऽहं त्वया ब्रह्मन् नेतुं शक्या बलान्न हि ॥ ५३

वसिष्ठः—

न त्वां त्यजामि कल्याणि स्थीयतां यदि शक्यते ।
दृढेन दाम्ना बद्धैष वत्सस्ते ह्रियते बलात् ॥ ५४
येन केनाप्युपायेन त्वया वत्सो निवार्यताम् ॥ ५४॥

गन्धर्वः—

स्थीयतामिति तच्छ्रुत्वा वसिष्ठस्य पयस्विनी ।
ऊर्ध्वाञ्चितशिरोग्रीवा प्रभावाच्चारुदर्शना ॥ ५५॥
क्रोधरक्तेक्षणा सा गौर् हुंकारवघनस्वनैः ।
विश्वामित्रस्य तत् सैन्यं व्यद्रावयत सर्वशः ॥ ५६॥
कशाग्रदण्डाभिहता क्रान्यमाना ततस्ततः ।
क्रोधदीप्तेक्षणा क्रोधं भूय एव समादधे ॥ ५७॥
आदित्य इव मध्याह्ने क्रोधदीप्तवपुर्बभौ ॥ ५८
अङ्गारवर्षं मुञ्चन्ती मुहुर्वातं मुखाद्वमत् ।

असृजत् पह्लवान् पुच्छात् प्रस्रवाच्छबराञ्छकान् ॥ ५९
योनिदेशाच्च यवनाञ् शकृद्देशाच्छकांस्तथा ।
[1]मूत्रतश्चासृजच्चापि नन्दिनी क्रोधमूर्छिता ॥ ६०
पौण्ड्रान् किरातान् द्रमिडान् सिंहलान् बर्बरांस्तथा ।
[2]तथैव बर्बरान् म्लेच्छान् फेनतस्सा ससर्ज ह ॥ ६१
तैर्विसृष्टैर्महासैन्यैर् नानाम्लेच्छगणैस्तथा ।
नानावरणसंछन्नैर् नानायुधधरैस्तथा ॥ ६२
अवकीर्यत संरब्धैर् विश्वामित्रस्य पश्यतः ॥ ६२॥
एकैकशस्तस्य योधाः पञ्चभिस्सप्तभिर्वृताः ॥ ६३
शस्त्रवर्षेण महता वध्यमानं बलं ततः ।
प्रभग्नदर्पं संत्रस्तं विश्वामित्रस्य पश्यतः ॥ ६४
तस्य तच्चतुरङ्गं वै बलं परमदुस्सहम् ।
प्रभग्नं सर्वतो घोरं पर्यस्विन्या विनिर्जितम् ॥ ६५
न च प्राणैर्वियुज्यन्ते तदा केचन सैनिकाः ।
विश्वामित्रस्य संक्रुद्धैर् वासिष्ठैर्भरतर्षभ ॥ ६६
विश्वामित्रस्य तत् सैन्यं कालयमानं त्रियोजनम् ।
क्रोशमानं भयोद्विग्नं त्रातारं नाध्यगच्छत ॥ ६७

1. घ—मूत्रतश्चासृजन्म्लेच्छान् मूर्ध्ना चान्ध्रान् सृजत्तदा ।
2. घ—पारसीकांश्च सिंहांश्च घनतस्सा ससर्ज ह ।

विश्वामित्रस्ततो दृष्ट्वा क्रोधाविष्टस्स रोदसी ।
ववर्ष शरवर्षाणि वसिष्ठे मुनिसत्तमे ॥ ६८

घोररूपांश्च नाराचान् क्षुरान् भल्लान् महामुनिः ।
विश्वामित्रप्रयुक्तांस्तान् वैणवेन व्यमोचयत् ॥ ६९

वसिष्ठस्य तदा दृष्ट्वा कर्मकौशलमाहवे ॥ ६९॥

विश्वामित्रोऽपि कोपेन भूयश्शत्रुनिपातनः ।
दिव्यास्त्रवर्षं तस्मै तु प्राहिणोन्मुनये रुषा ॥ ७०॥

आग्नेयं वारुणं चैन्द्रं याम्यं वायव्यमेव च ।
विससर्ज महाभागे वसिष्ठे ब्रह्मणस्सुते ॥ ७१॥

अस्त्राणि सर्वतो ज्वालां विसृजन्ति प्रपेदिरे ।
युगान्तसमये घोराः पतङ्गस्येव रश्मयः ॥ ७२॥

वसिष्ठोऽपि महातेजा ब्रह्मशक्तिप्रयुक्तया ।
यष्ट्या निवारयामास सर्वाण्यस्त्राणि स स्मयन् ॥ ७३॥

ततस्ते भस्मसाद्भूताः पतन्ति स्म महीतले ।
अपोह्य दिव्यान्यस्त्राणि वसिष्ठो वाक्यमब्रवीत् ॥ ७४॥

वसिष्ठः—

निर्जितोऽसि महाराज दुरात्मन् गाधिनन्दन ।
यदि तेऽस्ति परं शौर्यं तद्दर्शय मयि स्थिते ॥ ७५॥

गन्धर्वः—

विश्वामित्रस्तथा चोक्तो वसिष्ठेन नराधिप ।
नोवाच किंचिद्व्रीडाट्यो विद्राविसमहाबलः ॥ ७६॥

तद्दृष्ट्वा महदाश्चर्यं ब्रह्मतेजोभवं बलम् ।
विश्वामित्रः क्षत्रभावान्निर्विण्णो वाक्यमब्रवीत् ॥ ७७॥

विश्वामित्रः—

धिग्बलं क्षत्रियबलं ब्रह्मतेजोबलं बलम् ।
बलाबले विनिश्चित्य तप एव परं बलम् ॥ ७८॥

गन्धर्वः—

स राज्यं स्फीतमुत्सृज्य तां च दीप्तां नृपश्रियम् ।
भोगांश्च पृष्ठतः कृत्वा तप एव समाददे ॥ ७९॥

स गत्वा तपसा सिद्धिं लोकान् विष्टभ्य तेजसा ।
तताप सर्वान् लोकांश्च ब्राह्मणत्वमवाप च ॥ ८०॥

अपिबच्च [1]सुतं सोमम् इन्द्रेण सह कौशिकः ॥ ८१

एवंवीर्यस्तु राजर्षिर् विप्रर्षिस्संबभूव ह ॥ ८१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि त्रिसप्तत्यधिकशततमोऽध्यायः ॥ १७३ ॥
॥ ११ ॥ चैत्ररथपर्वणि द्वादशोऽध्यायः ॥ १२ ॥
[अस्मिन्नध्याये ८१॥ श्लोकाः]

---

1. क-ख-ग-घ—हुतं

॥ चतुस्सप्तत्यधिकशततमोऽध्यायः ॥

कल्माषपादराजोपाख्याने—वसिष्ठपुत्रेण शक्तिना कल्माषपादं प्रति शापदानम् ॥ १ ॥ पुनरन्येन ब्राह्मणेन च कल्माषपादं प्रति शापदानम् ॥ २ ॥ राक्षसाविष्टेन कल्माषपादेन वसिष्ठपुत्राणां भक्षणम् ॥ ३ ॥ पुत्रशोकाभिसंतप्तेन वसिष्ठेन प्राणत्यागार्थं अनेकधा प्रयतनम् ॥ ४ ॥

अर्जुनः—

ऋष्योस्तु यत्कृते वैरं विश्वामित्रवसिष्ठयोः ।
बभूव गन्धर्वपते ब्रूहि तत्सर्वमेव च ॥ १

माहात्म्यं च वसिष्ठस्य ब्राह्मण्यं ब्रह्मतेजसः ।
विश्वामित्रस्य च तथा क्षत्रस्य च महात्मनः ॥ २

न शृण्वानस्त्वहं तृप्तिम् उपगच्छामि खेचर ।
आख्याहि गन्धर्वपते [1]तत्कथासारमेव च ॥ ३
माहात्म्यं च वसिष्ठस्य [2]विचित्राणि च भाषसे ॥ ३॥

गन्धर्वः—

इदं वासिष्ठमाख्यानं पुराणं पुण्यमुत्तमम् ।
पार्थ सर्वेषु लोकेषु विश्रुतं तन्निबोध मे ॥ ४॥

कल्माषपाद इत्यस्मिन् लोके राजा बभूव ह ॥ ५
इक्ष्वाकूणां कुले जातस् तेजसा सदृशो भुवि ।

1. अ-क-ख-ग—ब्रूहि तत्सर्वमेव च 2. क-ख-ग—विश्वामित्रस्य

नास्ति तस्य महाराज वैश्वानरसमद्युतेः ॥ ६
स कदाचिद्वने रम्ये मृगयामचरद्बली ।
मृगान्निघ्नन् वराहांश्च चचार रिपुसूदनः ॥ ७
स तु राजा महात्मानं वासिष्ठमृषिसत्तमम् ।
स तृष्णार्तः क्षुधार्तश्च एकायनगतः पथि ॥ ८
अपश्यदजितस्सङ्ख्ये मुनिं प्रतिमुखागतम् ॥ ८॥
शक्तिं नाम महाभागं वसिष्ठकुलनन्दनम् ।
ज्येष्ठं [1]पुत्रशतात् पुत्रं वसिष्ठस्य महात्मनः ॥ ९॥
अपगच्छ पथोऽस्माकम् इत्येवं पार्थिवोऽब्रवीत् ।
स चाप्यृषिरुवाचैनं सान्त्वयञ्श्लक्ष्णया गिरा ॥ १०॥

शक्तिः—

मम पन्था महाराज धर्म एष सनातनः ।
राज्ञा धर्मेण संदिष्टो देयः पन्था द्विजातये ॥ ११॥

गन्धर्वः—

ऋषिस्तु नापचक्राम तस्मिन् धर्मपथे स्थितः ।
अपि राजा मुनेर्मार्गात् क्रोधान्नापजगाम ह ॥ १२॥
अमुञ्चन्तं तु पन्थानं तमृषिं नृपसत्तमः ।
जघान कशया मोहान्नृपो राक्षसवन्मुनिम् ॥ १३॥
कशाप्रहाराभिहतो राजानमृषिसत्तमः ।

1. घ—पुत्रशतानां च वासिष्ठानां महात्मनाम् ।

तं शशाप नृपश्रेष्ठं वासिष्ठः क्रोधमूर्च्छितः ॥ १४॥

शक्तिः—

हंसि राक्षसवद्यन्मां राजापशद तापसम् ।
तस्मात् त्वमद्यप्रभृति पुरुषादो भविष्यसि ॥ १५॥

मनुष्यपिशिते सक्तश् चरिष्यसि महीमिमाम् ।
गच्छ राजाधमेत्युक्तश् शक्तिना वीर्यशक्तिना ॥ १६॥

तत्र राज्यनिमित्तं तु विश्वामित्रवसिष्ठयोः ।
वैरमासीद्यदा तं तु विश्वामित्रोऽन्वविन्दत ॥ १७॥

तयोर्विवदतोरेवं समीपमुपचक्रमे ।
ऋषिरुग्रतपाः पार्थ विश्वामित्रः प्रतापवान् ॥ १८॥

ततस्स बुबुधे पश्चात् तमृषिं नृपसत्तम ।
ऋषेः पुत्रं वसिष्ठस्य वसिष्ठमिव तेजसा ॥ १९॥

अन्तर्धाय तदाऽऽत्मानं विश्वामित्रस्तु भारत ।
तावुभावपचक्राम चिकीर्षन्नात्मनः प्रियम् ॥ २०॥

स तु शप्तस्तदा तेन शक्तिना वै नृपोत्तमः ।
जगाम शरणं राजा प्रसादयितुमर्हयन् ॥ २१॥

तस्य भावं विदित्वा तु नृपतेः कुरुनन्दन ।
विश्वामित्रस्ततो रक्ष आदिदेश नृपं प्रति ॥ २२॥

शापात्तस्य स विप्रर्षेर् विश्वामित्रस्य चाज्ञया ।

राक्षसः किङ्करो नाम विवेश नृपतिं तदा ॥ २३॥

रक्षसा तं गृहीतं तु विदित्वा स मुनिस्तदा ।
विश्वामित्रोऽप्यपाक्रामत् तस्माद्देशादरिन्दम ॥ २४॥

ततस्स नृपतिर्विद्वान् रक्षन्नात्मानमात्मना ।
बलवत्पीड्यमानोऽपि रक्षसा[1]ऽन्तर्गतेन ह ॥ २५॥

ददर्श तं द्विजः कश्चिद् राजानं प्रस्थितं पुनः ।
ययाचे क्षुधितश्चैनं समांसं भोजनं तथा ॥ २६॥

तमुवाच स राजर्षिर् द्विजं मित्र[2]सहं तदा ॥ २७

आस्स्व ब्रह्मंस्त्वमत्रैव मुहूर्तमिव सान्त्वयन् ।
विनिवृत्तः प्रदास्यामि भोजनं ते यथेप्सितम् ॥ २८

इत्युक्त्वा प्रययौ राजा तस्थौ च द्विजसत्तमः ॥ २८॥

अन्तःपुरं गतो राजा श्रुत्वा ब्राह्मणभाषितम् ॥ २९

सोऽन्तःपुरं प्रविश्याथ न सस्मार नराधिपः ॥ २९॥

ततोऽर्धरात्र उत्थाय सूदमानाय्य सत्तमः ।
उवाच वचनं स्मृत्य ब्राह्मणस्य प्रतिश्रुतम् ॥ ३०॥

राजा—

गच्छामुष्मि[3]न्नसौ देशे ब्राह्मणो मां प्रतीक्षते ।

---

1. अ—तस्य तेन
2. क-ख-ग-घ—सहस्तदा
3. क-ख-ग—न्वनोद्देशे

अन्नार्थिनं त्वमन्नेन समांसेनोपपादय ॥ ३१॥

गन्धर्वः—

एवमुक्तस्तदा सूदस् सोऽनासाद्यामिषं क्वचित् ।
निवेदयामास पुनस् तस्मै राज्ञे व्यथाऽन्वितः ॥ ३२॥

राजा तु रक्षसाऽऽविष्टस् सूदमाह गतव्यथः ।
अप्येनं नरमांसेन भोजयेति पुनः पुनः ॥ ३३॥

तथेत्युक्त्वा ततस्सूदस् संस्थानं वध्यघातिनाम् ।
गत्वाऽऽजहार त्वरितो नरमांसमपेतभीः ॥ ३४॥

एतत् संस्कृत्य विधिवद् अन्नं सामिषमाशु वै ।
तस्मै प्रादाद्ब्राह्मणाय क्षुधिताय तपस्विने ॥ ३५॥

[1]स दिव्यचक्षुर्दृष्ट्वा तु तदन्नं द्विजसत्तमः ।
अभोज्यमिति मत्वाऽऽह क्रोधपर्याकुलेक्षणः ॥ ३६॥

ब्राह्मणः—

यस्मादभोज्यमन्नं मे ददाति स नृपाधमः ।
तस्मात्तस्यैव मुग्धस्य भविष्यत्यत्र लोलुपः ॥ ३७॥

सक्तो मानुषमांसेषु यथोक्तं शक्तिना पुरा ।
उद्वेजनीयो भूतानां चरिष्यति महीमिमाम् ॥ ३८॥

गन्धर्वः—

द्विरनुव्याहृते वाक्ये शापो हि बलवानभूत् ।

---

1. घ—स मानुषामिषं ज्ञात्वा ददासि स नृपाधम ।

रक्षोबलसमाविष्टो विसंज्ञश्चाभवत्तदा ॥ ३९॥

ततस्स नृपतिः पार्थ रक्षसाऽपहृतेन्द्रियः ।
उवाच शक्तिं दृष्ट्वा तु न चिरादिव भारत ॥ ४०॥

यस्मादसदृशश्शापः प्रयुक्तोऽयं मयि त्वया ।
तस्मात्त्वत्तः प्रवर्तिष्ये खादितुं मानुषानहम् ॥ ४१॥

एवमुक्त्वा ततस्सद्यस् तं प्राणैर्विप्रयोज्य सः ।
शक्तिनं भक्षयामास व्याघ्रः पशुमिवेप्सितम् ॥ ४२॥

शक्तिनं तु हतं दृष्ट्वा विश्वामित्रस्ततः पुनः ।
वसिष्ठस्यैव पुत्रेषु तद्रक्षस्संदिदेश ह ॥ ४३॥

स ताञ्शतावरान् पुत्रान् वसिष्ठस्य महात्मनः ।
भक्षयामास संक्रुद्धस् सिंहः क्षुद्रमृगानिव ॥ ४४॥

वसिष्ठो घातिताञ्श्रुत्वा विश्वामित्रेण स्वान् सुतान् ।
धारयामास संशोकं महाद्रिरिव मेदिनीम् ॥ ४५॥

चक्रे चात्मविनाशाय बुद्धिं स मुनिपुङ्गवः ।
न त्वेव कुशिकोच्छेदं मेने मतिमतां वरः ॥ ४६॥

स मेरुकूटादात्मानं मुमोच भगवानृषिः ।
शिरस्तस्य शिलायां च तूलराशाविवापतत् ॥ ४७॥

न ममार च पातेन तदा स मुनिसत्तमः ॥ ४८

तदाऽग्निमिध्वा भगवान् संविवेश महावने ।

तं तदा सुसमिद्धोऽपि न ददाह हुताशनः ॥ ४९

दीप्यमानोऽप्यमित्रघ्न शीतोऽग्निरभवत्तदा ॥ ४९॥

स समुद्रमभिप्रेत्य शोकाविष्टो महामुनिः ।
बद्ध्वा कण्ठे शिलां गुर्वीं निपपात तदम्भसि ॥ ५०॥

स समुद्रोर्मिवेगेन स्थले न्यस्तो महामुनिः ॥ ५१

जगाम सततं खिन्नः पुनरेवाश्रमं प्रति ॥ ५१॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्याम्
आदिपर्वणि चतुस्सप्तत्यधिकशततमोऽध्यायः ॥ १७४ ॥
॥ ११ ॥ चैत्ररथपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥
[अस्मिन्नध्याये ५१॥ श्लोकाः]

॥ पञ्चसप्तत्यधिकशततमोऽध्यायः ॥

पूर्वोपायैरपि दुस्त्यजप्राणस्य वसिष्ठस्य पुनर्गङ्गापतनादिनाऽपि प्राणत्यागासंभवे आश्रमं प्रत्यागमनम् ॥ १ ॥ शक्तिभार्यामदृश्यन्तीनाम्नीं गर्भवतीं ज्ञात्वा आत्मघातान्निवर्तनम् ॥ २ ॥

गन्धर्वः—

[1]स आश्रमपदं दृष्ट्वा रहितं तैर्महामुनिः ।
निर्जगाम सुदुःखार्तः पुनरेवाश्रमात्ततः ॥ १

सोऽपश्यत् सरितं पूर्णां प्रावृट्काले नवाम्भसा ।

1. घ—ततो दृष्ट्वाऽऽश्रमपदं पुत्रैर्विरहितो मुनिः ।

वृक्षान् वञ्जुलनीपादीन् वहन्तीं तीरजान् बहून् ॥ २

अथ चिन्तां समापेदे मुनिः पौरवनन्दन ।
अम्भस्यस्या निमज्जेयम् इति दुःखसमन्वितः ॥ ३

तथा पाशैस्तदाऽऽत्मानं गाढं बद्ध्वा महामुनिः ।
तस्या जले महानद्या निममज्ज सुदुःखितः ॥ ४

अथ च्छित्त्वा नदी पाशं तस्यारिबलमर्दन ।
स्थलस्थं तमृषिं कृत्वा विपाशं [1]सा समासृजत् ॥ ५

उत्ततार ततः पाशैर् विमुक्तस्स महानृषिः ।
विपाशेति च नामास्या नद्याश्चक्रे महानृषिः ॥ ६

सा विपाशेति विख्याता नदी लोकेषु भारत ।
ऋषेस्त्वथ नरव्याघ्र वचनात्तस्य धीमतः ॥ ७

उत्तीर्य च ततो राजन् दुःखितो भगवानृषिः ।
शोके बुद्धिं तु तां चक्रे न चैकत्र व्यतिष्ठत ॥ ८

सोऽपश्यत् पर्वतांश्चैव सरितश्च सरांसि च ॥ ८॥

दृष्ट्वा स पुनरेवर्षिर् नदीं हैमवतीं तदा ।
चण्डग्राहवतीं दृष्ट्वा स्रोतस्यात्मानमात्मना ॥ ९॥

मज्जयामास शोकार्तो मरणे कृतनिश्चयः ॥ १०

सा तमग्निसमं विप्रम् उपलभ्य सरिद्वरा ।

---

1. घ—समवासृजत्

शतधा विद्रुता तस्माच् छतद्रुरिति विश्रुता ॥ ११

ततस्थलगतं दृष्ट्वा आत्मानमृषिसत्तमः ।
[1]मर्तुं न शक्यमित्युक्त्वा पुनरेवाश्रमं ययौ ॥ १२

वध्वाऽदृश्यन्त्याऽनुगता आश्रमाभिमुखं व्रजन् ।
अथ शुश्राव संगम्य वेदाध्ययननिस्स्वनम् ॥ १३

पृष्ठतः परिपूर्णार्थैष् षड्भिरङ्गैरलङ्कृतम् ॥ १३॥

अनुव्रजति कोन्वेष मामित्येव च सोऽब्रवीत् ॥ १४

अदृश्यन्त्यहमित्येव तं स्नुषा प्रत्यभाषत ।
शक्तेर्भार्या महाभाग तपोयुक्ता मनस्विनी ॥ १५

वसिष्ठः—
पुत्रि कस्यैष साङ्गस्य वेदस्याध्ययनस्वनः ।
पुरा साङ्गस्य वेदस्य शक्तेरिव मया श्रुतः ॥ १६

अदृश्यन्ती—
अयं कुक्षौ समुत्पन्नस् शक्तेर्गर्भस्सुतस्य ते ।
समा द्वादश तस्येह वेदानभ्यस्यतो गताः ॥ १७

गन्धर्वः—
एवमुक्तस्ततो हृष्टो वसिष्ठश्श्रेष्ठभागिनीम् ।
अस्ति सन्तानमित्युक्त्वा मृत्योः पार्श्व न्यवर्तत ॥ १८

---

1. घ—स गत्वा विविधाञ्शैलान् देशान् बहुविधांस्तथा ।
अथ दिष्ट्याऽऽगतश्श्रीमान् आश्रमाभिमुखो ययौ॥
[अधिकः पाठः]

ततः प्रतिनिवृत्तस्स तया वध्वा सहानघ ।
कल्माषपादमासीनं ददर्श विजने तदा ॥ १९

स तु दृष्ट्वैव तं राजा क्रुद्ध उत्थाय भारत ।
आविष्टो रक्षसोग्रेण इयेषात्तुमथौजसा ॥ २०

अदृश्यन्ती तु तं दृष्ट्वा घोरकर्माणमग्रतः ।
भयसंविग्नया वाचा वसिष्ठमिदमब्रवीत् ॥ २१

अदृश्यन्ती—

असौ मृत्युरिवोग्रेण दण्डेन भगवन्निह ।
प्रगृहीतोऽतिघोरेण राक्षसोऽभ्येति भीषणः ॥ २२

तं निवारयितुं शक्तो नान्योऽस्ति भुवि कश्चन ।
त्वदृतेऽद्य महाभाग सर्ववेदविदां वर ॥ २३

त्राहि मां भगवन् पापाद् अस्माद्दारुणदर्शनात् ।
[1]राक्षसोऽत्तुमिहाप्यायान्नूनमेतच्चिकीर्षितम् ॥ २४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि पञ्चसप्तत्यधिकशततमोऽध्यायः ॥ १७५ ॥

॥ ११ ॥ चैत्ररथपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥

[अस्मिन्नध्याये २४ श्लोकाः]

---

1. घ—राक्षसोऽत्तुमयं त्र्यावां नूनमद्य चिकीर्षति ।

॥ षट्सप्तत्यधिकशततमोऽध्यायः ॥

वसिष्ठं भक्षयितुमागतस्य कल्माषपादस्य वसिष्ठेन शापान्मोक्षणम् ॥ 1 ॥ सौदासपत्न्या वसिष्ठाद्गर्भसंभवः ॥ २ ॥ अश्मकनामपुत्रोत्पत्तिः ॥ ३ ॥

वसिष्ठः—

मा भैः पुत्रि न भेतव्यं रक्षसस्ते कथञ्चन ।
नैतद्रक्षो भयं यस्मात् पश्यसि त्वमुपस्थितम् ॥ १

राजा कल्माषपादोऽयं वीर्येण प्रथितो भुवि ।
स एषोऽस्मिन् वनोद्देशे निवसत्यतिभीषणः ॥ २

गन्धर्वः—

तमापतन्तं संक्रुद्धं वसिष्ठो भगवानृषिः ।
वारयामास तेजस्वी हुङ्कारेणैव भारत ॥ ३

मन्त्रपूतेन च पुनस् स तमभ्युक्ष्य वारिणा ।
मोक्षयामास घोराद्वै राक्षसाद्राजसत्तम ॥ ४

स हि द्वादश वर्षाणि वासिष्ठस्यैव तेजसा ।
ग्रस्त आसीद्ग्रहेणेव पर्वकाले दिवाकरः ॥ ५

रक्षसा विप्रमुक्तोऽथ स नृपस्तद्वनं महत् ।
तेजसा रञ्जयामास सन्ध्याभ्रमिव भास्करः ॥ ६

प्रतिलभ्य ततस्संज्ञाम् अभिवाद्य कृताञ्जलिः ।
उवाच नृपतिः काले वसिष्ठमृषिसत्तमम् ॥ ७

सौदासोऽहं महाभाग याज्यस्ते द्विजसत्तम ।
अस्मिन् काले यदिष्टं ते ब्रूहि किं करवाणि ते ॥ ८

वसिष्ठः—
वृत्तमेतद्यथाकालं गच्छ राज्यं प्रशाधि तत् ।
ब्राह्मणांश्च मनुष्येन्द्र माऽवमंस्थाः कदाचन ॥ ९

राजा—
नावमंस्यामि वै ब्रह्मन् कदाचिद्ब्राह्मणानहम् ।
त्वन्निदेशे स्थितश्शश्वत् पूजयिष्याम्यहं द्विजान् ॥ १०

इक्ष्वाकूणां तु येनाहम् अनृणस्स्यां द्विजोत्तम ।
तत्त्वतः प्राप्तुमिच्छामि सर्ववेदविदां वर ॥ ११

अपत्यायेप्सिताय त्वं महिषीं गन्तुमर्हसि ।
शीलरूपगुणोपेताम् इक्ष्वा[1]कूणां हि वृद्धये ॥ १२

गन्धर्वः—
ददानीत्येव तं तत्र राजानं प्रत्युवाच ह ।
वसिष्ठः परमेष्वासं सत्यसन्धो महातपाः ॥ १३

ततः प्रतियया कालेवसिष्ठसहितोऽनघः ।
ख्यातं पुरवरं लोकेष्वयोध्यां मनुजेश्वरः ॥ १४

---

1. क-ख-ग-घ—कुकुल

तं प्रजाः प्रतिनन्दन्त्यस् सर्वाः प्रत्युद्ययुस्तदा ।
विपाप्मानं महात्मानं दिवौकस इवेश्वरम् ॥ १५

अचिरात् स मनुष्येन्द्रो नगरीं पुण्यकर्मणाम् ।
विवेश सहितस्तेन वसिष्ठेन महात्मना ॥ १६

ददृशुस्तं ततो राजन्नयोध्यापुरवासिनः ।
पुष्येण सहितं काले निशाकरमिवोदितम् ॥ १७

स हि तां पूरयामास लक्ष्म्या लक्ष्मीवतां वरः ।
अयोध्यां व्योम शीतांशुश् शरत्काल इवोदितः ॥ १८

संसिक्तमृष्टपन्थानं पताकोच्छ्रितभूषितम् ।
मनः प्रह्लादयामास तस्य तत्पुरमुत्तमम् ॥ १९

हृष्टपुष्टजनाकीर्णा सा पुरी कुरुनन्दन ।
अशोभत तदा तेन शक्रेणेवामरावती ॥ २०

ततः प्रविष्टे कौन्तेय तस्मिन् राजनि तां पुरीम् ।
तस्य राज्ञोऽथ सा देवी वसिष्ठमुपचक्रमे ॥ २१

ऋतावथ महर्षिस्स संबभूव तया सह ।
देव्या दिव्येन विधिना वसिष्ठश्श्रेष्ठभागृषिः ॥ २२

ततस्तस्यां समुत्पन्ने गर्भे स मुनिसत्तमः ।
राज्ञाऽभिवादितस्तेन जगाम पुनराश्रमम् ॥ २३

दीर्घकालकृतं गर्भं सुषाव न तु तं यदा ।

[1]साऽथ देव्यश्मना कुक्षिं निर्बिभेद तदा स्वकम् ॥ २४

द्वादशेऽथ ततो वर्षे संजज्ञे मनुजर्षभ ।
अश्मको नाम राजर्षिः [2]पातनं यो न्यवेशयत् ॥ २५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि षट्सप्तत्यधिकशततमोऽध्यायः ॥ १७६ ॥

॥ ११ ॥ चैत्ररथपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥
अस्मिन्नध्याये २५ श्लोकाः ।

॥ सप्तसप्तत्यधिकशततमोऽध्यायः ॥

पराशरोत्पत्तिः ॥ १ ॥ पितरं कल्माषपादभक्षितं ज्ञात्वा क्रुद्धेन पराशरेण लोकविनाशाय यतनम् ॥ २ ॥ कार्तवीर्यवंश्यैः क्षत्रियैः धनार्थं भृगुवंश्यानां ब्राह्मणानां हननम् ॥ ३ ॥ क्षत्रियभीत्या कयाचिद्ब्राह्मण्या ऊरौ गर्भं धृतं हन्तुं क्षत्रियाणामुद्यमः ॥४॥ ऊरुं भित्त्वा निर्गतस्य बालकस्य तेजसाऽन्धीभूतानां क्षत्रियाणां ब्राह्मणीं प्रति शरणगमनम् ॥ ५ ॥

गन्धर्वः—

आश्रमस्था ततः पुत्रम् अदृश्यन्ती व्यजायत ।
शक्तेः कुलकरं राजन् द्वितीयमिव शक्तिनम् ॥ १

जातकर्मादिकास्तस्य क्रियास्स मुनिपुङ्गवः ।
पौत्रस्य भरतश्रेष्ठ चकार भगवान् स्वयम् ॥ २

1. घ—अश्मना चात्मनः कुक्षिं निष्पिपेष मनस्विनी ।
2. क-ख-ग—पत्तनं

पराशीर्णो यतस्तेन वसिष्ठस्थापितस्तदा ।
गर्भस्तेन ततो लोके पराशर इति स्मृतः ॥ ३
अमन्यत स धर्मात्मा वसिष्ठं पितरं तदा ।
जन्मप्रभृति तस्मिंस्तु पितरीव व्यवर्तत ॥ ४
स तात इति विप्रर्षिं वसिष्ठं प्रत्यभाषत ।
मातुस्समीपे कौन्तेय अदृश्यन्त्या नराधिप ॥ ५
तातेति परिपूर्णार्थं तस्येदं मधुरं वचः ।
अदृश्यन्त्यश्रुपूर्णाक्षी शृण्वन्ती तमुवाच ह ॥ ६

अदृश्यन्ती—

मा तात तातेति न ते तातो महामुनिः ।
रक्षसा भक्षितस्तात तव तातो महामुनिः ॥ ७
मन्यसे यं तु तातं त्वं नैव तातस्तवानघ ।
आर्य एष पिता तस्य पितुस्तव मनस्विनः ॥ ८

गन्धर्वः—

स एवमुक्तो दुःखार्तस् सत्यवागृषिसत्तमः ।
सर्वलोकविनाशाय मतिं चक्रे महातपाः ॥ ९
वसिष्ठो वारयामास हेतुना येन तच्छृणु ।
कृतवीर्य इति ख्यातो बभूव नृपतिः क्षितौ ॥ १०
याज्यो वेदविदां लोके भृगूणां पार्थिवर्षभ ।
स तानन्वग्रहीत्तात धान्येन च धनेन च ॥ ११
सोमेन तर्पयामास विपुलेन विशांपतिः ॥ ११॥

तस्मिंस्तु नृपशार्दूले स्वर्यातेऽथ कदाचन ।
बभूव तत्कुले राज्ञां द्रव्यकार्यमुपस्थितम् ॥ १२॥
ते भृगूणां धनं ज्ञात्वा राजानस्सर्व एव हि ।
याचिष्णवोऽभिजग्मुस्तांस् तात भार्गवसत्तमान् ॥ १३॥
भूमौ तु निदधुः केचिद् भृगवो धनमक्षयम् ।
ददुः केचिद्द्विजातिभ्यो ज्ञात्वा क्षत्रियतो भयम् ॥ १४॥
भृगवस्तु ददुः केचित् तेषां वित्तं यथेप्सितम् ॥ १५
क्षत्रियाणां तदा तात कारणान्तरदर्शनात् ॥ १५॥
ततो महीतलं तात क्षत्रियेण यदृच्छया ।
खनताऽधिगतं वित्तं कस्मिंश्चिद्भृगुवेश्मनि ॥ १६॥
तद्वित्तं ददृशुस्सर्वे समेताः क्षत्रियर्षभ ॥ १७
अवमत्य ततः क्रोधाद् भृगूंस्ते शरणागतान् ।
निजघ्नुस्ते महेष्वासा बहून् वै निशितैश्शरैः ॥ १८
आगर्भादनुकृन्तन्तश् चेरुश्चैव वसुन्धराम् ॥ १८॥
तत उत्साद्यमानेषु भृगुष्वेवं भयात्तदा ।
भृगुपत्न्यो गिरिं तात हिमवन्तं प्रपेदिरे ॥ १९॥
तासामन्यतमा गर्भं धारयामास तेजसा ।
ऊरुणैकेन वामोरूर् भर्तुः कुलविवृद्धये ॥ २०॥
तं गर्भमुपलभ्याथ ब्राह्मण्योऽन्या भयार्दिताः ।

गत्वा वै कथयामासुः क्षत्रियाणामुपान्तिके ॥ २१॥
ततस्ते क्षत्रिया जग्मुस् तं गर्भं हन्तुमुद्यताः ।
ददृशुर्ब्राह्मणीं तां ते दीप्यमानां स्वतेजसा ॥ २२॥
अथ गर्भस्स भित्त्वोरुं ब्राह्मण्या निर्जगाम ह ॥ २३
मुष्णन् दृष्टीः क्षत्रियाणां मध्याह्न इव भास्करः ॥ २३॥
ततश्चक्षुर्विहीनास्ते गिरिदुर्गेषु बभ्रमुः ॥ २४
ततस्ते मोघसङ्कल्पा भयार्ताः क्षत्रियाः पुनः ।
ब्राह्मणीं शरणं जग्मुर् दृष्ट्यर्थं तामनिन्दिताम् ॥ २५
ऊचुश्चैनां महाभागां क्षत्रियास्ते विचेतसः ।
ज्योतिःप्रहीणा दुःखार्ताश् शान्तार्चिष इवाग्नयः ॥ २६
भगवत्याः प्रसादेन गच्छेत् क्षत्रं निरामयम् ।
[1]पापादस्मादुपारम्य पश्येम च तथा पुनः ॥ २७
सपुत्रा त्वं प्रसादं नस् सर्वेषां कर्तुमर्हसि ।
पुनर्दृष्टिप्रदानेन क्षत्रियांस्त्रातुमर्हसि ॥ २८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥
॥ ११ ॥ चैत्ररथपर्वणि षोडशोऽध्यायः ॥ १६ ॥
[अस्मिन्नध्याये २८ श्लोकाः]

---

1. ब—उपारम्य च गच्छेम सहिताः पापकर्मणः ।

॥ अष्टसप्तत्यधिकशततमोऽध्यायः ॥

ब्राह्मणीवाक्येन और्वं प्रति शरणागतानां क्षत्रियाणां चक्षुःप्राप्तिः॥१॥ लोकविनाशार्थं तपस्यत और्वस्य तत्पितृकृततपोनिवारणम् ॥ २ ॥

ब्राह्मणी—

नाहं मुष्णामि वस्तात दृष्टिं नास्मि रुषाऽन्विता ।
अयं तु भार्गवो नाम ऊरुजः कुपितो ध्रुवम् ॥ १

तेन चक्षूंषि वस्तात कुपितेन महात्मना ।
स्मरता निहतान् बन्धून् आर्तानिह कथञ्चन ॥ २

गर्भानपि यदा यूयं भृगूणां हत पुत्रकाः ।
तदाऽयमूरुणा गर्भो मया वर्षशतं धृतः ॥ ३

षडङ्गश्चाखिलो वेद इमं गर्भस्थमेव च ।
विवेश भृगुवंशस्य भूयः प्रियचिकीर्षया ॥ ४

सोऽयं पितृवधान्नूनं क्रोधाद्वो हन्तुमिच्छति ।
तेजसा यस्य दिव्येन चक्षूंषि मुषितानि वः ॥ ५

तमेव यूयं याचध्वम् और्वं मम सुतोत्तमम् ।
अयं वः प्रणिपातेन तुष्टो दृष्टीः प्रदास्यति ॥ ६

गन्धर्वः—

एवमुक्तास्ततस्सर्वे राजानस्ते तमूरुजम् ।

ऊचुः प्रसीदेति तदा प्रसादं च चकार सः ॥ ७

अनेनैव तु विख्यातो नाम्ना लोकेषु सत्तमः ।
स और्व इति विख्यात ऊरुं भित्त्वा विनिस्सृतः ॥ ८

चक्षूंषि प्रतिलभ्याथ प्रतिजग्मुस्ततो नृपाः ॥ ८॥

भार्गवस्तु मुनिर्नूनं मेने लोके पराभवम् ॥ ९

स चक्रे तत्र लोकानां विनाशाय मुनिस्तदा ।
सर्वेषामेव कात्स्न्र्येन मनः प्रवणमात्मनः ॥ १०

इच्छन्नपचितिं कर्तुं भृगूणां भृगुसत्तमः ।
सर्वलोकविनाशाय तेपे तूग्रं परं तपः ॥ ११

तापयामास ताँल्लोकान् ससुरासुरमानवान् ।
तपसोग्रेण महता मानयिष्यन् पितामहान् ॥ १२

ततस्तं पितरस्तात विज्ञाय भृगुसत्तमम् ।
पितृलोकादुपागम्य सर्व ऊचुरिदं वचः ॥ १३

पितरः—

और्व दृष्टः प्रभावस्ते तपसोग्रस्य पुत्रक ।
प्रसादं कुरु लोकानां नियच्छ क्रोधमात्मनः ॥ १४

तादृशैर्हि तदा तात भृगुभिर्भावितात्मभिः ।
वधोऽप्युपेक्षितस्सर्वैः क्षत्रियाणां विहिंसताम् ॥ १५

आयुषा च प्रकृष्टेन यदा नः खेद आविशत् ।

तदाऽस्माभिर्वधस्तात क्षत्रियैरीप्सितस्स्वयम् ॥ १६

निखातं तद्धि वै वित्तं कस्मिंश्चिद्भृगुवेश्मनि ।
वैरायैव ततो न्यस्तं क्षत्रियान् कोपयिष्णुभिः ॥ १७

किं हि वित्तेन नः कार्यं स्वर्गोत्सूनां द्विजर्षभ ॥ १७॥
[1]यदा तु मृत्युरादातुं न शक्नोति च सर्वशः ।

तदाऽस्माभिरयं दृष्ट उपायस्तत्र धर्मतः ॥ १८॥

आत्महा च पुनस्तात न लोकाँल्लभते शुभान् ।
ततोऽस्माभिस्समीक्ष्यैवम् आत्मनाऽऽत्मा विनाशितः ॥ १९॥

न चैतन्नः प्रियं तात यदिदं कर्तुमिच्छसि ।
नियच्छेदं मनः पापात् सर्वलोकपराभवात् ॥ २०॥

न हि नः क्षत्रियाः केचिन्न लोकास्सप्त पुत्रक ।
दूष्यन्ति च पुनस्तेजः क्रोधमुत्पतितं जहि* ॥ २१॥

और्वः—

उक्तवानस्मि यां क्रोधात् प्रतिज्ञां पितरस्तथा ।
सर्वलोकविनाशाय न सा मे वितथा भवेत् ॥ २२॥

वृथा रोषप्रतिज्ञोऽहं न तु जीवितुमुत्सहे ।
अनिस्तीर्णो हि मे रोषो दहेदग्निरिवारणिम् ॥ २३॥

---

1. घ—यदस्माकं धनाध्यक्षस् स्वयं वित्तमुपाहरत् । [अधिकः पाठः]

* अ-क-ख-ग—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते ।

[1]देशकालेन संजातं क्रोधं यः क्षन्तुमर्हति ।
नालं स मनुजस्सम्यक् त्रिवर्गं परिरक्षितुम् ॥ २४॥

[2]स्थाने रोषः प्रयुक्तस्स्यान्नृपैस्स्वर्गजिगीषुभिः ॥ २५
अश्रौषमहमूरुस्थो गर्भशय्यागतस्तदा ।

[3]आरावं तु भृशं तत्र भृगूणां क्षत्रियैर्वधे ॥ २६
[4]सामरेऽस्मिन् यदा लोके भृगूणां क्षत्रियाधमैः ।

आगर्भोत्सादनं क्षान्तं तदा मां मन्युराविशत् ॥ २७

प्रकीर्णकेशाः किल मे मातरः पितरस्तथा ।
भयान् सर्वेषु लोकेषु नाधिजग्मुः परायणम् ॥ २८

तान् भृगूणां परान् दारान् कश्चिन्नाभ्यवपद्यत ।
यदा तदा दधारेयम् ऊरुणैकेन मां शुभा ॥ २९

प्रतिषेद्धा हि पापस्य यदा लोके न विद्यते ।
तदा सर्वेषु लोकेषु पापकृन्नोपशाम्यति ॥ ३०

यदा तु प्रतिषेद्धारं पापो न लभते क्वचित् ।
तिष्ठन्ति बहवो लोकास् तदा पापेषु कर्मसु ॥ ३१

---

1. क-ख-ग—योह्यकारणतः क्रोधं संजातं
2. क-ख-ग-घ—अशिष्टानां निहन्ता हि शिष्टानां परिरक्षिता ।
[अधिकः पाठः]
3. क-ग-घ—आरावं मातृवर्गस्य ; अ—आनायं
4. अ—समाहितैस्तदा लोकैर् ; घ—सामरैर्हि यदा लोकैः

जानन्नपि च यः पापं शक्तिमान्न नियच्छति ।
ईशस्स चापि तेनैव कर्मणा संप्रयुज्यते ॥ ३२

राजभिश्चेतरैश्चैव यदा वै पितरो मम ।
शक्तै[1]र्न यतितास्त्रातुम् इष्टं मत्वेह जीवितम् ॥ ३३

अत एषामहं क्रुद्धो लोकानामीश्वरोऽद्य सन् ।
भवतां च वचो [2]नाहम् अलं समतिवर्तितुम् ॥ ३४

मम चापि भवेदेवम् ईश्वरस्य सतो महत् ।
उपेक्षमाणस्य पुनर् लोकानां किल्बिषं भयम् ॥ ३५

यश्चायं मन्युना ह्यग्निर् लोकानादातुमिच्छति ।
दहेदेव च मामेष निगृहीतस्स्वतेजसा ॥ ३६

भवतां च विजानामि सर्वलोकहितेप्सुताम् ।
तस्मा[3]द्विदध्वं यच्छ्रेयो लोकानां मम चेप्सथ ॥ ३७

पितरः—

य एष मन्युजस्तेऽग्निर् लोकानादातुमिच्छति ।
अप्सु तं मुञ्च भद्रं ते लोका ह्यप्सु प्रतिष्ठिताः ॥ ३८

---

1. क-ग—निवारितैस्त्रातुं
   घ —न लोकैरीप्सितास्त्रातुं शक्तैस्समस्तोऽखिलैरपि।
2. क-ग—नाहं नालं प्रतिनिवर्तितुम्।
   अ—नाहम् नृशंसमतिवर्तितुम्।
3. क-ग—द्धि धर्मः

[1]तस्मादप्सु प्रमुञ्चेमं क्रोधाग्निं द्विजसत्तम ॥ ३८॥
अयं तिष्ठतु ते विप्र यदीच्छसि महोदधौ ।
मन्युजोऽग्निर्दहन्नापो लोकाश्चैवाम्मयास्स्मृताः ॥ ३९॥
एवं प्रतिज्ञा सत्येयं भविष्यति तवानघ ।
न चैव सामरा लोका गमिष्यन्ति पराभवम् ॥ ४०॥

वसिष्ठः—

ततस्तं क्रोधजं तात और्वोऽग्निं वरुणालये ।
उत्ससर्ज स चैवाप उपयुङ्क्ते महोदधौ ॥ ४१॥
महद्धयशिरो भूत्वा यत्तद्वेदविदो विदुः ।
तमग्निमुद्गिरन् वक्त्रात् पिबत्यापो महोदधौ ॥ ४२॥
तस्मात्त्वमपि भद्रं ते न लोकान् हन्तुमर्हसि ।
पराशर परं धर्मं ज्ञात्वा ज्ञानविदां वर* ॥ ४३॥

गन्धर्वः—

एवमुक्तस्स विप्रर्षिर् वसिष्ठेन महात्मना ।
[2]नियच्छदात्मनः क्रोधं सर्वलोकपराभवात् ॥ ४४॥
ईजे च स महातेजास् सर्ववेदविदां वरः ।
ऋषी राक्षससत्रेण शाक्तेयोऽथ पराशरः ॥ ४५॥
ततो वृद्धांश्च बालांश्च राक्षसान् स महामतिः ।

---

1. क-ग-घ-अम्मया हि रसास्सर्वे सर्वमेवाम्मयं जगत् । [अधिकः पाठः]
*. अ-क-ख-ग—कोशेषु अत्र अध्यायसमाप्तिर्दृश्यते
2. क-ग—न्ययच्छ

ददाह विततेयज्ञे शक्तेर्वधमनुस्मरन् ॥ ४६॥
न हि तं वारयामास वसिष्ठो रक्षसां वधात् ।
द्वितीयामस्य मा [1]हन्याम् प्रतिज्ञामिति चिन्तयन् ॥ ४७॥
त्रयाणां पावकानां स सत्रे तस्मिन् महामुनिः ।
आसीत् पुरस्ताद्देवानां चतुर्थ इव पावकः ॥ ४८॥
तेन यज्ञेन शुद्धेन हूयमानेन युक्तितः ।
तद्विदीपितमाकाशं सूर्येणेव घनात्यये ॥ ४९॥
तं वसिष्ठादयस्सर्वे मुनयस्तत्र मेनिरे ।
तेजसा दीप्यमानं तु द्वितीयमिव भास्करम् ॥ ५०॥
ततः परमदुष्प्रापम् अन्यैर्ऋषिरुदारधीः ।
[2]समापिपयिषुस्सत्रं निर्ऋतेयं प्रियकाम्यया ॥ ५१॥
ततः पुलस्त्यः पुलहः क्रतुश्चैव महातपाः ।
तदाऽऽजग्मुरमित्रघ्न रक्षसां जीवितेप्सया ॥ ५२॥
पुलस्त्यस्तु वधात्तेषां रक्षसां भरतर्षभ ।
उवाचेदं वचः पार्थ पराशरमरिन्दमम् ॥ ५३॥

पुलस्त्यः—

कच्चित्तपस्यविघ्नं ते कच्चिन्नन्दसि पुत्रक ।
अजानतामदोषाणां सर्वेषां रक्षसां वधात् ॥ ५४॥

---

1. क-ग-घ—हिंस्यां प्रतिज्ञामिति; ख—जह्ने प्रतिज्ञामिति
2. क-ग-घ—स समापयिषुस्सत्रं निर्ऋतेः प्रियकाम्यया ।
ख—समापिपयिषुस्सत्रं नृपतेः प्रियकाम्यया ।

प्रजोच्छेदमिमं मह्यं मा कार्षीस्तापसोत्तम ॥ ५५
अधर्मिष्ठं वरिष्ठस्सन् कुरुषे त्वं पराशर ॥ ५५॥
[1]शक्तिना वाऽपि धर्मज्ञ नातिक्रमितुमर्हसि ॥ ५६
प्रजानां च ममोच्छेदं न वै कर्तुं त्वमर्हसि ॥ ५६॥
शापाद्धि शक्तेर्वासिष्ठास् तदा राज्ञा विनाशितः ।
आत्मजेन सरोषेण शक्तिर्नीत इतो दिवम् ॥ ५७॥
न हि तं राक्षसः काश्चिच् छक्तो भक्षयितुं मुने ॥ ५८
वासिष्ठा भक्षिताश्चासन् कौशिकोत्सृष्टरक्षसा ।
शापं न कुर्वन्ति तदा वाक्छस्त्रा यत्परायणम् ॥ ५९
क्षमावन्तोऽदहन् देहं देहमन्यं व्रजन्ति हि ॥ ५९॥
आत्मनैवाऽऽत्मनस्तेन नष्टो मृत्युस्तदाऽभवत् ॥ ६०
निमित्तभूतस्तत्रासीद् विश्वामित्रः पराशर ॥ ६०॥
राजा कल्माषपादस्तु दिवमारोढुमिच्छति ॥ ६१
ये च शक्त्यवराः पुत्रा वसिष्ठस्य महामुनेः ।
ते च सर्वे मुदा युक्ता मोदन्ते सहितास्सुरैः ॥ ६२
सर्वमेतद्वसिष्ठस्य विदितं वै महामुने ॥ ६२॥
रक्षसां च समुच्छेद एष तात तपस्विनाम् ।
निमित्तभूतस्त्वं चात्र क्रतौ वासिष्ठनन्दन ॥ ६३॥
स सत्रं मुञ्च भद्रं ते समाप्तमिदमस्तु ते ॥ ६४

1 · अ-ख-घ—कोशेषु इत आरभ्य पञ्चश्लोका न दृश्यन्ते ।

गन्धर्वः—

एवमुक्तः पुलस्त्येन वसिष्ठेन च धीमता ।
तदा समापयामास सत्रं शान्तः पराशरः ॥ ६५
सर्वराक्षससत्राय संभृतं पावकं मुनिः ।
उत्तरे हिमवत्पार्श्वे उत्ससर्ज महावने ॥ ६६
स तत्राद्यापि रक्षांसि वृक्षानश्मन एव च ।
भक्षयन् दृश्यते वह्निस् सदा पर्वणि पर्वणि ॥ ६७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि अष्टसप्तत्यधिकशततमोऽध्यायः ॥ १७८ ॥
॥ ११ ॥ चैत्ररथपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥
[अस्मिन्नध्याये ६७ श्लोकाः]

॥ ऊनाशीत्यधिकशततमोऽध्यायः ॥

सौदासभार्यायां वसिष्ठेन पुत्रोत्पादनकारणं पृष्टवन्तमर्जुनं प्रति पुनः कल्माषपादकथाकथनम् ॥ १ ॥ ब्राह्मणं भक्षितवतः सौदासस्य ब्राह्मण्या शापः ॥ २ ॥

1अर्जुनः—

राज्ञा कल्माषपादेन गुरौ ब्रह्मविदां वरे ।
कारणं किं पुरस्कृत्य भार्या वै सन्नियोजिता ॥ १

1. क-ग-घ—गन्धर्वः—

पुनश्चैव महातेजा विश्वामित्रजिघांसया ।
अग्निं संभृतवान् घोरं शक्तेयस्सुमहातपाः ॥
वासिष्ठसंभृतश्चाग्निर्विश्वामित्राहितैषिणा ।
तेजसा वह्नितुल्येन ग्रस्तस्स्कन्देन धीमता ॥ [अधिकः पाठः]

जानता च परं धर्मं लौक्यं तेन महर्षिणा ।
अगम्यागमनं कस्माद् वसिष्ठेन महात्मना ॥ २
[1]कृतं तेन पुरा सर्वं वक्तुमर्हसि पृच्छतः ॥ २॥

गन्धर्वः—

धनञ्जय निबोधेदं यन्मां त्वं परिपृच्छसि ।
वसिष्ठं प्रति दुर्धर्षं तथा मित्रसहं नृपम् ॥ ३॥
कथितं ते मया सर्वं यथा शप्तस्स पार्थिवः ।
शक्तिना भरतश्रेष्ठ वासिष्ठेन महात्मना ॥ ४॥
स तु शापवशं प्राप्तः क्रोधपर्याकुलेक्षणः ।
निर्जगाम पुराद्राजन् सहदारः परन्तपः ॥ ५॥
अरण्यं निर्जनं गत्वा सदारः परिचक्रमे ॥ ६
नानामृगगणाकीर्णं नानासत्वसमाकुलम् ।
नानागुल्मलताच्छन्नं नानाद्रुमसमावृतम् ॥ ७
अरण्यं घोरसन्नादं शापग्रस्तः परिभ्रमत् ।
स कदाचित् क्षुधाऽऽविष्टो मृगयन् भक्ष्यमात्मनः ॥ ८
ददर्श सुपरिक्लिष्टः कस्मिंश्चित् सुमनोरमे ।
ब्राह्मणं ब्राह्मणीं चैव मिथुनायोपसंगतौ ॥ ९

1. घ—अधर्मिणं वरिष्ठेन कृतिनाऽपि पुरा सखे ।
तत्र मे संशयो जातः कार्याकार्यविनिश्चये ।
संशयोऽप्रतिषेधं वै तन्मे त्वं वक्तुमर्हसि ॥ [अधिकः पाठः]

तौ समीक्ष्य च वित्रस्तावकृतार्थौ प्रधावितौ ॥ ९॥

तयोः प्रद्रवतोर्विप्रं जगृहे नृपतिर्बलात् ॥ १०

दृष्ट्वा गृहीतं भर्तारम् अथ ब्राह्मण्यभाषत ॥ १०॥

ब्राह्मणी—

शृणु राजन् वचो मह्यं यत्त्वां वक्ष्यामि सुव्रत ॥ ११

आदित्यवंशप्रभवस् त्वं हि लोके च विश्रुतः ॥ ११॥

अप्रमत्तस्थितो धर्मे गुरुशुश्रूषणे रतः ;
शापोपहत दुर्धर्ष न पापं कर्तुमर्हसि ॥ १२॥

ऋतुकाले तु संप्राप्ते भर्त्राऽहं समुपागता ।
अकृतार्थिन्यहं भद्र प्रसवार्थश्च मे महान् ॥ १३॥

प्रसीद नृपतिश्रेष्ठ भर्ता मम विसृज्यताम् ॥ १४

गन्धर्वः—

एवं विक्रोशमानायां तस्यां स सुनृशंसकृत् ।
भर्तारं भक्षयामास व्याघ्रो मृगमिवेप्सितम् ॥ १५

तस्याः क्रोधाभिभूतायास् तदाऽश्रूण्यपतन् भुवि ।
सोऽग्निस्समभवद्दीप्तस् तं च देशं व्यदीपयत् ॥ १६

ततस्सा शोकसंतप्ता भर्तृव्यसनदुःखिता ।
कल्माषपादं राजर्षिम् अशपद्ब्राह्मणी रुषा ॥ १७

ब्राह्मणी—

यस्मान्ममाकृतार्थायास् त्वया क्षुद्र नृशंसवत् ।
प्रेक्षन्त्या भक्षितो मेऽद्य प्रभुर्भर्ता महायशाः ॥ १८

तस्मात्त्वमपि दुर्बुद्धे मच्छापपरिविक्षतः ।
पत्नीमृतावनुप्राप्य सम्यक् त्यक्ष्यसि जीवितम् ॥ १९

[1]तेन प्रसाद्यमाना सा प्रसादमकरोत्तदा ॥ १९॥

यस्य चर्षेर्वसिष्ठस्य त्वया पुत्रा विनाशिताः ।
तेन संगम्य ते भार्या तनयं जनयिष्यति ॥ २०॥

स ते वंशकरः पुत्रो भविष्यति नृपाधम ॥ २१

गन्धर्वः—

एवं शप्त्वा तु राजानं सा तदाऽऽङ्गिरसी शुभा ।
तस्यैव सन्निधौ दीप्तं प्रविवेश हुताशनम् ॥ २२

वसिष्ठश्च महाभागस् सर्वमेतदपश्यत ।
ज्ञानयोगेन महता तपसा च परन्तप ॥ २३

मुक्तशापश्च राजर्षिः कालेन महता ततः ।
ऋतुकाले निपतितो भार्यया सन्निवारितः ॥ २४

न हि सस्मार नृपतिस् तं शापं काममोहितः ॥ २४॥

देव्यास्सोऽथ वचश्श्रुत्वा विसंज्ञस्समपद्यत ॥ २५

तं शापमनुसंस्मृत्य पर्यतप्यद्भृशं तदा ॥ २५॥

---

1. अ-घ-कोशयोः इदमर्धं नास्ति ।

एतस्मात् कारणाद्राजा वसिष्ठं संन्ययोजयत् ।
स्वदारे भरतश्रेष्ठ शापदोषसमन्वितः ॥ २६॥

यदा कल्माषपादस्तु राक्षसत्वमवाप सः ।
तदा वसिष्ठः कुरुणा यज्ञार्थे स वृतोऽभवत् ॥ २७॥

यदा कल्माषपादस्तु राक्षसत्वं विसृष्टवान् ।
तदा तेनैव राज्ञा तु वसिष्ठस्स वृतोऽभवत् ॥ २८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि ऊनाशीत्यधिकशततमोऽध्यायः* ॥ १७९ ॥
॥ ११ ॥ चैत्ररथपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥

[अस्मिन्नध्याये २८॥ श्लोकाः]

॥ अशीत्यधिकशततमोऽध्यायः ॥

अर्जुनेन अनुरूपपुरोहितसंपादनं पृष्टेन गन्धर्वेण धौम्यवरणाभ्यनुज्ञा ॥ १ ॥ गन्धर्वाय आग्नेयास्त्रदानम् ॥ २ ॥ उत्कचतीर्थे पाण्डवैः धौम्यस्य पौरोहित्ये वरणम् ॥ ३ ॥

अर्जुनः—

अस्माकमनुरूपं वै यस्स्याद्गन्धर्वसत्तम ।
पुरोहितं ममाचक्ष्व सर्वं हि विदितं तव ॥ १

---

* घ—कोशे नास्ति अध्यायसमाप्तिः

गन्धर्वः—

यवीयान् देवलस्यैष वने भ्राता तपस्यति ।
धौम्य उत्कचके तीर्थे तं वृणीष्व यदीच्छसि ॥ २

वैशम्पायनः—

ततोऽर्जुनोऽस्त्रमाग्नेयं प्रददौ तद्यथाविधि ।
गन्धर्वाय ददौ प्रीतो वचनं चेदमब्रवीत् ॥ ३

त्वय्येव तावत्तिष्ठन्तु हया गन्धर्वसत्तम ।
कार्यकाले ग्रहीष्यामि स्वस्ति तेऽस्त्विति चाब्रवीत् ॥ ४

तेऽन्योन्यमभिसंपूज्य गन्धर्वः पाण्डवाश्च ह ।
रम्याद्भागीरथीतीराद् यथाकामं प्रतस्थिरे ॥ ५

तत उत्कचकं तीर्थं गत्वा धौम्याश्रमान्तिके ।
तं वव्रुः पाण्डवा धौम्यं पौरोहित्याय पाण्डव ॥ ६

तांश्चापि प्रतिजग्राह सर्ववेदविदां वरः ।
पाद्येन फलमूलेन पौरोहित्येन चैव ह ॥ ७

तेन चाशंसिरे लब्धां श्रियं राज्यं च पाण्डवाः ।
ब्राह्मणं तं पुरस्कृत्य पाञ्चा[1]ल्याश्च स्वयंवरे ॥ ८

मातृषप्तास्ततस्तेन गुरुणा सह संगताः ।
नाथवन्तमिवात्मानं मेनिरे भरतर्षभाः ॥ ९

1. क-ग—ल्याश्च; घ—याज्ञसेन्याः स्वयंवरे ।

स हि वेदार्थतत्त्वज्ञस् तेषां गुरुरुदारधीः ।
वेदविच्चैकवाग्मी च धौम्यश्श्रीमान् द्विजोत्तमः ॥ १०

तेजसा चैव बुद्ध्या च रूपेण यशसा श्रिया ।
मन्त्रैश्च विविधैर्धौम्यस् तुल्य आसीद्बृहस्पतेः ॥ ११

स चापि विप्रस्तान् मेने स्वभावाभ्यधिकान् भुवि ॥ ११॥

तेन धर्मविदा पार्था [1]याज्यास्सर्वविदा पुरा ।
मेनिरे सहिता वीराः प्राप्तं राज्यं स्वधर्मतः ॥ १२॥

बुद्धिवीर्यबलोत्साहैर् युक्ता देवा इवापरे ।
कृतस्वस्त्ययनास्तेन ततस्ते मनुजाधिपाः ॥ १३॥

मेनिरे सहिता गन्तुं पाञ्चाल्यास्तं स्वयंवरम् ॥ १४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि अशीत्यधिकशततमोऽध्यायः ॥ १८० ॥

॥ ११ ॥ चैत्ररथपर्वणि एकोनविंशोऽध्यायः ॥१९॥

[अस्मिन्नध्याये १४ श्लोकाः]

॥ समाप्तं चैत्ररथपर्व ॥

---

1. क-ख-ग—याज्यास्सर्वविदा वृताः ।

॥ एकाशीत्यधिकशततमोऽध्यायः ॥

(अथ स्वयंवरपर्व)

द्रौपदीस्वयंवरं शृण्वतां राज्ञां पाण्डवानां च द्रुपदपुरप्रवेशनम् ॥१॥
धृष्टद्युम्नेन लक्ष्यवेधपणकथनं च ॥ २ ॥

वैशम्पायनः—

[1]एवं मत्वा प्रयातास्ते पाण्डवा जनमेजय ।
ब्रह्मरूपधरास्सर्वे जटिला ब्रह्मचारिणः ॥ १

राजन् दक्षिणपाञ्चालान् द्रुपदेनाभिरक्षितान् ॥ १॥
ततस्ते तं महात्मानं शुद्धात्मानमकल्मषम् ।
ददृशुः पाण्डवा राजन् पथि द्वैपायनं तदा ॥ २॥
तस्मै यथावत् सत्कारं कृत्वा तेन च सान्त्विताः ।
कथयित्वाऽभ्यनुज्ञाताः प्रययुर्द्रुपदक्षयम् ॥ ३॥
पश्यन्तो रमणीयानि वनानि च सरांसि च ।
तत्र तत्र वसन्तश्च शनैर्जग्मुर्महारथाः ॥ ४॥
स्वाध्यायवन्तो मधुराः पाण्डवाः प्रियवादिनः ।
आनुपूर्व्येण संप्राप्ताः पाञ्चालान् कुरुनन्दनाः ॥ ५॥
ते तु दृष्ट्वा पुरं तस्य स्कन्धावारं च पाण्डवाः ।

1. घ—ततस्ते कुरुशार्दूला भ्रातरः पञ्च पाण्डवाः ।
ब्रह्मरूपधराः पार्थाः

कुम्भकारस्य शालायां निवेशं चक्रिरे तदा ॥ ६॥

तत्र भैक्षं समाजह्रुर् ब्राह्मीं वृत्तिं समाश्रिताः ॥ ७

[1]तांश्च प्राप्तांस्तथा वीराञ् जज्ञिरे न नराः क्वचित् ॥ ७॥

[2]यज्ञसेनस्य कामस्तु पाण्डवाय किरीटिने ।
[3]कृष्णां ददानि च सदा न चैतद्विवृणोति सः ॥ ८॥

[4]जामातृबलसंयोगं मेने हि बलवत्तरम् ॥ ९

अन्वेषमाणः पाञ्चालः कौन्तेयान् जनमेजय ।
[5]दृढं धनु[6]रनायम्यं कारयामास भारत ॥ १०

---

1. घ—संप्राप्तांस्तांस्तदा तत्र जनाः पार्थान् न जज्ञिरे ।

2. क-ख-ग-घ—यज्ञसेनस्तु पाञ्चालो भीष्मद्रोणकृतागसम् ।
ज्ञात्वाऽऽत्मानं तदाऽऽरेभे त्राणायात्मक्षमां क्रियाम् ॥
अवाप्य धृष्टद्युम्नं हि न स द्रोणमचिन्तयत् ।
स तु वैरप्रसङ्गाच्च भीष्माद्भयमचिन्तयत् ॥
[अधिकः पाठः]

3. घ—दास्यामि कृष्णां पार्थाय न चैनं विवृणोति सः ।

4. क-ख-ग-घ—कन्यादानाद्धि शरणं सोऽमन्यत महीपतिः ।
[अधिकः पाठः]

5. ख—शङ्करेण वरं दत्तं प्रीतेन च महात्मना ।
तच्चिरफलं स्यान्न तु मे इति प्रामाण्यमागतः ॥
मया कर्तव्यमधुना दुष्करं लक्ष्यवेधनम् ।
इति निश्चित्य मनसा कारितं लक्ष्यमुत्तमम् ॥ [अधिकः पाठः]

6. क-ख-ग-घ—रनायम्यं मार्गयामास वै तदा ।

[1]यन्त्रं वैहायसं चापि कारयामास कृत्रिमम् ।
तेन यन्त्रेण सहितं कारयामास काञ्चनम् ॥ ११

इदं सज्यं धनुः कृत्वा छिद्रेणानेन सायकैः ।
[2]अतीत्य लक्ष्यं यो वेद्धा स लब्धा च सुतामिति ॥ १२

[3]इत्येवं द्रुपदो राजा सर्वतस्समघोषयत् ॥ १२॥

तच्छ्रुत्वा पाण्डवास्सर्वे समीयुस्तत्र भारत ॥ १३

ऋषयश्च महात्मानस् स्वयंवरदिदृक्षया ।
[4]दुर्योधनपुरोगाश्च सकर्णकुरवो नृपाः ॥ १४

---

1. क-ख-ग-घ—वैयाघ्रपद्यस्योग्रं वै सृञ्जयस्य महीपतेः ।
तद्धनुःकिन्धुरं नाम देवदत्तमुपानयत् ॥
आयसी तस्य ज्या चासीत् प्रतिबद्धा महाबल ।
न तु ज्यां प्रसहेदन्यस् तद्धनुःप्रवरं महत् ॥
[अधिकः पाठः]

2. घ—विध्वा यः पातयेल्लक्ष्यं स लब्धा द्रुपदात्मजाम् ॥

3. घ—अघोषयन्महीं सर्वां चतुर्वर्णसमावृताम् ।

4. क-ग-घ – यादवा वासुदेवेन सार्धमन्धकवृष्णयः ।
राजानो राजपुत्राश्च युवानो मृष्टकुण्डलाः ॥
नानाजनपदाधीशा यज्वानो भूरिदक्षिणाः ।
मनोज्ञरूपा लावण्यान्महेन्द्रसमविक्रमाः ॥
क्रोधेन चाग्निसदृशाः क्षमया पृथिवीसमाः ।
स्थैर्ये मेरुसमा धीरास् सूर्यवैश्वानरोपमाः ॥
पृथिव्यां ये च राजानो ऋषयश्च तपोधनाः ।
बालवृद्धानृते सर्वे महीपालास्समागताः ॥
[अधिकः पाठः]

ब्राह्मणाश्च महाभागा देशेभ्यस्समुपागताः ।
ते ह्यर्चिता नरेन्द्रेण द्रुपदेन महात्मना ॥ १५

[1]ततः पुरवरश्रेष्ठे सागरोद्धूतनिस्स्वने ।
शिंशुमारागिरिं प्राप्य न्यविशन्त महारथाः ॥ १६

प्रागुत्तरे च नगराद् भूमिभागे समे शुभे ।
समाजवाटश्शुशुभे भवनैस्सर्वतो वृतः ॥ १७

प्रासादपरिघोपेतो द्वारतोरणमण्डितः ।
वितानेन विचित्रेण सर्वतस्समलङ्कृतः ॥ १८

तूर्यौघशतसङ्कीर्णः परार्घ्यागुरुधूपितः ।
चन्दनोदकसिक्तश्च माल्यदामैश्च शोभितः ॥ १९

कैलासशिखरप्रख्यैर् नभस्स्थलविलेखिभिः ।
सर्वतस्संवृतैर्नद्धः प्रासादैस्सुकृतोच्छ्रितैः ॥ २०

सुवर्णजालसंवीतैर् मणिकुट्टिमभूषितैः ।
सुखारोहणसोपानैर् महासनपरिच्छदैः ॥ २१

[2]अग्राम्यसमवच्छन्नैर् अगुरूत्तमधूपितैः ।

---

1. क-ग-घ—त्रयस्त्रिंशत्सुरास्सर्वे विमानैर्व्योम्नि निष्ठिता :।
ब्राह्मणैरेव सहिताः पाण्डवास्समुपाविशन् ।
वैतालिका नर्तकाश्च सूतमागधवन्दिनः ।
राजसूपागमन् सर्वे द्रुष्टकामास्स्वयंवरम् ॥[अधिकः पाठः]

2. घ—स्रग्दामभिरविच्छिन्नैर् विमानध्वजशोभितैः ।

हंसवर्णैश्च बहुभिर् आयोजनसुगन्धिभिः ॥ २२
असंबाधपथद्वारैश् शयनासनशोभितैः ।
बहुधातुपिनद्धाङ्गैर् हिमवच्छिखरैरिव ॥ २३
तत्र नानाप्रकारेषु विमानेषु स्वलङ्कृताः ।
स्पर्धमानास्तदाऽन्योन्यं निषेदुस्सर्वपार्थिवाः ॥ २४
तत्रोपविष्टा ददृशुर् महासत्वान् पृथग्जनाः ।
राजसिंहान् महाभागान् मृष्टस्रगनुलेपनान् ॥ २५
महाप्रसादान् ब्रह्मण्यान् स्वराष्ट्रपरिरक्षिणः ।
प्रियान् सर्वस्य लोकस्य सुकृतैः कर्मभिश्शुभैः ॥ २६
ततो मञ्चातिमञ्चेषु पौरजानपदा जनाः ।
उपोपविविशुस्सर्वे याज्ञसेनीदिदृक्षवः ॥ २७
ब्राह्मणैस्त्वेव सहिताः पाण्डवास्समुपाविशन् ।
ऋद्धिं पञ्चालदेशस्य पश्यन्तस्तामनुत्तमाम् ॥ २८
ततस्समाजो ववृधे स राजन् दिवसान् बहून् ।
रत्नप्रदानबहुलश् शोभितो नटनर्तकैः ॥ २९
वर्तमाने समाजे तु रमणीयेऽह्नि षोडशे ।
आप्लुता शुद्धवसना सर्वाभरणभूषिता ॥ ३०
[1]वीरकां स्रजमादाय काञ्चनैस्समलङ्कृता ।

1. अ—वरकांस्यमुपादाय काञ्चनं समलङ्कृतम्।

अवतीर्णा ततो रङ्गे द्रौपदी द्रुपदात्मजा ॥ ३१

पुरोहितस्सोमकानां मन्त्रविद्ब्राह्मणश्शुचिः ।
परिस्तीर्य जुहावाग्निम् आज्येन विधिना तदा ॥ ३२

संतर्पयित्वा ज्वलनं ब्राह्मणान् स्वस्ति वाच्य च ।
वारयामास सर्वाणि वादित्राणि समन्ततः ॥ ३३

निश्शब्दे तु कृते तस्मिन् धृष्टद्युम्नो विशांपते ।
रङ्गमध्यं गतस्तत्र मेघगम्भीरया गिरा ॥ ३४
वाक्यमुच्चैर्जगादेदं श्लक्ष्णमर्थवदुत्तमम् ॥ ३४॥

धृष्टद्युम्नः—

इदं धनुर्लक्ष्यमिमे च बाणाः
शृण्वन्तु मे क्षत्रियास्सर्व एव ।
यन्त्राच्छिद्रेणाभ्यतिक्रम्य लक्ष्यं
समर्पयध्वं खगमैर्दशार्धैः ॥ ३५॥

एतत्कर्ता कर्म सुदुष्करं यः
कुलेन रूपेण बलेन युक्तः ।
तस्याद्य भार्या भगिनी ममेयं
कृष्णा भवित्री न मृषा ब्रवीमि ॥ ३६॥

वैशम्पायनः—

तानेवमुक्त्वा द्रुपदस्य पुत्रः
पश्चादिदं द्रौपदीमित्युवाच ।

नाम्ना च गोत्रेण च कर्मणा च
संकीर्तयंस्तान् नृपतीन् समेतान् ॥ ३७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि एकाशीत्यधिकशततमोऽध्यायः ॥ १८१ ॥
॥ १२ ॥ स्वयंवरपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[अस्मिन्नध्याये ३७॥ श्लोकाः]

॥ द्व्यशीत्यधिकशततमोऽध्यायः ॥

रङ्गं आगतानां राज्ञां नामकथनम् ॥ १ ॥ ब्राह्मणमध्यस्थान्पाण्डवान् विज्ञाय श्रीकृष्णेन बलरामाय कथनम् ॥ २ ॥ धनुर्दर्शनेनैव केषां चिद्राज्ञां धनुःपूरणे निराशता ॥ ३ ॥ शिशुपालादीनां धनुःपूरणे भङ्गः ॥ ४ ॥ अर्जुनस्य धनुःपूरणे एषणा ॥ ५ ॥

धृष्टद्युम्नः—

दुर्योधनो दुर्विषहो दुर्मुखो दुष्प्रधर्षणः ।
विविंशतिर्विकर्णश्च सहो दुःशासनस्समः ॥ १

युयुत्सुर्वायुवेगश्च भीमवेगश्च वीर्यवान् ।
उग्रायुधो बलाकिश्च कनकायुर्विरोचनः ॥ २

सुकुण्डलश्चित्रसेनस् सुवर्चाः कनकध्वजः ।
नन्दको बाहुशाली च कुण्डली विकटस्तथा ॥ ३

विन्दश्चाप्यनुविन्दश्च सदीपी विकलः करी ।

एते चान्ये च बहवो धार्तराष्ट्रा महाबलाः ॥ ४
कर्णेन सहिता वीरास् त्वदर्थं समुपागताः ॥ ४॥

शतसंख्या महात्मानस् समेता देवरूपिणः ।
शकुनिश्चाचलश्चैव वृषकोऽथ महारथः ॥ ५॥

एते गान्धारराजस्य सुतास्सर्वे समागताः ॥ ६

अश्वत्थामा च भोजश्च सर्वशस्त्रभृतां वरौ ।
[1]वार्धक्षेमिस्सुवर्चाश्च सेनाबिन्दुश्च वीर्यवान् ॥ ७

अभिभूस्सह पुत्रेण वसुना च सुवर्चसा ।
सुमित्रस्सुकुमारश्च वृत्तस्सत्यधृतिस्सदा ॥ ८

सूर्यध्वजो रोचमानो नीलश्चित्रायुधस्तदा ।
अंशुमांश्चेकितानश्च श्रेणिमांश्च महाबलः ॥ ९

समुद्रसेनश्चन्द्रसेन इन्द्रसेनश्च पार्थिवः ।
जरासन्धस्सपुत्रश्च सुदण्डो दण्ड एव च ॥ १०

पौण्ड्रको वासुदेवश्च भगदत्तश्च वीर्यवान् ।
कलिङ्गस्ताम्रलिप्तश्च पत्तनाधिपतिर्महान् ॥ ११

---

1. क-ख-ग-घ—समवेतौ महात्मानौ त्वदर्थं समलङ्कृतौ ।

बृहन्तो मणिमांश्चैव दण्डधारश्च वीर्यवान् ॥
सहदेवो जयत्सेनो मेघसन्धुश्च मागधः ।
विराटस्सह पुत्राभ्यां शङ्खेनैवोत्तरेण च ॥

[अधिकः पाठः]

मद्रराजस्तथा शल्यस् सहपुत्रो महाबलः ।
रुक्माङ्गदेन वीरेण तथा रुक्मरथेन च ॥ १२
कौरव्यस्सोमदत्तश्च पुत्रास्त्वस्य महारथाः ।
समवेतास्त्रयश्शूरा भूरिर्भूरिश्रवाश्शलः ॥ १३
सुदक्षिणश्च काम्भोजो दृढधन्वा च कौरवः ।
बृहद्बलस्सुषेणश्च शिबिरौशीनरस्तथा ॥ १४
पाण्डकेरलचोलेन्द्रास् त्रयस्तेताग्नयो यथा ।
आसनेषु विराजन्ते आशामागस्त्यमाश्रिताः ॥ १५
सङ्कर्षणो रौहिणेयो वासुदेवश्च वीर्यवान् ।
साम्बश्च चारुदेष्णश्च सारणोऽथ गदस्तथा ॥ १६
अक्रूरस्सात्विकश्चैव युयुधानश्च सात्यकिः ।
कृतवर्मा च हार्दिक्यः पृथुर्विपृथुरेव च ॥ १७
विदूरथश्च कण्वश्च समीकस्सारिमेजयः ।
वीरो धनपतिश्चैव वाह्निवाङ्गारकस्तथा ॥ १८
उशीनरश्च विक्रान्तो वृष्णयस्ते प्रकीर्तिताः ॥ १८॥
भगीरथो बृहत्क्षत्रस् सैन्धवश्च बृहद्रथः ॥ १९
जयद्रथो वाह्लिकश्च श्रुतायुरथ वीर्यवान् ।
उल्मुकः कैतवो राजा चित्राङ्गदशुभाङ्गदौ ॥ २०
वत्सराजश्च धृतिमान् कोसलाधिपतिर्महान् ।

कर्णश्च सह पुत्रेण वृषसेनश्च वीर्यवान् ॥ २१

बृहद्बलश्च बलवान् राजा चैवाथ दुर्जयः ॥ २१॥

दमघोषात्मजश्चैव शिशुपालो महाबलः ।

चेदीनामाधिपो वीरो बलवानन्तकोपमः ॥ २२॥

[1]एते चान्ये च बहवो नानाजनपदेश्वराः ।

त्वदर्थमागता भद्रे क्षत्रियाः प्रथिता भुवि ॥ २३॥

एते विध्यन्ति विक्रान्तास् त्वदर्थे लक्ष्यमुत्तमम् ।

वेद्धा तु यो भवेदेषां तं वरं वरयस्व वै* ॥ २४॥

वैशम्पायनः—

तेऽलङ्कृताः कुण्डलिनो युवानः
परस्परं स्पर्धमानास्समेताः ।
अस्त्रं बलं चात्मनि मन्यमानाः
सर्वे समुत्पेतुरहङ्कृतेन ॥ २५॥

वीर्येण रूपेण कुलेन चैव
शीलेन वित्तेन च यौवनेन ।
समृद्धदर्पा मदवेगभिन्ना
मत्ता यथा हैमवता गजेन्द्राः ॥ २६॥

---

1. क-ग-घ—प्राच्योदीच्यःप्रतीच्याश्च दाक्षिणात्याः क्षितीश्वराः । [अधिकः पाठः]

* अ-क-ग्व-ग—कोशेषु अत्रैवाध्याय समाप्तिर्दृश्यते

परस्परं स्पर्धया प्रेक्षमाणाः
सङ्कल्पजेनाभिपरिप्लुताङ्गाः ।
कृष्णा ममैवेत्यभिभाषमाणा
नृपास्समुत्पेतुरथासनेभ्यः ॥ २७॥

ते क्षत्रिया रङ्गगतास्समेता
[1]जिहीर्षमाणा द्रुपदात्मजां ताम् ।
चकाशिरे पर्वतराजकन्याम्
उमां यथा देवगणास्समेताः ॥ २८॥

कन्दर्पबाणाभिनिपीडिताङ्गाः
कृष्णागतैस्तद्धृदयैर्नरेन्द्राः ।
रङ्गावतीर्णा द्रुपदात्मजार्थं
द्वेष्यान् हि चक्रुस्सुहृदोऽपि सर्वे । २९॥

अथाययुर्देवगणा विमानै-
रुद्रादित्या वसवोऽथाश्विनौ च ।
साध्याश्च सर्वे मरुतस्तथैव
धर्मं पुरस्कृत्य धनेश्वरं च ॥ ३०॥

दैत्यास्सुपर्णाश्च महोरगाश्च
देवर्षयो गुह्यकाश्चारणाश्च ।

1. ब—जिजीषवस्ते

विश्वावसुर्नारदः पर्वतश्च
गन्धर्वमुख्यास्सहिताऽप्सरोभिः ॥ ३१॥

हलायुधस्तत्र च केशवश्च
वृष्ण्यन्धकाश्चैव यथाप्रधानाः ।
प्रेक्षांबभूवुर्यदुपुङ्गवास्ते
स्थिताहि कृष्णस्य मते बभूवुः ॥ ३२॥

दृष्ट्वा हि तान् मत्तगजेन्द्ररूपान्
पद्माभिपन्नानिव वारणेन्द्रान् ।
भस्मावृताङ्गानिव हव्यवाहान्
पार्थान् प्रदध्यौ स यदुप्रवीरः ॥ ३३॥

शशंस रामाय युधिष्ठिरं च
भीमं सजिष्णुं यमजौ च वीरौ ।
शनैश्शनै[1]स्तांश्च निरीक्ष्य रामो
जनार्दनं प्रीतमना ददर्श ॥ ३४॥

अन्ये तु वीरा नृपपुत्रपौत्राः
कृष्णागतैर्नेत्रमनस्स्वभावैः ।
व्यायच्छमाना ददृशुस्समन्तात्
सन्दष्टताम्रोज्वलदन्तवक्त्राः ॥ ३५॥

1. घ—स्तान् स निरीक्षमाणो जनार्दनः प्रीतमना बभूव ।

तथैव वीराः पुथुबाहुवर्णाः
पार्था यमौ चैव महानुभावौ ।
तां द्रौपदीं प्रेक्ष्य तदा स्म सर्वे
कन्दर्पबाणाभिहता बभूवुः ॥ ३६॥

[1]देवर्षिगन्धर्वसमाकुलं तत्
सुपर्णनागासुरयक्षजुष्टम् ।
दिव्येन गन्धेन समाकुलं च
दिव्यैश्च माल्यैरवकीर्यमाणम् ॥ ३७॥

समाहतैर्दुन्दुभिभिश्च राजन्
रराज तत् सङ्कुलमन्तरिक्षे ॥ ३८

विमानसंबाधमभूत्समन्तात्
सवेणुवीणा[2]पणवाभिनादितम् ।
समाजवाटोपरि संस्थितानां
मेघैस्समन्तांदिव गर्जितानाम् । ३९

---

1. क-ग—देवाश्च सर्वे सगणास्समेतास् तान्द्रष्टुकामा वसवोऽश्विनौ च ।
रुद्राश्च सोमो वरुणो यमश्च शक्रं पुरस्कृत्य धनेश्वरं च ।
विश्वावसुर्नारदपर्वतौ च देवर्षयश्चाप्सरसां गणाश्च ॥
[अधिकः पाठः]

2. क-ग—पणवाभिनन्दितम् । अ—पणवस्य नादितम् ।
ब—पणवानुरावैः ।

ततस्तु ते राजगणाः क्रमेण
कृष्णानिमित्तं [1]च समीहमानाः ।
तत्कार्मुकं संहननोपपन्नं
सज्यं न शेकुस्तरसाऽपि कर्तुम् ॥ ४०

ते विक्रमन्तस्स्फुरता दृढेन
निष्पिष्टमाना धनुषा नरेन्द्राः ।
विवेष्टमाना धरणीतलस्था
दृश्यन्ति तत्र प्रतिभग्नदर्पाः ॥ ४१

हाहाकृतं तद्धनुषा दृढेन
विस्रस्तनानाभरणाम्बरस्रजः ।
कृष्णानिमित्तं च निवृत्तभावं
राज्ञां तदा मण्डलमात्तमासीत् ॥ ४२

एवं तेषु निवृत्तेषु क्षत्रियेषु समन्ततः ।
चेदीनामधिपो वीरो बलवानन्तकोपमः ॥ ४३

दमघोषात्मजो वीरश् शिशुपालो महाद्युतिः ।
तमप्यारोप्यमाणं तु मार्गमात्रेऽह्यताडयत् ॥ ४४

ताडितस्स धनुष्कोट्या पपातोर्व्यां वियन्मुखः ।
संरम्भात् क्रोशमात्रे तु राजानोऽन्ये भयातुराः ॥ ४५

---

1. क-ख-ग—कृतविक्रमं ततः; अ—नृपविक्रमं ततः

ततो राजा जरासन्धो महावीर्यो महाबलः ।
कम्बुग्रीवः पृथुव्यंसो मत्तवारणविक्रमः ॥ ४६

मत्तवारणताम्राक्षो मत्तवारणवेगवान् ।
धनुषोऽभ्याशमागत्य तस्थौ गिरिरिवाचलः ॥ ४७

धनुरारोप्यमाणं तु सर्षमात्रेऽभ्यताडयत् ॥ ४८॥

धनुषा विध्यमानस्तु बाहुभ्यामगमन्महीम् ।
तत उत्थाय राजा स स्वराष्ट्राण्यभिजग्मिवान् ॥ ४८॥

ततश्शल्यो महावीर्यो मद्रराजो महाबलः ।
तमथारोप्यमाणं तु मुद्गमात्रेऽभ्यताडयत् ॥ ४९॥

स पपात महीं रङ्गाद् अर्धयोजनदूरतः ।
तथैवागात् स्वकं राज्यं पश्चादनवलोकयन् ॥ ५०॥

ततो दुर्योधनो राजा धार्तराष्ट्रः परन्तपः ।
मानी दृढाङ्गसंपन्नस् सर्वैश्च नृपलक्षणैः ॥ ५१॥

उत्थितस्सहसा तत्र भ्रातृमध्ये महाबलः ।
विलोक्य द्रौपदीं हृष्टो धनुषोऽभ्याशमागमत् ॥ ५२॥

स बभौ धनुरादाय शक्रश्चापधरो यथा ॥ ५३

आरोप्यमाणं तद्राजा धनुषा बलिना तदा ।
उत्तानशय्यमपतद् अङ्गुल्यन्तरताडितः ॥ ५४

स ययौ ताडितस्तेन व्रीडन्निव नराधिपः ॥ ५४॥

ततो वैकर्तनः कर्णो वृषा वै सूतनन्दनः ।
धनुरभ्याशमागम्य तोलयामास तद्धनुः ॥ ५५॥

तं चाप्यारोप्यमाणं तु केशमात्रेऽभ्यताडयत् ॥ ५६

[1]त्रैलोक्यविजयी कर्णस् सत्वे त्रैलोक्यविश्रुतः ।
धनुषा सोऽपि निर्धूत इति सर्वे भयाकुलाः ॥ ५७

एवं कर्णे विनिर्धूते धनुषाऽन्ये नृपोत्तम ।
चक्षुर्भिरपि नापश्यन् विनम्रमुखपङ्कजाः ॥ ५८

दृष्ट्वा कर्णं विनिर्धूतं लोकवीरा नृपोत्तमाः ।
निराशा धनुषोद्धारे द्रौपदीसङ्गमेऽपि च ॥ ५९

तस्मिंस्तु संभ्रान्तजने समाजे
निक्षिप्तशस्त्रेषु जनाधिपेषु ।
[2]कुन्तीसुतो जिष्णुरियेष कर्तुं
सज्यं धनुस्तत्सशरं च वीरः ॥ ६०

[3]ततो वरिष्ठस्सुरदानवानाम्
उदारधीर्वृष्णिकुलप्रवीरः ।

---

1. अ-ख-घ—कोशेषु इत आरभ्य त्रयः श्लोकाः न सन्ति
2. घ—तत्कार्मुकं जिष्णुरयाद्दधार
इयेष वीरस्सशरं च कर्तुम् ।
3. क-ख-ग-घ—कोशेषु श्लोकद्वयं नास्ति ।

जहर्ष रामेण स पीड्य हस्तं
हस्तं गतां पाण्डुसुतस्य मत्वा ॥ ६१
न जज्ञुरन्ये नृपवीरमुख्याः
संछन्नरूपानथ पाण्डुपुत्रान् ।
विना हि भीष्मं च यदुप्रवीरौ
धौम्यं च धर्मं सह सोदरांश्च ॥ ६२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि व्यशीत्यधिकशततमोऽध्यायः ॥ १८२ ॥
॥ १२ ॥ स्वयंवरपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[अस्मिन्नध्याये ६२ श्लोकाः]

॥ व्यशीत्यधिकशततमोऽध्यायः ॥

धनुरारोपणार्थमुत्थितमर्जुनं प्रति ब्राह्मणानां शुभाशंसनम् ॥ १ ॥ अर्जुनेन धनुरारोपणपूर्वकं लक्ष्यवेधः ॥ २ ॥ द्रौपद्या अर्जुनकण्ठे मालाप्रक्षेपः ॥ ३ ॥ क्रोधाद्राजसु द्रुपदहननार्थमागतेषु राजसंमुखे भीमार्जुनयोस्सज्जीभूय स्थितयोस्ततोः कृष्णबलरामयोः संवादः ॥ ४ ॥

वैशम्पायनः—
[1]ततोऽवतीर्णं रङ्गस्य मध्यं पाण्डवमध्यमम् ।
उदक्रोशन्विप्रमुख्या विधुन्वन्तोऽजिनानि च ॥ १

1. क-ख-ग—यदा निवृत्ता राज्ञानो धनुषस्सज्यकर्मणि ।
अथोदतिष्ठद्विप्राणां मध्याज्जिष्णुरुदारधीः ॥
[अधिकः पाठः]

दृष्ट्वा संप्रस्थितं पार्थम् इन्द्रकेतुसमप्रभम् ।
केचिदासन् विमनसः केचिदासन् मुदाऽन्विताः ॥ २
आहुः परस्परं केचिन्निपुणा बुद्धिचिन्तकाः ॥ २॥
यत्कर्णशल्यप्रमुखैः पार्थिवैर्लोकविश्रुतैः ।
नानतं बलवद्भिर्हि धनुर्वेदपरायणैः ॥ ३॥
तत्कथं त्वकृतास्त्रेण प्राणतो दुर्बलीयसा ।
द्विजमात्रेण शक्यं हि सज्यं कर्तुं धनुर्द्विजाः ॥ ४॥
सज्यं चेत् कृतवानेष विद्धं लक्ष्यं कथं भवेत् ॥ ५
अपहास्या भविष्यन्ति ब्राह्मणास्सर्वराजसु ।
कर्मण्यस्मिन्नसंसिद्धे चापलादपरीक्षिते ॥ ६
यद्येष हर्षाद्दर्पाद्वा यदि वा ब्रह्मचापलात् ।
प्रस्थितो धनुरायन्तुं वार्यतां साधु मा गमत् ॥ ७
नापहास्या भविष्यामो न च लाघवमास्थिताः ।
न च विद्वेष्यतां लोके गमिष्यामो महीक्षिताम् ॥ ८
[1]केचिदाहुर्युवा श्रीमान् नागराजवरोपमः ।
पीनस्कन्धोरुबाहुश्च धैर्येण हिमवानिव ॥ ९
संभाव्यं तस्य कर्मेदम् उत्साहाच्चानुमीयते ॥ ९॥
शक्तिरस्य महोत्साहा न ह्यशक्तस्स्वयं व्रजेत् ॥ १०

1. क-ग—केचिदाहुर्जयोऽस्माकं जयो नास्ति पराजयः ।
पराजयो जयो वा स्यात् कुर्यात् सज्यं धनुर्द्विजाः ॥
घ—केचिदाहुर्जयेऽस्माकं लज्जा नास्ति पराजये । [अधिकः पाठः]

न च तद्विद्यते किञ्चित् कर्म लोकेषु यद्भवेत् ।
ब्राह्मणानामसाध्यं वा [1]धृष्णुस्थास्नुश्चरिष्णु वा ॥ ११
अब्भक्षा वायुभक्षाश्च फलाहारा दृढव्रताः ।
दुर्बला हि बलीयांसो विप्रा हि ब्रह्मतेजसा ॥ १२
ब्राह्मणो नावमन्तव्यस् सदसद्वा समाचरन् ।
सुखं दुःखं महद्भस्वं कर्म यत्समुपागमत् ॥ १३
धनुर्वेदे च वेदे च योगेषु विविधेषु च ।
न तं पश्यामि मेदिन्यां ब्राह्मणोऽभ्यधिको भवेत् ॥ १४
मन्त्रयोगबलेनापि महताऽऽत्मबलेन वा ।
जृम्भयेयुरमुं लोकम् अथवा द्विजसत्तमाः ॥ १५
एवं तेषां विलपतां विप्राणां विविधा गिरः ।
अर्जुनो धनुषोऽभ्याशे तस्थौ गिरिरिवाचलः ॥ १६
[2]अर्जुनः पाण्डवश्रेष्ठो धृष्टद्युम्नमथाब्रवीत् ॥ १६॥
एतद्धनुर्ब्राह्मणानां सज्यं कर्तुमलं नु किम् ॥ १७
तस्य तद्वचनं श्रुत्वा धृष्टद्युम्नोऽब्रवीद्वचः ॥ १७॥
ब्राह्मणो वाऽथ राजन्यो वैश्यो वा शूद्र एव वा ।
एतेषां यो धनुश्श्रेष्ठं सज्यं कुर्याद्द्विजोत्तम ॥ १८॥
तस्मै प्रदेया भगिनी सत्यमुक्तं मया वचः ॥ १९
तस्य तद्वचनं श्रुत्वा प्रययौ ब्राह्मणैर्वृतः ।
ततः पश्चान्महातेजाः पाण्डवो रणदुर्जयः ॥ २०

---

1. घ—स्थावरेषु चरेषु च
2. अ-ख—कोशयोः इत आरभ्य चत्वारः श्लोका न दृश्यन्ते ।

स तद्धनुः परिक्रम्य प्रदक्षिणमथाकरोत् ।
प्रणम्य शिरसा हृष्टो जगृहे च परन्तपः ॥ २१

सज्यं च चक्रे निमिषान्तरेण
शरांश्च जग्राह दशार्धसङ्ख्यान् ।
विव्याध लक्ष्यं निपपात तच्च
छिद्रेण भूमौ सहसाऽतिविद्धम् ॥ २२

ततोऽन्तरिक्षे च बभूव नादस्
समाजमध्ये च महान्निनादः ।
पुष्पाणि दिव्यानि ववर्ष देवः
पार्थस्य मूर्ध्नि द्विषतां निहन्तुः ॥ २३

चेलानि विव्यधुश्चात्र ब्राह्मणाश्च सहस्रशः ।
ननन्दुर्नृतुश्चाऽथ धून्वन्तो व्यजनानि च ॥ २४

[1]न्यपतंश्चात्र नभसस् समन्तात् पुष्पवृष्टयः ।
शङ्खानि चैव तूर्याणि वादकाश्चाभ्यवादयन् ॥ २५

सूतमागधसङ्घाश्चाप्यस्तुवंस्तत्र सुस्वराः ॥ २५॥

तस्मिंस्तु शब्दे महति प्रवृद्धे
युधिष्ठिरो धर्मभृतां वरिष्ठः ।

---

1. क-घ—नृत्यन्तोऽभिमुखा राज्ञां दर्शयन्तो द्विजावलिम् ।
क्ष्वेलन्तश्च हसन्तश्च विद्युत्पिङ्गजटाधराः ॥ [अधिकः पाठः]

आवासमेवाभिजगाम शीघ्रं
सार्धं यमाभ्यां पुरुषोत्तमाभ्याम् ॥ २६॥

विद्धं च लक्ष्यं प्रसमीक्ष्य कृष्णा
पार्थं च शक्रप्रतिमं निरीक्ष्य ।
स्वभ्यस्तरूपाऽपि नवेव नित्यं
विनाऽपि हासं हसतीव कन्या ॥ २७॥

मदादृतेऽपि स्खलतीव भावैर्
वाचा विना व्याहरतीव दृष्ट्या ।
आदाय शुक्लं वरमाल्यदाम
जगाम कुन्तीसुतमुत्स्मयन्ती ॥ २८॥

[1]समेत्य तस्योपरि सोत्ससर्ज
समागतानां पुरतो नृपाणाम् ।
विन्यस्य मालां विनयेन तस्थौ
विहाय राज्ञस्सहसा नृपात्मजा ॥ २९॥

शचीव देवेन्द्रमथाग्निदेवं
स्वाहेव लक्ष्मीश्च यथा मुकुन्दम् ।
उषेव सूर्यं मदनं रतीव
महेश्वरं पर्वतराजपुत्री ॥ ३०॥

---

1 क.-ग-घ-गत्वा तु पश्चात् प्रसमीक्ष्य कृष्णा पार्थस्य वक्षस्यभिशङ्कमाना ।
क्षिप्त्वा तु तत्पार्थिवसङ्कमध्ये वराय वव्रे द्विजवीरमध्ये ॥

[1]रामं यथा मैथिलराजपुत्री
भैमी यथा राजवरं नलं हि ॥ ३१

तं दृष्ट्वा नृपतिः प्रीतो बभूवारिनिषूदनम् ।
सह सैन्येन पार्थस्य साहाय्यार्थमियेष सः* ॥ ३२

वैशम्पायनः—

तस्मै दित्सति कन्यां तु ब्राह्मणाय महात्मने ।
कोप आसीन्महीपानाम् आलोक्यान्योन्यमन्तिकात् ॥ ३३

अस्मानयमतिक्रम्य तृणीकृत्य च सङ्गतान् ।
दातुमिच्छति विप्राय द्रौपदीं योषितां वराम् ॥ ३४

अवज्ञायेह पार्षतः कार्यं केन महात्मनाम् । ३४॥
ते हन्मैनं दुरात्मानं योऽयमस्मान्न मन्यते ॥ ३५
न चार्हत्येष सत्कारं न हि वृद्धो मतो गुणैः ॥ ३५॥
[2]हन्मैनं सह पुत्रेण दुराचारं नृपद्विषम् ॥ ३६
अयं हि सर्वानाहूय सत्कृत्य च नराधिपान् ।
गुणवद्भोजयित्वा तु ततः पश्चाद्विनिन्दति ॥ ३७

---

1. क-ख-ग-घ—स तामुपादाय विजित्य रङ्गे
द्विजातिभिस्तैरभिपूज्यमानः ।
रङ्गान्निराक्रामदचिन्त्यकर्मा
पत्न्या तया चाप्यनुगम्यमानः ॥ [अधिकःपाठः]

* अ-क-ख-ग—कोशेष्वत्रैवाध्यायसमाप्तिर्दृश्यते ॥

2. क-ग—हन्मयेनं

अस्मिन् राजसमावाये देवानामिव सन्नये ।
किमयं सदृशं कंचिन्नृपतिं नैव दृष्टवान् ॥ ३८
न च विप्रेष्वधीकारो विद्यते वरणं प्रति ।
स्वयंवरः क्षत्रियाणाम् इतीयं प्रथिता श्रुतिः ॥ ३९
अथवा यदि कन्येयं नेह किञ्चिद्बुभूषति ।
तिलशः प्रविभज्यैनां याम राष्ट्राणि पार्थिवाः ॥ ४०
ब्राह्मणो यदि वा बाल्याल्लोभाद्वा कृतवानिदम् ।
विप्रियं पार्थिवेन्द्राणां नैष वध्यः कथञ्चन ॥ ४१
ब्राह्मणार्थं हि नो राज्यं जीवितं च वसूनि च ।
पुत्रपौत्रं च यच्चान्यद् अस्माकं विद्यते धनम् ॥ ४२
[1]अवमानवशाद्रोषात् स्वधर्मस्य च रक्षणात् ।
स्वयंवराणां चान्योन्यं मा भूदेवंविधा गतिः ॥ ४३
इत्युक्त्वा राजशार्दूला रुष्टाः परिघबाहवः ।
द्रुपदं संजिघृक्षन्तस् सायुधास्समुपाद्रवन् ॥ ४४
तान् गृहीतशरान् पापान् क्रुद्धानापततो भृशम् ।
द्रुपदो वीक्ष्य संत्रासाद् ब्राह्मणाञ्छरणं गतः ॥ ४५
न भयान्नापि कार्पण्यान्न प्राणपरिरक्षणात् ।
जगाम द्रुपदो विप्रान् क्षेमार्थी संप्रपद्यते ॥ ४६
वेगेनापततस्तांस्तु प्रभिन्नानिव वारणान् ।

1 घ—अवमानभयाद्रोषात्

पाण्डुपुत्रौ महावीर्यौ प्रतीयतुरिरिन्दमौ ॥ ४७

ततस्समानेदुरुदायुधास्ते
महीक्षितो बद्धतलाङ्गुलित्राः ।
जिघांसमानाः कुरुराजपुत्रा-
वमर्षयन्तोऽर्जुनभीमसेनौ ॥ ४८

ततस्तु भीमोऽद्भुतवीर्यकर्मा
महाबलो वज्रसमानवेगः ।
उत्पाट्य दोर्भ्यां द्रुममेकवीरो
निष्पत्रयामास यथा गजेन्द्रः ॥ ४९

तं वृक्षमादाय रिपुप्रमाथी
दण्डीव दण्डं पितृराज उग्रम् ।
तस्थौ समीपे पुरुषर्षभस्य
पार्थस्य पार्थः पृथुदीर्घबाहुः ॥ ५०

तदन्तरे धर्मरतोऽपि गत्वा
विज्ञाय कुन्तीं कुशलीं क्षणेन ।
आगम्य तस्थौ सह सोदराभ्यां
पुरुषर्षभाभ्यां पुरुषप्रवीरः ॥ ५१

तदाऽब्रवीज्जिष्णुरुदारकर्मा
मा सिंहनादं कुरु पूर्वजेह ।

मा घोरतां दर्शय शत्रुमध्ये
साधारणं योधय तावदार्यं ॥ ५२

तत्प्रेक्ष्य कर्मातिमनुष्यबुद्धिर्-
जिष्णुस्स हि भ्रातुरचिन्त्यकर्मा।
दामोदरो भ्रातरमुग्रवीर्यं
हलायुधं वाक्यमिदं बभाषे॥ ५३

वासुदेवः—

य एष सिंहर्षभदन्तगामी
महद्धनुः कर्षति तालमात्रम् ।
एषोऽर्जुनो नात्र विचार्यमस्ति
यद्यस्मि संकर्षण वासुदेवः ॥ ५४

य एष वृक्षं तरसाऽवरुध्य
राज्ञां निकारे सहसा निरुद्धः ।
वृकोदरो नान्य इहैतदद्य
कर्तुं समर्थो भुवि मर्त्यधर्मः ॥ ५५

योऽसौ पुरस्तात् कमलायताक्षः
कुकर्महा सिंहगतिर्नृवीरः ।
धीरप्रचण्डोज्ज्वलचारुघोणो
विनिस्सृतस्सोऽच्युत धर्मराजः ॥ ५६

यौ तौ कुमाराविव कार्तिकेयौ
द्वावाश्विनेयाविति मे वितर्कः ।
मुक्ता हि तस्माज्जतुवेश्मदाहा-
न्मया श्रुताः पाण्डुसुताः पृथा च ॥ ५७

वैशम्पायनः—

[1]यथा नृपाः पाण्डवमाजिमध्ये
तं प्राब्रवीच्चक्रधरो हलायुधम् ।
बलं विजानन् पुरुषोत्तमस्तदा
न कार्यमार्येण च संभ्रमस्त्वया ॥ ५८

भीमानुजो योधयितुं समर्थ
एको हि पार्थस्ससुरासुरान् बहून् ॥ ५८॥

अलं विजेतुं किमु मानुषान्नृपान्
साहाय्यमस्मान् यदि सव्यसाची ।
स वाञ्छति स्म प्रयताम वीर
पराभवः पाण्डुसुते न चास्ति ॥ ५९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि त्र्यशीत्यधिकशततमोऽध्यायः ॥ १८३ ॥
॥ १२ ॥ स्वयंवरपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
[अस्मिन्नध्याये ५९॥ श्लोकाः]

---

1. क-ग-तमब्रवीत्तोयदनिर्मलाभो हलायुधोऽनन्तरजं प्रतीतः ।
प्रीतोऽस्मि दिष्ट्या च पितुः स्वसा नः पृथा विमुक्ता सह कौरवाग्र्यैः॥
[अधिकः पाठः]

॥ चतुरशीत्यधिकशततमोऽध्यायः ॥

अर्जुनेन कर्णपराजयः ॥ १ ॥ भीमेन कर्णपराजयः ॥ २ ॥ युधिष्ठिरादिभिर्दुर्योधनादिपराजयः ॥ ३ ॥ पुनर्युद्धाय कृतनिश्चयानां राज्ञां श्रीकृष्णवाक्येन युद्धोद्योगाद्विरम्य स्वस्वालयगमनम् ॥ ४ ॥ द्रौपद्या सह भीमार्जुनयोः कुलालगृहप्रवेशः ॥ ५ ॥

वैशम्पायनः—

अजिनान्यवधुन्वन्तः करकांश्च द्विजर्षभाः ।
ऊचुस्ते भीर्न कर्तव्या वयं योत्स्यामहे रिपून् ॥ १

तानेवं वदतो विप्रान् अर्जुनः प्रहसन्निव ।
उवाच प्रेक्षका भूत्वा यूयं तिष्ठत पार्श्वतः ॥ २

अहमेनानजिह्मागैश् शतशो विकिरञ्छरैः ।
वारयिष्यामि संक्रुद्धान् मन्त्रैराशीविषानिव ॥ ३

इत्युक्त्वा धनुरादाय शुल्कावाप्तं महारथः ।
भ्रात्रा भीमेन सहितस् तस्थौ गिरिरिवाचलः ॥ ४

ततः कर्णमुखान् क्रुद्धान् क्षत्रियांस्तांश्च पार्थिवान् ।
आसेदतुरुभौ पार्थौ गजौ प्रतिगजानिव ॥ ५

ऊचुश्च वाचं पुरुषास् ते राजानो युयुत्सवः ।
आहवेषु द्विजस्यापि वधो दृष्टो युयुत्सतः ॥ ६

ततो वैकर्तनः कर्णो जगामार्जुनमोजसा ।

युद्धार्थी वाशिताहेतोर् गजः प्रतिगजं यथा ॥ ७
भीमसेनं ययौ शल्यो मद्राणामीश्वरो बली ॥ ७॥
दुर्योधनो धर्मराजं शकुनिं नकुलो ययौ ॥ ८
दुश्शासनस्सहदेवं देवरूपप्रहारिणम् ।
अगच्छज्जयतां श्रेष्ठं भस्मच्छन्नमिवानलम् ॥ ९
न कश्चिदश्वं न गजं रथं वाप्यारुरोह वै ॥ ९॥
पदातयस्सर्वएव प्रत्ययुध्यन्त ते परान् ॥ १०
तत्र कर्णोऽगमत् पार्थम् अर्जुनं गूढचारिणम् ॥ १०॥
[1]दुर्योधनादयस्सर्वे ब्राह्मणैस्सह सङ्गताः ।
मृदुपूर्वमयत्नेन प्रत्ययुध्यंस्तदाऽऽहवे ॥ ११॥
ततोऽर्जुनः प्रत्यविध्यत् तापयंस्तं त्रिभिश्शरैः ।
कर्णं वैकर्तनं श्रीमान् विकृष्य बलवद्धनुः ॥ १२॥
बलेन सुव्यवच्छिन्नैर् अवार्यं तमवारयत् ॥ १३
तेषां शराणां वेगेन शितानां तिग्मतेजसाम् ।
[2]विमुह्यमानो राधेयो यत्नात्तमनुधावति ॥ १४
तावुभावप्यनिर्देश्यौ लाघवाज्जयतां वरौ ।
अयुध्येतां सुसंक्रुद्धावन्योन्यं विजयैषिणौ ॥ १५
कृते प्रतिकृतं पश्य पश्य बाहुबलं च मे ।

1. अ-कोशे इदमर्धं नास्ति ।
2. ब—संभ्रान्तवत्तदा कर्णो यत्नतः प्रत्ययोधयत् । [अधिकः पाठः]

इति शूरार्थवचनैर् अभाषेतां परस्परम् ॥ १६

ततोऽर्जुनस्य भुजयोर् वीर्यमप्रतिमं भुवि ।
ज्ञात्वा वैकर्तनः कर्णस् संरब्धस्समयोधयत् ॥ १७

अर्जुनेन प्रयुक्तांस्तान् बाणान् वेगवतस्तथा ।
प्रतिहत्य ननादोच्चैस् सैन्यास्समभिपूजयन् ॥ १८

कर्णः—

तुष्यामि ते विप्रमुख्य भुजवीर्यस्य संयुगे ।
अविषादस्य चैवास्य शस्त्रास्त्र[1]विनयस्य च ॥ १९

किं त्वं साक्षाद्धनुर्वेदो रामो वा विप्रसत्तम ।
अथ त्वं साक्षाद्धरिहयस् साक्षाद्वा विष्णुरच्युतः ॥ २०

आत्मप्रच्छादनार्थं वै बाहुवीर्यमुपाश्रितः ।
विप्ररूपं विधायेदं ततो[2]मां प्रतियुध्यसे ॥ २१

न हि मामाहवे क्रुद्धम् अन्यस्साक्षाच्छचीपतेः ।
[3]पुमान् योधयितुं शक्तः पाण्डवाद्वा किरीटिनः ॥ २२

अहं कर्णो द्विजश्रेष्ठ सर्वशस्त्रभृतां वरः ।
ब्राह्मे वाप्युत्तमास्त्रे च निष्ठितो गुरुशासनात् ॥ २३

त्वामासाद्य महाबाहो बलं मे प्रतिहन्यते ।
दग्धा जतुगृहे सर्वे पाण्डवास्सार्जुनास्तदा ॥ २४

---

1 क-ग-घ—विज्ञ; ख - नयनस्य 2. अ—ऽस्त्रान् प्रत्यबुध्यसे ।
3. क-च—कस्त्वं वदार्जुनो विप्र पिनाकी स्वयमेव वा । [अधिकः पाठः]

वैशम्पायनः—

इत्युवाचार्जुनमिदं प्रत्याहन्तुमशक्नुवन् ॥ २४॥
[1]तमेवंवादिनं पार्थः प्रत्यभाषत वीर्यवान् ॥ २५

अर्जुनः—

नास्मि कर्ण धनर्वेदो नास्मि रामः प्रतापवान् ।
नाहं विष्णुर्न शक्रोऽहं कश्चिदन्यो बलान्वितः ॥ २६

ब्राह्मणोऽस्मि युधां श्रेष्ठस् सर्वशस्त्रभृतां वरः ।
[2]ब्राह्मे चास्त्रे च वेदे च निष्ठितो गुरुशासनात् ॥ २७

न त्वा संयोजये विप्रो न मे जीवन् विमोक्ष्यसे ।
निर्जितोऽस्मीति वा ब्रूहि ततो व्रज यथासुखम् ॥ २८

वैशम्पायनः—

एवमुक्त्वा तु कर्णस्य धनुर्ज्यामथ सोऽच्छिनत् ।
ततः कर्णविनाशाय सन्दधे शरमर्जुनः ॥ २९

[3]जितोऽस्मीत्यब्रवीत् कर्णस् संजहार ततोऽर्जुनः ॥ २९॥

1. क-ग-घ – न्यस्तहस्तो धनुष्कोट्यां मन्दस्मितमुखाम्बुजः ।
[अधिकः पाठः]
2. क-ख-ग-घ—स्थितोऽस्त्रेषु रणे जेतुं त्वं तु वीराचलो भव ।
[अधिकः पाठः]
3. क-ख-ग—ततोऽन्यद्धनुरादाय संयोद्धुं सन्दधे शरम् ।
धनुस्तदपि कौन्तेयश् चिच्छेद सशरं रुषा ॥
पुनः पुनश्चाददानश् चिच्छेद स पुनः पुनः ।
अच्छिनद्धनुषा पार्थश् शतं कर्णस्य संयुगे ॥

युद्धायोत्पततौ तत्र राजन् शल्यवृकोदरौ ।
बलिनौ युगपन्मत्तौ स्पर्धया च बलेन च ॥ ३०॥
अन्योन्यमाह्वयन्तौ तु मत्ताविव महागजौ ।
मुष्टिभिर्जानुभिश्चैव निघ्नन्तावितरेतरम् ॥ ३१ ॥
मुहूर्तं तावथान्योन्यं बाहुभ्यामपकर्षताम् ॥ ३२
ततो भीमस्समुत्क्षिप्य बाहुभ्यां शल्यमाहवे ।
नावधीद्बलिनां श्रेष्ठो जहास ब्राह्मणस्तदा ॥ ३३

पूर्वतोऽनुवृत्तम्—

छित्वा धनूंषि कर्णस्य कर्णं मर्मस्वताडयत् ।
स च्छिन्नधन्वा बहुशश् छिन्नेषुधिनिपङ्गवान् ॥
पार्थबाणैस्स तुन्नाङ्गः पलायनमथाकरोत् ।
पुनरायान्मुहूर्तेन गृहीत्वा सशरं धनुः ॥
ववर्ष शरवर्षेण पार्थं वैकर्तनस्तदा ।
व्यधमद्बाणजालेन सर्वाङ्गं फल्गुनस्य च ।
हस्तावापं च संछिद्य विननाद महास्वनम् ।
कौन्तेयोऽपि भृशं क्रुद्धो भृशं कार्मुकमाहवे ॥
छित्वाऽस्य शरजालानि धनुः कवचमेव च ।
अर्दयित्वा भृशं बाणैर् द्रावयामास पाण्डवः॥
मत्वा सर्वान् बाणघातान् द्विजस्येव शचीपतेः ।
इन्द्रोऽयं विप्ररूपेण विष्णुर्वा शङ्करोऽपि वा ॥
रामो दाशरथिर्वाऽपि रामो वा जमदग्निजः ।
युध्यत्यस्मानिति ज्ञात्वा कर्णो यायाद्रणाद्बहिः ॥
ब्राह्मं तेजस्तथाऽजय्यं मन्यमानो महारथः ।
न जयेद्ब्राह्मणं संख्ये युधा क्षत्रकुलोद्भवः ।
इति मत्वा द्रुतं कर्णश् शिबिराय जगाम ह ॥

[अधिकः पाठः]

[1]ततो राजसमूहस्य संक्रुद्धो वृक्षमारुजत् ॥ ३३॥
ततस्तु भीमं संज्ञाभिर् वारयामास धर्मराट् ॥ ३४
आकारज्ञस्ततो भ्रातुः पाण्डवोऽपि न्यवर्तत ॥ ३४॥
धर्मराजश्च कौरव्य दुर्योधनममर्षिणम् ।
सुमहच्चापमादाय द्रुपदस्य निवेशने ॥ ३५॥
धनुषी यमयोर्दत्वा योधयामास पाण्डवः ॥ ३६
ततस्तु पाण्डवश्रेष्ठो राजा तत्र महायशाः ।
ब्रह्मरूपप्रतिच्छन्नो राजानं समयोधयत् ॥ ३७
भीतो दुर्योधन इति वारयामास च त्रिभिः ।
जितमात्रे जिते त्वस्मिन् कः कामस्स्यान्महत्कृतम् ॥ ३८
[2]भुजयोरन्तरेऽविध्यद् बाणेनानतपर्वणा ।
दुर्योधनममित्रघ्नं धर्मराजो युधिष्ठिरः ॥ ३९

---

1. क-ख-ग – परिरभ्योत्क्षिप्य बाहुभ्यां मध्ये भारतसत्तम ।
घ—बभञ्ज तरसा शल्यं मध्ये शीघ्रं महाबलः ।
तत्राश्चर्यं भीमसेनश् चकार पुरुषर्षभ ।
यच्छल्यं पतितं भूमौ नाहनद्बलिनं बली ॥
[अधिकः पाठः]

2. क-ग-घ—आयोधयद्रणे राजन् पश्यतां च महीभृताम् ॥
दुर्योधनो धर्मसुतं तौ यमावप्ययोधयत् ।
कर्णे पराजिते यत्न मया तत्र कथं भवेत् ।
चिन्तयन्तमिति ज्ञात्वा राजा विप्राकृतिस्तदा ॥
[अधिकः पाठः]

ततो दुर्योधनः क्रुद्धो दण्डाहत इवोरगः ।
प्रत्यविध्यत राजानं यत्नं परममास्थितः ॥ ४०

छित्त्वा राजा धनुर्ज्यां तु धार्तराष्ट्रस्य संयुगे ।
नाराचेन सुतीक्ष्णेन कायावरणभेदिना ॥ ४१

हृदि विव्याथ भूयोऽस्य बाह्वोरुरसि चार्पयत् ॥ ४१॥

अभ्यवर्षच्छरौघैस्तं स हित्वा प्राद्रवद्रणात् ॥ ४२

दुश्शासनस्तु संक्रुद्धस् सहदेवेन सङ्गतः ॥ ४२॥

युद्ध्वा च सुचिरं कालं धनुषा स महारथः ।
उत्सृज्य च धनुस्सङ्ख्ये बाहुभ्यामेव कौरव ॥ ४३॥

पाण्डवं त्वभिदुद्राव सोऽसिं जग्राह चर्म च ॥ ४४

विकर्णचित्रसेनाभ्यां निगृहीतश्च कौरवः ॥ ४४॥

दुस्सहो नकुलाच्चापि व्यपकृष्टश्च कौरवैः ।
निवर्तन्तां भवन्तो वै न नो विप्रेषु विग्रहः ॥ ४५॥

न च मे केवलं विप्रा न चैषां मानुषं बलम् ।
द्वौ यत्र ब्राह्मणौ क्रूरौ वाय्वग्निसदृशौ बले ॥ ४६॥

ये वा के वा नमस्तेभ्यो गच्छामस्त्वपुरं वयम् ॥ ४७

एवं संभाष्य ते वीरा विनिवर्तन्त कौरवाः ॥ ४७॥

जहसुर्ब्राह्मणास्तत्र समेता राजमण्डले ॥ ४८

ते प्रयातास्ततस्तत्र क्षत्रिया रणमूर्धनि ॥ ४८॥

ब्राह्मणाश्च जयं प्राप्य कन्यामादाय निर्ययुः ॥ ४९
तत्राश्चर्यं भीमसेनश् चकार भरतर्षभ ।
यच्छल्यं पतितं भूमौ नाहनद्बलिनं बली ॥ ५०
पतिते भीमसेनेन शल्ये कर्णे च निर्जिते ।
दुर्योधने चापगते तथा दुश्शासने रणात् ॥ ५१
शङ्कितास्सर्वराजानः परिवव्रुर्द्विजोत्तमान् ॥ ५१॥
ऊचुश्च सहितास्तत्र साध्विह ब्राह्मणर्षभाः ।
[1]विज्ञायन्तामिमे सम्यक् क्व जन्मवस्तथैव च ॥ ५२॥
को हि राधासुतं कर्णं शक्तो वारयितुं रणे ।
[2]तथैव मद्रराजानं शल्यं बलवतां वरम् ॥ ५३॥
बलदेवादृते वीरात् पाण्डवाच्च वृकोदरात् ।
क्रियतामपहारोऽस्माद् युद्धाद्ब्राह्मणसंकुलात् ॥ ५४॥
अथैनानुपलभ्येह पुनर्योत्स्यामहे वयम् ॥ ५५

तत्कर्म भीमस्य समीक्ष्य कृष्णः
कुन्तीसुतौ तौ परिशङ्कमानः ।
निवारयामास महीपतींस्तान्
धर्मेण लब्धेत्यनुनीय सर्वान् ॥ ५६

---

1. क-ख-ग—विज्ञायेतां क्वजन्मानौ क्वनिवासौ तथैव च ।
2. क-ग-घ—अन्यत्र रामाद् द्रोणाद्वा कृपाद्वापि शरद्वतः ॥
कृष्णाद्वा देवकीपुत्रात् फल्गुनाद्वा परन्तपात् ।
को वा दुर्योधनं शक्तः प्रतिवारयितुं रणे ॥ [अधिकः पाठः]

एवं ते सन्निरुद्धास्तु युद्धाद्युद्धविशारदाः ।
यथावासं ययुस्सर्वे विस्मिता राजसत्तम ॥ ५७
वृत्तो ब्राह्मोत्तरो रङ्गः पाञ्चाली ब्राह्मणैर्वृता ।
इति ब्रुवन्तः प्रययुर् ये तत्रासन् समागताः ॥ ५८
ब्राह्मणैश्च प्रतिच्छन्नौ रौरवाजिनवासिभिः ।
कृच्छ्रेण जग्मतुस्तत्र भीमसेनधनञ्जयौ ॥ ५९
विमुक्तौ जनसंबाधाच् छत्रुभिः परिविक्षतौ ।
कृष्णयाऽनुगतौ तत्र नृवीरौ हि विचेरतुः ॥ ६०
तेषां माता बहुविधं विनाशं पर्यचिन्तयत् ॥ ६०॥
अनागच्छत्सु पुत्रेषु भैक्षकालेऽतिगच्छति ।
धार्तराष्ट्रैर्हृता नूनं विज्ञाय कुरुपुङ्गवाः ॥ ६१॥
मायान्वितैर्वा रक्षोभिस् सुघोरैर्दृढवैरिभिः ।
विपरीतं मतं जातं व्यासस्यापि महात्मनः ॥ ६२॥
इत्येवं चिन्तयामास सुतस्नेहान्विता पृथा ॥ ६३
ततो भुक्तजनप्राये घनैस्सूर्य इवावृतः ।
ब्राह्मणैः प्राविशत्तत्र जिष्णुर्धर्मपुरस्कृतः ॥ ६४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥
॥ १२ ॥ स्वयंवरपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥

[अस्मिन्नध्याये ६४ श्लोकाः]

॥ पञ्चाशीत्यधिकशततमोऽध्यायः ॥

भीमार्जुनाभ्यां द्रौपद्याः भिक्षेत्यावेदने कुन्त्या पञ्चानां सह भोजनानुज्ञा ॥ १ ॥ पश्चात् द्रौपदीदर्शनेन चिन्तान्वितायां कुन्त्यां युधिष्ठिरार्जुनयोस्संवादः ॥ २ ॥ द्वैपायनवचस्स्मरणेन सर्वेषां द्रौपदी भार्येति युधिष्ठिरनिश्चयः ॥ ३ ॥ जनमेजयेन कृष्णस्य कार्मुकानारोपणे कारणप्रश्ने पाण्डवार्थमिति वैशम्पायनस्योत्तरम् ॥४॥ कुलालशालां प्रति श्रीकृष्णस्यागमनम् । ५ ॥

वैशम्पायनः—

गत्वा ततो भार्गवपर्णशालां
पार्थौ पृथां प्रेक्ष्य महानुभावौ ।
तां याज्ञसेनीं परमप्रतीतौ
भिक्षेत्यथावेदयतां नराग्र्यौ ॥ १

[1]कुटीगता सा त्वनवेक्ष्य पुत्रौ
प्रोवाच भुङ्क्तेति समेत्य सर्वे ।
पश्चात्तु कुन्ती प्रसमीक्ष्य कन्यां
कष्टं मया भाषितमित्युवाच ॥ २

साऽधर्मभीता हि विलज्जमानां
तां याज्ञसेनीं परमप्रतीताम् ।

1. क-ग—प्रागेव संप्रविष्टेषु भवनं भ्रातृषु स्विषु ।
अम्ब भिक्षेयमानीतेत्याहतुर्भीमफल्गुनौ ॥ [अधिकः पाठः]

पाणौ गृहीत्वोपजगाम कुन्ती
युधिष्ठिरं वाक्यमुवाच चेदम् ॥ ३

कुन्ती—

इयं च कन्या द्रुपदस्य राज्ञस्-
तवानुजाभ्यां मयि सन्निसृष्टा ।
यथान्वितं पुत्र मयाऽपि चोक्तं
समेत्य भुङ्क्ष्वेमिति प्रमादात् ॥ ४

मया कथं नानृतमुक्तमद्य
भवेत् कुरूणामृषभ ब्रवीहि ।
पञ्चालराजस्य सुतामधर्मो
न चोपवर्तेत न भूतपूर्वः ॥ ५

वैशम्पायनः—

ततो मुहूर्तं त्वनुचिन्त्य राजा
युधिष्ठिरो भ्रातरमुत्तमौजाः ।
कुन्तीं समाश्वास्य कुरुप्रवीरो
धनञ्जयं वाक्यमिदं बभाषे ॥ ६

युधिष्ठिरः—

त्वया जिता पाण्डव याज्ञसेनी
[1]त्वयैव तोषिष्यति राजपुत्री ।

1. घ—त्वया च शोभिष्यति शोभमाना।

प्रज्वाल्यतां हूयतां चैव वह्निर्
गृहाण पाणिं विधिवत्त्वमस्याः ॥ ७

अर्जुनः—

मा मां नरेन्द्र त्वमधर्मभाजं
कृथा न धर्मोऽह्ययमीप्सितोऽन्यैः ।
भवान्निवेश्यः प्रथमं ततोऽयं
भीमो महाबाहुरचिन्त्यकर्मा ॥ ८

अहं ततो नकुलोऽनन्तरं मे
माद्रीसुतस्सहदेवो जघन्यः ।
वृकोदरोऽहं च यमौ च राज-
न्नियं च कन्या भवतश्च सर्वे ॥ ९

एवं गते यत् करणीयमत्र
धर्म्यं यशस्यं कुरु तद्विचिन्त्य ।
पाञ्चालराजस्य हि यत् प्रियं स्यात्
तद्ब्रूहि सर्वे स्म वशे स्थितास्ते ॥ १०

वैशम्पायनः—

दृष्ट्वा ते तत्र तिष्ठन्तीं सर्वे कृष्णां यशस्विनीम् ।
संप्रेक्ष्यान्योन्यमासीना हृदयैस्तामधारयन् ॥ ११

तेषां च द्रौपदीं दृष्ट्वा सर्वेषामितौजसाम् ।
संप्रमथ्येन्द्रियग्रामं प्रादुरासीन्मनोभवः ॥ १२

काम्यं हि रूपं पाञ्चाल्या विधात्रा विहितं स्वयम् ।
बभूवाधिकमन्याभ्यस् सर्वभूतमनोहरम् ॥ १३

ते मन्यमानाः कौन्तेयास् सर्वभूतमनोहराम् ।
चकमुस्सत्त्वसंपन्ना विधात्रा च प्रचोदिताः ॥ १४

तेषामाकारतत्त्वज्ञः कुन्तीपुत्रो युधिष्ठिरः ।
द्वैपायनवचः कृत्स्नं सस्मार मनुजर्षभः ॥ १५

अब्रवीत् सहितान् भ्रातॄन् मिथो भेदभयान्नृपः ।
सर्वेषां द्रौपदी भार्या सामान्यं नो भविष्यति ॥ १६

प्रत्यगृह्णंस्ततो वाणीं भ्रातुर्ज्येष्ठस्य पाण्डवाः ।
अन्योन्यं चानुपघ्नन्तो धर्मार्थं काममीप्सितम्* ॥ १७

जनमेजयः—

सताऽपि शक्तेन च केशवेन
सज्यं धनुस्तन्न कृतं किमर्थम् ।
विद्धं च लक्ष्यं न च कस्य हेतोर्-
आचक्ष्व तन्मे द्विपदां वरिष्ठ ॥ १८

वैशम्पायनः—

शक्तेन कृष्णेन च कार्मुकं त-
न्नारोपितं ज्ञातुकामेन पार्थान् ।

* अ-ख-कोशयोः अत्रैवाध्यायसमाप्तिर्दृश्यते ।

परिश्रवादेव बभूव लोके
जीवन्ति पार्था इति निश्चयोऽस्य ॥ १९

अन्यानशक्तान्नृपतीन् समीक्ष्य
स्वयंवरे कार्मुकेणोत्तमेन ।
धनञ्जयस्तु धनुरेकवीरस्
सज्यं करोतीत्यभिवीक्ष्य कृष्णः ॥ २०

इति स्वयं वासुदेवो विचिन्त्य
पार्थान् विचिन्वन् विविधैरुपायैः ।
न तद्धनुस्सज्यमियेष कर्तुं
कृष्णस्य वै प्राणसमो हि पार्थः* ॥ २१

भ्रातुर्वचस्तत् प्रसमीक्ष्य सर्वे
ज्येष्ठस्य पाण्डोस्तनयास्तदानीम् ।
तमेवार्थं ध्यायमाना मनोभिर्
आसांचक्रुरथ तत्रामितौजसः ॥ २२

वृष्णिप्रवीरः कुरुपुङ्गवांस्तान्
आशंसमानस्सहरौहिणेयः ।
जगाम तां भार्गवकर्मशालां
यत्रासते ते पुरुषप्रवीराः ॥ २३

क-ग-कोशयोः अत्रैवाध्यायसमाप्तिर्दृश्यते

तत्रोपविष्टं पृथुदीर्घबाहुं
ददर्श कृष्णस्सहरौहिणेयः ।
अजातशत्रुं परिवार्य तांश्च
उपोपविष्टाञ्ज्वलनप्रकाशान् ॥ २४

तांश्चाऽब्रवीद्वासुदेवोऽभिगम्य
कुन्तीसुतान् धर्मभृतां वरिष्ठान् ।
कृष्णोऽहमस्मीति निपीड्य पादौ
युधिष्ठिरस्याजमीढस्य तस्थौ ॥ २५

तथैव तस्याप्यनु रौहिणेयस्
ते चापि हृष्टाः कुरवोऽभ्यनन्दन् ।
पितृष्वसुश्चैव यदुप्रवीरा-
वगृह्णीतां भारतमुख्य पादौ ॥ २६

अजातशत्रुस्तु कुरुप्रवीरः
पप्रच्छ कृष्णं कुशलं निवेद्य ।
कथं वयं वासुदेव त्वयेह
गूढा वसन्तो विदितास्स्म सर्वे ॥ २७

तमब्रवीद्वासुदेवः प्रहस्य
गूढोऽप्यग्निर्ज्ञायत एव राजन् ।

तं विक्रमं पाण्डवेयानतीत्य
कोऽन्यः कर्ता विद्यते मानुषेषु ॥ २८

दिष्ट्या तस्मात् पावकाच्चापि मुक्ता
यूयं सर्वे पाण्डवाश्शत्रुसाहाः ।
दिष्ट्या पापो धृतराष्ट्रस्य पुत्रस्
सामात्यो वै न सकामोऽभविष्यत् ॥ २९

[1]भद्रं वोऽस्तु निहितं यद्गुहायां
विवृद्धं वै ज्वलनमिवेध्यमानम् ।
मा वो विदुः पार्थिवाः केचनेह
यास्यावो वां शिबिरायैव तावत् ॥ ३०

सोऽनुज्ञातः पाण्डवेनाव्ययश्रीः
प्रायाच्छीघ्रं बलदेवेन सार्धम् ।
तत्रैवासन् पाण्डवाश्चाजघन्या
मात्रा सार्धं कृष्णया चापि वीराः ॥ ३१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि पञ्चाशीत्यधिकशततमोऽध्यायः ॥ १८५ ॥
॥ १२ ॥ स्वयंवरपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
[अस्मिन्नध्याये ३१ श्लोकाः]

---

1. क-ग-घ— दिष्ट्या कृष्णा वीर्यमाश्रित्य लब्धा
दिष्ट्या भूयश्शश्वदेवं कृतार्थाः ॥ [अधिकः पाठः]

॥ षडशीत्यधिकशततमोऽध्यायः ॥

पाण्डवावासे धृष्टद्युम्नस्य निलीयावस्थानम् ॥ १ ॥ भीमाद्यानीतस्य भैक्षस्य कुन्त्याज्ञया द्रौपद्या परिवेषणम् ॥ २ ॥ सर्वं पाण्डववृत्तान्तं ज्ञात्वा धृष्टद्युम्नस्य प्रतिनिवर्तनम् ॥ ३ ॥

वैशम्पायनः—

धृष्टद्युम्नस्तु पाञ्चाल्याः पृष्ठतः कुरुनन्दनौ ।
अन्वगच्छत्तदा यान्तौ भार्गवस्य निवेशनम् ॥ १

सोऽज्ञायमानः पुरुषान् अवधार्य समन्ततः ।
स्वयमाराद्विनिष्टोऽभूद् भार्गवस्य निवेशनात् ॥ २

जिज्ञासमानस्तु तदा सन्दिदेश नृपात्मजः ।
पुरुषान् द्रौपदीहेतोर् जानीध्वं के त्विमे द्विजाः ॥ ३

सायं च भीमस्तु रिपुप्रमाथी
जिष्णुर्यमौ चापि महानुभावौ ।
भैक्षं चरित्वा तु युधिष्ठिराय
निवेदयाञ्चक्रुरदीनसत्त्वाः ॥ ४

ततस्तु कुन्ती द्रुपदात्मजां ताम्
उवाच काले वचनं वदान्या ।
भक्ताग्र्यमादाय कुरुष्व भद्रे
बलिं च विप्राय च देहि भिक्षाम् ॥ ५

ये चान्नमिच्छन्ति हि देहि तेभ्यः
परिश्रिता ये परितो मनुष्याः ।
ततश्च शेषं प्रविभज्य शीघ्रम्
अर्धं चतुर्धा मम चात्मनश्च ॥ ६

अर्धं तु भीमाय च देहि भद्रे
य एष सिंहर्षभतुल्यरूपः ।
श्यामो युवा संहननोपपन्न
एषो हि वीरो बहुभुक् सदैव ॥ ७

सा हृष्टरूपैव च राजपुत्री
तस्या वचस्साध्वविशङ्कमाना ।
यथा तयोक्तं वचनं चकार
ते चापि सर्वेऽभ्यवजह्रुरन्नम् ॥ ८

कुशैस्तु भूमौ शयनं चकार
माद्रीसुतस्सहदेवस्तरस्वी ।
अथात्मनीनान्यजिनानि सर्वे
संस्तीर्य वीरास्सुपुपुर्धरण्याम् ॥ ९

अगस्त्यकान्तामभितो दिशं तु
शिरांसि तेषां कुरुसत्तमानाम् ।
कुन्ती पुरस्तात्तु बभूव तेषां
कृष्णा तिरश्चैव बभूव पत्नी ॥ १०

अशेत भूमौ सह पाण्डुपुत्रैः
पादोपधानेव कृता कुशेषु ।
न तत्र तस्या मन आप दुःखं
न चावमेने कुरुपुङ्गवांस्तान् ॥ ११

ते तत्र शूराः कथयांबभूवुः
कथा विचित्राः पृतनाधिकाराः ।
अस्त्राणि दिव्यानि रथांश्च नागान्
तथा गदाश्चापि परश्वधांश्च ॥ १२

तेषां कथास्ताः परिकीर्त्यमानाः
पाञ्चालराजस्य सुतस्तदानीम् ।
शुश्राव कृष्णां च तथाऽभिपन्नां
ते चापि सर्वे ददृशुर्मनुष्याः ॥ १३

धृष्टद्युम्नो राजपुत्रस्तु सर्वं
वृत्तं तेषां कथितं चैव रात्रौ ।
सर्वं राज्ञे द्रुपदायाखिलेन
निवेदयिष्यंस्त्वरितो जगाम ॥ १४

पाञ्चालराजस्तु विषण्णरूपस्-
[1]तान् पाण्डवानप्रतिविन्दमानः ।
धृष्टद्युम्नं पर्यपृच्छन्महात्मा
क्व सा गता केन हृता च कृष्णा ॥ १५

1. घ—सदा स्मरन् द्रौपदीं किं कृतेति ।

कच्चिन्न शूद्रेण न हीनजेन
वैश्येन वा करणेनोपपन्ना ।
कच्चित् पदं मूर्ध्नि न मे विषक्तं
कच्चिच्च बाला पतिता न श्मशाने ॥ १६

कच्चित् सुवर्णप्रतिमो मनुष्य
उद्रिक्तवर्णोऽप्युत वेह कच्चित् ।
कच्चिन्न वामो मम मूर्ध्नि पादः
कृष्णाभिमर्शेन कृतोऽद्य पुत्र ॥ १७

कच्चिच्छयिष्ये परमप्रतीतस्
तां युज्य पार्थेन नरर्षभेण ।
वदस्व तत्त्वेन महानुभाव
कोऽसौ विजेता दुहितुर्ममाद्य ॥ १८

वैचित्रवीर्यस्य तु कच्चिदद्य
कुरुप्रवीरस्य चरन्ति पुत्राः ।
[1]कच्चिच्च पार्थेन यवीयसाऽद्य
धनुर्गृहीतं निहतं च लक्ष्यम् ॥ १९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि षडशीत्यधिकशततमोऽध्यायः ॥ १८६ ॥
॥ १२ ॥ स्वयंवरपर्वणि षष्ठोऽध्यायः ॥ ६ ॥

[स्वयंवरपर्व समाप्तम्]

[अस्मिन्नध्याये १९ श्लोकाः]

---

1. क-ग-घ—कच्चित्त मे यज्ञफलेन पुत्र
भाग्येन तस्याश्च कुलं च वामे ॥ [अधिकः पाठः]

॥ सप्ताशीत्यधिकशततमोऽध्यायः ॥

(अथ वैवाहिकपर्व)

धृष्टद्युम्नवार्तां श्रुतवता द्रुपदेन तत्त्वविवित्सया पाण्डवान् प्रति पुरोहितप्रेषणम् ॥ १ ॥ कुन्त्या सह पाण्डवानां द्रुपदगृहगमनम् ॥ २ ॥ द्रुपदेन परीक्षणार्थं अनेकविधवस्तूपहरणम् ॥ ३ ॥ द्रौपद्या सह कुन्त्या अन्तःपुरप्रवेशः ॥ ४ ॥ पाण्डवानां भोजनानन्तरं साङ्ग्रामिकवस्तुपूर्ण-प्रदेशे प्रवेशः ॥ ५ ॥

वैशम्पायनः—

ततस्तथोक्तः परिहृष्टरूपः
पित्रे शशंसाथ नरेन्द्रपुत्रः ।
धृष्टद्युम्नस्सोमकानां प्रवर्हो
वृत्तं यथा येन हृता च कृष्णा ॥ १

धृष्टद्युम्नः—

योऽसौ युवा स्वायतलोहिताक्षः
कृष्णाजिनी रूपमतीव बिभ्रत् ।
यः कार्मुकाग्र्यं कृतवानधिज्यं
लक्ष्यं च तत् पातितवान् पृथिव्याम् ॥ २

आसज्जमानश्च गतस्तरस्वी
द्विजातिभिस्तैरभिपूज्यमानः ।

विक्रम्य वज्रीव दितेस्सुतेषु
सर्वैश्च देवैर्ऋषिभिश्च दृष्टः ॥ ३
श्यामो युवा वारण[1]मन्दगामी
कृत्वा महत् कर्म सुदुष्करं तत् ।
कृष्णाऽपि कृष्णाजिनिनं जगाम
नागं यथा नागवधूः प्रहृष्टा ॥ ४
यस्सूतपुत्रेण चकार युद्धं
शङ्केऽर्जुनं तं त्रिदशेशवीर्यम् ।
अमृष्यमाणेषु नराधिपेषु
क्रुद्धेषु तं तत्र समापतत्सु ॥ ५
ततो वटुः पार्थिवसङ्घमध्ये
प्रवृद्धमारुज्य महीप्ररोहम् ।
प्राकालयत्तत्र स पार्थिवान् रणे
भीमोऽन्तकः प्राणभृतो यथैव ॥ ६
तौ पार्थिवानां मिषतां नरेन्द्र
कृष्णामुपादाय गतौ नराग्र्यौ ।
[2]विभ्राजमानाविव चन्द्रसूर्यौ
बाह्यां पुराद्भार्गवकर्मशालाम् ॥ ७

---

1. क-ख-ग-घ—मत्त
2. क-ग—विक्षोभ्य विद्राव्य च पार्थिवांस्तान्
स्वतेजसा दुष्प्रतिवीक्ष्यरूपौ ॥ [अधिकः पाठः]

तत्रोपविष्टाऽर्चिरिवानलस्य
तेषां जनित्रीति मम प्रतर्कः ।
तथाविधैरेव नरप्रवीरैर्-
उपोपविष्टा त्रिभिरग्निकल्पैः ॥ ८

तस्यास्ततस्तावभिवाद्य पादा-
वुपोपविष्टौ नरलोकवीरौ ।
स्थितौ च तत्रैव निवेद्य कृष्णां
भिक्षाप्रचाराय गता नराढ्याः ॥ ९

तेषां तु भैक्षं प्रतिगृह्य कृष्णा
कृत्वा बलिं ब्राह्मणानर्चयित्वा ।
तां चैव वृद्धां परिवेष्य तांश्च
नरप्रवीरान् स्वयमप्यभुङ्क्त ॥ १०

सुप्तास्तु ते पार्थिवास्सर्व एव
कृष्णा च तेषां चरणोपधानम् ।
आसीत् पृथिव्यां शयनं च तेषां
दर्भाजिनाढ्यास्तरणोपपन्नम् ॥ ११

ते नर्दमाना इव कालमेघाः
कथा विचित्राः कथयांबभूवुः ।
न वैश्यशूद्रौपयिकीः कथास्ता
न च द्विजार्हाः कथयन्ति वीराः ॥ १२

निस्संशयं क्षत्रियपुङ्गवास्ते
यथा हि युद्धं कथयन्ति राजन् ।
आशा हि नो व्यक्तमियं समृद्धा
मुक्तान् हि पार्थाञ्शृणुमोऽग्निदाहात् ॥ १३

यथा हि लक्ष्यं निहतं धनुश्च
सज्यं कृतं तेन तथा प्रगृह्य ।
यथा हि जल्पन्ति परस्परं ते
छन्नं वसन्तो विचरन्ति पार्थाः । १४

वैशम्पायनः—

ततस्स राजा द्रुपदः प्रहृष्टः
पुरोहितं प्रेषयामास तत्र ।
विद्याम युष्मानिति भाषमाणो
महात्मनः पाण्डुसुतांश्च कञ्चित् ॥ १५

गृहीतवाक्यो नृपतेः पुरोधा
गत्वा प्रशंसामभिधाय तेषाम् ।
वाक्यं यथावन्नृपतेस्सममम्
उवाच तेभ्यस्समनुक्रमेण ॥ १६

पुरोधाः—

विज्ञातुमिच्छत्यवनीश्वरो वः
पाञ्चालराजो द्रुपदो वरार्हान् ।

लक्ष्यस्य वेद्धारमिमं हि दृष्ट्वा
हर्षस्य नान्तं परिपश्यते सः ॥ १७

आचक्षध्वं जातिकुलानुपूर्वं
शिरस्सु पादान् द्विषतां कुरुध्वम् ।
प्रह्लादयध्वं हृदयं ममेदं
पाञ्चालराजस्य सहात्मजस्य ॥ १८

पाण्डुर्हि राजा द्रुपदस्य राज्ञः
प्रियस्सखा चात्मसमो बभूव ।
तस्यैष कामो दुहिता ममेयं
स्नुषा यदि स्यादिति कौरवस्य ॥ १९

अयं च कामो द्रुपदस्य राज्ञो
हृदि स्थितो नित्यमनिन्दिताङ्गाः ।
यदर्जुनो मे पृथुदीर्घबाहुर्
धर्मेण विन्देत सुतां ममेति ॥ २०

वैशम्पायनः—

तथोक्तवाक्यं तु पुरोहितं तं
स्थितं विधिज्ञं समुदीक्ष्य राजा ।
समर्पयं भीममिदं शशास
प्रदीयतां पाद्यमर्घ्यं तथाऽस्मै ॥ २१

मान्यः पुरोधा द्रुपदस्य राज्ञस्
तस्मै प्रयोज्याऽभ्यधिका च पूजा ॥ २१॥

भीमस्ततस्तत् कृतवान् नरेन्द्र
तां चैव पूजां प्रतिगृह्य तत्र ।
सुखोपविष्टं तु पुरोहितं तं
युधिष्ठिरो ब्राह्मणमित्युवाच ॥ २२॥

युधिष्ठिरः—

पाञ्चालराजेन सुता निसृष्टा
स्वधर्मदृष्टेन यथा निकामम् ।
प्रदिष्टशुल्का द्रुपदेन राज्ञा
सा तेन वीरेण तथा गृहीता ॥ २३॥

न तत्र वर्णेषु कृता विवक्षा
न चापि [1]शीले न कुले न गोत्रैः ।
कृतेन सज्येन हि कार्मुकेण
विद्धेन लक्ष्येण च सन्निकृष्टा ॥ २४॥

सेयं तथाऽनेन महात्मनेह
कृष्णा जिता पार्थिवसङ्घमध्ये ।
नैवं गते सौमकिरद्य राजा
सन्तापमर्हत्यसुखेन कर्तुम् ॥ २५॥

1. अ-ख-ग-घ—शिल्पे

कामश्च योऽसौ द्रुपदस्य राज्ञस्
स चापि संपत्स्यति पार्थिवस्य ।
नाप्राप्तरूपस्य नरेन्द्रकन्याम्
इमामहं ब्राह्मण साधु मन्ये ॥ २६॥
न तद्धनुर्मन्दबलेन शक्यं
मौर्व्या समायोजयितुं तथा हि ।
न चाकृतास्त्रेण न हीनजेन
लक्ष्यं तथा पातयितुं च शक्यम् ॥ २७॥
तस्मान्न तापं दुहितुर्निमित्तं
पाञ्चालराजोऽर्हति कर्तुमद्य ।
न चापि तत्पातनमन्यथेह
कर्तुं विषह्यं भुवि मानवेन ॥ २८॥

वैशम्पायनः—

एवं ब्रुवत्येव युधिष्ठिरे तु
पाञ्चालराजस्य समीपतोऽन्यः ।
तत्राजगमाशु नरो द्वितीयो
निवेदयिष्यन्निह सिद्धमन्नम्* ॥ २९॥

दूतः—

अन्यार्थमन्नं द्रुपदेन राज्ञा
विवाहहेतोरुपसंस्कृतं च ।

---

* अ-क-ख-ग—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते ।

तदाप्लुवध्वं कृतसर्वकार्याः
कृष्णा तु तत्रैतु चिरं न कार्यम् ॥ ३०॥

इमे रथाः काञ्चनपद्मचित्रास्
सदश्वयुक्ता वसुधाधिपार्हाः ।
एतान् समारुह्य [1]समेत सर्वे
पाञ्चालराजस्य निवेशनं तत् ॥ ३१॥

वैशम्पायनः—
ततः प्रयाताः कुरुपुङ्गवास्ते
पुरोहितं तं प्रथमं प्रयाप्य ।
आस्थाय यानानि महान्ति तानि
कुन्ती च कृष्णा च सह प्रयाते ॥ ३२॥

स वै तथोक्तस्तु युधिष्ठिरेण
पाञ्चालराजस्य पुरोहिताग्र्यः ।
सर्वं यथोक्तं कुरुनन्दनेन
निवेदयामास नृपाय गत्वा ॥ ३३॥

श्रुत्वा तु वाक्यानि पुरोहितस्य
यान्युक्तवान् भारत धर्मराजः ।
जिज्ञासयैवाथ कुरूत्तमानां
द्रव्याण्यनेकान्युपसञ्जहार ॥ ३४॥

1. घ—परीत

फलानि माल्यान्यथ संस्कृतानि
चर्माणि वर्माणि तथाऽऽसनानि ।
गाश्चैव राजन्नथ चैव रज्जू-
रत्नानि धान्यानि कृषेर्निमित्तम् ॥ ३५॥

अन्येषु शिल्पेष्वपि यान्यपि स्युस्
सर्वाणि कृत्यान्यखिलेन तत्र ।
क्रीडानिमित्तान्यपि यानि तानि
सर्वाणि तत्रोपजहार राजा ॥ ३६॥

अस्त्राणि शस्त्राणि च भानुमन्ति
खड्गा महान्तोऽथ रथाश्च चित्राः ।
धनूंषि चोग्राणि शराश्च मुख्याश्
शक्त्यृष्टयः काञ्चनभूषिताश्च ॥ ३७॥

प्रासान् मुसुण्डीश्च परश्वधांश्च
सांग्रामिकांश्चैव तथाऽपि चान्यान् ।
शय्यासनान्युत्तमसंस्कृतानि
तथैव राजन् विविधानि तत्र ॥ ३८॥

कुन्ती तु कृष्णां परिगृह्य साध्वीम्
अन्तःपुरं द्रुपदस्याविवेश ।
राजस्त्रियः कौरवराजपुत्रीं
प्रत्यर्चयाञ्चक्रुरदीनसत्वाम् ॥ ३९॥

तान् सिंहविक्रान्तगतीनुदीक्ष्य
महर्षभाक्षानजिनोत्तरीयान् ।
व्यूढान्तरांसान् भुजगेन्द्रभोग-
प्रलम्बबाहून् पुरुषप्रवीरान् ॥ ४०॥

राजा च राज्ञस्सचिवाश्च सर्वे
पुत्राश्च राज्ञस्सुहृदस्तथैव ।
प्रेष्याश्च सर्वे निखिलेन राजन्
हर्षं समापेतुरतीव तत्र ॥ ४१॥

ते तत्र वीराः परमासनेषु
सपादपीठेष्वविशङ्कमानाः ।
यथानुपूर्व्याद्विविशुर्नराग्र्यास्
तथा महार्हेषु न विस्मयन्तः ॥ ४२॥

उच्चावचं पार्थिवभोजनीयं
पात्रेषु जाम्बूनदराजतेषु ।
दासाश्च दास्यश्च सुमृष्टवेषाः
भोज्यं परं चाभ्युपजह्रुरग्र्यम् ॥ ४३॥

ते तत्र भुक्त्वा पुरुषप्रवीरा
यथा सुकामं सुभृशं प्रतीताः ।
उत्क्रम्य सर्वाणि वसूनि तत्र
सांग्रामिकाण्याविविशुर्नृवीराः ॥ ४४॥

तल्लक्षयित्वा द्रुपदस्य पुत्रा
राजा च सर्वे सह मन्त्रिमुख्याः ।
सम्मन्त्रयामासुरतीव हृष्टाः
कुन्तीसुतान् पार्थिवपुत्रपौत्रान् ॥ ४५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥
॥ १३ ॥ वैवाहिकपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[अस्मिन्नध्याये ४५ । श्लोकाः ।]

॥ अष्टाशीत्यधिकशततमोऽध्यायः ॥

द्रुपदप्रश्नानन्तरं युधिष्ठिरेण स्वेषां पाण्डवत्वकथनम् ॥ १ ॥ द्रौपद्याः पञ्चपत्नीत्वे द्रुपदस्य विवादः ॥२॥ व्यासागमनम् ॥३॥ एकस्याः बहुभार्यात्वे शङ्कमानान् द्रुपदादीन् प्रति व्यासेन स्वस्वाभिप्रायकथनानुज्ञा ॥४॥ द्रुपदादिभिः स्वस्वमते कथिते व्यासेनास्य विवाहस्य धर्म्यत्वकथनम् ॥५॥

वैशम्पायनः—

तत आहूय पाञ्चालो राजपुत्रं युधिष्ठिरम् ।
परिग्रहेण ब्राह्मेण परिगृह्य महाद्युतिः ॥ १
पर्यपृच्छददीनात्मा कुन्तीपुत्रं युधिष्ठिरम् ॥ १॥

द्रुपदः—

कथं जानीम भवतः क्षत्रियान् ब्राह्मणानुत ।

वैश्यान् वा गुणसम्पन्नान् उत वा शूद्रयोनिजान् ॥ २॥

मायामास्थाय वा सिद्धांश् चरतस्सर्वतोदिशम् ।
कृष्णाहेतोरनुप्राप्तान् दिवस्संदर्शनार्थिनः ॥ ३॥

ब्रवीतु नो भवान् सत्यं सन्देहो ह्यस्ति नो महान् ॥ ४

अपि नस्संशयस्यान्ते मनस्तुष्टिरिहाविशेत् ।
अपि नो भागधेयानि शुभानि स्युः परन्तप ॥ ५

[1]कामयेयं ब्रूहि सत्यं सत्यं राजसु शोभते ।
इष्टापूर्तेन च तथा वक्तव्यं नानृतं भवेत् ॥ ६

श्रुत्वा ह्यमरसङ्काश तव वाक्यमरिन्दम ।
ध्रुवं विवाहकरणम् आस्थास्यामि विधानतः ॥ ७

युधिष्ठिरः—

मा राजन् विमना भूस्त्वं पाञ्चाल प्रीतिरस्तु ते ।
ईप्सितस्ते ध्रुवः कामस् संवृत्तोऽयमसंशयम् ॥ ८

वयं हि क्षत्रिया राजन् पाण्डोः पुत्रा महात्मनः ।
ज्येष्ठं मां विद्धि कौन्तेयं भीमसेनार्जुनाविमौ ॥ ९

याभ्यां तव सुता राजन्निर्जिता राजसंसदि ॥ ९॥

यमौ तौ तत्र राजेन्द्र यत्र कृष्णा प्रतिष्ठिता ॥ १०

व्येतु ते मानसं दुःखं क्षत्रियास्मो नराधिप ॥ १०॥

---

1. क-ख-ग—कामयानस्य ब्रूहि त्वं ; घ - कामये ब्रूहि सत्यं ते

पद्मिनीव सुतेयं ते ह्रदादन्यह्रदं गता ॥ ११

इति तथ्यं महाराज सर्वमेतद्ब्रवीमि ते ।
भवान् हि गुरुरस्माकं परमं च परायणम् ॥ १२

वैशम्पायनः—

ततस्स द्रुपदो राजा हर्षव्याकुललोचनः ।
प्रतिवक्तुं न शक्तोऽभूद् धर्मसूनुं तदाऽनघम् ॥ १३

यत्नेन तु स तं हर्षं सन्निगृह्य परन्तपः ।
अनुरूपं ततो राजा प्रत्युवाच युधिष्ठिरम् ॥ १४

[1]पर्यपृच्छददीनात्मा यथा ते प्रद्रुताः पुरा ।
तथाऽस्मै सर्वमाचष्ट आनुपूर्व्येण पाण्डवः ॥ १५

तच्छ्रुत्वा द्रुपदो राजा कुन्तीपुत्रस्य भाषितम् ।
विगर्हयामास तदा धृतराष्ट्रं नरेश्वरम् ॥ १६

आश्वासयामास तदा कुन्तीपुत्रं युधिष्ठिरम् ।
प्रतिजज्ञे स राज्याय द्रुपदो ददतां वरः ॥ १७

ततः कुन्ती च कृष्णा च भीमसेनार्जुनावपि ।
यमौ च राज्ञा संदिष्टा विविशुर्भवनं महत् ॥ १८

तत्र ते न्यवसन् राजन् यज्ञसेनेन पूजिताः ।
पर्याश्वस्तांस्तदा राजा सह पुत्रैरुवाच तान् ॥ १९

1. ख—पर्यपृच्छत दीनात्मा

द्रुपदः—

गृह्णातु विधिवत् पाणिम् अद्यैव कुरुनन्दनः ।
पुण्येऽहनि महाबाहुर् अर्जुनः कुरुतां क्षणम् ॥ २०

वैशम्पायनः—

ततस्तमब्रवीद्राजा धर्मपुत्रो युधिष्ठिरः ॥ २०॥
ममापि दारसंबन्धः कार्यस्तावद्विशांपते ।
तस्मात् पूर्वं मया कार्यं तद्भवाननुमन्यताम् ॥ २१॥

द्रुपदः—

भवान् वा विधिवत् पाणिं गृह्णातु दुहितुर्मम ।
यस्य वा मन्यसे वीर तस्य कृष्णामुपादिश ॥ २२॥

युधिष्ठिरः—

सर्वेषां द्रौपदी राजन् महिषी नो भविष्यति ।
एवं हि व्याहृतं पूर्वं मम मात्रा विशांपते ॥ २३॥
अहं चाप्यनिविष्टो वै भीमसेनश्च पाण्डवः ।
पार्थेन विजिता चैषा रत्नभूता च ते सुता ॥ २४॥
एष नस्समयो राजन् रत्नस्य सह भोजनम् ।
न चैनं हातुमिच्छामस् समयं राजसत्तम ॥ २५॥
अक्रमेण निवेशे च धर्मलोपो महान् भवेत ॥ २६

[1]सर्वेषां धर्मतः कृष्णा महिषी नो भविष्यति ।
आनुपूर्व्येण गृह्णन्तु सर्वेऽग्नौ ज्वलिते करम् ॥ २७

द्रुपदः—

एकस्य बह्व्यो विहिता महिष्यः कुरुनन्दन ।
नैकस्या बहवः पुंसो विधीयन्ते कदाचन ॥ २८
सोऽयं न लोके वेदे वा जातु धर्मः प्रशस्यते ॥ २८॥
लोकवेदविरुद्धं च नाधर्मं धार्मिकश्शुचिः ।
कर्तुमर्हसि कौन्तेय कस्मात्ते बुद्धिरीदृशी ॥ २९॥

युधिष्ठिरः—

[2]सूक्ष्मो धर्मो महाराज नास्य विद्मो गतिं वयम् ।
पूर्वेषामानुपूर्व्येण यातं वर्त्मानुयामहे ॥ ३०॥
न मे वागनृतं प्राह नाधर्मे धीयते मतिः ।
एवं चैव वदत्यम्बा ममापि च मनोगतम् ॥ ३१॥
आश्रमेषु विनिर्दिष्टाद् व्यासादेतन्मया श्रुतम् ।
[3]धर्म एष ध्रुवो राजन् चरैनमविचारयन् ॥ ३२॥
अत्र ते संशयो मा भूत् कथमित्यवनीश्वर ॥ ३३

द्रुपदः—

त्वं च कुन्ती च कौन्तेय धृष्टद्युम्नश्च मे सुतः ।

---

1. अ-कोशे—निर्जिता चैव पार्थेन रत्नभूता च ते सुता । [अधिकः पाठः]
2. अ-कोशे—लोकधर्मविरुद्धोऽयं धर्मो धर्मभृतां वर । [अधिकः पाठः]
3. अ-क-ख-ग—कोशेषु— धर्मविच्चाद्भुवो राजन् विचार्यैव करोम्यहम् ।
मा च तत्र विशङ्का भूत्र ह्यधर्मे मतिर्मम ॥

कथयन्त्विह कर्तव्यं श्वः काल्ये करवामहे ॥ ३४

वैशम्पायनः—

ते समेत्य ततस्सर्वे कथयन्ति स्म भारत ।
अथ द्वैपायनो राजन्नाजगाम [1]विचिन्तितः* ॥ ३५

वैशम्पायनः—

ततस्ते पाण्डवास्सर्वे पाञ्चाल्यश्च महारथः ।
प्रत्युत्थाय महात्मानं कृष्णं दृष्ट्वाऽभ्यपूजयन् ॥ ३६

प्रतिनन्द्य स तान् सर्वान् पृष्ट्वा च कुशलं ततः ।
आसने काञ्चने शुभ्रे निषसाद महामुनिः ॥ ३७

अनुज्ञातास्तु ते सर्वे कृष्णेनामिततेजसा ।
आसनेषु महार्हेषु निषेदुर्द्विपदां वराः ॥ ३८

ततो मुहूर्तं मधुरां वाचमुच्चार्य पार्षतः ।
पप्रच्छ तं महात्मानं द्रौपद्यर्थं महामुनिम् ॥ ३९

द्रुपदः—

कथमेका बहूनां स्यान्न च स्याद्धर्मसंकरः ।
एतन्नो भगवान् सर्वं प्रब्रवीतु यथातथम् ॥ ४०

व्यासः

अस्मिन् धर्मे विप्रलब्धे लोकवेदविरोधिते ।
यस्य यस्य मतं यद्यच् छ्रोतुमिच्छामि तस्य तत् ॥ ४१

1. ख-विचिन्त्य तत्। घ—यदृच्छया।
* अ-क-ख-ग—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते।

द्रुपदः—

अधर्मोऽयं मम मतो विरुद्धो लोकवेदयोः ।
न ह्येका विद्यते पत्नी बहूनां द्विजसत्तम ॥ ४२

न चाप्याचरितः पूर्वैर् अयं धर्मो महात्मभिः ।
न चाधर्मोऽप्यनेकस्थश् चरितव्यस्सनातनः ॥ ४३

अतो नाहं करोम्येनं व्यवसायं सुतां प्रति ।
धर्मसन्देहसन्दिग्धं प्रतिभातीह मामिदम् ॥ ४४

धृष्टद्युम्नः—

यवीयसः कथं भार्यां ज्येष्ठो भ्राता द्विजर्षभ ।
ब्रह्मन् समभिवर्तेत सद्वृत्तस्संस्तपोधन ॥ ४५

न तु धर्मस्य सूक्ष्मत्वाद् गतिं वेद्मि कथञ्चन ।
अधर्मो धर्म इति वा व्यवसायो न शक्यते ॥ ४६

कर्तुमस्माद्विधैर्ब्रह्मन्नतो न व्यवसाम्यहम् ।
पञ्चानां महिषी कृष्णा भवत्विति कथञ्चन ॥ ४७

युधिष्ठिरः—

न मे वागनृतं प्राह नाधर्मे धीयते मतिः ।
वर्तते च मनो मेऽत्र नैषोऽधर्मः कथञ्चन ॥ ४८

श्रूयते हि पुराणेषु जटिलो नाम गौतमः ।
तस्य पुत्री महाप्राज्ञा गौतमस्य यशस्विनी ॥ ४९
ऋषीनध्यासितवती सप्त धर्मभृतां वरान् ॥ ४९॥

तथा वै मृगशावाक्षी तपोभिर्भावितान् मुनीन् ।
दशाभजदृषीन् भ्रातॄन् एकनाम्नः प्रचेतसः ॥ ५०॥

गुरोश्च वचनं प्राहुर् धर्म्यं धर्मभृतां वरम् ।
गुरूणां चैव सर्वेषां जनित्री परमो गुरुः ॥ ५१॥

सा चाप्युक्तवती वाचं भैक्षवद्भुज्यतामिति ॥ ५२
तस्मादेतदहं मन्ये परं धर्मं द्विजोत्तम ॥ ५२॥

कुन्ती—

एवमेतद्यथाऽऽहायं धर्मचारी युधिष्ठिरः ।
[1]भुज्यतां भ्रातृभिस्सार्धम् इत्यर्जुनमचोदयम् ॥ ५३॥

अनृतान्मे भयं तीव्रं मुच्येऽहमनृतात् कथम् ॥ ५४

व्यासः—

अनृतान्मोक्ष्यसे भद्रे धर्मश्चैष सनातनः ।
ननु वक्ष्यामि सर्वेषां पाञ्चाल शृणु मे वचः ॥ ५५

यथाऽयं विहितो धर्मो यतश्चायं सनातनः ।
यथा चाप्याह कौन्तेयस् तथा धर्मो न संशयः ॥ ५६

वैशम्पायनः —

तत उत्थाय भगवान् व्यासो द्वैपायनः प्रभुः ।
करे गृहीत्वा राजानं राजवेश्म समाविशत् ॥ ५७

पाण्डवास्त्वथ कुन्ती च धृष्टद्युम्नश्च पार्षतः ।
मिथः कथाभिस्ते सर्वे प्रतीक्षन्ते स्म तावुभौ ॥ ५८

1. अ-ख-घ-कोशेषु-इदमर्धं नास्ति ।

ततो द्वैपायनस्तस्मै नरेन्द्राय विशाम्पते ।
आचख्यौ तद्यथा धर्मो बहूनामेकपत्निता ॥ ५९
यथा देवा ददुश्चैव राजपुत्र्याः पुरा वरम् ।
धर्माद्यास्तपसा तुष्टाः पञ्चपत्नीत्वमीश्वराः ॥ ६०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि अष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥
॥ १३ ॥ वैवाहिकपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[अस्मिन्नध्याये ६० श्लोकाः]

एकोननवत्यधिकशततमोऽध्यायः ॥

द्रुपदसेनापरनाम्न्या नालायन्या उपाख्यानारम्भः—नालायन्या स्थविरस्य पत्युर्मौद्गल्यस्य आराधनम् ॥ १ ॥ तुष्टेन तेन नालायनीप्रार्थनयाऽऽत्मनः पञ्चरूपस्वीकारेण तस्यां रमणम् ॥ २ ॥ नालायनी तव दुहिता जातेति द्रुपदं प्रति व्यासस्योक्तिः ॥ ३॥ नालायन्या रुद्रात् पञ्चपत्नीत्ववरप्राप्तिः ॥ ४ ॥

व्यासः—
मा भूद्राजंस्तव तापो मनस्थः
पञ्चानां भार्या दुहिता ममेति ।
मातुरेषा पार्थिव प्रार्थिता स्यात्
पञ्चानां भार्या [1]दुहिता ममेति ॥ १
याजोपयाजौ धर्मघृणी तपोभ्यां
तौ चक्रतुः पञ्चपतित्वमस्याः ।

1. अ-घ—महिषी तवे ।

[1]सा धर्मतः पाण्डुसुतैरवाप्ता
भार्या कृष्णा मोदतां वै कुलं ते ॥ २

लोके नान्यो नाथवांस्त्वद्विशिष्टस्
सर्वारीणामप्रधृष्योऽसि राजन् ।
भूयस्तु मे शृण्विदं त्वं विशोको
यथागमं पञ्चपतित्वमस्याः ॥ ३

एषा नालायनी पूर्वं मौद्गल्यं स्थविरं पतिम् ।
आराधयामास तदा कुष्ठिनं तमनिन्दिता ॥ ४
त्वगस्थिभूतं कटुकं लोलमीर्ष्युं सुकोपनम् ।
सुगन्धेतरगन्धाढ्यं वलीपलितधारिणम् ॥ ५
स्थविरं विकृताकारं शीर्यमाणनखत्वचम् ।
उच्छिष्टमुपभुञ्जाना पर्युपास्ते महाव्रता ॥ ६
ततः कदाचिदङ्गुष्ठो भुञ्जानस्य व्यशीर्यत ।
अन्नादुद्धृत्य तच्चान्नम् उपभुङ्क्तेऽविशङ्किता ॥ ७
तेन तस्याः प्रसन्नेन कामव्याहारिणा तदा ।
वरं वृणीष्वेत्यसकृद् उक्तो वव्रे वरं तदा ॥ ८

मौद्गल्यः—

नास्मि वृद्धो न कटुको नेर्ष्युर्नैवातिकोपनः ।

1. अ-ख—कोशयोरयं सार्धश्लोको नास्ति

न च दुर्गन्धवदनो न कृशो न च लोलुपः ॥ ९

कथं त्वां रमयामीह कथं त्वां वासयाम्यहम् ।
वद कल्याणि भद्रं ते यथा त्वं मनसेच्छसि ॥ १०

व्यासः—

सा तमक्लिष्टकर्माणं वरदं सर्वकामदम् ।
भर्तारमनवद्याङ्गी प्रसन्नं प्रत्युवाच ह ॥ ११

नालायनी—

[1]पञ्चधा मां विभक्तात्मा भगवँल्लोकविश्रुत ।
रमय त्वमचिन्त्यात्मन् पुनश्चैकत्वमास्थितः ॥ १२

व्यासः—

तां तथेत्यब्रवीद्धीमान् ब्रह्मर्षिर्वै महातपाः ।
स पञ्चधावपुर्भूत्वा रमयामास सर्वशः ॥ १३

नालायनीं सुकेशान्तां मौद्गल्यश्चारुहासिनीम् ॥ १३॥

आश्रमेष्वाधिकं चापि पूज्यमानो महर्षिभिः ।
विचचार यथाकामं कामरूपवपुः पुनः ॥ १४॥

यदा ययौ दिवं चापि तत्र देवर्षिभिस्सह ।
स्वधामृतरसाहारस् सुरलोके चचार ह ॥ १५॥

पूज्यमानस्तथा शच्या शक्रस्य भवनेष्वपि ।
महेन्द्रसेनया सार्धं पर्यटन् दिवि रंहसः ॥ १६॥

1. क-ग-घ—पञ्चबाणातिविद्धाऽहं मन्मथस्य महामते। [अधिकः पाठः]

सूर्यस्य च रथं दिव्यम् आरुह्य भगवान् प्रभुः ।
पर्युपेत्य पुनर्मेरुं मेरौ वासमरोचयत् ॥ २७॥
आकाशगङ्गामाप्लुत्य तया सह तपोनिधिः ।
अंशुजालेषु चन्द्रस्य उवास च यथाऽनिलः ॥ २८॥
गिरिरूपं यथा दध्रे स महर्षिस्तदा पुनः ।
तत्प्रभावेन सा तस्य मध्ये जज्ञे महानदी ॥ २९॥
[1]यदा पुष्पाकुलस्सालस् संजज्ञे भगवानृषिः ।
[2]लतात्वमथ संपेदे तमेवाभ्यनुवेष्टती ॥ ३०॥
पुपोष च वपुर्यत्तद् रूपं तस्यानुगं पुनः ।
सा पुपोष समं भर्तुस् स्कन्धेनापि चचार ह ॥ ३१॥
ततस्तस्य च तस्याश्च तुल्या प्रीतिरवर्धत ॥ ३२
तथा सा भगवंस्तस्याः प्रसादाद्दर्षिसत्तमः ।
विजज्ञुषी च सा तत्र तपोयोगेन भामिनी ॥ ३३
स च तां तपसा देवीं रमयामास योगतः ॥ ३३॥
एकपत्नी पुनर्भूत्वा सदैवाग्रे यशस्विनी ।
अरुन्धतीव सीतेव बभूवातिपतिव्रता ॥ ३४॥
दमयन्त्याश्च मातुस्सा विशेषमधिकं ययौ ॥ ३५

1. घ—यदाऽसौ कल्पवृक्षस्य आश्रिताखिलसिद्धिदः ।
2. घ—तदा स्यात् कल्पकलता तस्योपरि समावृता ।

एतत्तथ्यं महाराज मा ते भूद्बुद्धिरन्यथा ॥ ३५॥
एषा नालायनी जज्ञे दैवयोगेन केन चित् ।
राजंस्तवात्मजा कृष्णा वेद्यां तेजस्विनी शुभा ॥ ३६॥
तस्मिंस्तस्या मनस्सक्तं न चचाल कदाचन ॥ ३७
तथा प्रणिहितो ह्यात्मा तस्यास्तस्मिन् द्विजोत्तमे ॥ ३७॥

द्रुपदः—

ब्रूहि तत् कारणं येन ब्रह्मज्ञाता तपस्विनी ।
सूता ममाध्वरे कृष्णा सर्ववेदविदां वर* ॥ ३८॥

व्यासः—

शृणु राजन् यथा ह्यस्या दत्तो रुद्रेण वै पुरा ।
यदर्थं चैव संभूता तव यज्ञे यशस्विनी ॥ ३९॥
अहं ते कथयिष्यामि कृष्णायाः पौर्वदैहिकम् ॥ ४०
इन्द्रसेनेति विख्याता पुरा नालायनी शुभा ।
मौद्गल्यं पतिमासाद्य चचार विगतज्वरा ॥ ४१
मौद्गल्यस्य महर्षेश्च रममाणस्य वै तया ।
संवत्सरगणा राजन् व्यतीयुः क्षणवत्तदा ॥ ४२
ततः कदाचिद्धर्मात्मा तपुकामो व्यरज्यत ।
अन्विच्छन् परमं ब्रह्म त्यागधर्मपरोऽभवत् ॥ ४३

* अ-क-ख-ग—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते ।

उत्ससर्ज स तां विप्रस् सा तदा चापतद्भुवि ।
[1]मौद्गल्यो राजशार्दूल तपोभिर्भावितस्सदा ॥ ४४

नाळायनी—

प्रसीद भगवन् मह्यं न मामुत्स्रष्टुमर्हसि ।
अवितृप्ताऽस्मि ब्रह्मर्षे कामानां मम कामद ॥ ४५

[2] ऋषिः—

मात्त्वं मयि निश्शङ्का ह्यवक्तव्यं प्रभाषसे ।
आचरन्ती तपोविघ्नं तस्माच्छृणु वचो मम ॥ ४६
भविष्यसि नृलोकेऽस्मिन् राजपुत्री यशस्विनी ।
पाञ्चालराजस्य सुता द्रुपदस्य महात्मनः ॥ ४७
भवितारस्ततस्तत्र पतयः पञ्च विश्रुताः ।
तैस्सार्धं मधुराकारैश् चिरं रतिमवाप्स्यसि ॥ ४८

व्यासः—

सैवं शप्ता तु विमना वनं प्रायाद्यशस्विनी ।
भोगैरतृप्ता देवेशं तपसाऽऽराधयत्तदा ॥ ४९
निराशीर्मारुताहारा निराहारा तथैव च ।
अनुवर्तमाना त्वादित्यं तथा पञ्चतपा भवत् ॥ ५०

---

1. क-ग-घ—मौद्गल्यं राजशार्दूल तपोभिर्भावितं सदा ।
कामभोगातुराऽभ्येत्य वचनं चेदमब्रवीत् । [अधिकः पाठः]
2. क-ग-घ—मारो मां बाधतेऽत्यर्थम् अनुगृह्णातु मां भवान् ।
तर्पयस्व ममाक्षाणि गुह्यं मां बाधतेऽनिशम् ॥
[अधिकः पाठः]

तीव्रेण तपसा तस्यास् तुष्टः पशुपतिस्स्वयम् ।
वरं प्रादात्तदा रुद्रस् सर्वलोकेश्वरः प्रभुः ॥ ५१

महेश्वरः—

भविष्यति परं जन्म मनुष्येषु वराङ्गने ।
भविष्यन्ति च ते भद्रे पतयः पञ्च सुव्रताः ॥ ५२

महेन्द्रवपुषस्सर्वे महेन्द्रसमविक्रमाः ।
तत्रस्था च महत्कर्म सुराणां त्वं करिष्यसि ॥ ५३

नालायनी—

एकः खलु मया भर्ता वृतः पञ्च त्विमे कथम् ।
भविष्यन्ति ममैकस्याः पतयस्तद्ब्रवीहि मे ॥ ५४

महेश्वरः—

पञ्चकृत्वस्त्वया ह्युक्तः पतिं देहीत्यहं पुनः ।
पञ्च ते पतयो भद्रे भविष्यन्ति सुखावहाः ॥ ५५

नालायनी—

धर्म एकः पतिस्स्त्रीणां पूर्वमेव प्रकल्पितः ।
बहुपत्नीकता पुंसां धर्मश्च पितृभिः कृतः ॥ ५६

स्त्रीधर्मः पूर्वमेवायं निर्मितो मुनिभिः पुरा ।
सहधर्मचरी भर्तुर् एका एकस्य चोच्यते ॥ ५७

एको हि भर्ता नारीणां कौमार इति लौकिकः ।
आपत्सु च नियोगेन सन्तानार्थे परस्स्मृतः ॥ ५८

गच्छेत या तृतीयं तु तस्या निष्कृतिरुच्यते ॥ ५८॥
चतुर्थे पतिता धर्मात् पञ्चमे वर्धकी भवेत् ॥ ५९

एवं गते धर्मपथे न वृणे बहुपुंस्कताम् ॥ ५९॥
अलोकाचरितात्तस्मात् कथं मुच्येय सङ्करात् ॥ ६०

महेश्वरः—

अनावृताः पुरा नार्यो [1]ह्यासञ्शुध्यन्ति चार्तवे ॥ ६०॥
सकृदुक्तं त्वया नैतन्नाधर्मस्ते भविष्यति ॥ ६१

नालायनी—

यदि मे पतयः पञ्च रतिमिच्छामि तैर्मिथः ।
कौमारं च भवेत् सर्वैस् सङ्गमे सङ्गमे च मे ॥ ६२

पतिशुश्रूषया चैव सिद्धिः प्राप्ता मया पुरा ।
भोगेच्छा च मया प्राप्ता स च भोगश्च मे भवेत् ॥ ६३

महेश्वरः—

रतिश्च भद्रे सिद्धिश्च न भजेते परस्परम् ॥ ६३॥
[2]अभोगा लप्स्यसे सिद्धिं योगेन च महत्त्वताम् ॥ ६४

अन्यदेहान्तरे च त्वं रूपभाग्यगुणान्विता ।
पञ्चभिः प्राप्य कौमारं महाभागा भविष्यसि ॥ ६५

गच्छ गङ्गाजलद्वारं नरं पश्यसि यं शुभे ।

---

1. क-ग—मासे शुध्यन्ति
2. घ—दुर्भगा लप्स्यसे सिद्धिं भोगेन बहुमान्यताम् ।

तमानय ममाभ्याशं सुरराजं शुचिस्मिते ॥ ६६

व्यासः—

इत्युक्ता विश्वरूपेण रुद्रं कृत्वा प्रदक्षिणम् ।
जगाम गङ्गामुद्दिश्य पुण्यां त्रिपथगां नदीम् ॥ ६७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम् आदिपर्वणि एकोननवत्यधिकशततमोऽध्यायः ॥ १८९ ॥
॥ १३ ॥ वैवाहिकपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
[अस्मिन्नध्याये ६७ श्लोकाः]

॥ नवत्यधिकशततमोऽध्यायः ॥

पञ्चेन्द्रोपाख्यानप्रारम्भः ॥ १ ॥ बलरामकेशवद्रौपद्यादीनामुत्पत्तिकथा ॥ २ ॥ व्यासदत्तदिव्यदृष्टेर्द्रुपदस्य पाण्डवद्रौपदीपूर्वरूपदर्शनं ॥ ३ ॥ द्रौपद्या अव्यवहितपूर्वजन्मवृत्तान्तकथनम् ॥ ४ ॥

व्यासः—

पुरा वै नैमिशारण्ये देवास्सत्रमुपासते । ॥
तत्र वैवस्वतो राजन् शामित्रमकरोत्तदा ॥ १

ततो यमो दीक्षितस्तत्र राजन्
नामारयत् किञ्चिदपि प्रजाभ्यः ।
ततः प्रजास्ता बहुला बभूवुः
कालातिपातान्मरणात् प्रहीणाः ॥ २

ततश्च शक्रो वरुणः कुबेरस्
साध्याश्च रुद्रा वसवश्चाश्विनौ च ।
प्रणेतारं भुवनस्य प्रजापतिं
समाजग्मुस्तत्र देवास्तथाऽन्ये ॥ ३

ततोऽब्रुवँल्लोकगुरुं समेता
भयं नस्तीव्रं मानुषाणां प्रवृद्ध्या ।
तस्माद्भयादुद्विजन्तस्सुखेप्सवः
प्रयाम सर्वे शरणं भवन्तम् ॥ ४

ब्रह्मा—

किं वो भयं मानुषेभ्यो यूयं सर्वे यदाऽमराः ।
न वो मर्त्यसकाशाद्वै भयं भवति कर्हि चित् ॥ ५

देवाः—

मर्त्या ह्यमर्त्यास्संवृत्ता न विशेषोऽस्ति कश्चन ।
अविशेषादुद्विजन्तो विशेषार्थमिहागताः ॥ ६

ब्रह्मा—

वैवस्वतो व्यापृतस्सत्रहेतोस्
तेन त्विमे न म्रियन्ते मनुष्याः ।
तस्मिन्नेकाग्रे कृतसर्वकार्ये
तत एषां भवितैवान्तकालः ॥ ७

वैवस्वतस्येह तनुर्हि भूत्वा
वीर्येण युष्माकमुत प्रवृद्धा ।

सैषामन्तो भविता ह्यन्तकाले
नियच्छध्वं मोहमित्रसाहाः ॥ ८

व्यासः—

ततस्तु ते पूर्वजदेववाक्यं
श्रुत्वा जग्मुर्यत्र देवा यजन्ते ।
समासीनास्ते समेता महाबला
भागीरथ्यां ददृशुः पुण्डरीकम् ॥ ९

दृष्ट्वा च तद्विस्मितास्ते बभूवुस्
तेषामिन्द्रस्तत्र शूरो जगाम ।
सोऽपश्यद्योषामथ पावकप्रभां
यत्र देवी गङ्गा सततं प्रभूता ॥ १०

सा तत्र योषा रुदती जलार्थिनी
गङ्गां देवीं व्यवगाह्य व्यतिष्ठत् ।
तस्याश्रुबिन्दुः पतितो जले वै
तत्पद्ममासीदथ तत्र काञ्चनम् ॥ ११

तदद्भुतं प्रेक्ष्य वज्री तदानीम्
अपृच्छत्तां योषितमन्तिकाद्वै ।
का त्वं कुतो रोदिषि कस्य हेतोर्
वाक्यं तथ्यं कामयेऽहं ब्रवीहि ॥ १२

स्त्री—

त्वं वेत्स्यसे मामिह याऽस्मि शक्र
यदर्थं चाहं रोदिमि मन्दभाग्या ।
आगच्छ राजन् पुरतो गमिष्ये
द्रष्टाऽसि तद्रोदिमि यत्कृतेऽहम् ॥ १३

व्यासः—

तां गच्छन्तीमन्वगच्छत्तदानीं
सोऽपश्यदारात्तरुणं दर्शनीयम् ।
सिद्धासनस्थं युवतीसहायं
क्रीडन्तमक्षैर्गिरिराजमूर्ध्नि ॥ १४

तमब्रवीद्देवराजो ममेदं
त्वं विद्धि विश्वं भुवनं वशे स्थितम् ।
ईशोऽहमस्मीति समन्युरब्रवीद्
दृष्ट्वा तमक्षैस्सुभृशं प्रमत्तम् ॥ १५

क्रुद्धं स शक्रं प्रसमीक्ष्य देवो
जहास शक्रं च शनैरुदीक्ष्य ।
संस्तम्भितोऽभूदथ देवराजस्
तेनेक्षितस्थाणुरिवावतस्थे ॥ १६

यदा तु पर्याप्तगिरिहाक्षक्रीडया
तदा देवीं रुदतीं तामुवाच ।

आनीयतामेष यतोऽहमारा-
न्नैनं दर्पः पुनरप्याविशेत ॥ १७
तदा शक्रस्पृष्टमात्रस्तया तु
स्रस्तैरङ्गैः पतितोऽभूद्धरण्याम् ।
तमब्रवीद्भगवानुग्रतेजा
नैवं पुनश्शक्र कृथाः कथञ्चित् ॥ १८
निवर्तयैनं च महाद्रिराजं
बलं च वीर्यं च तवाप्रमेयम् ।
विवृत्य चैवाविश मध्यमस्य
यत्रासते त्वद्विधास्सूर्यभासः ॥ १९
स तद्विवृत्य शिखरं महागिरेस्
तुल्यद्युतींस्तांश्चतुरो ददर्श ।
स तानभिप्रेक्ष्य बभूव दुःखितः
कथं नाहं भविता वै यथेमे ॥ २०
ततो देवो गिरिशो वज्रपाणिं
विवृत्य नेत्रे रुषितोऽभ्युवाच ।
दरीमेतां प्रविश त्वं शतक्रतो
यन्मां बाल्यादवमंस्थाः पुरस्तात् ॥ २१
उक्तस्त्वेवं विभुना देवराजः
प्रावेपमानो भवदेवाभिषङ्गात् ।

स्रस्तैरङ्गैरानिलेनेव नुन्नम्
अश्वत्थपत्रं गिरिराजमूर्ध्नि ॥ २२

स प्राञ्जलिर्वै विनतेनाननेन
प्रवेपमानस्सहसैवमुक्तः ।
उवाच देवं बहुरूपमुग्रं
दृष्ट्वा शेषं भगवंस्त्वं प्रसीद ॥ २३

तमब्रवीदुग्रधन्वा प्रहस्य
नैवंविधाश्शेषमवाप्नुवन्ति ।
एतेऽप्येवं भवितारः पुरस्तात्
तस्मादेते दरीमेनां प्रविष्टाः ॥ २४

एषा भार्या भविता वो न संशयो
योनिं सर्वे मानुषीं संविशध्वम् ।
तत्र यूयं कर्म कृत्वाऽविषह्यं
[1]भूभारस्य निधनं प्रापयित्वा ॥ २५

शस्त्रैर्दिव्यैर्मानुषान् योधयित्वा
शूरान् सर्वानाहवे तान् विजित्य ।
आगन्तारः पुनरेवेन्द्रलोकं
स्वकर्मणा पूज्यमाना महार्हम् ॥ २६

1. क-ग—बहूनां राज्ञां निधनं; घ--बहूनन्यान्

सर्वं मया भाषितमेतदेवं
कर्तव्यमन्यद्विविधार्थवच्च ॥ २६॥

पूर्वेन्द्राः—

गमिष्यामो मानुषं देवलोकाद्
दुरावारो विहितो यत्र मोक्षः ।
देवास्त्वस्मानादधीरञ्ननन्यां
धर्मो वायुर्मघवानाश्विनौ च ॥ २७॥

व्यासः—

एतच्छ्रुत्वा वज्रपाणिर्वचस्तु
देवश्रेष्ठः पुनरेवेदमाह ।
वीर्येणाहं पुरुषं कार्यहेतोर्
दद्यामेषां पञ्चमं मत्प्रसूतम् ॥ २८॥

तेषां कामं भगवानुग्रकर्मा
प्रादादिष्टं सन्निसर्गाद्यथोक्तम् ।
तां चाप्येषां योषितं लोककान्तां
श्रियं भार्यां व्यदधान्मानुषेषु ॥ २९॥

तैरेव सार्धं तु ततस्स देवो
जगाम नारायणमप्रमेयम् ।
स चापि तद्व्यदधात् सर्वमेव
ततस्सर्वे संबभूवुर्धरण्याम् ॥ ३०॥

नरं तु देवं विबुधप्रधानम्
इन्द्राज्जिष्णुं पञ्चमं कल्पयित्वा ।
स चापि केशौ हरिरुद्वर्ह
शुक्लमेकमपरं चापि कृष्णम् ॥ ३१॥

तौ चापि केशौ विशतां यदूनां
कुले स्त्रियौ देवकीं रोहिणीं च ।
तयोश्चेतो बलदेवो बभूव
कृष्णो द्वितीयः केशवस्संबभूव ॥ ३२॥

ये ते पूर्वं शक्ररूपा निरुद्धास्
तस्यां दर्यां पर्वतस्योत्तमस्य ।
इहैव ते पाण्डवा वीर्यवन्तश्
शक्रस्यांशः पाण्डवस्सव्यसाची ॥ ३३॥

एवमेते पाण्डवास्संबभूवुर्
ये ते राजन् पूर्वमिन्द्रा बभूवुः ।
लक्ष्मीश्चैषां पूर्वमेवोपदिष्टा
भार्या चैषा द्रौपदी दिव्यरूपा ॥ ३४॥

कथं हि स्त्री कर्मणोऽन्ते महीतलात्
समुत्तिष्ठेदन्यतो दैवयोगात् ।
यस्या रूपं सोमसूर्यप्रकाशं
गन्धश्च यस्याः क्रोशमात्रात् प्रवाति ॥ ३५॥

इदं चान्यत् प्रीतिपूर्वं नरेन्द्र
ददामि ते दिव्यमत्यद्भुतं च ।
दिव्यं चक्षुः पश्य कुन्तीसुतांस्त्वं
पुण्यैर्दिव्यैः पूर्वदेहैरुपेतान् ॥ ३६॥

वैशम्पायनः—

ततो व्यासः परमोदारकर्मा
शुचिर्विप्रस्तपसा तस्य राज्ञः ।
चक्षुर्दिव्यं प्रददौ तेन सर्वान्
राजाऽपश्यत् पूर्वदेहैरुपेतान् ॥ ३७॥

ततो दिव्यान् हेमकिरीटमालिनः
शक्रप्रख्यान् पावकादित्यवर्णान् ।
बद्धापीडांश्चारुरूपांश्च यूनो
व्यूढोरस्कान् सालमात्रान् ददर्श ॥ ३८॥

दिव्यैर्वस्त्रैररजोभिस्सुवर्णैर्
माल्यैश्चाग्र्यैश्शोभमानानतीव ।
साक्षात्त्र्यक्षान् वासवान् वाऽथ दिव्यान्
आदित्यान् वा सर्वगुणोपपन्नान् ॥ ३९॥

पूर्वेन्द्रांस्तानेवमीक्ष्याभिरूपान्
प्रीतो राजा द्रुपदो विस्मितश्च ।

दिव्यां मालां तामवाप्याप्रमेयाम्
तां चैवाग्र्यां श्रियमिव रूपिणीं च ॥ ४०॥
योग्यां तेषां रूपतेजोयशोभिः
पत्नीमिष्टां दृष्टवान् पार्थिवेन्द्रः ॥ ४१
स तां दृष्ट्वा महदाश्चर्यरूपां
जग्राह पादौ सत्यवत्यास्सुतस्य ।
नैताच्चित्रं परमर्षे त्वयीति
प्रसन्नचेतास्स उवाच चैनम् ॥ ४२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि नवत्यधिकशततमोऽध्यायः ॥ १९० ॥
॥ १३ ॥ वैवाहिकपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
[अस्मिन्नध्याये ४२ श्लोकाः]

॥ एकनवत्यधिकशततमोऽध्यायः ॥

व्यासेन द्रौपद्या देवतांशत्वनिरूपणम् ॥ १ ॥ पाण्डवस्वरूपनिदर्शनम् ॥ २ ॥ युधिष्ठिरादीनां क्रमेण द्रौपद्याः पाणिग्रहणम् ॥ ३ ॥

व्यासः—

इदमन्यत् पुरावृत्तं तन्निबोध च भूमिप ।
कीर्त्यमानं नृपर्षीणां पूर्वेषां दारकर्मणि ॥ १

नितन्तुर्नाम राजर्षिर् बभूव भुवि विश्रुतः ॥ १॥
तस्य पुत्रा महेष्वासा बभूवुः पञ्च भूमिपाः ॥ २
साल्वेयश्शूरसेनश्च श्रुतसेनश्च वीर्यवान् ।
तिन्दुसारोऽद्रिसारश्च क्षत्रियाः क्रतुयाजिनः ॥ ३
नातिचक्रमुरन्योन्यम् अन्योन्यस्य प्रियंवदाः ॥ ३॥
एतान्नैतन्तवान् पञ्च शैब्या चात्र स्वयंवरे ।
अवाप तान् पतीन् वीरान् भौमाश्वी मनुजाधिप ॥ ४॥
वीणेयं मधुरारावा गान्धारस्वरमूर्छिता ।
उत्तमा सर्वनारीणां भौमाश्वी ह्यभवत्तदा ॥ ५॥
यस्या नैतन्तवाः पञ्च पतयः क्षत्रियर्षभाः ।
बभूवुः पृथिवीपालास् सर्वैस्समुदिता गुणैः ॥ ६॥
तेषामेकाऽभवद्भार्या राज्ञामौशीनरी शुभा ॥ ७
भौमाश्वी नाम भद्रं ते तथा रूपगुणान्विता ॥ ७॥
पञ्चभ्यः पञ्चधा पञ्च दायादान् सा व्यजायत ॥ ८
तेभ्यो नैतन्तवेभ्यस्तु राजशार्दूल वै तदा ।
पृथगाख्याऽभवत्तेषां भ्रातॄणां पञ्चधा भुवि ॥ ९
यथावत् कीर्त्यमानांस्तान् शृणु मे राजसत्तम ॥ ९॥
साल्वेयाश्शूरसेनाश्च श्रुतसेनाश्च पार्थिवाः ।
तिन्दुसाराद्रिसाराश्च वंशा एषां नृपोत्तम ॥ १०॥

एवमेकाऽभवद्भार्या भौमाश्वी भुवि विश्रुता* ॥ ११

व्यासः—

आसीत्तपोवने काचिद् ऋषेः कन्या महात्मनः ।
नाध्यगच्छत् पतिं सा तु कन्या रूपवती सती ॥ १२
तोषयामास तपसा सा तु देवं महेश्वरम् ॥ १२॥
तपसा चेश्वरस्तुष्टो वृणीथाः काममीप्सितम् ॥ १३
अथेश्वरमुवाचेदम् आत्मनो यद्धितं वचः ।
पतिं सर्वगुणोपेतम् इच्छामीति पुनः पुनः ॥ १४
एवमुक्तस्तदा देव इदं वचनमब्रवीत् ।
पञ्च ते पतयश्श्रेष्ठा †(भविष्यन्तीति शङ्करः ॥ १५
सा प्रसादयती देवम् इदं भूयोऽभ्यभाषत ।
एकं पतिं गुणोपेतं त्वत्तोऽर्हामीति शङ्कर ॥ १६
तां देवदेवः प्रीतात्मा पुनः प्राह शुभं वचः ॥) १६॥
पञ्चकृत्वस्त्वया प्रोक्तः पतिं देहीत्यहं शुभे ।
देहमन्यं गतायास्ते यथोक्तं वै भविष्यति ॥ १७॥
सैव नालायनी भूत्वा रूपेणाप्रतिमा भुवि ।
सौद्गल्यं पतिमासाद्य शिवाद्वरमवाप्य च ॥ १८॥
द्रुपदैषा ततो जज्ञे सुता ते देवरूपिणी ।
पञ्चानां विहिता कृष्णा पुरा पार्षत्यनिन्दिता ॥ १९॥

---

* अ-क-ख-ग-कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते ।
† (———) अस्थपादोनश्लोकद्वयम् अ-क-ख-ग-घ-कोशेषु नास्ति ।

स्वर्गाच्छ्रीः पाण्डवार्थाय समुत्पन्ना तपोवने ।
सैतत् तप्त्वा तपो घोरं दुहितृत्वं गता तव । २०॥

[1]सैषा देवी रुचिरा देवजुष्टा
पञ्चानामेका स्वकृतेनैव कर्मणा ।

---

1. क-ग-घ—शृणु गुह्यं महीपाल वदतस्सावधानतः ।
संश्रद्धत्स्व वचो मह्यं ततः पश्यसि पाण्डवान् ॥ १
हत्वा वृत्रं सुरपतिस् त्वाष्ट्रं स्वर्गात् सह च्युतः ।
ब्रह्महत्यामवाप्याथ धर्मादिरहितस्तदा ॥ २
ऐन्द्रो धर्मो यममगाद् बलं वायुमथाविशत् ।
वीर्यं वरं ज्ञानरूपे नासत्यावभिजग्मतुः ॥ ३
ह्रीश्च लक्ष्मीश्च कीर्तिश्च सन्ननतिर्मतिरेव च ।
एता विनिर्गता इन्द्राद् वाग्देवीं तास्समाश्रिताः ॥ ४
पूर्वेन्द्रवरदानाच्च महेशस्याज्ञया नृप ।
धर्मादीन् पाण्डवान् विद्धि ह्रियाद्या द्रौपदीं तथा ॥ ५
तदिमे पाण्डवा राजन्निन्द्र एको न संशयः ।
एकैव द्रौपदी राजन् पौलोमी ते न संशयः ॥ ६
शृणु गुह्यतमं चान्यद् रहस्यं देवनिर्मितम् ।
यच्छ्रुत्वा संशयस्तेऽद्य शतधा विफलिष्यति ॥ ७
सद्योजातमुखादीनि मुखानि च महेशितुः ।
पाण्डवाः पञ्च यानि स्युः पार्वती द्रौपदी स्त्रियम् ॥ ८
इदमन्यद्रहस्यं ते देवगुह्यं सनातनम् ।
भवतः प्रत्ययार्थं च निस्संशयकरं महत् ॥ ९
चत्वारश्च भुजा विष्णोश्शङ्खचक्रादिलाञ्छिताः ।
धर्मराजश्च भीमश्च यमौ च नृपसत्तम ॥ १०
अर्जुनस्तु स्वयं विष्णुः पाञ्चाली कमला सती ।
चतस्रो मूर्तयो विष्णोः स्वयं विष्णुश्च सिन्धुजा ॥ ११
चतुरः पाण्डवाञ्छ्रिष्णुं कृष्णां विद्धि महीं वर ।
चतुर्मूर्तिश्चतुर्व्यूहो वासुदेवादिभिस्सह ॥ १२

सृष्टा पूर्वं देवपत्नी स्वयंभुवा
श्रुत्वा राजन् द्रुपदेष्टं कुरुष्व* ॥ २१॥

द्रुपदः—

श्रुत्वैवैवं वचनं ते महर्षे
मया पूर्वं विदितं वर्जनीयम् ।
न हि शक्यं विहिताच्चापयातुं
तदेवेदमुपपन्नं विधानम् ॥ २२॥

दिष्टस्य ग्रन्थिरनिवर्तनीयस्
स्वकर्मणा विहितं तेन किञ्चित् ।
कृतं निमित्तं हि वरैकहेतोस्
तदेवेदमुपपन्नं बहूनाम् ॥ २३॥

यथैव कृष्णोक्तवती पुरस्ता-
न्नैकान् पतीन् मे भगवान् ददातु ।
स चाप्येतद्वरमित्यब्रवीत्तदा
देवो हि वेद परमं यदत्र ॥ २४॥

पूर्वतोऽनुवृत्तम्—

अवतीर्णो महीं विष्णुः पाञ्चाली कमला स्वयम् ।
पञ्चायतनसंज्ञं च पञ्चमूर्तिस्सदाशिवः ॥ १३
निवृत्त्यादिकलाः पञ्च पाञ्चालीं विद्धि भूमिप ।
तस्मात्ते संशयो मा भूत् पाण्डवेभ्यः प्रदीयताम् ॥ १४
कृष्णा तव सुता राजन् पञ्चभिः पूर्वसंभवा ।
पञ्चाग्नयः पाण्डवास्स्युः स्वाहा कृष्णा प्रकीर्तिता ॥ १५
[अधिकः पाठः]

* अ-क-ख-ग—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते ।

यदि त्वयं विहितश्शङ्करेण
धर्मोऽधर्मो वा नात्र ममापराधः ।
गृह्णन्त्विमे पाण्डवाः पाणिमस्या
यथाजोषं विहितैषां हि कृष्णा ॥ २५॥

वैशम्पायनः—

तत आजग्मतुस्तत्र तौ कृष्णद्रुपदावुभौ ।
कुन्ती सपुत्रा यत्रास्ते धृष्टद्युम्नश्च पार्षतः ॥ २६॥
ततो द्वैपायनः कृष्णो युधिष्ठिरमथाब्रवीत् ॥ २७

व्यासः—

अद्य पुण्यमहश्चन्द्रो रोहिण्या च समेष्यति ।
क्रमेण पुरुषव्याघ्र पाणिं गृह्णन्तु पाण्डवाः ॥ २८
द्रौपद्या धर्मतस्सर्वे दृष्टमेतत् पुराऽनघ ॥ २८॥

वैशम्पायनः—

ततो राजा यज्ञसेनस्सपुत्रो
जन्यार्थयुक्तं बहु तत्तदाऽऽद्यम् ।
सम्भावयामास सुतां च कृष्णाम्
आप्लाव्य रत्नैर्बहुभिर्विभूष्य ॥ २९॥
ततस्सर्वे सुहृदस्तत्र तस्य
समाजग्मुस्सचिवा मन्त्रिणश्च ।

द्रष्टुं विवाहं परमप्रतीता
द्विजाश्च पौराश्च यथाप्रधानाः ॥ ३०॥
तत्तस्य वेश्मार्थिजनोपशोभितं
विकीर्णपद्मोत्पलशोभिताङ्गिकम् ।
बभूव रत्नौघविचित्रमाबभौ
दिवं यथा निर्मलतारकाचितम् ॥ ३१॥
ततस्तु ते कौरवराजपुत्रा
विभूषिताः कुण्डलिनस्सुवेषाः ।
महार्हवस्त्रा वरचन्दनोक्षिताः
कृताभिषेका कृतकौतुकक्रियाः ॥ ३२॥
पुरोहितेनाग्निसमेन तेजसा
सहैव धौम्येन तथा यथाविधि ।
क्रमेण सर्वे विविशुश्च तत्सदो
महर्षभा गोष्ठमिवाभिनन्दिनः ॥ ३३॥
ततस्समाधाय स वेदपारगो
जुहाव मन्त्रैर्ज्वलितं हुताशनम् ।
युधिष्ठिरं चाप्युपनीय मन्त्रवि-
न्नियोजयामास सहैव कृष्णया ॥ ३४॥
प्रदक्षिणं तौ परिगृह्य पाणिना
समानयामास स वेदपारगः ।

विप्रांस्तु संतर्प्य युधिष्ठिरोऽन्नैर्
गोभिश्च रत्नैर्विविधैश्च पूर्वम् ॥ ३५॥
जग्राह पाणिं नरदेव जायया
धौम्येन मन्त्रैर्विधिवद्धुतेऽग्नौ ।
ततोऽन्तरिक्षात् कुसुमानि पेतुर्
ववौ च वायुस्सुमनोज्ञगन्धः ॥ ३६॥
ततोऽभ्यनुज्ञाय तमाजिशोभनं
पुरोहितो राजगृहाद्विनिर्ययौ ।
क्रमेण चानेन नराधिपात्मजा
वरस्त्रियास्ते जगृहुः करं तदा ॥ ३७॥
अहन्यहन्युत्तमरूपधारिणो
महारथाः कौरववंशवर्धनाः ।
इदं च तत्राद्भुतरूपमुत्तमं
दधार कृष्णा वपुषाऽतिमानुषम् ॥ ३८॥
महानुभावा किल सा सुमध्यमा
बभूव कन्येव गते गतेऽहनि ।
कृते विवाहे द्रुपदो धनं ददौ
महारथेभ्यो बहुरूपमुत्तमम् ॥ ३९॥
शतं रथानां वरहेमभूषितं
चतुर्युजां हेमविचित्रमालिनाम् ।

शतं गजानामपि पद्मजानां
तथा गिरीणामिव हेमशृङ्गिणाम् ॥ ४०॥

शतं दशाश्वान् मणिहेमभूषणान्
मनोजवान् द्वादशवार्षिकान् यथा ।
तथैव दासीशतमप्ययौवनं
महार्हवेषाभरणाम्बरस्रजम् ॥ ४१॥

हैमानि शय्यासनभाजनानि
द्रव्याणि चान्यानि महासनानि ।
पृथक्पृथक्चैव दशायुतानि
धनं ददौ सौमकिरग्निसाक्षिकम् ॥ ४२॥

तथैव वस्त्राणि विभूषणानि
प्रभावयुक्तानि महाधनानि ॥ ४३

कृते विवाहे च ततस्तु पाण्डवाः
प्रभूतरत्नामुपलभ्य तां श्रियम् ।
विजह्रुरिन्द्रप्रतिमा महाबलाः
पुरे तु पाञ्चालनृपस्य तस्य ह ॥ ४४

सर्वैऽपि तुष्यन्नृप पाण्डवेयास्
तस्याऽशुभैश्शीलसमाधिवृत्तैः ।

सा चाप्येषा याज्ञसेनी तदानीं
विवर्धयामास मुदं स्वसुव्रतैः ॥ ४५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि एकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥
॥ १३ ॥ वैवाहिकपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
[अस्मिन्नध्याये ४५ श्लोकाः]

॥ द्विनवत्यधिकशततमोऽध्यायः ॥

द्रौपदीं प्रति कुन्त्या आशीर्वादः ॥ १ ॥ श्रीकृष्णप्रेषितालंकारादीनां पाण्डवैः स्वीकारः ॥ २ ॥

वैशम्पायनः—

एवं विवाहं कृत्वा ते वीरा द्रुपदवेश्मनि ।
ऊषुस्सर्वे यथा पुण्यं कृतवन्तोऽन्तरिक्षगाः ॥ १

पाण्डवैस्सह संयोगं गतस्य द्रुपदस्य तु ।
न बभूव भयं किंचिद् देवेभ्योऽपि कथञ्चन ॥ २

कुन्तीमासाद्य ता नार्यो द्रुपदस्य महात्मनः ।
पादौ ववन्दिरे हृष्टाश् शिरोभिर्नाम कीर्तयन् ॥ ३

द्रौपदी क्षौमसंवीता कृतकौतुकमङ्गला ।
अभिवाद्य तदा श्वश्रूं तस्थौ प्रह्वा कृताञ्जलिः ॥ ४

रूपयौवनसंपन्नां शीलाचारसमन्विताम् ।
द्रौपदीमवदत् प्रेम्णा पृथाऽऽशीर्वचनं स्नुषाम् ॥ ५

कुन्ती—

यथेन्द्राणी हरिहये स्वाहा चैव विभावसौ ।
रोहिणी च यथा सोमे दमयन्ती यथा नले ॥ ६

यथा वैश्रवणे भद्रा वसिष्ठे चाप्यरुन्धती ।
[1]यथा नारायणे लक्ष्मीस् तथा त्वं भव भर्तृषु ॥ ७

जीवसूर्वीरसूर्भद्रे बहुपुत्रसमन्विता ।
सुभगा भोगसंपन्ना यज्ञपत्नी भवानघे ॥ ८

अतिथीनागतान् साधून् वृद्धान् बालांस्तथा गुरून् ।
पूजयन्त्या यथान्यायं शश्वद्गच्छन्तु ते समाः ॥ ९

कुरुजाङ्गलमुख्येषु राष्ट्रेषु नगरेषु च ।
अनु त्वमभिषिञ्चस्व नृपतीन् धर्मवत्सलान् ॥ १०

पतिभिर्निर्जितामुर्वीं विक्रमेण महाबलैः ॥
कुरु ब्राह्मणसात् सर्वाम् अश्वमेधे महाक्रतौ ॥ ११

पृथिव्यां यानि रत्नानि गुणवन्ति गुणान्विते ।

---

1. क-ग-घ—लोपामुद्रा यथाऽगस्त्ये यथा रामे च जानकी ।
यथा नारायणे लक्ष्मीर् वाग्देवी चतुरानने ॥
गिरिजा गिरिशे यद्वद् उषा भानौ यथा स्थिरा ।
स्थिरा च वल्लभा च त्वं सुप्रीता भव भर्तृषु ॥
[अधिकः पाठः]

तान्याप्नुहि त्वं कल्याणि सुखिनी शरदां शतम् ॥ १२
यथा च त्वाऽभिनन्दामि वध्वद्य क्षौमसंवृताम् ।
तथा भूयोऽपि नन्दिष्ये सूतान् पुत्रान् गुणान्वितान् ॥ १३

वैशम्पायनः —

[1]प्राहिणोद्वासुदेवश्च पाण्डवेभ्यो रिपुञ्जयः ।
मुक्तावैडूर्यचित्राणि हैमान्याभरणानि च ॥ १४
वासांसि च महार्हाणि नानादेश्यानि माधवः ।
कम्बलाजिनरत्नानि स्पर्शवन्ति शुभानि च ॥ १५
शयनासनयानानि विविधानि महान्ति च ।
वैडूर्यरत्नचित्राणि शतशो भाजनानि च ॥ १६
रूपयौवनदाक्षिण्यैर् उपेताश्च स्वलङ्कृताः ।
[2]प्रेष्यास्सम्प्रददौ कृष्णो नानादेश्यास्सहस्रशः ॥ १७
गजान् विनीतान् भद्रांश्च सदश्वांश्च स्वलङ्कृतान् ।

---

1. घ—गत्वाऽथ यादवश्रेष्ठः पुरीं द्वारवतीं हरिः । [अधिकः पाठः]
2. क-ग-घ—राकाशशाङ्कवदनाः पद्मिनीजातिसंभवाः ।
पद्मगन्धाः पद्मवक्त्राः पद्मपत्रनिभेक्षणाः ॥
मुक्तायुक्तसुवर्णाश्च सप्तविन्दुललाटिकाः ।
पीवरस्तनभारार्ताश् शङ्खकण्ठ्यस्सुनासिकाः ॥
कृष्णदीर्घसुकेशिन्यो मुष्टिग्राह्यसुमध्यमाः ।
भृङ्गालिरोमतिलका ह्यावर्तनिभनाभिकाः ।
विपुलश्रोणिफलका रम्भास्तम्भोरुयुग्मकाः ॥
[अधिकः पाठः]

रथांश्च दान्तान् सौवर्णान् शुभ्रैः पत्त्रैरलङ्कृतान् ॥ १८

कोटिशश्च सुवर्णानां तथैव कृतकं बहु ।
कृताकृतमभेयात्मा प्राहिणोन्मधुसूदनः ॥ १९

तत्सर्वं प्रतिजग्राह धर्मराजो युधिष्ठिरः ।
अर्चयिष्यन् हृषीकेशं गोविन्दप्रियकाम्यया* ॥ २०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि द्विनवत्यधिकशततमोऽध्यायः ॥ १९२ ॥
॥ १३ ॥ वैवाहिकपर्वणि षष्ठोऽध्यायः ॥ ६ ॥
[अस्मिन्नध्याये २० श्लोकाः]
[वैवाहिकपर्व समाप्तम् ॥]

॥ त्रिनवत्यधिकशततमोऽध्यायः ॥

(अथ विदुरागमनपर्व)

चारद्वारा पाण्डवविवाहादिवृत्तान्तश्रवणेन अन्यैः राजभिः भीष्म-धृतराष्ट्रादीनां धिक्कारः ॥१॥ धार्तराष्ट्रैः पाण्डवान्प्रति मन्त्रालोचनम् ॥२॥ पाण्डवा हन्तव्या इति शकुनेरुक्तिः ॥ ३ ॥ पाण्डवानां हन्तुमशक्यत्वात् तैस्सह सन्धिः कर्तव्य इति सोमदत्तेरुक्तिः ॥ ४ ॥

वैशम्पायनः—

ततो राज्ञां चरैराप्तैश् चारस्समुपनीयते ।
पाण्डवैरुपसंपन्ना द्रौपदी बहुभिस्त्विति ॥ १

---

* अ—कोशे नाध्यायसमाप्तिर्दृश्यते ।

येन तद्धनुरानम्य लक्ष्यं विद्धं महात्मना ।
सोऽर्जुनो जयतां श्रेष्ठो महाबाहुर्धनुर्धरः ॥ २

यश्शल्यं मद्रराजानम् उत्क्षिप्य न्यहनद्बली ।
त्रासयंश्चापि सङ्क्रुद्धो वृक्षेण पुरुषान् रणे ॥ ३

न चास्य संभ्रमः कश्चिद् आसीत्तत्र महात्मनः ।
स भीमो भीमसन्नादश् शत्रुसैन्याङ्गमर्दनः ॥ ४

योऽसौ वीरतमोऽधावद् युद्धे दुर्योधनं तदा ।
स राजा पाण्डवश्रेष्ठश् श्रेष्ठवाग्बुद्धिवर्धनः ॥ ५

दुर्योधनस्यावरजैर् यौ युध्येतां प्रतीतवत् ।
तौ यमौ वृत्तसम्पन्नौ सम्पन्नबलविक्रमौ ॥ ६
चारैः प्रणिहितैर्बुध्वा राजानो विगतज्वराः ॥ ६॥

ब्रह्मरूपधरान् बुध्वा तत्र तानृषभेक्षणान् ।
पाण्डवान् मनुजेन्द्रास्ते समपद्यन्त विस्मिताः ॥ ७॥

सा सपुत्रा तदा कुन्ती दग्धा जतुगृहे श्रुता ।
सर्वभूमिपतीनां च राष्ट्राणां च यशस्विनी ॥ ८॥
पुनर्जातानिति स्मैतान् मन्यन्ते सर्वपार्थिवाः ॥ ९

व्यनिन्दंश्च तथा भीष्मं धृतराष्ट्रं च कौरवम् ।
कर्मणा सुनृशंसेन पुरोचनकृतेन वै ॥ १०
धार्मिकान् वृत्तसंपन्नान् मातुः प्रियहिते रतान् ।

यदा तानीदृशान् पार्थान् उत्सादयितुमिच्छति ॥ ११

ततस्स्वयंवरे वृत्ते धार्तराष्ट्रास्स्म भारत ।
मन्त्रयन्ते ततस्सर्वे कर्णसौबलदूषिताः ॥ १२

शकुनिः—

कश्चिच्छत्रुः कर्शनीयः पीडनीयस्तथाऽपरः ।
उत्सादनीयाः कौन्तेयास् सर्वे क्षत्तस्य मे मताः ॥ १३

एवं पराजितास्सर्वे यदि यूयं गमिष्यथ ।
अकृत्वा संविदं कां चित् तद्वत्तप्स्यन्त्यसंशयम् ॥ १४

अयं देशश्च कालश्च पाण्डवोद्धरणाय नः ।
न चेदेवं करिष्यध्वं लोके हास्या भविष्यथ ॥ १५

यमेते संश्रिता वस्तुं कामयन्ते च भूमिपम् ।
सोऽल्पवीर्यबलो राजा द्रुपदो वै मतो मम ॥ १६

यावदेतान्न जानन्ति जीवतो वृष्णिपुङ्गवाः ।
चैद्यश्च पुरुषव्याघ्रश् शिशुपालः प्रतापवान् ॥ १७

एकीभावं गता राज्ञा द्रुपदेन महात्मना ।
दुराधर्षतरा राजन् भविष्यन्ति न संशयः ॥ १८

यावदत्वरतां सर्वे प्राप्नुवन्ति नराधिपाः ।
तावदेव व्यवस्यामः पाण्डवानां वधं प्रति ॥ १९

मुक्ता जतुगृहाद्भीमाद् आशीविषमुखादिव ।

पुनर्यदीह मुच्यन्ते महन्नो भयमाविशेत् ॥ २०

तेषामिहोपयातानाम् एषां च पुरवासिनाम् ।
अन्तरे दुष्करं स्थातुं मेषयोर्महतोरिव ॥ २१

हलधृक्प्रगृहीतानि बलानि बलिनां स्वयं ।
यावन्नः कुरुसेनायां पतन्ति पतगा इव ॥ २२

तावत्सर्वाभिसारेण पुरमेतद्विनाश्यताम् ।
एतदत्र परं मन्ये प्राप्तकालं नरर्षभाः ॥ २३

वैशम्पायनः—
शकुनेर्वचनं श्रुत्वा भाषमाणस्य दुर्मतेः ।
सौमदत्तिरिदं वाक्यं जगाद परमं ततः ॥ २४

सौमदत्तिः—
प्रकृतीस्सप्त वै ज्ञात्वा आत्मनश्च परस्य च ।
तथा देशं च कालं च षड्विधांश्च नयेद्गुणान् ॥ २५

स्थानं वृद्धिं क्षयं चैव भूमिं मित्राणि विक्रमम् ।
समीक्ष्याथाभियुञ्जीत परं व्यसनपीडितम् ॥ २६

ततोऽहं पाण्डवान् मन्ये मित्रकोशसमन्वितान् ।
बलस्थान् विक्रमस्थांश्च स्वकृतैः प्रकृतिप्रियान् ॥ २७

वपुषा हि तु भूतानां नेत्राणि हृदयानि च ।
श्रोत्रं मधुरया वाचा रमयत्यर्जुनो नृणाम् ॥ २८

न तु केवलदैवेन प्रजा भावेन भेजिरे ॥ २८॥

यद्बभूव मनःकान्तं कर्मणा च चकार तत् ॥ २९
न ह्ययुक्तं न चासक्तं नानृतं न च विप्रियम् ।
भाषितं चारुभाषस्य जज्ञे पार्थस्य भारती ॥ ३०
तानेवं गुणसम्पन्नान् सम्पन्नान् राजलक्षणैः ।
न तान् पश्यामि ये शक्तास् समुच्छेत्तुं यथा बलात् ॥ ३१
प्रभावशक्तिर्विपुला मन्त्रशक्तिश्च पुष्कला ।
तथैवोत्साहशक्तिश्च पार्थेष्वभ्यधिका सदा ॥ ३२
मौलमित्रबलानां च कालज्ञो वै युधिष्ठिरः ॥ ३२॥
साम्ना दानेन भेदेन दण्डेनेति युधिष्ठिरः ।
अमित्रं यतते जेतुं न रोषेणेति मे मतिः ॥ ३३॥
परिक्रीय धनैश्शत्रून् मित्राणि च बलानि च ।
मूलं च सुदृढं कृत्वा हन्त्यरीन् पाण्डवस्तदा ॥ ३४॥
अशक्यान् पाण्डवान् मन्ये देवैरपि सवासवैः ।
येषामर्थे सदा युक्तौ कृष्णसंकर्षणावुभौ ॥ ३५॥
श्रेयश्च यदि मन्यध्वं मन्मतं यदि वो मतम् ।
संविदं पाण्डवैस्साधं कृत्वा याम यथागतम् ॥ ३६॥
गोपुराट्टालकैरुच्चैर् उपतल्पशतैरपि ।
गुप्तं पुरवरश्रेष्ठम् एतदद्भिश्च संवृतम् ॥ ३७॥
तृणधान्येन्धनरसैस् तथा यन्त्रायुधौषधैः ।

युक्तं बहुकवाटैश्च द्रव्यागारतुषादिकैः ॥ ३८॥

भीमोच्छ्रितमहाचक्रं बृहदट्टालसंवृतम् ।
दृढप्राकारनिर्यूहं शतघ्नीजालसंवृतम् ॥ ३९॥

ऐष्टको दारवो वप्रो मानुषश्चेति यस्स्मृतः ।
प्राकारकर्तृभिर्वीरैर् नृगर्भस्तत्र पूजितः ॥ ४०॥

तदेतन्नरगर्भेण पाण्डरेण विराजते ।
सालेनानेकतालेन सर्वतस्संवृतं पुरम् ॥ ४१॥

अनुरक्ताः प्रकृतयो द्रुपदस्य महात्मनः ।
दानमानार्चितास्सर्वे बाह्याश्चाभ्यन्तराश्च ये ॥ ४२॥

प्रतिरुद्धानिमाञ्ज्ञात्वा राजभिर्भीमविक्रमैः ।
उपयास्यन्ति दाशार्हास् समुदग्रोच्छ्रितायुधाः ॥ ४३॥

तस्मात् सन्धिं वयं कृत्वा धार्तराष्ट्रस्य पाण्डवैः ।
स्वराष्ट्रमेव गच्छामो यद्यान्न वचनं मम ॥ ४४॥

एतन्मम मतं सर्वैः क्रियतां यदि रोचते ।
एतद्धि सुकृतं मन्ये क्षेमं चापि महीक्षिताम् । ४५॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्याम्
आदिपर्वणि त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥
॥ १४ ॥ विदुरागमनपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[अस्मिन्नध्याये ४५॥ श्लोकाः]

॥ चतुर्नवत्यधिकशततमोऽध्यायः ॥

पाण्डवा हन्तव्या एवेति कर्णस्योक्तिः ॥ १ ॥ पाञ्चालनगरं प्रति युद्धार्थं दुर्योधनादीनां गमनम् ॥ २ ॥ अर्जुनेन कर्णत्रयद्रथपुत्रयोर्वधः ॥ ३ ॥ कर्णदुर्योधनादीनां पराजयः ॥ ४ ॥ पराजितानां तेषां हास्तिनपुरगमनम् ॥ ५ ॥ कृष्णबलरामयोः पाञ्चालपुरे वासः ॥ ६ ॥

वैशम्पायनः—

सौमदत्तेर्वचश्श्रुत्वा कर्णो वैकर्तनो वृषा ।
उवाच वचनं काले कालज्ञस्सर्वकर्मणाम् ॥ १

कर्णः—

नीतिपूर्वमिदं सर्वम् उक्तं वचनमर्थवत् ।
वचनं नाभ्यसूयामि श्रूयतां मद्वचस्स्थितिः ॥ २

द्वैधीभावो न गन्तव्यस् सर्वकर्मसु मानवैः ।
द्विधाभूतेन मनसा ह्यन्यत् कर्म न सिध्यति ॥ ३

संप्रयाणासनाभ्यां तु कर्शनेन तथैव च ।
नैतच्छक्यं पुरं हन्तुम् आक्रन्दोऽस्यामशोभनः ॥ ४

अवमर्दनकालोऽत्र मतश्चिन्तयतो मम ।
यावन्नो वृष्णयः पार्ष्णिं न गृह्णन्ति रणप्रियाः ॥ ५

प्रभवन्तो हृष्टतुष्टास् स्वबाहुबलशालिनः ।
प्राकारमवमृद्नन्तु परिघाः पूरयन्त्वपि ॥ ६

प्रस्रावयन्तु सलिलं क्रियतां विषमं समम् ।
तृणकाष्ठेन महता खातमस्य प्रपूर्यताम् ॥ ७

घुष्यतां राजसैन्येषु परेषां यो हनिष्यति ।
नागमश्वं पदातिं वा दानमानं स लप्स्यते ॥ ८

नागे दशसहस्राणि पञ्च चाश्वपदातिषु ।
रथे वै द्विगुणं नागाद् वसु दास्यन्ति पार्थिवाः ॥ ९

यश्च कामसुखे सक्तो बालश्च स्थविरश्च यः ।
अयुद्धमनसो ये च ते तु तिष्ठन्तु भीरवः ॥ १०

प्रदरश्च न दातव्यो न गन्तव्यमचोदितैः ।
यशो रक्षत भद्रं वो जेष्यामो वै वयं पुरम् ॥ ११

अनुलोमाश्च नो वातास् सर्वतो मृगपक्षिणः ।
अग्नयश्च विराजन्ते शस्त्राणि कवचानि च ॥ १२

वैशम्पायनः—

ततः कर्णवचश्श्रुत्वा धार्तराष्ट्रप्रियैषिणः ।
निर्ययुः पृथिवीपालाश् चालयन्तः परान् रणे ॥ १३

न हि तेषां मनस्सक्तिर् इन्द्रियार्थेषु सर्वशः ।
यथा पुनररिघ्नानां प्रसहो युद्ध एव च ॥ १४

वैकर्तनपुरोवातस् सैन्धवोर्मिमहास्वनः ।
दुश्शासनमहामत्स्यो दुर्योधनमहाग्रहः ॥ १५

स राजसागरो भीमो भीमघोषप्रदर्शनः ।
अभिदुद्राव वेगेन पुरं तदपसव्यतः ॥ १६

तदनीकमनाधृष्यं शस्त्राग्निव्यालदीपितम् ।
[1]समुत्कुपितमाज्ञाय चुक्रुधुर्द्रुपदात्मजाः ॥ १७

ते मेघसमनिर्घोषैर् बलिनस्स्यन्दनोत्तमैः ।
निर्ययुर्नगरद्वारात् त्रासयन्तः परान् रणे ॥ १८

धृष्टद्युम्नश्शिखण्डी च सुमित्रः प्रियदर्शनः ।
चित्रकेतुस्सुकेतुश्च ध्वजसेनश्च वीर्यवान् ॥ १९

पुत्रा द्रुपदराजस्य बलवन्तो जयैषिणः ।
द्रुपदश्च महावीर्यः पाण्डरोष्णीषकेतनः ॥ २०

पाण्डरव्यजनच्छत्रः पाण्डरध्वजवाहनः ।
स पुत्रगणमध्यस्थश् शुशुभे राजसत्तमः ॥ २१

चन्द्रमा ज्योतिषां मध्ये पौर्णमास्यामिवोदितः ॥ २१॥

अथोद्धूतपताकाग्रम् अजिह्मगतिमव्ययम् ।
द्रुपदानीकमायान्तं कुरुसैन्यमभिद्रवत् ॥ २२॥

तयोरुभयतो जज्ञे भैरवस्तुमुलस्स्वनः ।
बलयोस्संप्रहरतोस् स्रवन्त्योस्सरितोरिव ॥ २३॥

---

1. क-ख—समुत्कूलितमाज्ञाय चुक्रुशुः
घ—समुत्कम्पितमाज्ञाय चुक्रुशुः

प्रकीर्णरथनागाश्वैस् तान्यनीकानि सर्वशः ।
ज्योतींषि विप्रकीर्णानि सर्वतः प्रचकाशिरे ॥ २४॥

उत्कृष्टभेरीनिनदे संप्रवृत्ते [1]महाहवे ।
अमर्षिता महात्मानः पाण्डवा निर्ययुस्ततः ॥ २५॥

रथांश्च मेघनिर्घोषान् युक्तान् परमवाजिभिः ।
धन्विनो ध्वजिनश्शुभ्रान् आस्थाय भरतर्षभाः ॥ २६॥

ततः पाण्डुसुतान् दृष्ट्वा रथस्थानात्तकार्मुकान् ।
नृपाणामभवत् कम्पो वेपथुर्हृदयेषु च ॥ २७॥

निर्यातेष्वथ पार्थेषु द्रौपदं तद्बलं रणे ।
आविशत् परमो हर्षः प्रमोदश्च जयं प्रति ॥ २८॥

स मुहूर्तं व्यतिकरस् सैन्यानामभवद्भृशम् ।
ततो द्वन्द्वमयुध्यन्त मृत्युं कृत्वा निवर्तनम् ॥ २९॥

जघ्नतुस्समरे तस्मिन् सुमित्रप्रियदर्शनौ ।
जयद्रथश्च कर्णश्च पश्यतस्सव्यसाचिनः ॥ ३०॥

अर्जुनः प्रेक्ष्य निहतौ सुमित्रप्रियदर्शनौ ।
जयद्रथसुतं तत्र जघान पितुरन्तिके ॥ ३१॥

वृषसेनादवरजं सुबाहुं वै धनञ्जयः ।
कर्णपुत्रं महावीर्यं रथनीडादपाहरत् ॥ ३२॥

---

1. अ—दिवाकरे; ख—महारवे

तौ सुतौ निहतौ दृष्ट्वा राजसिंहौ तरस्विनौ ।
नामृष्येतां महावीर्यौ प्रहारमिव सद्गजौ ॥ ३३॥

तौ जग्मतुरसम्भ्रान्तौ फल्गुनस्य रथं प्रति ।
प्रतिमुक्ततलत्राणौ त्रायमाणौ परस्परम् ॥ ३४॥

सन्निपातस्तयोरासीत् फल्गुनेन महामृधे ।
वृत्रशम्बरयोस्सङ्ख्ये वज्रिणेव महारणे ॥ ३५॥

त्रीनश्वाञ्जघ्नतुस्तत्र फल्गुनस्य नरर्षभौ ।
ततः किलिकिलाशब्दः कुरूणामभवत्तदा ॥ ३६॥

तान् हयान्निहतान् दृष्ट्वा भीमसेनः प्रतापवान् ।
निमेषान्तरमात्रेण रथमश्वैरयोजयत् । ३७॥

उपयातं रथं दृष्ट्वा दुर्योधनपुरस्सरौ ।
सौबलस्सौमदत्तिश्च समेयातां परन्तपौ ॥ ३८॥

तैः पञ्चभिरदीनात्मा भीमसेनो महाबलः ।
अयुध्यत बलैर्वीरैर् इन्द्रियार्थैरिवेश्वरः ॥ ३९॥

तैर्निरुद्धो न संत्रासं जगाम समितिञ्जयः ।
पञ्चभिर्द्विरदैर्मत्तैर् निरुद्ध इव केसरी ॥ ४०॥

तस्य ते युगपत् पञ्च पञ्चभिर्निशितैश्शरैः ।
सारथिं वाजिनश्चैव निन्युर्वैवस्वतक्षयम् ॥ ४१॥

हताश्वात् स्यन्दनश्रेष्ठाद् अवरुह्य महारथः ।

चचार विविधान् मार्गान् असिमुद्यम्य पाण्डवः ॥ ४२॥

अश्वस्कन्धेषु चक्रेषु [1]युगेष्वीषासु चैव ह ।
व्यचरत् पातयञ्शत्रून् सुपर्ण इव भोगिनः ॥ ४३॥

विधनुष्कं विकवचं विरथं च समीक्ष्य तम् ।
अभिपेतुर्नरव्याघ्रम् अर्जुनप्रमुखा रथाः ॥ ४४॥

धृष्टद्युम्नशिखण्डी च यमौ च युधि दुर्जयौ ॥ ४५

तस्मिन् [2]दाशरथे युद्धे प्रवृद्धे शरवृष्टिभिः ।
रथा ध्वजाः पताकाश्च सर्वमन्तरधीयत ॥ ४६

तत् प्रवृत्तं चिरं कालं युद्धं सममिवाभवत् ॥ ४६॥

रथेन तान् महाबाहुर् अर्जुनोऽभ्यपतत् पुनः ॥ ४७

तमापतन्तं दृष्ट्वैव महाबाहुर्धनुर्धरः ।
कर्णोऽस्त्रविदुषां श्रेष्ठो वारयामास सायकैः ॥ ४८

स तेनाभिहतः पार्थो वासविर्वज्रसन्निभान् ।
त्रीञ्शरान् सन्दधे क्रुद्धो व्यधात् कर्णस्य पाण्डवः ॥ ४९

तैश्शरैराहतं कर्णं ध्वजयष्टिमुपाश्रितम् ।
अपोवाह रथेनाशु सूतः परपुरञ्जयम् ॥ ५०

ततः पराजिते कर्णे धार्तराष्ट्रं महद्भयम् ।

---

1. क—युगेष्विष्वसनेषु च; ग—युगेष्विष्वासनेषु च
2. क-ग—भग्नरथे

विवेश समुदग्रांश्च पाण्डवान् प्रसमीक्ष्य च ॥ ५१
तत्प्रकम्पितमत्यर्थं दृष्ट्वा वै सौबलो बलम् ।
गिरा गम्भीरया वीरस् समाश्वासयतासकृत् ॥ ५२
धार्तराष्ट्रैस्ततस्सर्वैर् दुर्योधनपुरस्सरैः ।
धृतं तत्पुनरेवासीद् बलं पार्थप्रकम्पितम् ॥ ५३
ततो दुर्योधनं दृष्ट्वा भीमो भीमपराक्रमः ।
अक्रुध्यत्स महाबाहुर् अगारं जातुषं स्मरन् ॥ ५४
[1]ततस्संग्रामशिरसि ददर्श विपुलद्रुमम् ।
आयामभूतं तिष्ठन्तं स्कन्धपञ्चाशदुन्नतम् ॥ ५५
महास्कन्धं महोत्सेधं शक्रध्वजमिवोच्छ्रितम् ।
चित्रमाल्याम्बरधरं पताकाशतशोभितम् ॥ ५६
सालमुत्पाट्य पाणिभ्याम् उद्यम्य च रणे बली ।
अभिपेदे परान् सङ्ख्ये वज्रपाणिरिवासुरान् ॥ ५७
भीमसेनभयार्तानि फल्गुनाभिहतानि च ।
न शेकुस्तान्यनीकानि धार्तराष्ट्रान्निरीक्षितुम् ॥ ५८
तानि संभ्रान्तयोधानि श्रान्तवाजिगजानि च ।
दिशः प्राकालयद्भीमो दिवीवाभ्राणि मारुतः ॥ ५९
तान् निवृत्तान् निरानन्दान् हतवारणवाजिनः ।

1. घ—पञ्चबाहुपरीणाहं पञ्चस्कन्ध[illegible]ासुरान् । [अधिकः पाठः]

नानुसस्मुर्न चाजघ्नुर् नोचुः किञ्चिच्च दारुणम् ॥ ६०
स्वमेव शिबिरं जग्मुः क्षत्रियाश्शरविक्षताः ॥ ६०॥
परेऽप्यभिययुर्हृष्टाः पुरं पौरसुखावहाः ॥ ६१
मुहूर्तमभवद्वैरं तेषां वै पाण्डवैस्सह ॥ ६१॥
यावत्तद्युद्धमभवन्महद्देवासुरोपमम् ।
तावदेवाभवच्छान्तं निवृत्ता वै महारथाः ॥ ६२॥
सुवृत्तं चक्रिरे सर्वे सुप्राप्तामब्रुवन वधूम् ।
कृतार्थं द्रुपदं चोचुर् धृष्टद्युम्नं च पार्षतम् ॥ ६३॥
शकुनिस्सिन्धुराजश्च कर्णदुर्योधनावपि ।
तेषां तदभवद्दुःखं हृदि वाचा तु नाब्रुवन् ॥ ६४॥
ततः प्रयाता राजानस् सर्व एव यथागतम् ।
धार्तराष्ट्रा हि ते सर्वे गता नागपुरं तदा ॥ ६५॥
प्रागेव पुररोधात्तु पाण्डवैरश्वसादिनः ।
प्रेषिता गच्छतारिष्टान् अस्मानाख्यात शौरये ॥ ६६॥
ते त्वदीर्घेण कालेन गत्वा द्वारवतीं पुरीम् ।
ऊचुस्संकर्षणोपेन्द्रौ वचनं वचनक्षमौ ॥ ६७॥
कुशलं पाण्डवास्सर्वान् आहुस्स्मान्धकवृष्णयः ।
आत्मनश्चाक्षतानाहुर् विमुक्ताञ्जातुषाद् गृहात् ॥ ६८॥
समाजे द्रौपदीं स्माहुर् लब्धां राजीवलोचनाम् ।

आत्मनस्सदृशीं सर्वे शीलवृत्तसमाधिभिः ॥ ६९॥

तच्छ्रुत्वा वचनं कृष्णस् तानुवाचोत्तरं वचः ॥ ७०

सर्वमेतदहं जाने वधात्तस्य तु रक्षसः ॥ ७०॥

तत उद्योजयामास केशवश्चतुरङ्गिणीम् ।
सेना समुपयान्तूर्णं पाञ्चालनगरीं प्रति ॥ ७१॥

ततस्संकर्षणश्चैव केशवश्च महाबलः ।
यादवैस्सह सर्वैश्च पाण्डवानभिजग्मतुः ॥ ७२॥

पितृष्वसारं संपूज्य द्रुपदं च यथाविधि ।
द्रौपदीं भूषणैश्शुभ्रैर् भूषयित्वा महाधनैः ॥ ७३॥

न्यायतः पूजिता राज्ञा द्रुपदेन महात्मना ।
रेमिरे पाण्डवैस्सार्धं ते पाञ्चालपुरे तदा ॥ ७४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि चतुर्नवत्यधिकशततमोऽध्यायः ॥ १९४ ॥

॥ १४ ॥ विदुरागमनपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

[अस्मिन्नध्याये ७४॥ श्लोकाः]

॥ पञ्चनवत्यधिकशततमोऽध्यायः ॥

विदुरात् ज्ञातपाण्डववृत्तान्तेन धृतराष्ट्रेण द्रौपद्यानयनार्थमाज्ञापनम् ॥ १ ॥ धृतराष्ट्रसमीपे कर्णदुर्योधनयोर्भाषणम् ॥ २ ॥ धृतराष्ट्रदुर्योधनसंवादः ॥ ३ ॥ दुर्योधनं प्रति कर्णेनोक्तं श्रुतवतो धृतराष्ट्रस्य भीष्मादिभिः सह मन्त्रणम् ॥ ४ ॥ भीष्मेण दुर्योधनादिसमीपे पाण्डवेभ्योऽर्धराज्यं दातव्यमिति स्वाभिप्रायकथनम् ॥ ५ ॥

वैशम्पायनः—

ततस्स्वयंवरे वृत्ते राजानस्सर्व एव ते ।
यथागतं विप्रजग्मुर् विदित्वा पाण्डवान् वृतान् ॥ १

अथ दुर्योधनो राजा विमना भ्रातृभिस्सह ।
अश्वत्थाम्ना मातुलेन कर्णेन च कृपेण च ॥ २

विनिवृत्तो वृतं दृष्ट्वा द्रौपद्या श्वेतवाहनम् । २॥

[1]अथ दुश्शासनं राजा मन्दं मन्दमिवाब्रवीत् ॥ ३

यद्यसौ ब्राह्मणो न स्यान्न च विन्देत द्रौपदीम् ।
न हि तं तत्त्वतो राजा वेद कश्चिद्धनञ्जयम् ॥ ४

धिगस्मत्पौरुषं पञ्च यद्धरन्तीह पाण्डवाः ।
दैवमेव परं मन्ये पौरुषं तु निरर्थकम् ॥ ५

1. क-ग-घ—स्विद्यच्छुष्यन्मुखो राज्ञा दूयमानेन चेतसा।
[अधिकः पाठ]

[1]एवं संभाषमाणास्ते निन्दन्तश्च पुरोचनम् ।
[2]विविशुर्हास्तिनपुरं दीना विगतचेतसः ॥ ६
त्रस्ता विगतसङ्कल्पा दृष्ट्वा पार्थान् महौजसः ।
विमुक्तान् हव्यवाहाच्च संयुक्तान् द्रुपदेन च ॥ ७
धृष्टद्युम्नं च सञ्चिन्त्य तथैव च शिखण्डिनम् ।
द्रुपदस्यात्मजांश्चान्यान् सर्वयुद्धविशारदान् ॥ ८
[3]विदुरस्त्वथ ताञ्श्रुत्वा द्रौपद्या पाण्डवान् वृतान् ।
व्रीडितान् धार्तराष्ट्रांश्च भग्नदर्पानुपागतान् ॥ ९
ततः प्रीतमनाः क्षत्ता धृतराष्ट्रं विशाम्पते ।
उवाच कुरवो दिष्ट्या वर्धन्त इति विस्मितः ॥ १०

---

1. क-ग-घ—बध्वा चक्षूंषि नः पार्था राज्ञां च द्रुपदात्मजाम् ।
उद्वाह्य राज्ञां तैर्न्यस्तं पादं वामं पृथासुतैः ॥
विमुक्ताः कथमेतेन जतुवेश्मविभुंजः ।
अस्माकं पौरुषं सत्वं बुद्धिश्चापि गता कुतः ॥
दैवमेव परं मन्ये पौरुषं तु निरर्थकम् ।
वयं हता मातुलाद्य विश्वस्य च पुरोचनम् ॥
अदग्ध्वा पाण्डवान् दग्ध्वा स्वयं दग्धो हुताशने ।
मत्तो मातुल मन्येऽहं पाण्डवा बुद्धिमत्तराः ।
तेषां नास्ति भयं मृत्योर् मुक्तानां जतुवेश्मनः ॥
[अधिकः पाठः]

2. क-ग-घ—पञ्चपुत्रान् किरातीं च विदुरं च महामतिम् ।
[अधिकः पाठः]

3. क-ग-घ—मुखानि धार्तराष्ट्राणां दृष्ट्वा क्षत्ता मुदान्वितः ।
विकसद्वदनाम्भोजः पद्मं दृष्ट्वेव भास्करम् ॥
[अधिकः पाठः]

[1]वैचित्रवीर्यस्तु तदा निशम्य विदुरस्य तत् ।
अब्रवीत् परमप्रीतो दिष्ट्या दिष्ट्येति कौरवः ॥ ११

मन्यते स वृतं पुत्रं ज्येष्ठं द्रुपदकन्यया ।
दुर्योधनमविज्ञानात् प्रज्ञाचक्षुर्नरेश्वरः ॥ १२

[2]अथ त्वाज्ञापयामास द्रौपद्या भूषणं बहु ।
आनीयतां वै कृष्णेति पुत्रं दुर्योधनं तदा ॥ १३

अथास्य पश्चाद्विदुर आचख्यौ पाण्डवान् वृतान् ।
[3]सर्वान् कुशलिनो राजन् पूजितान् द्रुपदेन च ॥ १४

एतच्छ्रुत्वा तु वचनं विदुरस्य नराधिपः ।
आकारच्छादनार्थं तु दिष्ट्या दिष्ट्येति चाब्रवीत् ॥ १५

---

1. क-ग-घ—सर्वापद्भ्यो विमुक्ताश्च विमुक्ता राजसङ्करात् ।
कृष्णया संवृताश्चैव वीरलक्ष्म्या तथैव च ॥

वैशम्पायनः—

विदुरोक्तं वचश्श्रुत्वा सामान्यात् कौरवा इति ।
उल्ललास स हर्षेण सन्तोषभरितो नृपः ॥
प्रहर्षभरितो राजा स्तम्भीभूत इव क्षणम् ॥[अधिकः पाठः]

2. क-ग-घ—पुत्राणां च तथा सर्वं विचित्राभरणाम्बरम् ।
[अधिकः पाठः]

3. क-ग-घ—पुत्राभिवृद्ध्यसन्तोषश्रवणानन्दनिर्भरम् ।
कौरवा इति सामान्यान्न मन्येथास्तवात्मजान् ॥
वर्धिता इति मद्वाक्याद् वर्धिताः पाण्डुनन्दनाः ।
कृष्णया संवृताः पार्था विमुक्ता राजसङ्करात् ॥
[अधिकः पाठः]

एवं विदुर भद्रं ते यदि जीवन्ति पाण्डवाः ।
[1]साध्वाचारा तथा कुन्ती सम्बन्धो द्रुपदेन च ॥ १६
बभूव परमश्लाघ्यो दिष्ट्या दिष्ट्येति चाब्रवीत् ॥ १६॥

धृतराष्ट्रः—

अन्ववाये वसोर्जातः [2]प्रकृष्टे मान्यके कुले ।
व्रतविद्यातपोवृद्धः पार्थिवानां धुरन्धरः ॥ १७॥

पुत्राश्चास्य तथा पौत्रास् सर्वे सुचरितव्रताः ।
तेषां संबन्धिनश्चान्ये बहवस्सुमहाबलाः ॥ १८॥

यथैव पाण्डोः पुत्रास्ते तथैवाभ्यधिकं मम ।
[3]सेयमभ्याधिकाऽन्येभ्यो वृत्तिर्विदुर मे मता ॥ १९॥

---

1. क-ग-घ—न ममौ मे तनौ प्रीतिस् त्वद्वाक्यामृतसंभवा ।
आलिङ्गस्वेति मां क्षत्तः पुनः पुनरभाषत ॥
दुर्भावगोपनार्थाय बाहू विस्तार्य दूरतः ।
एह्येहि विदुर प्राज्ञ मामालिङ्गितुमर्हसि ॥
इत्युक्त्वाऽऽकृष्य विदुरं ज्ञात्वाऽन्तर्भावमात्मनः ।
आलिलिङ्ग दृढं दोर्भ्यां निरुच्छ्वासं दुरात्मवान् ॥
[अधिकः पाठः]

2. क-ग—प्रवरो मात्स्यके कुले । ख—प्रभवो मान्यके कुले ।
घ—प्रवरे

3. क-ग-घ—या प्रीतिः पाण्डुपुत्रेषु न साऽन्यत्र ममाभि भो ।
नित्योऽयं निश्चितः क्षत्तस् सत्यं सत्येन ते शपे ॥
[अधिकः पाठः]

[1]यत्ते कुशलिनो वीरा मित्रवन्तश्च मे सुताः ॥ २०

का हि द्रुपदमासाद्य मित्रं क्षत्तस्सबान्धवम् ।
न बुभूषेद्भवस्यार्थं गतश्रीरपि पार्थिवः ॥ २१

वैशम्पायनः—

तं तथा भाषमाणं तु विदुरः प्रत्यभाषत ।

विदुरः—

[2]नित्या भवतु ते बुद्धिर् एषा राजञ्छतं समाः ॥ २२

वैशम्पायनः—

इत्युक्त्वा प्रययौ राजन् विदुरस्स्वं निवेशनम् ॥ २२॥
ततो दुर्योधनश्चैव राधेयश्च विशाम्पते ।
धृतराष्ट्रस्य तच्छ्रुत्वा वचोऽब्रूतामिदं ततः ॥ २३॥

दुर्योधनः—

सन्निधौ विदुरस्य त्वां वक्तुं न नृप शक्नुमः ॥ २४
विविक्तमिति वक्ष्यावः किं तवेदं चिकीर्षितम् ॥ २४॥
सपत्नवृद्धिं यत्तात मन्यसे वृद्धिमात्मनः ।

---

1. क-ग-घ—मित्रवन्तोऽभवन् पुत्रा दुर्योधनमुखास्सदा ।
मया श्रुता यदा वह्नेर् दग्धाः पाण्डुसुता इति ॥ १
तदारभ्य दिवारात्रं न भोक्ष्ये न स्वपामि च ।
असहायाश्च मे पुत्रा लूनपक्षा इव द्विजाः ॥ २
तत्त्वतश्शृणु मे क्षत्तस् सुसहायास्सुता मम ।
अद्य मे स्थिरसाम्राज्यम् आचन्द्रार्कं ममाभवत् ॥ ३
[अधिकः पाठः]

2. क-ग-घ—बुद्धिरेषा महाराज रूढमूला च ते हृदि ।
कर्मणा मनसा वाचा स्थिरो भव जनेश्वर ॥[अधिकः पाठः]

अभिष्टौषि च यत् क्षत्तुस् समीपे द्विपदांवर ॥ २५॥

अन्यस्मिन्नृप कर्तव्ये त्वमन्यत् कुरुषेऽनघ ।
तेषां बलविघातो हि कर्तव्यस्तात नित्यशः ॥ २६॥

ते वयं प्राप्तकालस्य चिकित्सां मन्त्रयामहे ।
यथा नो न ग्रसेयुस्ते सपुत्रगणबान्धवान्* ॥ २७॥

वैशम्पायनः

दुर्योधनेनैवमुक्तः कर्णेन च विशाम्पते ।
पुत्रं च सूतपुत्रं च धृतराष्ट्रोऽब्रवीदिदम् ॥ २८॥

धृतराष्ट्रः—

अहमप्येवमेवैतच् चिन्तयामि यथा युवाम् ।
विवृतं नाहमिच्छामि त्वाकारं विदुरं प्रति ॥ २९॥

अतस्तेषां गुणानेव कीर्तयामि विशेषतः ॥ ३०
न च बुध्येत विदुरो ममाभिप्रायमिङ्गितैः ॥ ३०॥

यच्च वै मन्यसे प्राप्तं तद्ब्रूहि त्वं सुयोधन ॥ ३१
राधेय मन्यसे त्वं च यत् प्राप्तं तद्ब्रवीहि मे ॥ ३१॥

दुर्योधनः—

प्रच्छन्नैः कुशलैर्विप्रैस् सुतुष्टैराप्तकारिभिः ।
कुन्तीपुत्रान् भेदयामो माद्रीपुत्रौ च पाण्डवौ ॥ ३२॥

---

* अ-क-ख-ग—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते ।

अथवा द्रुपदो राजा महद्भिर्धनसञ्चयैः ।
पुत्रांश्चास्य प्रलोभ्यन्ताम् अमात्यांश्चैव सर्वशः ॥ ३३॥
परित्यजेयू राजानं कुन्तीपुत्रं युधिष्ठिरम् ।
अथ तत्रैव नैतेषां निवासं रोचयन्तु ते ॥ ३४॥
इहैषां दोषवद्वासं वर्णयन्तु पृथक्पृथक् ॥ ३५
ते भिद्यमानास्तत्रैव मनः कुर्वन्तु पाण्डवाः ॥ ३५॥
अथवा कुशलाः केचिद् उपायकुशलैर्नरैः ।
इतरेतरतः पार्थान् भेदयन्त्वनुरागतः ॥ ३६॥
व्युत्थापयन्तु तां कृष्णां बहुत्वात् सुकरं हि तत् । ३७
अथवा पाण्डवांस्तस्यां भेदयन्तु ततश्च ताम् ॥ ३७॥
भीमसेनस्य वा राजन्नुपायकुशलैर्नरैः ।
मृत्युर्विधीयतां छद्मैस् स हि तेषां बलाधिकः ॥ ३८॥
तस्मिंस्तु निहते राजन् हतोत्साहा हतौजसः ।
यतिष्यन्ते न राज्याय स हि तेषां व्यपाश्रयः ॥ ३९॥
अजेयो ह्यर्जुनस्सङ्ख्ये पृष्ठगोपे वृकोदरे ।
तमृते फल्गुनो युद्धे राधेयस्य न पादभाक् ॥ ४०॥
ते जानन्तो हि दौर्बल्यं भीमसेने हते सति ।
अस्मान् बलवतो मत्वा न शिष्यन्त्यबलीयसः ॥ ४१॥
इहागतेषु पार्थेषु निदेशवशवर्तिषु ।

प्रवर्तिष्यामहे राजन् यथाश्रद्धं यथासुखम् ॥ ४२॥

दर्पं विदधतां तेषां केचिदत्र मनस्विनः ।
द्रुपदस्यात्मजा राजंस् ते भिद्यन्तां ततः परैः ॥ ४३॥

अथवा दर्शनीयाभिः प्रमदाभिर्विलोभ्यताम् ।
एकैकः पाण्डुपुत्राणां ततः कृष्णा विरुध्यताम् ॥ ४४॥

प्रेष्यतां वाऽपि राजेन्द्र तेषामागमनाय हि ।
तेऽल्पोपहारैस्सन्धाय वध्यन्तामाप्तकारिभिः ॥ ४५॥

एतेषामप्युपायानां निर्दोषो यो मतस्तव ।
तस्य प्रयोगमातिष्ठ पुरा कालोऽतिवर्तते ॥ ४६॥

यावद्धयकृतविश्वासा द्रुपदे पार्थिवर्षभे ।
तावदेव हि शक्यास्ते न शक्यास्तु ततः परम् ॥ ४७॥

सैषा मम मती राजन् पाण्डवान् प्रति दृश्यते ।
साध्वी वा यदि वाऽसाध्वी किं वा राधेय मन्यसे* ॥ ४८॥

कर्णः—

दुर्योधन तव प्रज्ञा न सम्यगिति मे मतिः ।
न ह्युपायेन शक्यास्ते पाण्डवाः कुरुनन्दन ॥ ४९॥

पूर्वमेव हि ते सर्वैर् उपायैर्य[1]तितास्त्वया ।

---

* अ-क-ख-ग—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते ।

1. अ—यत्ति

निगृहीतुं त्वया वीराश् शकिता न तु भारत ॥ ५०॥
इहैव वर्तमानास्ते समीपे तव पार्थिव ।
अजातपक्षाशिशवो न शक्यास्तव बाधितुम् ॥ ५१॥
जातपक्षा विदेशस्था विवृद्धास्सर्व एव ते ।
नोपायसाध्याः कौन्तेया ममैषा मतिरच्युता ॥ ५२॥
न च ते व्यसनैश्शक्या योक्तुं दृष्टगुणा हि ते ।
शक्ताः खल्वीप्सवश्चैव पितृपैतामहं पदम् ॥ ५३॥
परस्परेभ्यो भेदश्च नाधातुं तेषु शक्यते ।
एकस्यां हि यथा पत्न्यां न भिद्यन्ते कथञ्चन ॥ ५४॥
न चापि कृष्णा शक्येत तेभ्यो भेदयितुं परैः ।
परिद्यूनान् वृतवती किमुताद्य प्रतापिनः ॥ ५५॥
ईप्सितश्च गुणस्त्रीणाम् एकस्यां बहुभर्तृता ।
तं च प्राप्तवती कृष्णा सा न भेदयितुं क्षमा ॥ ५६।
आर्यवृत्तश्च पाञ्चालस् स च राजा धृतव्रतः ।
न सन्त्यक्ष्यति कौन्तेयान् राज्यदानैरपि ध्रुवम् ॥ ५७।
तथाऽस्य पुत्रो गुणवान् अनुरक्तश्च पाण्डवान् ।
तस्मान्नोपायसाध्यांस्तान् अहं मन्ये कथञ्चन ॥ ५८।
इदमद्य क्षमं कर्तुम् अस्माकं भरतर्षभ ॥ ५९
यावन्न कृतमूलाश्च पाण्डवेया विशाम्पते ।

तावत् प्रहरणीयास्ते रोचतां तत्र विक्रमः ॥ ६०

अस्मत्पक्षो महानद्य यावत् पाञ्चालको लघुः ।
तावत् प्रहरणं तेषां क्रियतामिति रोचये ॥ ६१

वाहनानि प्रभूतानि मिलाणि बहुलानि च ।
यावन्न तेषां गान्धारे तावदेवाशु विक्रम ॥ ६२

यावच्च राजा पाञ्चालो नोद्यमे कुरुते मनः ।
कुन्तीपुत्रैर्महावीर्यैस् तावदेवाशु विक्रम ॥ ६३

सदा च वैरी द्रुपदस् सततं निकृतस्त्वया ।
यावन्न वर्धते मित्रै रोचतां तत्र विक्रमः ॥ ६४

यावन्नायाति वार्ष्णेयः कर्षन् यादववाहिनीम् ।
राज्यार्थे पाण्डवेयानां तावदेवाशु विक्रम ॥ ६५

वसूनि विविधान् भोगान् राज्यमेव च केवलम् ।
नासाध्यमस्ति कृष्णस्य पाण्डवार्थे विशाम्पते ॥ ६६

विक्रमेण मही प्राप्ता भरतेन महात्मना ।
विक्रमेणैव लोकांस्त्रीन् जितवान् पाकशासनः ॥ ६७

विक्रमं च प्रशंसन्ति क्षत्रियस्य विशाम्पते ।
स्वको हि धर्मश्शूराणां विक्रमः पार्थिवर्षभ ॥ ६८

ते बलेन वयं राजन् महता चतुरङ्गिणा ।
प्रमथ्य द्रुपदं शीघ्रम् आनयामेह पाण्डवान् ॥ ६९

न हि साम्ना न भेदेन नच दानेन पाण्डवाः ।
शक्यास्साधयितुं तस्माद् विक्रमेणैव ताञ्जहि ॥ ७०
विक्रमेणैव जित्वेमाम् अखिलां भुङ्क्ष्व मेदिनीम् ।
नान्यमत्र प्रपश्यामि कार्योपायं जनाधिप ॥ ७१

वैशम्पायनः—

श्रुत्वा स राधेयवचो धृतराष्ट्रः प्रतापवान् ।
अभिपूज्य ततः पश्चाद् इदं वचनमब्रवीत् ॥ ७२

धृतराष्ट्रः—

उपपन्नं महाप्राज्ञे कृतास्त्रे सूतनन्दने ।
त्वयि विक्रमसंपन्नम् इदं वचनमीदृशम् ॥ ७३
भूय एव तु भीष्मश्च द्रोणो विदुर एव च ।
युवां च कुरुतं बुद्धिं भवेद्यावत् सुखोदयः ॥ ७४

वैशम्पायनः—

तत आनाय्य तान् सर्वान् मन्त्रिणस्सुमहायशाः ।
धृतराष्ट्रो महाराज मन्त्रयामास वै तदा* ॥ ७५

भीष्मः—

न रोचते विक्रमस्तु पाण्डुपुत्रैः कथञ्चन ।
यथैव धृतराष्ट्रो मे तथा पाण्डुरसंशयम् ॥ ७६
गान्धार्याश्च यथा पुत्रास्तथा कुन्तीसुता मताः ।
यथा च मम ते रक्ष्या धृतराष्ट्र तथा तव ॥ ७७
यथा च मम राज्ञश्च तथा दुर्योधनस्य ते ।

* अ-क-ख-ग—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते ।

तथा कुरूणां सर्वेषाम् अन्येषामपि पार्थिव ॥ ७८

एवं गते विग्रहं तैर्न रोचे
सन्धाय वीरैर्दीयतामद्य भूमिः ।
तेषामपीदं प्रपितामहानां
राज्यं पितुश्चैव कुरूत्तमानाम् ॥ ७९

दुर्योधन यथा राज्यं त्वमिदं तात पश्यसि ।
मम पैतृकमेवेति तथा तेषामपि प्रभो ॥ ८०
यदि राज्यं न ते प्राप्ताः पाण्डवेयास्तरस्विनः ।
कुत एतत्त्वयापीदं भारतस्यापि कस्य चित् ॥ ८१
अथ धर्मेण राज्यं त्वं प्राप्तवान् भरतर्षभ ।
तेऽपि राज्यमनुप्राप्ताः पूर्वमेव न संशयः ॥ ८२
मधुरेणैवमुक्त्वा तान् राज्यस्यार्धं प्रदीयताम् ।
एतद्धि पुरुषव्याघ्र हितं सर्वजनस्य नः ॥ ८३
अतोऽन्यथा चेत् क्रियते अहितं नो भविष्यति ।
तवाप्यधर्मस्सकलो भविष्यति न संशयः ॥ ८४
त्वय्यप्यकीर्तिर्विपुला भविष्यति न संशयः ।
कीर्तिरक्षणमातिष्ठेत् कीर्तिर्हि विमलं फलम् ॥ ८५
नष्टकीर्तेर्मनुष्यस्य जीवितं ह्यफलं स्मृतम् ॥ ८५॥
यावत्कीर्तिर्मनुष्यस्य लोके भवति भारत ।
तावज्जीवति गान्धारे नष्टकीर्तिस्तु नश्यति ॥ ८६॥

तदिदं समुपातिष्ठ धर्मं कुरुकुलोचितम् ।
अनुरूपं महाबाहो पूर्वेषामात्मनः कुरु ॥ ८७॥

दिष्ट्या चरन्ति ते वीरा दिष्ट्या जीवति सा पृथा ।
दिष्ट्या पुरोचनः पापो न सकामोऽत्ययं गतः ॥ ८८॥

तदाप्रभृति गान्धारे न शक्नोम्यभिवीक्षितुम् ।
[1]अदाह्यो यदा पार्थांस् § त्वमग्नौ जतुवेश्मनि ॥ ८९॥

लोके प्राणभृतां किञ्चिच् छ्रुत्वा कुन्तीं तथागताम् ।
[2]दुःखं तु जायते राजन् भवान् सर्वस्य कारणम् ॥ ९०॥

न चापि दोषेण तथा लोको वेत्ति पुरोचनम् ।
यथा त्वां पुरुषव्याघ्र लोको दोषेण गच्छति ॥ ९१॥

तदिदं जीवितं तेषां तव किल्बिषनाशनम् ।
सम्मन्तव्यं महाराज पाण्डवानां च दर्शनम् ॥ ९२॥

न चापि तेषां वीराणां जयतां कुरुनन्दन ।
प्रित्र्योंशश्शक्य आदातुम् अपि वज्रभृता स्वयम् ॥ ९३॥

[3]ते हि धर्मे स्थितास्सर्वे सर्वे चैवैकचेतसः ।

---

1. अ-कोशे इदमर्धं न दृश्यते § क-ग-घ—सत्वतो
2. अ-कोशे इदमर्धमपि न दृश्यते ।
3. घ-वैशम्पायनः—
धृतराष्ट्रो महाराज मन्त्रयामास तैस्सह ।
भीष्मः--
न रोचते विग्रहो मे पाण्डुपुत्रैः कदा चन ।
यथैव धृतराष्ट्रो मे तथा पाण्डुर्न संशयः ।

अधर्मेण निरस्ताश्च तुल्ये राज्ये च धर्मतः ॥ ९४॥

यदि धर्मस्त्वया कार्यो यदि कार्यं प्रियं च मे ।
क्षेमं च यदि कर्तव्यं राज्यं तेभ्यः प्रयच्छताम् ॥ ९५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि पञ्चनवत्यधिकशततमोऽध्यायः ॥ १९५ ॥
॥ १४ ॥ विदुरागमनपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
[अस्मिन्नध्याये ९५॥ श्लोकाः]

॥ षण्णवत्यधिकशततमोऽध्यायः ॥

पाण्डवाः संविभज्या इति द्रोणवचनम् ॥ १ ॥ तद्विरोधितया कर्णेन विनिन्दवृत्तान्तकथनम् ॥ २ ॥ मदुक्तं न क्रियते चेत् कुरवो विनङ्क्ष्यन्तीति द्रोणेनोक्तिः ॥ ३ ॥ भीष्मद्रोणाभ्यामुक्तमेवावश्यं करणीयं पाण्डवा जेतुं न शक्याः. दुर्योधनादीनां वचनं मा कार्षीरिति धृतराष्ट्रं प्रति विदुरस्योक्तिः ॥ ४ ॥

द्रोणः—

मन्त्राय समुपानीतैर् धृतराष्ट्र हितैर्नृप ।
धर्म्यं पथ्यं यशस्यं च वाच्यमित्यनुशुश्रुमः ॥ १

ममाप्येषा मतिस्तात या भीष्मस्य महात्मनः ।
संविभज्यास्तु कौन्तेया धर्म एष सनातनः ॥ २

प्रेष्यतां द्रुपदायाशु नरः कश्चित् प्रियंवदः ।
बहुलं रत्नमादाय तेषामर्थाय भारत ॥ ३

मिथः कृत्यं च तस्मै स आदाय बहु गच्छतु ॥ ३॥
वृद्धिं च परमां ब्रूयात् तत्संयोगोद्भवां तथा ॥ ४
सुप्रीयमाणं त्वां ब्रूयाद् राजन् दुर्योधनं तथा ।
असकृद्पदे चैव धृष्टद्युम्ने च भारत ॥ ५
उचितत्वं प्रियत्वं च योगस्यापि च वर्णयेत् ।
पुनः पुनश्च कौन्तेयान् माद्रीपुत्रौ च सान्त्वयेत् ॥ ६
हिरण्मयानि शुभ्राणि बहून्याभरणानि च ।
वचनात्तव राजेन्द्र द्रौपद्यास्सम्प्रयच्छतु ॥ ७
तथा द्रुपदपुत्राणां सर्वेषां भरतर्षभ ।
पाण्डवानां च सर्वेषां कुन्त्या युक्तानि यानि च ॥ ८
दत्त्वा तानि महार्हाणि पाण्डवान् सम्प्रहर्षय ॥ ८॥
एवं सान्त्वसमायुक्तं द्रुपदं पाण्डवैस्सह ।
उक्त्वा सोऽनन्तरं ब्रूयात् तेषामागमनं प्रति ॥ ९॥
अनुज्ञातेषु वीरेषु बलं गच्छतु शोभनम् ॥ १०
दुश्शासनो विकर्णश्च पाण्डवानानयत्विह ॥ १०॥
ततस्ते पार्थिवश्रेष्ठाः पूज्यमानास्सदा त्वया ।
प्रकृतीनामनुमते पदे स्थास्यन्ति पैतृके ॥ ११॥
एवं तव महाराज तेषु पुत्रेषु चैव हि ।
वृत्तमौपयिकं मन्ये भीष्मेण सह भारत ॥ १२॥

कर्णः—

योजितावर्थमानाभ्यां सर्वकार्येष्वनन्तरौ ।
न मन्त्रयेतां त्वच्छ्रेयः किमद्भुततरं ततः ॥ १३॥

दुष्टेन मनसा यो वै प्रच्छन्नेनान्तरात्मना ।
ब्रूयान्निश्श्रेयसं नैव कथं कुर्यात् सतां मतम् ॥ १४॥

न मित्राण्यर्थकृच्छ्रेषु श्रेयसे वेतराय वा ।
विधिपूर्वं हि सर्वस्य दुःखं वा यदि वा सुखम् ॥ १५॥

कृतप्रज्ञोऽकृतप्रज्ञो बालो वृद्धश्च मानवः ।
ससहायोऽसहायश्च सर्वं सर्वत्र विन्दति ॥ १६॥

श्रूयते हि पुरा कश्चिद् [1]विनिन्द इति श्रुतः ।
आसीद्राजगृहे राजा मागधानां महीपतिः ॥ १७॥

स हीनः करणैस्सर्वैर् उच्छ्वासपरमो नृपः ।
अमात्यसंस्थस्सर्वेषु कार्येष्वेवाभवत्तदा ॥ १८॥

तस्यामात्या बभूवुस्ते अन्योन्यसहितास्तदा ॥ १९

तस्यामात्यो महाकर्णिर् बभूवैकेश्वरः पुरा ।
स लब्धबलमात्मानं मन्यमानोऽवमन्यते ॥ २०

स राज्ञो वसुरत्नानि स्त्रियो भोज्यानि यानि च ।
आददे सर्वतो मूढ ऐश्वर्यं च स्वयं तदा ॥ २१

---

1. अ—अम्बरीष इति

तदादाय च लुब्धस्य लाभाल्लोभः प्रवर्तते ।
तथा हि सर्वमादाय राज्यमस्य जिहीर्षति ॥ २२

हीनस्य करणैस्सर्वैर् उच्छ्वासपरमस्य च ।
यतमानो न शक्नोति राज्यं कर्तुमिति श्रुतिः ॥ २३

किमन्यद्विहिता देव तस्य कापुरुषेन्द्रता ।
यदि ते विहितं राज्यं भविष्यति न संशयः ॥ २४

मिषतस्सर्वलोकस्य स्थास्यते त्वयि तद्ध्रुवम् ।
अतोऽन्यथा चेद्विहितं यतमानो न लप्स्यसे ॥ २५

एवं विद्वन्नुपादत्स्व मन्त्रिणां साध्वसाधुताम् ।
दुष्टानां चैव बोद्धव्यम् अदुष्टानां चैव भाषितम् ॥ २६

द्रोणः—

विद्म ते भावदोषेण यदर्थमिदमुच्यते ।
दुष्टः पाण्डवहेतोस्त्वं दोषं ख्यापयसे च नः ॥ २७

हितं तु परमं कर्ण ब्रवीमि कुरुवर्धनम् ।
अथ त्वं मन्यस दुष्टं ब्रूहि यत् परमं हितम् ॥ २८

अतोऽन्यथा चेत् क्रियते यद्ब्रवीमि परं हितम् ।
कुरवोऽपि नशिष्यन्ति नचिरेणैव मे मतिः* ॥ २९

विदुरः—

राजन्निस्संशयं श्रेयो वाच्यस्त्वमसि बान्धवैः ।

* अ-क-ख-ग—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते ।

न त्वं शुश्रूषमाणो हि वाक्यं संप्रति भाषसि ॥ ३०

हितं हि तव तद्वाक्यम् उक्तवान् कुरुसत्तमः ।
भीष्मश्शान्तनवो राजा महावीर्यपराक्रमः ॥ ३१

तथा द्रोणेन बहुधा भाषितं हितमुत्तमम् ।
तच्च राधासुतः कर्णो मन्यते न हितं वचः ॥ ३२

चिन्तयंश्च न पश्यामि राजंस्तव सुहृत्तमम् ।
आभ्यां पुरुषसिंहाभ्यां यो वा स्यात् प्रज्ञयाऽधिकः ॥ ३३

इमौ हि वृद्धौ वयसा राजनीतिविशारदौ ।
समानौ त्वयि राजेन्द्र तेषु पाण्डुसुतेषु च ॥ ३४

धर्मे चानवमौ राजन् सत्यतायां च भारत ।
रामाद्दाशरथेश्चैव गयाच्चैव न संशयः ॥ ३५

न चोक्तवन्तावश्रेयः पुरस्तादपि किञ्चन ।
न चाप्यपकृतं किञ्चिद् अनयोर्लक्ष्यते त्वयि ॥ ३६

ताविमौ पुरुषव्याघ्रावनागसि नृप त्वयि ।
न मन्त्रयेतां त्वच्छ्रेयः कथं सत्यपराक्रमौ ॥ ३७

प्रज्ञावन्तौ नृपश्रेष्ठावस्मिँल्लोके नराधिप ।
त्वन्निमित्तमतो नेमौ किञ्चिज्जिह्मं वदिष्यतः ॥ ३८

इति मे नैष्ठिकी बुद्धिर् वर्तते कुरुनन्दन ।

न चार्थहेतोर्धर्मज्ञौ वक्ष्यतः पक्षसंश्रितम् ॥ ३९

एतद्धि परमं श्रेयो मेनाते तव भारत ॥ ३९॥

[1]अथ ते हृदये राजन् विशेषस्तेषु वर्तते ।
अन्तरस्थं विवृण्वानाश् श्रेयः कुर्युर्न ते ध्रुवम् ॥ ४०॥

एतदर्थं महात्मानाविमौ राजन् महाद्युती ।
नोचतुर्विवृतं किञ्चिन्न ह्येष तव निश्चयः ॥ ४१॥

तथाप्यशक्यतां तेषाम् आहतुः पुरुषर्षभौ ।
तत् तथा पुरुषव्याघ्र तव तद्भद्रमस्तु ते ॥ ४२॥

कथं हि पाण्डवश्श्रीमान् सव्यसाची धनञ्जयः ।
शक्यो हि जेतुं सङ्ग्रामे राजन् मघवताऽपि हि ॥ ४३॥

भीमसेनो महाबाहुर् नागायुतबलो महान् ।
कथं स्म युधि शक्येत विजेतुममरैरपि ॥ ४४॥

तथैव कृतिनौ युद्धे यमौ यमसुताविव ।
कथं विषहितुं शक्यौ रणे जीवितुमिच्छता ॥ ४५॥

यस्मिन् धृतिरनुक्रोशः क्षमा सत्यं पराक्रमः ।
नित्यानि पाण्डवे ज्येष्ठे स जयी न कथं रणे ॥ ४६॥

---

1. क-ग-घ—दुर्योधनप्रभृतयः पुत्रा राजन् यथा तव ।
तथैव पाण्डवेयास्ते पुत्रा राजन् न संशयः ॥
तेषु चेदहितं किञ्चिन्मन्त्रयेयुरबुद्धयः ।
मन्क्षिणस्ते न ते श्रेयः प्रपश्यन्ति विशेषतः ॥
[अधिकः पाठः]

येषां पक्षधरो रामो येषां मन्त्री च केशवः ।
किं नु तैरजितं सङ्ख्ये येषां पक्षे च सात्यकिः ॥ ४७॥

द्रुपदश्श्वशुरो येषां येषां स्यालाश्च पार्षताः ।
धृष्टद्युम्नमुखा वीरा भ्रातरो द्रुपदात्मजाः ॥ ४८॥

चैद्यश्च येषां भ्राता च शिशुपालो महारथः ।
सोऽशक्यतां च विज्ञाय तेषां युद्धेन भारत । ४९॥

दायाद्यतां च धर्मेण सम्यक् तेषु समाचर ॥ ५०

इदं निर्दिष्टमयशः पुरोचनकृतं महत् ।
तेषामनुग्रहेणाद्य राजन् प्रक्षालयात्मनः ॥ ५१

तेषामनुग्रहश्चायं सर्वेषां चैव नः कुले ।
जीविते परमं श्रेयः क्षत्रस्य च विवर्धनम् ॥ ५२

द्रुपदोऽपि महान् राजा कृतवैरश्च नः पुरा ।
तस्य सङ्ग्रहणं श्रेयस् स्वपक्षस्य च वर्धनम् ॥ ५३

बलवन्तश्च दाशार्हा बहवश्च विशाम्पते ।
यतः कृष्णस्ततस्ते स्युर् यतः कृष्णस्ततो जयः ॥ ५४

यच्च सान्त्वेन शक्येत कार्यं साधयितुं नृप ।
को दैवशप्तस्तत् कर्तुं विग्रहेण समाचरेत् ॥ ५५

श्रुत्वा च जीवतः पार्थान् पौरजानपदो जनः ।
बलवद्दर्शने हृष्टस् तेषां राजन् कुरु प्रियम् ॥ ५६

दुर्योधनश्च कर्णश्च शकुनिश्चापि सौबलः ।
अधर्माश्चापि दुष्प्रज्ञा बाला मैषां वचः कृथाः ॥ ५७
उक्तमेतन्मया राजन् पुरा गुणवतस्तव ।
[1]दुर्योधनापराधेन प्रज्ञेयं तव नश्यति ॥ ५८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि षण्णवत्यधिकशततमोऽध्यायः ॥ १९६ ॥
॥ १४ ॥ विदुरागमनपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
[अस्मिन्नध्याये ५८ श्लोकाः]

---

1. क-ग-घ—अजय्याः पाण्डवा युद्धे हरेण हरिणाऽपि वा ।
त्रैलोक्येनापि भूपाल किमु तैः खलु मानवैः ॥ १
दैवानुकूलाः कौन्तेया दैवं तेषां परायणम् ।
प्रत्यक्षमेतत् सर्वेषां मुक्ता जतुगृहानलात् ॥ २
जित्वा गन्धर्वराजानं धौम्यं प्राप्य पुरोहितम् ।
पाञ्चालनगरं प्राप्य हत्वा लक्षसमानुषम् ॥ ३
अनम्यं धनुरायम्य शिरोभिस्सह भूभृताम् ।
चैद्यमागधकर्णाद्यैः किं कृतं तव भूमिपैः ॥ ४
अरूढमूलाः पार्थाश्च दरिद्रा निर्धना इति ।
जेतुं शक्या न मन्येथा अजय्याः पाण्डवास्सुरैः ॥ ५
यावत्तिष्ठति लोकेऽस्मिन् कृष्णो यादववंशजः ।
मुरारिः केशिहन्ता च लीलामानुषविग्रहः ॥ ६
प्रणतार्तिहरो योगी केशवः क्लेशनाशनः ।
भक्तानुवत्सलो भक्तस् स्वान्तवेश्मगृही तथा ॥ ७
चतुस्सागरपर्यन्तां केवलं पृथिवीं न हि ।
धर्मात्मजो महाराज तावत् त्रैलोक्यमर्हति ॥ ८
अलं कर्णानया बुद्ध्या नोत्साहय सुयोधनम् ।
शकुने गच्छ मा गाधं निरयं कौरवैस्सह ॥ ९
पाण्डवाश्च वयं सर्वे भूमिपालास्सबान्धवाः ।

॥ सप्तनवत्यधिकशततमोऽध्यायः ॥

धृतराष्ट्राज्ञया विदुरस्य द्रुपदनगरगमनम् ॥ १ ॥ तत्र श्रीकृष्णादीनां समीपे धृतराष्ट्रसन्देशकथनम् ॥२॥ पाण्डवानां हास्तिनपुरं प्रति गमनाय श्रीकृष्णद्रुपदयोरभ्यनुज्ञा ॥ ३ ॥ पृथाविदुरसंवादः ॥ ४ ॥ द्रुपदेन पारिबर्हदानम् ॥ ५ ॥ पाण्डवानां हास्तिनपुरप्रवेशः ॥ ६ ॥ प्रत्युद्गमनायागतैः कौरवैस्सह प्रस्थितानां पाण्डवानां भीष्मादिवन्दनपुरस्सरं गृहप्रवेशः ॥७॥

धृतराष्ट्रः—

भीष्मश्शान्तनवश्चैव द्रोणश्चैव महामतिः ।

पूर्वतोऽनुवृत्तम्—

वृष्ण्यन्धकपुरोगाश्च यादवास्सहकेशवाः ॥ १०
सर्वे संभूय जीवाम सपुत्रपशुबान्धवाः ॥ १०॥
बोधयध्वं तथा यूयं तथैव शरदां शतम् ।
मा पुत्रवशगो भूप तव पुत्रस्सुदुर्मतिः ॥ ११॥
आनीय पाण्डवान् साधून् पुत्रांश्च सह सर्वशः ।
अभेदेन निरीक्षस्व न भेदं चक्षुषोः कुरु ॥ १२॥
मनसा स्नेहपूर्वेण निर्भेदो नखमांसवत् ॥ १३

धृतराष्ट्रः—

पार्थिवार्थे प्रियं ब्रूहि नाप्रियं सूतनन्दन ।
पुत्रं त्वं च न मे ब्रूहि पार्थानामहितं क्वचित् ॥ १४
दुर्योधनमसन्मार्गान्निवर्तय महामते ॥ १४॥
[अधिकः पाठः]

ध—शकुने प्रवर्तय त्वं च सद्भिराचरिते पथि ॥
प्रथमं मम पुत्रास्ते पाण्डवा धर्मचारिणः ।
सत्यं ब्रवीम्यहं क्षत्तः पश्चाद्दुर्योधनादयः ॥
मम भाग्यवशान्मुक्ता घोराज्जतुगृहानलात् ।
लोकापवादान्मुक्तोऽहं चक्षुषाऽन्धस्य ते मम ।
उक्त्वेत्थमात्मजं कर्णं शकुनिं चापि सौबलम् ।
आहूय विदुरं भूपं पृथक् चेदमुवाच ह ॥ [अधिकः पाठः]

हितं परमकं वाक्यं त्वं च सत्यं ब्रवीषि माम् ॥ १

यथैव पाण्डोस्ते वीराः कुन्तीपुत्रा महाबलाः ।
तथैव धर्मतस्सर्वे मम पुत्रा न संशयः ॥ २

यथैव मम पुत्राणाम् इदं राज्यं विधीयते ।
तथैव पाण्डुपुत्राणाम् इदं राज्यमसंशयम् ॥ ३

क्षत्तरानय गच्छैतान् सह मात्रा सुसत्कृतान् ।
तया च देवरूपिण्या कृष्णया सह भारत ॥ ४

दिष्ट्या जीवन्ति ते पार्था दिष्ट्या जीवति सा पृथा ।
दिष्ट्या द्रुपदकन्यां च लब्धवन्तो महारथाः ॥ ५

दिष्ट्या वर्धामहे सर्वे दिष्ट्या शान्तः पुरोचनः ।
दिष्ट्या मम परं दुःखम् अपनीतं महाद्युते ॥ ६

त्वमेव गत्वा विदुर तानिहानय मा चिरम् ॥ ६॥

1 वैशम्पायनः—

एवमुक्तस्ततः क्षत्ता रथमारुह्य शीघ्रगम् ।
आगात् कतिपयाहोभिः पाञ्चालान् राजधर्मवित् ॥ ७॥

ततो जगाम विदुरो धृतराष्ट्रस्य शासनात् ।

---

1. घ—विदुरः—
एवं ते निश्चिता बुद्धिर् आचन्द्रार्कं जनेश्वर ।
न भवेच्चञ्चला पार्थे काकस्थानं च मा कुरु ॥

सकाशं यज्ञसेनस्य पाण्डवानां च भारत ॥ ८॥

आगतं विदुरं श्रुत्वा द्रुपदो राजसत्तमः ।
स्वपुत्रैस्सह धर्मात्मा पूजयामास धर्मतः ॥ ९॥

तत्र गत्वा च धर्मज्ञस् सर्वशास्त्रविशारदः ।
द्रुपदं न्यायतो राजन् संयुक्तमुपतस्थिवान् ॥ १०॥

स चापि प्रतिजग्राह धर्मेण विदुरं ततः ।
चक्रे पूजां यथान्यायं विदुरस्य महात्मनः ॥ ११॥

चक्रतुश्च यथान्यायं कुशलप्रश्नसंविदम् ॥ १२

ददर्श पाण्डवांस्तत्र वासुदेवं च भारत ॥ १२॥

[1]ततस्स्नेहात् परिष्वज्य पप्रच्छानामयं ततः ॥ १३

वचनाद्धृतराष्ट्रस्य स्नेहयुक्तं पुनः पुनः ।
तैश्चाप्यमितबुद्धिस्स पूजितोऽथ यथाक्रमम् ॥ १४

पाण्डवा विनयोपेता नत्वाऽऽलिङ्ग्य च विशाम्पते ।
दृष्ट्वा मुहुर्मुहू राजन् हर्षादश्रूण्यवर्तयन् ॥ १५

दृष्ट्वा कुशलिनश्चैतान् ततस्तान् पाण्डुनन्दनान् ।

---

1. घ—अद्य मे सफला दृष्टिर् अद्य मे सफलं श्रुतम् ।
अवश्यं पाण्डवानद्य चिरस्य पुनरागतान् ॥
कुन्तीमपश्यं सत्पुत्रां वीरसूं मम मातरम् ।
दृष्ट्वाऽथ पाण्डवान् क्षत्ता वासुदेवं सनातनम् ॥
जीवात्मानमात्मनः कृष्णम् आत्मप्राणेन्द्रियेश्वरम् ॥ [अधिकः पाठः]

प्रददौ चापि रत्नानि विविधानि वसूनि च ॥ १६

पाण्डवानां च कुन्त्याश्च द्रौपद्याश्च विशेषतः ।
द्रुपदस्य च पुत्राणां तथा दत्तानि कौरवैः ॥ १७

सङ्कर्षणं वासुदेवं प्रणम्य विदुरस्ततः ।
आसने काञ्चने शुभ्रे निषसाद महामतिः ॥ १८

कृत्वा मिथस्तु सँल्लापं मुदा पुनरभाषत ॥ १८॥

भीष्मद्रोणाजमीढैश्च यदुक्तं पाण्डवान् प्रति ।
अवदत्तत्र तत्सर्वं सर्वेषामनुशृण्वताम् ॥ १९॥

प्रोवाच चामितप्रज्ञः प्रश्रितं विनयान्वितम् ।
द्रुपदं पाण्डुपुत्राणां सन्निधौ केशवस्य च ॥ २०॥

विदुरः—

राजन् शृणु सहामात्यस् सपुत्रश्च वचो मम ॥ २१

धृतराष्ट्रस्सपुत्रं त्वां सहामात्यं सबान्धवम् ।
अब्रवीत् कुशलं राजन् प्रीयमाणः पुनः पुनः ॥ २२

प्रीतिमांस्ते दृढं चापि सम्बन्धेन नराधिप ॥ २२॥

अथ भीष्मश्शान्तनवः कौरवैस्सह सर्वशः ।
कुशलं त्वां महाप्राज्ञस् सर्वतः परिपृच्छति ॥ २३॥

भारद्वाजो महाप्राज्ञो द्रोणः प्रियसखस्तव ।
समाश्लेषमुपेत्य त्वां कुशलं परिपृच्छति ॥ २४॥

धृतराष्ट्रस्तु पाञ्चाल त्वया संबन्धमेयिवान् ।
कृतार्थं मन्यतेत्मानं तथा सर्वेऽपि कौरवाः ॥ २५॥
न तथा राज्यसंप्राप्तिस् तेषां प्रीतिकरी मता ।
यथा सम्बन्धकं प्राप्य यज्ञसेन त्वया सह ॥ २६॥
एतद्विदित्वा तु भवान् प्रस्थापयतु पाण्डवान् ।
द्रष्टुं हि पाण्डुदायादान् त्वरन्ते कुरवो भृशम् ॥ २७॥
विप्रोषिता दीर्घकालम् एते चापि नरर्षभाः ।
उत्सुका नगरं द्रष्टुं भविष्यन्ति तथा पृथा ॥ २८॥
कृष्णामपि च पाञ्चालीं सर्वाः कुरुवरस्त्रियः ।
द्रष्टुकामाः प्रतीक्षन्ते पुरं च विषयं च नः ॥ २९॥
स भवान् पाण्डुपुत्राणाम् आज्ञापयतु मा चिरम् ।
गमनं सहदाराणाम् एतदागमनं मम ॥ ३०॥
निसृष्टेषु त्वया राजन् पाण्डवेषु महात्मसु ।
ततोऽहं प्रेषयिष्यामि धृतराष्ट्रस्य शीघ्रगान् ॥ ३१॥
आगमिष्यन्ति कौन्तेयाः कुन्ती च सह कृष्णया* ॥ ३२

द्रुपदः—

एवमेतन्महाप्राज्ञ यथाऽऽत्थ विदुराद्य माम् ।
ममापि परमो हर्षस् सम्बन्धेऽस्मिन् कृते विभो ॥ ३३

* अ-क-ख-ग—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते ।

गमनं चापि युक्तं स्याद् गृहमेषां महात्मनाम् ।
न तु तावन्मया युक्तम् एतद्वक्तुं स्वया गिरा ॥ ३४

यदा तु मन्यते वीरः कुन्तीपुत्रो युधिष्ठिरः ।
भीमसेनार्जुनौ चैव यमौ च पुरुषर्षभौ ॥ ३५

रामकृष्णौ च धर्मज्ञौ तदा गच्छन्तु पाण्डवाः ॥ ३५॥

एतौ हि पुरुषव्याघ्रावेषां प्रियहिते रतौ ॥ ३६

युधिष्ठिरः—

परवन्तो वयं राजंस् त्वयि सर्वे सहानुगाः ।
यथा वक्ष्यसि नः प्रीत्या चरिष्यामस्तथा वयम् ॥ ३७

वैशम्पायनः—

ततोऽब्रवीद्वासुदेवो गमनं मम रोचते ।
[1]यथाऽयं मन्यते राजा द्रुपदस्सर्वधर्मवित् ॥ ३८

द्रुपदः

यथैतन्मन्यते वीरो दाशार्हः पुरुषोत्तमः ।

---

1. घ—दूरे वस्तुमयुक्तं हि ज्ञातीनामविभागिनाम् ।
तदेव संविभागस्याद् दूरदेशप्रवासनम् ॥
धृतराष्ट्रे स्थिते मीष्मे बाह्लिके विदुरेऽपि च ।
भूरिश्रवसि कौरव्ये कुरुष्वन्येषु भूमिप ॥
एतेषु सत्सु पार्थानाम् अयुक्तं मम रोचते ।
वैवाहिकगृहे राजन् तस्माद्गच्छन्तु पाण्डवाः ॥
सुचिरं वर्धतां राजा पाण्डवार्थे सपार्थतः ।
नाथोऽयं पाण्डवानां च द्रुपदोऽस्त्र को भवेत् ॥
[अधिकः पाठः]

प्राप्तकालं महाबाहुस् सा बुद्धिर्निश्चिता मम ॥ ३९

यथैव हि महाभागाः कौन्तेया मम साम्प्रतम् ।
तथैव वासुदेवस्य पाण्डुपुत्रा न संशयः ॥ ४०

न तद्ध्यायति कौन्तेयः पाण्डुपुत्रो महामनाः ।
यदैषां पुरुषव्याघ्रश् श्रेयो ध्यायति केशवः ॥ ४१

वैशम्पायनः

पृथायास्तु यथा वेश्म प्रविवेश महाद्युतिः ।
पादौ स्पृष्ट्वा पृथायास्तु शिरसा च महीं गतः ॥ ४२

दृष्ट्वा तु देवरं कुन्ती शुशोच च मुहुर्मुहुः ॥ ४२॥

कुन्ती—

वैचित्रवीर्य ते पुत्राः कथञ्चिज्जीवितास्त्वया ।
त्वत्प्रसादाज्जतुगृहे त्राताः प्रत्यागतास्तव ॥ ४३॥

कूर्मश्चिन्तयते पुत्रान् यत्र वा तत्र वा गतान् ।
चिन्तया वर्धयेत् पुत्रान् यथा कुशलिनस्तथा ॥ ४४॥

तव पुत्रास्तु जीवन्ति त्वं त्राता भरतर्षभ ॥ ४५

यथा परभृतः पुत्रान् अरिष्ट्वा वर्धयेत् सदा ।
तथैव तव पुत्रास्तु मया तात सुरक्षिताः ॥ ४६

दुःखास्तु बहवः प्राप्तास् तथा प्राणान्तिका मया ॥ ४६॥

अतः परं न जानामि कर्तव्यं ज्ञातुमर्हसि ॥ ४७

वैशम्पायनः—

इत्येवमुक्ता दुःखार्ता शुशोच परमातुरा ।
प्रणिपत्याब्रवीत् क्षत्ता मा शोच इति भारत ॥ ४८

विदुरः—

न विनश्यन्ति लोकेषु तव पुत्रा महाबलाः ।
नचिरेणैव कालेन स्वराज्यस्था भवन्ति ते ॥ ४९
बान्धवैस्सहितास्सर्वैर् मा शोकं कुरु माधवि ॥ ४९॥

वैशम्पायनः—

ततस्ते समनुज्ञाता द्रुपदेन महात्मना ।
पाण्डवाश्चैव कृष्णश्च विदुरश्च महामतिः ॥ ५०॥
आदाय द्रौपदीं कृष्णां कुन्तीं चैव यशस्विनीम् ।
सविहारं सुखं जग्मुर् नगरं नागसाह्वयम् ॥ ५१॥
सुवर्णकक्ष्याग्रैवेयान् सुवर्णाङ्कुशभूषितान् ।
जाम्बूनदपरिष्कारान् प्रभिन्नकरटामुखान् ॥ ५२॥
अधिष्ठितान् महामात्रैस् सर्वशस्त्रसमन्वितान् ।
सहस्रं प्रददौ राजा गजानां वरवर्णिनाम् ॥ ५३॥
रथानां च सहस्रं वै सुवर्णमणिचित्रितम् ।
चतुर्युजां भानुमच्च पञ्चानां प्रददौ तदा ॥ ५४॥
सुवर्णपरिबर्हाणां वरचामरमालिनाम् ।
जात्यश्वानां च पञ्चाशत् सहस्रं प्रददौ नृपः ॥ ५५॥

दासीनामयुतं राजा प्रददौ वरभूषणम् ।
ततस्सहस्रं दासानां प्रददौ वरधन्विनाम् ॥ ५६॥

हैमानि शय्यासनभाजनानि
द्रव्याणि चान्यानि च गोधनानि ।
पृथक्पृथक् चैव ददौ स कोटिं
पाञ्चालराजः परमप्रहृष्टः ॥ ५७॥

शिबिकानां शतं पूर्णं वाहान् पञ्चशतं नरान् ।
एवमेतानि पाञ्चालो कन्यार्थे प्रददौ धनम् ॥ ५८॥
हरणं चापि पाञ्चाल्या ज्ञातिदेयं तु सौमकिः ।
धृष्टद्युम्नो ययौ तत्र भगिनीं गृह्य भारत ॥ ५९॥
नानद्यमाने बहुभिस् तूर्यशब्दैस्सहस्रशः* ॥ ६०
श्रुत्वा चोपस्थितान् वीरान् धृतराष्ट्रोऽम्बिकासुतः ।
प्रतिग्रहाय पाण्डूनां प्रेषयामास कौरवान् ॥ ६१
विकर्णं च महेष्वासं चित्रसेनं च भारत ।
द्रोणं च परमेष्वासं गौतमं कृपमेव च ॥ ६२
ते तैः परिवृता वीराश् शोभमाना महारथाः ।
नगरं हास्तिनपुरं शनैः प्रविविशुस्तदा ॥ ६३
पाण्डवानागताञ्छ्रुत्वा नागरास्तु कुतूहलात् ।
मण्डयाञ्चक्रिरे तत्र नगरं नागसाह्वयम् ॥ ६४

*. अ-क-ख-ग—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते ।

मुक्तपुष्पावकीर्णं तज् जलसिक्तं तु सर्वशः ।
धूपितं दिव्यधूपेन मण्डनैश्चापि संवृतम् ॥ ६५

पताकोच्छ्रितमाल्यं च पुरमप्रतिमं बभौ ॥ ६५॥
शङ्खभेरीनिनादैश्च नानावादित्रनिस्वनैः ।

कौतूहलेन नगरं पूर्यमाणमिवाभवत् ॥ ६६॥

यत्र ते पुरुषव्याघ्राश् शोकदुःखविनाशनाः ॥ ६७

[1]तत उच्चावचा वाचः प्रियाः प्रियचिकीर्षुभिः ।
उदीरितास्तेऽशृण्वन्त पाण्डवा हृदयङ्गमाः ॥ ६८

पौराः—

अयं स पुरुषव्याघ्रः पुनरायाति धर्मवित् ।
यो नस्स्वानिव दायादान् धर्मेण परिरक्षति ॥ ६९

अद्य पाण्डुर्महाराजो वनादिव वनप्रियः ।
आगतः प्रियमस्माकं चिकीर्षुर्नात्र संशयः ॥ ७०

किं न्वद्य सुकृतं पुण्यं सर्वेषां नः प्रियं परम् ।
कुन्तीसुता वीरा भर्तारः पुनरागताः ॥ ७१

यदि दत्तं यदि हुतं यदि वाऽप्यस्ति नस्तपः ।
तेन तिष्ठन्तु नगरे पाण्डवाश्शरदां शतम् ॥ ७२

1. घ—निवसन्तो वयं तत्र निवसामोऽकुतोभयाः । [अधिकः पाठः]

वैशम्पायनः—

[1]ततस्ते धृतराष्ट्रस्य भीष्मस्य च महात्मनः ।
अन्येषां च तदर्हाणां चक्रुः पादाभिवन्दनम् ॥ ७३
कृत्वा तु कुशलप्रश्नं सर्वस्य नगरस्य ते ।
[2]समाविशन्त वेश्मानि धृतराष्ट्रस्य शासनात् ॥ ७४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि सप्तनवत्यधिकशततमोऽध्यायः* ॥ १९७ ॥
॥ १४ ॥ विदुरागमनपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
(समाप्तं विदुरागमनपर्व)
[अस्मिन्नध्याये ७४ श्लोकाः]

॥ अष्टनवत्यधिकशततमोऽध्यायः ॥

(अथ राज्यलाभपर्व)

धृतराष्ट्रेण युधिष्ठिरस्य अर्धराज्येऽभिषेकः ॥ १ ॥ पाण्डवानां खाण्डवप्रस्थगमनम् ॥ २ ॥ श्रीकृष्णचिन्तितेनेन्द्रेण विश्वकर्मणः प्रेषणम् ॥ ३ ॥ विश्वकर्मणा इन्द्रप्रस्थपुरनिर्माणम् ॥ ४ ॥

वैशम्पायनः—

दुर्योधनस्य महिषी काशिराजसुता तदा ।
धृतराष्ट्रस्य पुत्राणां वधूभिस्सहिता तदा ॥ १

---

1. घ—एता वाचस्सुश्रुवानास् तैः पौरैस्समुदीरिताः ।
सुयोधनश्रुतिविषं विविशुर्नगरं तदा ॥ [अधिकः पाठः]
2. घ—जितेन्द्रियस्य भीष्मस्य त्यक्तसङ्गस्य सर्वतः ।
दृष्ट्वा [illegible] प्रीतिर् न मर्मा तस्य चात्मनि ॥[अधिकः पाठः]

* घ—कोशे नास्ति [illegible]

पाञ्चालीं प्रतिजग्राह [1]द्रौपदीं श्रीमिवापराम् ॥ १॥

[2]पूजयामास पूजार्हां शचीदेवीमिवागताम् ॥ २

[3]ववन्दे तत्र गान्धारीं माधवी कृष्णया सह ॥ २॥

आशिषश्च प्रयुक्त्वा तु पाञ्चालीं परिषस्वजे ॥ ३

परिष्वज्य च गान्धारी कृष्णां कमललोचनाम् ।
पुत्राणां मम पाञ्चाली मृत्युरेवेत्यमन्यत ॥ ४

सा चिन्त्य विदुरं प्राह युक्तितस्सुबलात्मजा ॥ ४॥

गान्धारी—

कुन्तीं राजसुतां क्षत्तस् सवधूं सपरिच्छदाम् ।
पाण्डोर्निवेशनं शीघ्रं नीयतां यदि रोचते ॥ ५॥

[4]करणेन मुहूर्तेन नक्षत्रेण शुभे तिथौ ।
यथा सुखं तथा कुन्ती रंस्यते स्वगृहे सुतैः ॥ ६॥

वैशम्पायनः—

तथेत्येव तदा क्षत्ता कारयामास तत्तदा ॥ ७

---

1. क-ग—साध्वीं श्रियमिवापराम् । घ—प्रत्यक्षां श्रीमिवापराम् ।
2. घ—यौवनेन सुवेषेण लावण्येन मुखश्रिया ।
सर्वाङ्गसौष्ठवेनैव देवकन्या विशेषतः ॥
योषितां भानुमत्याद्या दिवा दीपमिवाभवन् ॥ [अधिकः पाठः]
3. घ—कुन्तीं ववन्दे पूर्वं तां गान्धारीं पतिदेवताम् । [अधिकः पाठः]
4. घ—लग्ने गृहगता कुन्ती रंस्यते स्वगृहे यथा ।
कुरुष्वाद्य तथा शीघ्रं सर्वकामसमन्वितम् ॥ [अधिकः पाठः]

पूजयामासुरत्यर्थं बान्धवाः पाण्डवांस्तदा ।
नागराश्श्रेणिमुख्याश्च पूजयन्ति स्म पाण्डवान् ॥ ८

भीष्मो द्रोण[1]स्तथा कर्णो बाह्लीकस्ससुतस्तदा ।
शासनाद्धृतराष्ट्रस्य अकुर्वन्नातिथिक्रियाम् ॥ ९

एवं विहरतां तेषां पाण्डवानां महात्मनाम् ।
नेता सर्वस्य कार्यस्य विदुरो राजशासनात् ॥ १०

विश्रान्तास्ते महात्मानः कञ्चित् कालं सकेशवाः ।
आहूता धृतराष्ट्रेण राज्ञा शान्तनवेन च ॥ ११

[2]धृतराष्ट्रः—

भ्रातृभिस्सह कौन्तेय निबोध त्वं वचो मम ॥ ११॥

पाण्डुना वर्धितं राज्यं पाण्डुना पालितं जगत् ॥ १२

शासनान्मम कौन्तेय मम भ्राता महाबलः ।
कृतवान् दुष्करं कर्म नित्यमेव विशाम्पते ॥ १३

तस्मात् त्वमपि कौन्तेय शासनं कुरु मा चिरम् ॥ १३॥

मम पुत्रा दुरात्मानो दर्पाहङ्कारसंयुताः ।
शासनं न करिष्यन्ति मम नित्यं युधिष्ठिर ॥ १४॥

स्वकार्यनिरतैर्नित्यम् अवलिप्तैर्दुरात्मभिः ।

1. घ—:कृपः
2. घ—गत्वाऽभिवाद्य राजानं पुनः प्राञ्जलयस्थिताः । [अधिकः पाठः]

पुनर्वैं विग्रहो मा भूत् खाण्डवप्रस्थमाविश ॥ १५॥
न च वो वसतस्तत्र कश्चिच्छक्तः प्रबाधितुम् ।
संरक्ष्यमाणान् पार्थेन त्रिदशानिव वज्रिणा ॥ १६॥
अर्धराज्यं तु सम्प्राप्य खाण्डवप्रस्थमाविश ॥ १७
केशवो यदि मन्येत तन् कर्तव्यमसंशयम् ॥ १७॥

वैशम्पायनः—

प्रतिगृह्य तु ते वाक्यं नृपं सर्वे प्रणम्य च ।
वासुदेवेन सम्मन्त्र्य पाण्डवास्समुपाविशन् ॥ १८॥

1धृतराष्ट्रः—

अभिषेकस्य संभारान् क्षत्तरानय मा चिरम् ।
अभिषिक्तं करिष्यामि अद्य वै कुरुनन्दनम् ॥ १९॥

---

1. घ—श्रीभगवान्—

मा स्तु राज्यं पाण्डवानाम् अर्धं वा सर्वमेव वा ।
शास्तु दुर्योधनो राजा भ्रातृभिश्शरदां शतम् ॥
धर्मराजोऽनुजैस्सार्धं मात्रा कुन्त्या दिवानिशम् ।
कृष्णया सह राजेन्द्र भवन्तमुपतिष्ठतु ॥
अनाथाः पितृहीनाश्च लोके वदतु नोदिति ।
पितृवन्तो नाथवन्तो भवन्तु भवता अमी ॥

धृतराष्ट्रः—

पुत्राणां चैव मे कृष्ण पाण्डवानां च सर्वदा ।
त्वमेव राज्यं स्वर्गं च भोगमोक्षसुखानि च ॥
उभयेषां भवान् कर्ता शास्ता नेता पिता गुरुः ।
तदर्धराज्यं पाण्डूनां त्वमेवादिश केशव ॥
इत्युक्त्वा केशवं राजा विदुरं पुनरब्रवीत् ।
क्षिविधैः करणैः कष्टचित्तोऽसावम्बिकासुतः ॥ [अधिकः पाठः]

ब्राह्मणा नैगमश्रेष्ठाश् श्रेणीमुख्याश्च सर्वशः ।
आहूयन्तां प्रकृतयो बान्धवाश्च विशेषतः ॥ २०॥

पुण्याहं वाच्यतां तात गोसहस्रं तु दीयताम् ।
ग्राममुख्याश्च विप्रेभ्यो दीयन्तां [1]सहदक्षिणाः ॥ २१॥

अङ्गदे मकुटं क्षत्तर् हस्ताभरणमानय ॥ २२

मुक्तावलीश्च हारं च निष्कादीन् कुण्डलानि च ।
कटिबन्धश्च सूत्रं च तथोदरनिबन्धनम् ॥ २३

अष्टोत्तरसहस्रं तु ब्राह्मणाधिष्ठिता गजाः ।
जाह्नवीसलिलं शीघ्रम् आनीयन्तां पुरोहितैः ॥ २४

अभिषेकोदकक्लिन्नं सर्वाभरणभूषितम् ।
औपवाह्योपरिगतं दिव्यचामरवीजितम् ॥ २५

सुवर्णमणिचित्रेण श्वेतच्छत्रेण शोभितम् ।
जयेति द्विजवाक्येन स्तूयमानं नृपैस्तथा ॥ २६

दृष्ट्वा कुन्तीसुतं ज्येष्ठम् आजमीढं युधिष्ठिरम् ॥
[2]प्रीताः प्रीतेन मनसा प्रशंसन्तु पुरे जनाः ॥ २७

---

1. अ-ब्य—सहदक्षिणैः ।
2. घ—प्रीतः प्रीतेन मनसा विदुरादीनुवाच ह ।
मूर्धाभिषिक्तसंयुक्तं सुवर्णमणिभूषितम् ॥
महापर्वतसङ्काशं निर्मदं रोषवर्जितम् ।
महागजं समारोप्य प्रथयन्तु पुरे जनाः ॥ [अधिकः पाठः]

पाण्डोः कृतोपकारस्य राज्यं दत्वा ममैव च ।
प्रतिक्रिया कृतमिदं भविष्यति न संशयः ॥ २८

वैशम्पायनः—

भीष्मो द्रोणः कृपः क्षत्ता साधु साध्वित्यभाषत ॥ २८॥

श्रीवासुदेवः—

युक्तमेतन्महाराज कौरवाणां यशस्करम् ।
शीघ्रमद्यैव राजेन्द्र यथोक्तं कर्तुमर्हसि ॥ २९॥

वैशम्पायनः—

इत्येवमुक्त्वा वार्ष्णेयस् त्वरयामास तं तदा ॥ ३०
यथोक्तं धृतराष्ट्रश्च कारयामास कौरवः ॥ ३०॥
तस्मिन् क्षणे महाराज कृष्णद्वैपायनस्तदा ।
आगत्य कुरुभिस्सर्वैः पूजितस्ससुहृद्गणैः ॥ ३१॥
मूर्धावसिक्तैस्सहितो ब्राह्मणैर्वेदपारगैः ।
कारयामास विधिवत् केशवानुमते तदा ॥ ३२॥
कृपो द्रोणश्च भीष्मश्च धौम्यश्च व्यासकेशवौ ।
बाह्लीकस्सोमदत्तश्च चातुर्वेद्यपुरस्कृताः ॥ ३३॥
अभिषेकं तदा चक्रुर् भद्रपीठे सुसंयतम् ॥ ३४
जित्वा तु पृथिवीं कृत्स्नां वशे कृत्वा नरर्षभान् ।
राजसूयादिभिर्यज्ञैः क्रतुभिर्भूरिदक्षिणैः ॥ ३५

स्नात्वा ह्यवभृथस्नानं मोदतां बान्धवैस्सह ॥ ३५॥

एवमुक्त्वा तु ते सर्वे आशीर्भिरभिपूजयन् ॥ ३६

मूर्धाभिषिक्तः कौरव्यस् सर्वाभरणभूषितः ।
जयेति संस्तुतो राजा प्रददौ धनमक्षयम् ॥ ३७

सर्वमूर्धावसिक्तैश्च पूजितः कुरुनन्दनः ।
औपवाह्यमथारुह्य श्वेतच्छत्रेण शोभितः ॥ ३८

रराजानुगतो राजा महेन्द्र इव दैवतैः ॥ ३८॥

ततः प्रदक्षिणीकृत्य नगरं नागसाह्वयम् ।
प्रविवेश ततो राजा नागरैः पूजितो भृशम् ॥ ३९॥

मूर्धावसिक्तं कौन्तेयम् अभ्यनन्दन्त बान्धवाः ।
गान्धारिपुत्राश्शोचन्तस् सर्वे ते सह बान्धवैः ॥ ४०॥

ज्ञात्वा शोकं तु पुत्राणां धृतराष्ट्रोऽब्रवीन्नृपम् ।
समक्षं वासुदेवस्य कुरूणां च समक्षतः ॥ ४१॥

धृतराष्ट्रः—
अभिषेकं त्वया प्राप्तं दुष्प्रापमकृतात्मभिः ।
गच्छ त्वमद्यैव नृप कृतकृत्योऽसि कौरव ॥ ४२॥

आयुः पुरूरवा राजन् नहुषश्च ययातिना ।
तत्रैव निवसन्ति स्म खाण्ड[1]वाह्ये नृपोत्तम ॥ ४३॥

1. क-ग—वाख्ये

राजधानी तु सर्वेषां पौरवाणां महाभुज ।
विनाशितं मुनिगणैर् लोभाद्बुधसुतस्य तु ॥ ४४॥

तस्मात् त्वं खाण्डवप्रस्थं पुरं राष्ट्रं च वर्धय ॥ ४५

ब्राह्मणाः क्षत्रिया वैश्याश् शूद्राश्च कृतनिश्चयाः ।
त्वद्भक्त्या जन्तवश्चान्ये भजन्त्येव पुरं शुभम् ॥ ४६

पुरं राष्ट्रं समृद्धं वै धनधान्यैस्समावृतम् ।
तस्माद्गच्छस्व कौन्तेय भ्रातृभिस्सहितोऽनघ ॥ ४७

वैशम्पायनः—

प्रतिगृह्य तु ते वाक्यं नृपं सर्वे प्रणम्य च ।
रथैर्नागैर्हयैश्चापि सहितास्तु पदातिभिः ॥ ४८

प्रतस्थिरे ततो घोरं वनान्तं मनुजर्षभाः ॥ ४८॥

पाण्डवैस्साहिता गन्तुं नार्हतेति च नागरान् ।
घोषयामास नगरे धार्तराष्ट्रस्ससौबलः ॥ ४९॥

ततस्ते पाण्डवास्तत्र गत्वा कृष्णपुरोगमाः ।
मण्डयाञ्चक्रिरे तद्वै पुरं स्वर्गवदच्युताः ॥ ५०॥

वासुदेवो जगन्नाथश् चिन्तयामास वासवम् ।
महेन्द्रश्चिन्तितो राजन् विश्वकर्माणमादिशत् ॥ ५१॥

महेन्द्रः—

विश्वकर्मन् महाप्राज्ञ अद्यप्रभृति तत् पुरम् ।

इन्द्रप्रस्थमिति ख्यातं दिव्यं रम्यं भविष्यति ॥ ५२॥

वैशम्पायनः—

महेन्द्रशासनाद्गत्वा विश्वकर्मा तु केशवम् ।
प्रणम्य प्रणिपातार्हं किं करोमीत्यभाषत ॥ ५३॥
वासुदेवस्तु तच्छ्रुत्वा विश्वकर्माणमूचिवान् । ५४

वासुदेवः—

कुरुष्व कुरुराजाय महेन्द्रपुरसन्निभम् ।
इन्द्रेण कृतनामानम् इन्द्रप्रस्थं महापुरम् ॥ ५५

वैशम्पायनः—

ततः पुण्ये शिवे देशे शान्तिं कृत्वा महारथाः ।
स्वस्तिवाच्य यथान्यायम् इन्द्रप्रस्थं भवत्विति ॥ ५६
तत्पुरं प्रापयामासुर् द्वैपायनपुरोगमाः ॥ ५६॥
ततस्तु विश्वकर्मा तु चकार पुरमुत्तमम् ।
सागरप्रतिरूपाभिः परिखाभिरलङ्कृतम् ॥ ५७॥
प्राकारेण च सम्पन्नं दिवमावृत्य तिष्ठता ।
पाण्डुराभ्रप्रकाशेन वृतं शशिनिभेन च ॥ ५८॥
शुशुभे तत् पुरश्रेष्ठं नागैर्भोगवती यथा ॥ ५९
विपक्षगारुडप्रख्यैर् द्वारैर्घोरप्रदर्शनैः ।
गुप्तं मन्द्रघनप्रख्यैर् गोपुरैर्मन्दरोपमैः ॥ ६०

विविधैरतिनिर्विद्धैश् शस्त्रोपेतैस्सुसंवृतैः ।
शक्तिभिश्चावृतं तद्धि द्विजिह्वैरिव पन्नगैः ॥ ६१

तल्पैश्चाभ्याधिकैर्युक्तं शुशुभे योधरक्षितम् ॥ ६१॥

तीक्ष्णाभिश्च शतघ्नीभिर् यन्त्रजालैश्च शोभितम् ।
आयसैश्च महाचक्रैश् शुशुभे तत् पुरोत्तमम् ॥ ६२॥

सुविभक्तमहारथ्यं देवताबाधवर्जितम् ।
विरोचमानं विविधैः पाण्डुरैर्भवनोत्तमैः ॥ ६३॥

हर्म्यप्रासादसम्बाधं नानापण्यविभूषितम् ॥ ६४

विस्पर्धयेव प्रासादा अन्योन्यस्योच्छ्रिता भवन् ॥ ६४॥

मण्डपाश्च सभाशालाः प्रपाश्चैव समन्ततः ॥ ६५

तत् त्रिविष्टपसङ्काशम् इन्द्रप्रस्थं व्यरोचत ।
मेघवृन्दमिवाकाशे विद्धं विद्युत्समावृतम् ॥ ६६

इन्द्रप्रस्थस्य मध्ये तु कौरवस्य निवेशनम् ।
शुशुभे धनसम्पूर्णं धनाध्यक्षक्षयोपमम् ॥ ६७

गृहैरादर्शविमलैर् विविधैश्च लतागृहैः ।
मनोहरैश्चित्रगृहैस् तथाऽजगतिपर्वतैः ॥ ६८

पुष्करिण्यश्च विविधाः पद्मोत्पलसमावृताः ।
हंसकारण्डवाकीर्णाश् चक्रवाकोपशोभिताः ॥ ६९

रम्याश्च विविधास्तत्र वाप्यश्चैव वनावृताः ॥ ६९॥

वेश्ममध्ये शुभं दिव्यम् इन्द्रवासगृहोपमम् ।
राज्ञो वासगृहं रम्यं विश्वकर्माऽत्यकारयत् ॥ ७०॥

सुवर्णमणिसोपानं सर्वरत्नविचित्रितम् ॥ ७१
विहारभूम्यो विविधाः कारितास्सुमनोहराः ॥ ७१॥

तथा प्रासादमालाश्च शोभन्ते स्म सहस्रशः ॥ ७२
निरन्तरा राजमार्गास् स्त्रीरत्नैश्शोभितास्स्थिताः ॥ ७२॥

तत्रागच्छन् द्विजा राजन् सर्वे वेदविदां वराः ॥ ७३
निवासं रोचयन्ति स्म सर्वभाषाविदस्तथा ॥ ७३॥

वणिजश्चाभ्ययुस्तत्र देशेभ्योऽपि धनार्थिनः ।
सर्वशिल्पविदश्चैव वासायाभ्यागमंस्तदा ॥ ७४॥

उद्यानानि च रम्याणि नगरस्य समीपतः ।
सहकाराम्रपनसैः कपित्थैरप्युदुम्बरैः ॥ ७५॥

नालिकेरैश्च लिकुचैः कदलीभिश्च संवृताः ।
अशोकैस्तिलकैर्लोध्रैर् नीलाशोकैश्च चम्पकैः ॥ ७६॥

पुन्नागैर्नागवृक्षैश्च मधूकैश्च सुपुष्पितैः ।
सालतालकदम्बैश्च वकुलैश्च सकेतकैः ॥ ७७॥

जम्बूभिः पाटलीभिश्च अङ्कोलैरतिमुक्तकैः ।
कर्णिकारैः पारिजातैः करवीरैस्सुपुष्पितैः ॥ ७८॥

अन्यैश्च विविधैर्वृक्षैः फलभारावनामिभिः ।
नित्यपुष्पफलोपेतैश् शोभितास्ते गृहोत्तमाः ॥ ७९॥

तटाकानि च रम्याणि विविधानि दिशासु च ॥ ८०
नदी च नन्दिनी नाम सा पुरीमुपगूहते ॥ ८०॥

चातुर्वर्ण्यसमाकीर्णं मान्यैश्शिल्पिभिरावृतम् ।
उपभोगसमर्थैश्च सर्वद्रव्यैस्समावृतम् ॥ ८१॥

नित्यमार्यजनोपेतं नरनारीगणैर्युतम् ।
[1]मत्तवारणसम्पूर्णं गोभिरुष्ट्रैः खरैरजैः ॥ ८२॥

सर्वदाऽभिगतं सद्भिः कारितं विश्वकर्मणा ।
तत् त्रिविष्टपसङ्काशम् इन्द्रप्रस्थं व्यरोचत ॥ ८३॥

पुरीं सर्वगुणोपेतां निर्मितां विश्वकर्मणा ।
पौरवाणामधिपतिः कुन्तीपुत्रो युधिष्ठिरः ॥ ८४॥

कृतमङ्गलसत्कारो ब्राह्मणैर्वेदपारगैः ।
द्वैपायनं पुरस्कृत्य धौम्यस्यानुमते स्थितः ॥ ८५॥

---

1. घ—नानादेशपुरग्रामं कुर्वद्भि सहपट्टणैः ।
नानाजातिसमृद्धैस् स्वस्वकर्मरतैस्सदा ।
सुयोधनाज्ञामुल्लङ्घ्य हरिप्रस्थं सुपूरितम् ॥ [अधिकः पाठः]

भ्रातृभिस्सहितो राजन् केशवेन सहाभिभूः ।
[1]तोरणद्वारसुमुखं द्वात्रिंशद्द्वारसंयुतम् ॥ ८६॥
वर्धमानपुरद्वारं प्रविवेश महाद्युतिः ॥ ८७
शङ्खदुन्दुभिनिर्घोषाश् श्रूयन्ते बहवो भृशम् ।
जयेति ब्राह्मणगिरश् श्रूयन्ते च सहस्रशः ॥ ८८
संस्तूयमानो मुनिभिस् सूतमागधवन्दिभिः ।
औपवाह्यगतो राजा राजमार्गमतीत्य च ॥ ८९
कृतमङ्गलसत्कारं प्रविवेश गृहोत्तमम् ॥ ८९॥
प्रविश्य भवनं राजा सत्कारैरभिपूजितः ।
पूजयामास विप्रेन्द्रान् केशवेन यथाक्रमम् ॥ ९०॥
ततस्तु राष्ट्रं नगरं नरनारीगणायुतम् ।
गोधनैश्च समाकीर्णं सस्यवृद्धिस्तदाऽभवत् ॥ ९१॥
तेषां पुण्यजनोपेतं राष्ट्रमावसतां महत् ।

---

1. घ—नानाविधमहावाद्या महाघोषरवैर्दिशः ।
पूरयन् सुरलोकं च पुष्पवर्षं सुवर्षितम् ॥
नदत्सु दिव्यवाद्येषु गायत्स्वमरवन्दिषु ।
सुरयोषित्सु नृत्यत्सु सुरेष्वशुभशंसिषु ॥
शृण्वन् स्वस्तिवचस्सर्वं देवविप्रसमीरितम् ।
विलोकयन् प्रजास्सर्वाः कृपार्णःपूर्णया दृशा ॥
पद्भ्यां प्रदक्षिणं कृत्वा वाचा मधुरया नृपः ।
मन्दस्मितेन स्पर्शेन प्रियांश्च सुहृदस्तथा ।
कृतार्थयन् महीपांश्च मिलसम्बन्धिबान्धवान् ॥ [अधिकः पाठः]

पाण्डवानां महाराज शश्वत् प्रीतिरवर्धत ॥ ९२॥

सौबलेन च कर्णेन धार्तराष्ट्रैः कृपेण च ।
तथा भीष्मेण राज्ञा च धर्मप्रणयिनस्सदा ॥ ९३॥

पाण्डवास्समपद्यन्त खाण्डवप्रस्थवासिनः ॥ ९४

पञ्चभिस्तैर्महेष्वासैर् इन्द्रकल्पैस्समावृतम् ।
शुशुभे तत् पुरश्रेष्ठं नागैर्भोगवती यथा ॥ ९५

ततस्तु विश्वकर्माणं पूजयित्वा विसृज्य च ।
द्वैपायनं च सम्पूज्य विसृज्य च नराधिप ॥ ९६
वार्ष्णेयमब्रवीद्राजा गन्तुकामं कृतक्षणम् ॥ ९६॥

युधिष्ठिरः—
तव प्रसादाद्वार्ष्णेय राज्यं प्राप्तं मयाऽनघ ॥ ९७
प्रसादादेव ते वीर शून्यं राष्ट्रं सुदुर्गमम् ॥ ९७॥

तवैव तु प्रसादेन राज्यस्याश्च महामते ॥ ९८

गतिस्त्वमन्तकाले च पाण्डवानां तु माधव ।
माताऽस्माकं पिता देवो न पाण्डुं विद्म वै वयम् ॥ ९९
[1]ज्ञात्वा तु कृत्यं कर्तव्यं कारयस्व भवान् हि नः ॥ ९९॥

1. घ—कर्तव्यं नः कृतं कर्म कृत्यं ज्ञात्वा च केशव ।
अस्माकं यद्धितं कृत्यं तत् कर्तव्यं त्वयाऽनघ ॥
त्वत्प्रेरिता वयं कृत्यं स्वर्गं वा श्वभ्रमेव वा ।
गच्छाम पुरुषव्याघ्र त्वमस्माकं गतिर्भव ॥ [अधिकः पाठः]

यदिष्टमनुमन्तव्यं पाण्डवानां त्वयाऽनघ ॥ १००

श्रीवासुदेवः—

त्वत्प्रभावान्महाभाग राज्यं प्राप्तं स्वधर्मतः ।
पितृपैतामहं राज्यं कथं न स्यात्तव प्रभो ॥ १०१
धार्तराष्ट्रा दुराचाराः किं करिष्यन्ति पाण्डवान् ॥ १०१॥
यथेष्टं पालय महीं सदा धर्मधुरं वह ॥ १०२
धर्मोपदेशं संक्षेपाद् ब्राह्मणान् भज कौरव ।
अद्यैव नारदश्श्रीमान् आगमिष्यति सत्वरः ॥ १०३
आदृत्य तस्य वाक्यानि शासनं कुरु तस्य वै ॥ १०३॥

वैशम्पायनः—

एवमुक्त्वा ततः कुन्तीम् अभिवाद्य जनार्दनः ।
उवाच श्लक्ष्णया वाचा गमिष्यामि नमोऽस्तु ते ॥ १०४॥

कुन्ती—

जातुषं गृहमासाद्य मया प्राप्तं च केशव ।
आर्येण चापि न ज्ञातं कुन्तिभोजेन चानघ ॥ १०५॥
त्वया नाथेन गोविन्द दुःखं तीर्णं महत्तरम् ।
त्वं हि नाथस्त्वनाथानां दरिद्राणां विशेषतः ॥ १०६॥
सर्वदुःखानि शाम्यन्ति तव सन्दर्शनान्मम ॥ १०७
स्मरस्वैनान् महाप्राज्ञ तेन जीवन्ति पाण्डवाः ॥ १०७॥

वैशम्पायनः—

करिष्यामीति चामन्त्र्य अभिवाद्य पितृष्वसाम् ।
गमनाय मतिं चक्रे वासुदेवस्सहानुगः ॥ १०८॥

[1]तां निवर्त्य ततो वीरस् सह रामेण केशवः ।
ययौ द्वारवतीं राजन् पाण्डवानुमते तदा ॥ १०९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि अष्टनवत्यधिकशततमोऽध्यायः ॥ १९८ ॥
॥ १५ ॥ राज्यलाभपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[अस्मिन्नध्याये १०९॥ श्लोकाः]

॥ एकोनद्विशततमोऽध्यायः ॥

पाण्डवानां समीपे नारदागमनम् ॥ १ ॥

जनमेजयः—

एवं सम्प्राप्य राज्यं तद् इन्द्रप्रस्थे तपोधन ।
अत ऊर्ध्वं नरव्याघ्राः किमकुर्वत पाण्डवाः ॥ १

सर्व एव महात्मानस् सर्व एव पितामहाः ।
द्रौपदी धर्मपत्नी च कथं तानन्वर्तत ॥ २

---

1. घ—महाप्रसाद इत्युक्त्वा तां नमस्कृत्य केशवः ।
पाण्डवानात्मसात्कृत्वा योगक्षेमे तथा तयोः ।
आमन्त्र्य ब्राह्मणान् सर्वान् राज्ञः पुण्यकृतो हरिः ॥
ययौ द्वारवतीं [अधिकः पाठः]

कथमासंश्च कृष्णायाम् एकस्यां ते नराधिपाः ।
वर्तमाना महेष्वासा नाभिद्यन्त परस्परम् ॥ ३

श्रोतुमिच्छाम्यहं तत्र विस्तरेण यथातथम् ।
तेषां चेष्टितमन्योन्यं युक्तानां कृष्णया सह ॥ ४

वैशम्पायनः—

धृतराष्ट्राभ्यनुज्ञाता इन्द्रप्रस्थं प्रविश्य तत् ।
रेमिरे पुरुषव्याघ्राः कृष्णया सह पाण्डवाः ॥ ५

प्राप्य राज्यं महातेजास् सत्यसन्धो युधिष्ठिरः ।
पालयामास धर्मेण पृथिवीं भ्रातृभिस्सह ॥ ६

जितारयो महाप्राज्ञास् सत्यधर्मपरायणाः ।
मुदं परामिकां प्राप्तास् तत्रोषुः पाण्डुनन्दनाः ॥ ७

कुर्वाणाः पौरकार्याणि सर्वाणि भरतर्षभ ।
आसाञ्चक्रुर्महार्हेषु परार्ध्येष्वासनेषु च ॥ ८

तेषु तत्रोपविष्टेषु पाण्डवेषु महात्मसु ।
आययौ धर्मराजं तु द्रष्टुकामोऽथ नारदः ॥ ९

पथा नक्षत्रजुष्टेन सुपर्णचरितेन च ।
चन्द्रसूर्यप्रकाशेन सेवितेन महर्षिभिः ॥ १०

नभस्स्थलेन दिव्येन दुर्लभेनातपस्विनाम् ।
भूतार्चितो भूतधरं राष्ट्रं नगरभूषितम् ॥ ११

अवेक्षमाणो द्युतिमान् आजगाम महातपाः ॥ ११॥

सर्ववेदान्तगो विप्रस् सर्वविद्यासु पारगः ।
परेण तपसा युक्तो ब्राह्मेण तपसा वृतः ॥ १२॥

नये नीतौ च निरतो विश्रुतश्च महामुनिः ।
[1]परात् परतरं प्राप्तो धर्मात् समभिजग्मिवान् ॥ १३॥

भावितात्मा गतरजाश् शान्तो मृदुर्ऋजुर्द्विजः ।
धर्मेणाधिगतस्सर्वैर् देवदानवमानुषैः ॥ १४॥

[2]क्षीणकर्मसु पापेषु भूतेषु विविधेषु च ।
सर्वथा कृतमर्यादो वेदेषु विविधेषु च ॥ १५॥

शतशस्सोमपा यज्ञे सदा पुण्यकृदग्रिचित् ।
ऋक्सामयजुषां वेत्ता न्यायवृत्तान्तकोविदः ॥ १६॥

ऋजुरारोहवाञ्छुक्लो भूयिष्ठपथिकोऽनघः ।
श्लक्ष्णया शिखयोपेतस् सम्पन्नः परमत्विषा ॥ १७॥

अवदाते च सूक्ष्मे च दिव्ये च रुचिरे शुभे ।
महेन्द्रदत्ते महती बिभ्रन् परमवाससी ॥ १८॥

जाम्बूनदमये दिव्ये गण्डलम्बिमुखे नवे ।
अग्न्यर्कसदृशे दिव्ये धारयन् कुण्डले शुभे ॥ १९॥

---

1. घ — काष्ठां परमिकां प्राप्तो धर्मकामस्समाधिमान् ।
2. घ — अक्षीणवृत्तधर्मश्च संसारभयवर्जितः ।

राजतच्छत्रमुच्छ्रित्य चित्रं परमवर्चसम् ।
प्राप्य दुष्प्रापमन्येन ब्रह्मवर्चसमुत्तमम् ॥ २०॥
भवने भूमिपालस्य बृहस्पतिरिवाप्लुतः ॥ २१
संहितायां च सर्वेषां स्थितस्योपस्थितस्य च ।
द्विपदस्य च धर्मस्य क्रमधर्मस्य पारगः ॥ २२
गाथासामानुधर्मज्ञस् साम्नां परमवल्गुनाम् ।
आत्मना सर्वमोक्षिभ्यः कृतिमान् कृत्यवित्तदा ॥ २३
योक्ता धर्मे बहुविधे मनो मतिमतां वरः ।
[1]विदितार्थस्समश्चैव छेत्ता निगमसंशयान् ॥ २४
अर्थनिर्वचने नित्यं संशयच्छिदसंशयः ।
प्रकृत्या धर्मकुशलो नानाधर्मविशारदः ॥ २५
लोपेनागमधर्मेण सङ्क्रमेण च वृत्तिषु ।
एकशब्दांश्च नानार्थान् एकार्थांश्च पृथक्कृतान् ॥ २६
पृथगर्थाभिधानांश्च प्रयोगाणामवेक्षिता ॥ २६॥
प्रमाणभूतो लोकस्य सर्वाधिकरणेषु च ।
सर्ववर्णविकारेषु नित्यं सकलपूजितः ॥ २७॥
स्वरेऽस्वरे च विविधे वृत्तेषु विविधेषु च ।
समस्थानेषु सर्वेषु समाम्नायेषु धातुषु ॥ २८॥

1. क-ग—विदितार्थः स्वसमय ; घ—विदितार्थः समश्चैव

उद्देश्यानां समाख्याता सर्वमाख्यातमुद्दिशन् ॥ २९
अभिसन्धिषु [1]सर्वज्ञः पदान्यङ्गान्यनुस्मरन् ॥ २९॥
कालधर्मेण निर्दिष्टं यथार्थं च विचारयन् ।
चिकीर्षितं च यो वेत्ता [2]यथा लोकेन संवृतम् ॥ ३०॥
विभाषितं च समयं भाषितं हृदयङ्गमम् ।
आत्मने च परस्मै च स्वरसंस्कारयोगवान् ॥ ३१॥
एषां स्वराणां [3]वेत्ता च बोद्धा च वचनस्वरान् ।
विज्ञाता चोक्तवाक्यानाम् एकतां बहुतां तथा ॥ ३२॥
बोद्धा हि परमार्थांश्च विविधांश्च व्यतिक्रमान् ।
अभेदतश्च बहुशो बहुशश्चापि भेदतः ॥ ३३॥
वचनानां विविधानां च देशानां च समीक्षिता ।
नानार्थकुशलस्तत्र तद्धितेषु च सर्वशः ॥ ३४॥
परिभूषयिता वाचां वर्णतस्स्वरतोऽर्थतः ॥ ३५
प्रत्ययांश्च समाख्याता नियतं प्रतिधातुकम् ।
पञ्च चाक्षरजातानि स्वरसंज्ञानि यानि च ॥ ३६
नारदस्त्वथ देवर्षिर् आजगाम यदृच्छया ॥ ३६॥
तमागतमृषिं दृष्ट्वा प्रत्युद्गम्याभिवाद्य च ।

1. क-ख-ग-घ—तत्त्वज्ञः 2. अ-ख-घ - शर्करीतेन
3. क-ख-घ—ज्ञाता च बोद्धा प्रवचनस्वरान् ।

आसनं रुचिरं तस्मै स्वं ददौ स युधिष्ठिरः ॥ ३७॥

कृष्णाजिनोत्तरे तस्मिन्नुपविष्टो महानृषिः ॥ ३८

देवर्षेरुपविष्टस्य स्वयमर्घ्यं यथाविधि ।
प्रादाद्युधिष्ठिरो धीमान् राज्यं चास्मै न्यवेदयत् ॥ ३९

प्रतिगृह्य तु तां पूजाम् ऋषिः प्रीतमना भवत् ।
आशीर्भिर्वर्धयित्वा तु तमुवाचास्यतामिति ॥ ४०

निषसादाभ्यनुज्ञातस् तदा राजा युधिष्ठिरः ।
प्रेषयामास कृष्णायै भगवन्तमुपस्थितम् ॥ ४१

श्रुत्वैतद्द्रौपदी चैव शुचिर्भूत्वा समाहिता ।
जगाम तत्र यत्रास्ते नारदः पाण्डवैस्सह ॥ ४२

तस्याभिवाद्य चरणौ देवर्षेर्धर्मचारिणी ।
कृताञ्जलिस्सुसंवीता स्थिता वै द्रुपदात्मजा ॥ ४३

तस्याश्चापि स धर्मात्मा सत्यवागृषिसत्तमः ।
आशिषो विविधाः प्रोच्य राजपुत्र्यास्तु नारदः ॥ ४४

गम्यतामिति चोवाच भगवांस्तामनिन्दिताम् ॥ ४४॥

गतायामथ कृष्णायां युधिष्ठिरपुरोगमान् ।
विविक्ते पाण्डवान् सर्वान् उवाच भगवानृषिः ॥ ४५॥

नारदः—

पाञ्चाली भवतामेका धर्मपत्नी ॥ ।

यथा वो नात्र भेदस्स्यात् तथा नीतिर्विधीयताम् ॥ ४६॥
सुन्दोपसुन्दौ ह्यसुरौ भ्रातरौ सहितावुभौ ।
देवैरवध्यावसुरौ त्रिषु लोकेषु विश्रुतौ ॥ ४७॥
एकराज्यावेकगृहावेकशय्यासनाशनौ ।
तिलोत्तमायास्तौ हेतोर् अन्योन्यमभिजघ्नतुः ॥ ४८॥
रक्ष्यतां सौहृदं तस्माद् अन्योन्यं प्रति भाविकम् ।
यथा वो नात्र भेदस्स्यात् तत् कुरुष्व युधिष्ठिर ॥ ४९॥

युधिष्ठिरः—

सुन्दोपसुन्दावसुरौ कस्य पुत्रौ महामुने ।
उत्पन्नश्च कथं भेदः कथं चान्योन्यमघ्नताम् ॥ ५०॥
अप्सरा देवकन्या वा कस्य वैषा तिलोत्तमा ।
यस्याः कामेन सम्मत्तौ जघ्नतुस्तौ परस्परम् ॥ ५१॥
एतत्सर्वं यथा वृत्तं विस्तरेण तपोधन ।
श्रोतुमिच्छामहे विप्र परं कौतूहलं हि नः ॥ ५२॥

नारदः—

शृणु मे विस्तरेणेदम् इतिहासं पुरातनम् ।
भ्रातृभिस्सहितः पार्थ यथावृत्तं युधिष्ठिर ॥ ५३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि एकोनद्विशततमोऽध्यायः ॥ १९९ ॥
॥ १५ ॥राज्यलाभपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[अस्मिन्नध्याये ५३॥ श्लोकाः]

॥ द्विशततमोऽध्यायः ॥

सुन्दोपसुन्दकथा-सुन्दोपसुन्दयोर्ब्रह्मणो वरलाभः ॥ १ ॥ सुन्दोपसुन्दयोः दिग्विजयः कुरुक्षेत्रे निवासश्च ॥ २ ॥ सुन्दोपसुन्दकृतोपद्रवं निवेद्य देवादिभिः प्रार्थितेन ब्रह्मणा आज्ञप्तेन विश्वकर्मणा तिलोत्तमासृष्टिः ॥ ३ ॥ तिलोत्तमया ब्रह्माज्ञास्वीकारः ॥ ४ ॥ सुन्दोपसुन्दसमीपे तिलोत्तमाया आगमनम् ॥ ५ ॥ तस्यां सकामयोस्तयोः परस्परं गदाप्रहारेण मरणम् ॥ ६ ॥ तिलोत्तमायै ब्रह्मणा वरदानम् ॥ ७ ॥ नारदोक्तामिमां कथां श्रुतवद्भिः पाण्डवैः तत्समक्षं द्रौपदीविषये समयकरणम् ॥ ८ ॥

नारदः—

महासुरस्यान्ववाये हिरण्यकशिपोः पुरा ।
निकुम्भो नाम दैत्येन्द्रस् तेजसा बलवानभूत् ॥ १

तस्य पुत्रौ महावीर्यौ जातौ भीमपराक्रमौ ।
सहान्योन्येन भुञ्जाते विनाऽन्योन्यं न गच्छताम् ॥ २

अन्योन्यस्य प्रियकरावन्योन्यस्य प्रियंवदौ ।
एकशीलसमाचारौ द्विधैवैकोऽभवच्च यौ ॥ ३

तौ विवृद्धौ महावीर्यौ कार्येष्वप्येकनिष्ठितौ ॥ ३॥

त्रैलोक्यविजये यत्तौ समास्थायैकनिश्चयम् ।
दीक्षां कृत्वा गतौ विन्ध्यं तत्रोग्रं तेपतुस्तपः ॥ ४॥

तौ तु दीर्घेण कालेन तपोयुक्तौ बभूवतुः ॥ ५

क्षुत्पिपासापरिश्रान्तौ जटावल्कलधारिणौ ।

मलोपचितसर्वाङ्गौ वायुभक्षौ बभूवतुः ॥ ६

आत्ममांसानि जुह्वन्तौ पादाङ्गुष्ठाग्रविष्ठितौ ।
ऊर्ध्वबाहू ह्यनिमिषौ दीर्घकालं धृतव्रतौ ॥ ७

तयोस्तपःप्रभावेण दीर्घकालं प्रतापितः ।
धूमं प्रमुमुचे विन्ध्यस् तदद्भुतमिवाभवत् ॥ ८

ततो देवा भवन भीता उग्रं दृष्ट्वा तयोस्तपः ।
ततस्तपोविघातार्थं देवा विघ्नानि चक्रिरे ॥ ९

रत्नैः प्रलोभयामासुस् स्त्रीभिश्चोभौ पुनः पुनः ।
न च तौ चक्रतुर्भङ्गं व्रतस्य तु महाव्रतौ ॥ १०

[1]अथ मायां पुनर्देवास् तयोश्चक्रुर्महात्मनोः ॥ १०॥

भगिन्यो मातरो भार्यास् तयोर्बन्धुजनास्तथा ।
परीयमाना वित्रस्ताश् शूलहस्तेन रक्षसा ॥ ११॥

स्रस्ताभरणकेशान्ता एकान्तभ्रष्टवाससः ।
[2]अभिभाष्य तु तास्सर्वास् तौ त्राहीति पुनः पुनः ॥ १२॥

यदा क्षोभं न गच्छेताम् आर्तिं वैकतरस्तयोः ।
ततस्त्रियस्तास्सन्त्रस्तास् सर्वमन्तरधीयत ॥ १३॥

---

1. घ—यदा तौ तपसो भङ्गं व्रतस्य सुमहाव्रतौ । [अधिकः पाठः]
2. घ—न हि तौ चक्रतुर्भङ्गं व्रतस्य सुमहाव्रतौ ।
यदा तौ तपसो भङ्गं चक्रतुर्दृढमानसौ ॥ [अधिकः पाठः]

ततः पितामहस्साक्षाद् अभिगम्य महासुरौ ।
वरेण च्छन्दयामास सर्वलोकपितामहः ॥ १४॥

ततस्सुन्दोपसुन्दौ तौ भ्रातरौ दृढविक्रमौ ।
दृष्ट्वा पितामहं देवम् उभौ तौ प्राञ्जली तदा ॥ १५॥

[1]ऊचतुश्च प्रभुं देवं ततस्तौ सहितौ तदा ॥ १६

सुन्दोपसुन्दौ—

आवयोस्तपसाऽनेन यदि प्रीतः पितामहः । १६॥
मायाविदावस्त्रविदौ बलिनौ कामरूपिणौ ।
उभावप्यमरौ स्यावः प्रसन्नो यदि नौ प्रभुः ॥ १७॥

पितामहः—

ऋतेऽमरत्वमन्यद्वां सर्वमुक्तं भविष्यति ।
अन्यद्वृणीतं मृत्योश्च विधानममरैस्सह ॥ १८॥

सुन्दोपसुन्दौ—

करिष्यावेदमिति यन्महदप्युत्थितं तपः ।
आवयोर्हेतुना केन नामरत्वं विधीयते ॥ १९॥

पितामहः—

त्रैलोक्यविजयार्थाय भवद्भ्यामास्थितं तपः ।
हेतुनाऽनेन दैत्येन्द्रौ न वां कामं करोम्यहम् ॥ २०॥

---

1. घ—निश्चित्य मनसाऽन्योन्यं चिरमात्माभिकाङ्क्षितम् ।
अवृणीतां वरं भीमौ सर्वलोकभयङ्करौ ॥ [अधिकः पाठः]

सुन्दोपसुन्दौ—

त्रिषु लोकेषु यद्भूतं सर्वं स्थावरजङ्गमम् ।
सर्वस्मान्नौ भयं न स्याद् ऋतेऽन्योन्यात् पितामह ॥ २१॥

पितामहः—

यत् प्रार्थितं यथोक्तं तत् काममेव ददामि वाम् ।
मृत्योर्विधानमेतच्च यथावद्वां भविष्यति ॥ २२॥

नारदः—

ततः पितामहो दत्त्वा वरमेतत्तदा तयोः ।
निवर्त्य तपसस्तौ च ब्रह्मलोकं जगाम ह ॥ २३॥

लब्ध्वा वराणि सर्वाणि दैत्येन्द्रावपि तावुभौ ।
अवध्यौ सर्वलोकस्य [1]स्वयमेवावनिं गतौ ॥ २४॥

तौ तु लब्धवरौ दृष्ट्वा कृतकामौ महासुरौ ।
सर्वसुहृज्जनस्ताभ्यां प्रहर्षमुपजग्मिवान् ॥ २५॥

ततस्तौ तु जटा भित्त्वा मौलिनौ सम्बभूवतुः ।
महार्हाभरणोपेतौ विरजोम्बरधारिणौ ॥ २६॥

अकालकौमुदीं चैवं चक्रतुस्सार्वकालिकीम् ॥ २७

दैत्येन्द्रौ परमप्रीतौ तयोश्चैव सुहृज्जनः ॥ २७॥

भक्ष्यतां भुज्यतां नित्यं रम्यतां गीयतामिति ।
पीयतां दीयतां चेति वाच आसन् गृहे गृहे ॥ २८॥

[1] क.-ग-घ—स्वमेव भवनं

तत्र तत्र महानादैर् उद्वुष्टतलनादितैः ।
[1]हृष्टं प्रमुदितं सर्वं दैत्यानामभवत् पुरम् ॥ २९॥

तैस्तैर्विहारैर्बहुभिर् दैत्येन्द्राणां महौजसाम् ।
समास्संक्रीडतां तेषाम् अहरेकमिवाभवत् ॥* ३०॥

उत्सवे वर्तमाने तु त्रैलोक्याकाङ्क्षिणावुभौ ।
मन्त्रयित्वा ततस्सेनां तावाज्ञापयतां तदा ॥ ३१॥

सुहृद्भिरभ्यनुज्ञातौ दैत्यवृद्धैश्च मन्त्रिभिः ।
कृत्वा प्रास्थानिकीं यात्राम् असुरौ ययतुस्तदा ॥ ३२॥

गदापट्टिसधारिण्या शूलमुद्गरहस्तया ।
प्रस्थितौ सहधर्मिण्या महत्या दैत्यसेनया ॥ ३३॥

मङ्गलैस्स्तुतिभिश्चापि विजयं प्रति संहितौ ।
चारणैस्स्तूयमानौ तौ जग्मतुः परया मुदा ॥ ३४॥

तावन्तरिक्षमुत्पत्य दैत्यौ कामगमावुभौ ।
देवानामेव भवनं जग्मतुर्युद्धदुर्मदौ ॥ ३५॥

तयोरागमनं ज्ञात्वा वरदानं च तत् प्रभोः ।
हित्वा त्रिविष्टपं जग्मुर् ब्रह्मलोकं ततस्सुराः ॥ ३६॥

---

1. घ पारावतरवस्सर्वः केकारं कोकिलारवः ।
कस्तूरिलिप्तसर्वाङ्गस् सर्वाभरणभूषितः ।
सुगन्धलेपमाल्याढ्यस्त्रीरत्नसुरताकुलः ॥ [अधिकः पाठः]

* अ-क ख-ग कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते ।

ताविन्द्रलोकं निर्जित्य यक्षरक्षोगणांस्तथा ।
खेचराण्यपि भूतानि जघ्नतुस्तीव्रविक्रमौ ॥ ३७॥

अन्तर्भूमिगतान् नागाञ् जित्वा तौ तु महासुरौ ।
समुद्रवासिनीस्सर्वा म्लेच्छजातीर्विजिग्यतुः ॥ ३८॥

ततस्सर्वां महीं जेतुम् आरब्धावुग्रशासनौ ।
सैनिकांश्च समाहूय सुतीक्ष्णां वाचमूचतुः ॥ ३९॥

राजर्षयो महायज्ञैर् हव्यकव्यैर्द्विजातयः ।
तेजो बलं च देवानां वर्धयन्ते श्रियं तथा ॥ ४०॥

तेषामेवं प्रवृद्धानां सर्वेषामसुरद्विषाम् ।
सम्भूय सर्वैरस्माभिः कार्यस्सर्वात्मना वधः ॥ ४१॥

एवं सर्वान समादिश्य पूर्वतीरे महोदधेः ।
क्रूरां मतिं समास्थाय जग्मतुस्सर्वतोदिशम् ॥ ४२॥

यज्ञैर्यजन्ते ये के चिद् याजयन्ति च ये द्विजाः ।
तान् सर्वानसुरौ दृष्ट्वा बलिनौ जघ्नतुस्ततः ॥ ४३॥

आश्रमेष्वग्निहोत्राणि ऋषीणां भावितात्मनाम् ।
गृहीत्वा प्रक्षिपन्त्यप्सु विस्रब्धास्सैनिकास्तदा ॥ ४४॥

तपोधनैश्च ये शापाः क्रुद्धैरुक्ता महात्मभिः ।
नाक्रामन्ति तयोस्तेन वरदानेन च प्रभो ॥ ४५॥

नाक्रामन्ति यदा शापा बाणा मुक्ताद्रिशिलास्विव ।

नियमांस्तु परित्यज्य विद्रवन्ति द्विजातयः ॥ ४६॥

पृथिव्यां ये तपस्सिद्धाश् शान्ता दमपरायणाः ।
तयोर्भयाद्दुद्रुविरे वैनतेयादिवोरगाः ॥ ४७॥

मथितैराश्रमैर्भग्नैर् विकीर्णैः कलशैस्तुवैः ।
शून्यमासीज्जगत्सर्वं कालेनेव हतं यथा ॥ ४८॥

ततो राजन्नदृश्यद्भिर् ऋषिभिश्च तपोधनैः ।
उभौ विनिश्चयं कृत्वा विकुर्वाणौ वधैषिणौ ॥ ४९॥

प्रभिन्नकरटौ मत्तौ भूत्वा कुञ्जररूपिणौ ।
सँल्लीनानपि दुर्गेषु निन्यतुर्यमसादनम् ॥ ५०॥

सिंहौ भूत्वा पुनर्व्याघ्रौ पुनश्चान्तर्हितावुभौ ।
तैरुपायैस्तु तान् क्रुद्धान् ऋषीन् दृष्ट्वा निजघ्नतुः ॥ ५१॥

निवृत्तनित्यस्वाध्याया प्रनष्टनृपतिद्विजा ।
उत्सन्नोत्सवयज्ञा च बभूव वसुधा तदा ॥ ५२॥

हाहाभूता भयार्ता च निवृत्तविपणापणा ।
निवृत्तदेवकार्या च पुण्योद्वाहविवर्जिता ॥ ५३॥

निवृत्तकृषिगोरक्षा विध्वस्तनगराश्रया ।
अस्थिकङ्कालसङ्कीर्णा बभूव ह्युग्रदर्शना ॥ ५४॥

निवृत्तपितृकार्यं च निर्वषट्कारमङ्गलम् ।

जगत् प्रतिभयाकारं दुष्प्रेक्ष्यमभवत् तदा ॥ ५५॥
चन्द्रादित्यौ ग्रहास्तारा नक्षत्राणि दिवौकसः ।
जग्मुर्विषादं तत् कर्म दृष्ट्वा सुन्दोपसुन्दयोः ॥ ५६॥
एवं सर्वा दिशो दैत्यौ जित्वा क्रूरेण कर्मणा ;
निस्सपत्नौ कुरुक्षेत्रे निवेशमभिचक्रतुः* ॥ ५७॥
ततो देवर्षयस्सर्वे सिद्धाश्च परमर्षयः ।
जग्मुस्तदा परामार्तिं दृष्ट्वा तत्कदनं महत् ॥ ५८॥
तेऽभिजग्मुर्जितक्रोधा जितात्मानो जितेन्द्रियाः ।
पितामहस्य भवनं जग्मुस्ते शोककातराः ॥ ५९॥
ततो ददृशुरासीनं सह देवैः पितामहम् ।
सिद्धैर्ब्रह्मर्षिभिश्चैव समन्तात् परिवारितम् ॥ ६०॥
तत्र विष्णुर्महादेवस् तवाग्निर्वायुना सह ।
चन्द्रादित्यौ च धर्मश्च परमेष्ठी तथा बुधः ॥ ६१॥
वैखानसा वालखिल्यास् सोमपाश्च मरीचिपाः ।
अजाश्चैवाजमीढाश्च तेजोगर्भास्तपस्विनः ॥ ६२॥
ऋषयस्सर्व एवैते पितामहमुपासते ॥ ६३
ततोऽभिगम्य सहिताम् सर्व एव महर्षयः ।
सुन्दोपसुन्दयोः कर्म सर्वमेवाशशंसिरे ॥ ६४

* अ-क-ख-ग - कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

यथा हृतं यथा चैव कृतं येन क्रमेण च ।
[1]न्यवेदयंस्ततस्सर्वम् अखिलेन पितामहम् ॥ ६५

ततो देवगणास्सर्वे ते चैव परमर्षयः ।
तमेवार्थं पुरस्कृत्य पितामहमचोदयन् ॥ ६६

ततः पितामहश्श्रुत्वा सर्वेषां तद्वचस्तदा ।
मुहूर्तमिव सञ्चिन्त्य कर्तव्यस्य विनिश्चयम् ॥ ६७

तयोर्वधं समुद्दिश्य विश्वकर्माणमाह्वयत् ॥ ६७॥

दृष्ट्वा च विश्वकर्माणं व्यादिदेश पितामहः ।
सृज्यतां प्रार्थनीयेन रूपेण स्त्रीत्यथाब्रवीत् ॥ ६८॥

पितामहं नमस्कृत्य तद्वाक्यमभिनन्द्य वै ।
निर्ममेऽपि च तां दिव्यां चिन्तयित्वा प्रयत्नतः ॥ ६९॥

त्रिषु लोकेषु यत् किञ्चिद् भूतं स्थावरजङ्गमम् ।

---

1. घ—यदा न प्रतिपेद्वारस् तयोस्मन्तीह के चन ।
निरुद्योगो तथा भूत्वा विज्ञहातेऽमराविव ॥
पुरे पुरवनोद्याने पर्वतोपवनेऽपि च ।
यथेप्सितेषु सर्वत्र विजहातेऽमराविव ॥
ततः कदाचिद्विन्ध्यस्य पृष्ठे तस्य शिलातले ।
पुष्पिताग्रेषु सालेषु विहारमभिजग्मतुः ॥
दिव्येषु सर्वकामेषु सर्वासीनेषु तत्र वै ।
वरासनेषु संहृष्टास् सह स्त्रीभिर्निषीदतुः ॥
ततो वादित्रनृत्ताभ्याम् उपातिष्ठन्त तास्स्त्रियः ।
गीतैश्च सुसमायुक्तैः प्रीत्यर्थमुपजग्मिरे ॥ [अधिकः पाठः]

समानयद्दर्शनीयं तत्तद्यत्नात् ततस्ततः ॥ ७०॥

तिलशश्चैव रत्नानि तस्या गात्रे न्यवेशयत् ।
तां रत्नसङ्घातमयीम् असृजद्देवरूपिणीम् ॥ ७१॥

सा प्रयत्नेन महता निर्मिता विश्वकर्मणा ।
त्रिषु लोकेषु नारीणां रूपेणाप्रतिमा भुवि ॥ ७२॥

न तस्यास्सूक्ष्ममप्यस्ति यद्गात्रे रूपसम्पदा ।
निर्मितं सर्वगात्रेषु यत्र दृष्टिर्न सज्जते ॥ ७३॥

सा विग्रहवतीव श्रीः कान्तरूपा वपुष्मती ।
पितामहमुपातिष्ठत् किं करोमीति चाब्रवीत् ॥ ७४॥

प्रीतो भूत्वा स दृष्ट्वैव प्रीत्या चास्यै वरं ददौ ।
कान्तत्वं सर्वभूतानां स्वश्रियाऽनुपमं वपुः ॥ ७५॥

सा तेन वरदानेन कर्तुश्च क्रियया तदा ।
जहार सर्वभूतानां चक्षूंषि च मनांसि च ॥ ७६॥

तिलं तिलं समादाय रत्नानां यद्विनिर्मिता ।
तिलोत्तमेत्यतस्तस्या नाम चक्रे पितामहः ॥ ७७॥

पितामहः—

गच्छ सुन्दोपसुन्दाभ्याम् असुराभ्यां तिलोत्तमे ।
प्रार्थनीयेन रूपेण कुरु भद्रे प्रलोभनम् ॥ ७८॥

त्वत्कृते दर्शनादेव रूपसंपत्कृते च वै ।

विरोधस्स्याद्यथा ताभ्याम् अन्योन्यं तु तथा कुरु ॥ ७९॥

नारदः—

सा तथेति प्रतिज्ञाय नमस्कृत्य पितामहम् ।
चकार मण्डलं सा वै विबुधानां प्रदक्षिणम् ॥ ८०॥
प्राङ्मुखो भगवानास्ते दक्षिणेन महेश्वरः ।
देवाश्चैवोत्तरेणासन् सर्वतस्त्वृषयोऽभवन् ॥ ८१॥
कुर्वन्त्यां तु तदा तस्यां मण्डलं तत्प्रदक्षिणम् ।
ब्रह्मा विष्णुश्च भगवान् तृणीकृत्यावतिष्ठते ॥ ८२॥
इन्द्रस्स्थाणुश्च भगवान् धैर्यं कृत्वा व्यवस्थितौ ॥ ८३
द्रष्टुकामस्य रुद्रस्य गतायां पार्श्वतस्ततः ।
अन्यदञ्चितपक्ष्माक्षं पश्चिमं निस्सृतं मुखम् ॥ ८४
गतायाश्चोत्तरं पार्श्वम् उत्तरं निस्सृतं मुखम् ।
पृष्ठतः परिवर्तन्त्या दक्षिणं निस्सृतं मुखम् ॥ ८५
महेन्द्रस्यापि नेत्राणां पार्श्वतः पृष्ठतोऽग्रतः ।
रक्तानां च विशालानां सहस्रं सर्वतोऽभवत् ॥ ८६
एवं चतुर्मुखस्स्थाणुर् महादेवोऽभवत् पुरा ।
तथा सहस्रनेत्रश्च बभूव बलसूदनः ॥ ८७
तथा देवनिकायानाम् ऋषीणां चैव सर्वशः ।
मुखान्यपि प्रवर्तन्ते येन याति तिलोत्तमा ॥ ८८

तस्या गात्रे निपतिता दृष्टिस्तेषां महात्मनाम् ।
सर्वेषामेव भूयिष्ठम् ऋते देवं पितामहम् ॥ ८९

गच्छन्त्या च तया देवास् सर्वे च परमर्षयः ।
कृतमित्येव तत् कार्यं मेनिरे रूपसम्पदा ॥ ९०

तिलोत्तमायां तु तदा गतायां लोकभावनः ।
कृतं कार्यमिति श्रीमान् अब्रवीच्च पितामहः ॥ ९१

सर्वान् विसर्जयामास देवानृषिगणांश्च तान्* ॥ ९१॥

जित्वा तु पृथिवीं दैत्यौ निस्सपत्नौ गतव्यथौ ।
त्रैलोक्यं तु वशे कृत्वा कृतकृत्यौ बभूवतुः ॥ ९२॥

देवगन्धर्वयक्षाणां नागपार्थिवरक्षसाम् ।
आदाय सर्वरत्नानि परां तुष्टिमुपागतौ ॥ ९३॥

यदा न प्रतिषेद्धारस् तयोस्मन्तीह के चन ।
निरुद्योगौ ततो भूत्वा विजह्रातेऽमरौ यथा ॥ ९४॥

स्त्रीभिर्माल्यैश्च गन्धैश्च भक्ष्यैर्भोज्यैश्च पुष्कलैः ।
पानैश्च विविधैरन्यैः परां प्रीतिमवापतुः ॥ ९५॥

अन्तःपुरे वनोद्याने पर्वतोपवनेषु च ।
यथेप्सितेषु देशेषु विजह्रातेऽमराविव ॥ ९६॥

* अ-क-ख-ग—कोशेषु अत्रैवाध्यायसमाप्तिरिष्यते ।

ततः कदाचिद्विन्ध्यस्य पृष्ठे समशिलातले ।
पुष्पिताग्रेषु सालेषु विहारमभिजग्मतुः ॥ ९७॥

[1]दिव्येषु सर्वकामेषु समानीतेषु तत्र तौ ।
वरासनेषु संहृष्टौ सह स्त्रीभिर्निषीदतुः ॥ ९८॥

ततो वादित्रनृत्ताभ्याम् उपातिष्ठंस्ततस्स्त्रियः ।
गीतैश्च स्तुतिसंयुक्तैः प्रीत्यर्थमुपजग्मिरे ॥ ९९॥

ततस्तिलोत्तमा तस्मिन् वने पुष्पाणि चिन्वती ।
वेषमादीप्तमाधाय रक्तेनैकेन वाससा ॥ १००॥

---

1. घ—नन्दनादिषु दिव्येषु वनेषूपवनेषु च ।
सरस्सरित्सु कुञ्जेषु गुहासु च दरीषु च ॥
निस्सपत्नं निरुद्विग्नं निर्भयं निर्भरं सुखम् ।
सुनिश्चलं च निश्शङ्कं निर्भर्यादं निराकुलम् ॥
देवदानवरक्षांसि यक्षकिन्नरभूपतीन् ।
मुनीन् ऋषीन् ब्राह्मणांश्च सर्वान् पुण्यकृतो नरान् ॥
हत्वा छित्वा समाच्छिद्य स्वेन वीर्येण संभृतम् ।
परोत्सादनतप्तेन तपसा तामसेन च ॥
आर्जितं चिरतप्तेन नाशोदर्कफलं तथा ।
स्ववशे नाशहेतुश्च निरयार्णवपातनम् ॥
एवंभूतं सुखं प्राप्य तौ रेमाते नरेश्वरौ ॥
ततः कदाचिद्विन्ध्यस्य पृष्ठे समशिलातले ।
पुष्पिताग्रेषु सालेषु विहारमभिजग्मतुः ॥
दिव्येषु सर्वभोगेषु समानीतेषु सर्वतः ॥ [अधिकः पाठः]

[1]नदीतीरेषु जातान् सा कर्णिकारान् प्रचिन्वती ।
शनैर्जगाम तं देशं यत्रास्तां तौ महासुरौ ॥ १०१॥
तौ तु पीत्वा परं पानं मदरक्तान्तलोचनौ ।
दृष्ट्वैव तां वरारोहां व्यथितौ सम्बभूवतुः ॥ १०२॥
तावापुत्यासनं हित्वा जग्मतुर्यत्र सा स्थिता ।
उभौ च कामसंयुक्तावुभौ प्रार्थयतां च ताम् ॥ १०३॥
दक्षिणे तां करे क्रूरस् सुन्दो जग्राह पाणिना ।
उपसुन्दोऽपि जग्राह वामे पाणौ तिलोत्तमाम् ॥ १०४॥
वरप्रदानमत्तौ तावौरसेन बलेन च ।
धनरत्नमदाभ्यां च सुरापानमदेन च ॥ १०५॥
[2]सर्वैरेतैर्मदैर्मत्तावन्योन्यं भ्रुकुटीकृतौ ॥ १०६
तौ कटाक्षेण दैत्येन्द्रावाकर्षति मुहुर्मुहुः ।
दक्षिणेन कटाक्षेण सुन्दं जग्राह कामिनी ॥ १०७
वामेनैव कटाक्षेण उपसुन्दं जिघृक्षती ॥ १०७॥
गन्धाभरणरूपैस्तौ व्यामोहं जग्मतुस्तदा ॥ १०८

1. घ—बाहुमूलोरुवक्षोज्ञनाभिमूलप्रदर्शिनी ।
स्वकङ्कणक्वणत्कारमुखरीकृतदिङ्मुखा ॥
स्वकरस्पर्शसञ्जातमदनाकुलभास्वरा ।
पद्मोत्पलदलाकीर्णाः कुर्वन्ती स्वदृशा दिशः ॥ [अधिकः पाठः]
2. घ—वारयोषित्सहस्रोत्थरतिभोगमदेन च ।
निस्सपत्नमदेनापि रूपलावण्यजेन च ॥ [अधिकः पाठः]

मदकामसमाविष्टौ परस्परमथोचतुः ॥ १०८॥

मम भार्या तव गुरुर् इति सुन्दोऽभ्यभाषत ।
मम भार्या तव वधूर् उपसुन्दोऽभ्यभाषत ॥ १०९॥

[1]नैषा तव ममैषेति तत्र तौ मन्युराविशत् ।
तस्या हेतोर्गदे भीमे सङ्गृह्णीतामुभौ हि तौ ॥ ११०॥

[2]प्रगृह्य तौ गदे भीमे तस्याः कामेन मोहितौ ।
[3]अहंपूर्वमहंपूर्वम् इत्यन्योन्यं निजघ्नतुः ॥ १११॥

तौ गदाभिहतौ भीमौ पेततुर्धरणीतले ।
रुधिरेणैव लिप्ताङ्गौ द्वाविवार्कौ नभश्च्युतौ ॥ ११२॥

---

1. घ—ज्येष्ठभार्याभिगमने नाचरेद्गुरुतल्पगम् ।
इति मत्वाऽनुज भ्रातर् मुञ्चेमां मत्परिग्रहाम् ॥
कनिष्ठभार्याभिगमे भवदुक्तमघं भवेत् ।
इति मत्वा स्नुषां चेमाम् उपसुन्दोऽभ्यभाषत ॥
एषा मम ममेत्येवं वदन्तौ भ्रातरावुभौ ।
प्रविवेश महान् मन्युः कालसृष्टो महीपते ॥ [अधिकः पाठः]
2. घ—शतभारायसीं गुर्वीं महस्रघ्नीं पृथक्पृथक् ।
कालदण्डब्रह्मदण्डसमाने घोरदर्शने ।
तौ प्रगृह्य गदे भीमे [अधिकः पाठः]
3. घ—परस्परगदाघातैर् युयुधाते परस्परम् ।
सुचिरं युद्धतोरेवं समीपमुपसर्पति ॥
कटाक्षवीक्षणैश्चैव मुखावयवदर्शनैः ।
विलासमुखसंलापैर् गमनागमनेन च ॥
कामक्रोधानले चित्रे ज्वालयामास सा तयोः ।
शिरसोस्तौ गदाघातैर् अन्योन्यमभिजघ्नतुः ॥ [अधिकः पाठः]

ततस्ता विद्रुता नार्यस् स च दैत्यगणस्तदा ।
पातालमगमन् सर्वे विषादभयशङ्किताः ॥ ११३॥
ततः पितामहस्तत्र सहदेवैर्महर्षिभिः ।
आजगाम विशुद्धात्मा पूजयिष्यंस्तिलोत्तमाम् ॥ ११४॥
वरेण च्छन्दिता सा च भगवत्प्रीतिमेव सा ।
[1]वरयामास तत्रैतां प्रीतः प्राह पितामहः ॥ ११५॥

पितामहः—

[2]आदित्यचरितॉल्लोकान् विचरिष्यसि तेजसा ।
तेजसा तेन दृष्टस्त्वां न हरिष्यति कश्चन ॥ ११६॥

नारदः—

एवं तस्यै वरं दत्त्वा सर्वलोकपितामहः ।
इन्द्रे त्रैलोक्यमाधाय ब्रह्मलोकं गतः प्रभुः ॥ ११७॥
[3]एवं तौ सहितौ भूत्वा सर्वार्थेष्वेकनिश्चयौ ।
तिलोत्तमार्थे सङ्क्रुद्धावन्योन्यमभिजघ्नतुः ॥ ११८॥
तस्माद्ब्रवीमि वस्स्नेहान् सर्वान् भरतसत्तमाः ॥ ११९

---

1. घ—भक्तिर्मे भास्करे ब्रह्मन्नचला पद्मसम्भव ।
एवं कृतस्तया ब्रह्मा प्रीतः प्राह सुलोचनाम् ॥ [अधिकः पाठः]
2. घ—दिवि तावत् सुकल्याणि दिव्यभोगसमन्विता ।
चरिष्यस्यकुतोभीता रूपेणानेन नित्यदा ।
तेजसा तव दृष्ट्वा त्वां नाहरिष्यति कश्चन ॥ [अधिकः पाठः]
3. घ—कालस्तिलोत्तमारूपं कृत्वा हत्वा महासुरौ ।
परां निर्वृतिमापेदे साऽगात्सूर्यसलोकताम् ॥ [अधिकः पाठः]

यथा वो नात्र भेदस्यात् सर्वेषां द्रौपदीकृते ।
तथा कुरुत भद्रं वो मम चेत् प्रियमिच्छथ ॥ १२०
यथा सुन्दोपसुन्दाभ्यां तथा न स्याद्युधिष्ठिर ॥ १२०॥

[1] वैशम्पायनः—

एवमुक्ता महात्मानो नारदेन महर्षिणा ।
समयं चक्रिरे राजंस् तेऽन्योन्येन समागताः ॥ १२१॥
समक्षं तस्य देवर्षेर्नारदस्यामितौजसः ॥ १२२
एकैकस्य गृहे कृष्णा वसेद्वर्षमकल्मषा ॥ १२२॥
द्रौपद्या च समासीनम् अन्योन्यं यो विदर्शयेत् ।
स नो द्वादश वै मासान् व्रतचारी वने वसेत् ॥ १२३॥
कृते च समये तस्मिन् पाण्डवैर्धर्मचारिभिः ।
ततस्स भगवांस्तत्र पाण्डवैरर्चितः प्रभुः ॥ १२४॥
नारदोऽप्यगमत्प्रीत इष्टं देशं महामुनिः ॥ १२५
[2]एवं तैस्समयः पूर्वं कृतो नारदचोदितैः ॥ १२५॥
न चाभिघ्नन्त ते सर्वे तदाऽन्योन्येन भारत ॥ १२६

---

1. क-ग—पुरा सुन्दोपसुन्दाभ्यां यथा तस्माद्युधिष्ठिर ।
घ—सर्वदा जायते भेदस् स्त्र्यर्थे स विदुषामपि ।
कामस्सर्वात्मना वाऽपि सर्वान् योषित्सु योजयेत् ॥
[अधिकः पाठः]
2. घ – विनिर्ययौ शुभे काले इन्द्रप्रस्थात् सुरालयम् । [अधिकः पाठः]

एतद्विस्तरशस्सर्वम् आख्यातं ते नरेश्वर ।
काले च तस्मिन् सम्पन्नं यथावज्जनमेजय ॥ १२७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि द्विशततमोऽध्यायः ॥ २०० ॥
॥ १५ ॥ राज्यलाभपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
[अस्मिन्नध्याये १२७ श्लोकाः]
[समाप्तं च राज्यलाभपर्व]

॥ एकाधिकद्विशततमोऽध्यायः ॥

(अथार्जुनवनवासपर्व)

तस्करैः कस्यचिद्ब्राह्मणस्य गोहरणम् ॥ १ ॥ चोरितानां गवां प्रत्याज्ञिहीर्षया धनुर्ग्रहणार्थं द्रौपदीयुधिष्ठिराधिष्ठिते आयुधागारे अर्जुनस्य प्रवेशः ॥ २ ॥ चोरेभ्यः प्रत्याहृता गाः ब्राह्मणाय दत्त्वा यथासमयं अर्जुनस्य तीर्थयात्रा ॥ ३ ॥

वैशम्पायनः—

एवं ते समयं कृत्वा न्यवसंस्तत्र पाण्डवाः ।
वशे शस्त्रप्रतापेन कुर्वन्तोऽन्यान् महीक्षितः ॥ १

तेषां मनुजसिंहानां पञ्चानाममितौजसाम् ।
बभूव कृष्णा सर्वेषां पार्थानां वशवर्तिनी ॥ २

[1]ते तया तैश्च सा वीरैः पतिभिस्सह पञ्चभिः ।
बभूव परमप्रीता नागैरिव सरस्वती ॥ ३

1. क-ग—अनुयातैश्च

वर्तमानेषु धर्मेण पाण्डवेषु महात्मसु ।
व्यवर्धन् कुरवस्सर्वे हीनदोषास्सुखान्विताः ॥ ४

अथ दीर्घेण कालेन ब्राह्मणस्य विशाम्पते ।
कस्यचित्तस्कराः केचिज् जह्रुर्गा नृपसत्तम ॥ ५

ह्रियमाणे धने तस्मिन् ब्राह्मणः क्रोधमूर्च्छितः ।
आगम्य खाण्डवप्रस्थम् उदक्रोशत पाण्डवान् ॥ ६

ब्राह्मणः

ह्रियते गोधनं क्षुद्रैर् नृशंसैरकृतात्मभिः ।
प्रगृह्य चास्माद्विषयाद् अभिधावन्ति पाण्डवाः ॥ ७

ब्राह्मणस्याप्रमत्तस्य हविर्ध्वाङ्क्षैर्विलुप्यते ॥ ७॥

शार्दूलस्य गुहां [1]शून्यां नीचः क्रोष्टाऽभिमन्यते ॥ ८

ब्राह्मणस्वे हृते चोरैर् धर्मार्थौ च विलोपितौ ।
रोरूयमाणे च मयि क्रियतामस्त्रधारणम् ॥ ९

वैशम्पायनः—

रोरूयमाणस्याभ्याशे भृशं विप्रस्य पाण्डवः ।
तानि वाक्यानि शुश्राव कुन्तीपुत्रो धनञ्जयः ॥ १०

श्रुत्वैव च महाबाहुर् मा भैरित्याह तं द्विजम् ॥ १०॥

1. घ—भीमामधिगच्छन्ति जम्बुकाः

आयुधानि च यत्रासन् पाण्डवानां महात्मनाम् ।
कृष्णया सह तत्रासीद् धर्मराजो युधिष्ठिरः ॥ ११॥
स प्रवेशाय चाशक्तो गन्तुमिच्छंश्च पाण्डवः ।
तस्य चार्तस्य तैर्वाक्यैश् चोद्यमानः पुनः पुनः ॥ १२॥
[1]आक्रन्देन च कौन्तेयश् चिन्तयामास दुःखितः ॥ १३
ह्रियमाणे धने तस्मिन् ब्राह्मणस्य तपस्विनः ।
उपप्रेक्षणजोऽधर्मस् सुमहान् स्यान्महीपतेः ॥ १४
आत्मप्रमार्जनं तस्य कर्तव्यमिति निश्चयः ॥ १४॥
यद्यस्य रुदतो द्वारि न करोम्यद्य रक्षणम् ।
नास्तिक्यं चापि सर्वेषाम् अस्माकं स्यादधर्मजम् ॥ १५॥
प्रतितिष्ठेत लोकेऽस्मिन् अधर्मश्चैव नो भवेत् ॥ १६
अनापृच्छ्यैव राजानं गते मयि न संशयः ।
अजातशत्रोर्नृपतेर् मम चैवाप्रियं भवेत् ॥ १७
[2]अनुप्रवेशे राज्ञस्तु वनवासो भवेन्मम ।

---

1 घ—आक्रोशति द्विजे तस्मिंश् चिन्तयामास फल्गुनः ।
2. घ—एवं विचार्य कौन्तेयो ब्राह्मणं पुनरब्रवीत् ।
उपर्युपरि चात्यर्थं विक्रोशन्तं पुनः पुनः ॥
प्रतीक्षस्व क्षणं विप्र समयो विषमोऽधुना ॥
अस्माकमायुधागारे धर्मराजस्य कृष्णया ।
शेते तत्र प्रवेष्टुं मे न शक्यस्समयो हि नः ॥
गोधनं तेऽपहर्तुं न चोराणां शक्तिरस्ति हि ॥

अधर्मो वै महानस्तु वने वा मरणं मम ॥ १८
शरीरस्यापि नाशात्तु धर्म एव विशिष्यते ॥ १८॥
एवं विनिश्चित्य ततः कुन्तीपुत्रो धनञ्जयः ।
अनुप्रविश्य राजानम् अभिवाद्य विनिस्सृतः ॥ १९॥
धनुरादाय संहृष्टो ब्राह्मणं प्रत्यभाषत ॥ २०

अर्जुनः—

ब्राह्मणागम्यतां शीघ्रं यावन् परधनैषिणः ।

पूर्वतोऽनुवृत्तम्

त्रैलोक्यान्तर्गतमपि साधये तव गा द्विज ? ।
पातालेषु दिगन्तेषु भूरादिषु च सप्तसु ॥
यस्य कुलाप्यहं ते गां गतास्ताः पुनरानये ।
सत्येनायुधमालप्ये भयामो भैक्षणं कुरु ? ॥

ब्राह्मणः—

दूरं गते धने मह्यं कथं लभ्येत मे पुनः ।
न जीवामि नृपश्रेष्ठ गतिरन्या न विद्यते ॥
राज्यं राष्ट्रं पुरो ग्रामनगराणि नृपात्मज ।
सर्वत्र विवृतद्वारं सर्वत्रैवाकुतोभयम् ॥
मम भाग्यविपर्यासाच् चोरैर्मेऽपहृतं धनम् ।
निवर्तयाशु मे गास्त्वं नोपेक्षां कुरु फल्गुन ॥
यदि धर्मः प्रमाणं ते प्रज्ञानां परिपालनम् ।
गा मे निवर्तयाशु त्वं जीवितुं यदिहेच्छसि ॥
हारयित्वा धनं चोरैर् मह्यं क्षत्रकुलोद्भव ॥
सपुत्रज्ञातिसम्बन्धिसुहृन्मित्रकलत्रवान् ।
सुखी भव चिरं जीव यामि राज्यं सुराजकम् ॥
एवं विक्रोशमानेऽस्मिंश् चिन्तयामास फल्गुनः ।
धर्मलोपभयाद्धीतो ब्रह्मण्यो ब्रह्मवत्सल ।
अनुप्रवेशाद्राज्ञस्तु वनवासो भवेन्मम ॥ [अधिकः पाठः]

अदूराध्वगताः क्षुद्रास् तावद्गच्छावहे सह ॥ २१

[1]यावदावर्तयाम्यद्य चोरहस्ताद्धनं तव ॥ २१॥

वैशम्पायनः—

सोऽनुसृत्य महाबाहुर् धन्वी वर्मी रथी ध्वजी ।

[2]शरैर्विध्वस्य तांश्चोरान् अपजित्य च तद्धनम् ॥ २२॥

ब्राह्मणस्य उपाकृत्य यशः पीत्वा च पाण्डवः ।

[3]आजगाम पुरं वीरस् सव्यसाची धनञ्जयः ॥ २३॥

---

1. घ—हरन्ति गोधनं दूरात् तावद्गच्छावहे सह ।
मा भैस्त्वं गोधनं तुभ्यं शीघ्रमावर्तयाम्यहम् ।
चोरहस्तगता वाऽपि विलोकात् परतोऽपि वा ॥ [अधिकः पाठः]
2. घ—पदपङ्क्तिं समादाय चोराणां च गवां तथा ॥ [अधिकः पाठः]
3. घ—कृतार्थयित्वा विप्रं तं तोषयित्वा पुनः पुनः ।
प्रेषयित्वा द्विजश्रेष्ठं चोरांस्तानाह फल्गुनः ॥
कुतो यूयं धर्मसूनो राज्यं निहतकण्टकम् ।
अकुतोभयचोरं च सर्वत्र निरुपद्रवम् ॥
सर्वत्रासंवृतद्वारं निश्शङ्कं निर्भयं सुखम् ।
प्रविश्य गोधनं हृत्वा कुतो यास्यथ निर्भयाः ॥
किं नु न ज्ञास्यथ नृपं धर्मसूनुं युधिष्ठिरम् ।
तस्यानुजं भीमसेनं नागायुतबलं बले ॥
यद्बाहुबलमाश्रित्य वयं जीवाम निर्भयाः ।
किं न ज्ञास्यथ तं भीमं तयोर्भ्रातोऽहमर्जुनः ॥
किङ्करो धर्मराजस्य भीमस्य च महात्मनः ।
नकुलं सहदेवं च रूपे ज्ञाने च निस्समौ ॥
तौ राज्ञश्चक्षुषी चैव तौ च न ज्ञायतो ध्रुवम् ।
यस्याज्ञया जगत्यस्मिंश् चोरशब्दस्थितो श्रुतः ॥
तस्यापि पापचौर्यत्वम् अपरद्रव्यचौर्यतः ।
तस्माद्वदत के यूयं कस्य वा च्छन्दकारिणः ॥

चोराः—

कौन्तेय नास्मि चोरोऽपि नास्माभिर्गोधनं हृतम् ।
नैव गोमांस्त्वं विप्रोऽपि गुह्यं शृणु पृथात्मज ॥
स ब्राह्मणो बलारातिः गन्धर्वास्स्याम पाण्डव ।
मायात्मिकाश्च ता गावः शृणु धर्मं सनातनम् ॥
आज्ञां जिज्ञासमानेन भक्तिं वो ब्राह्मणेषु च ।
कारणं किञ्चिदुद्दिश्य शोधितोऽसि बलारिणा ॥
दिवा वा यदि वा रात्रौ सन्ध्ययोश्च सदाऽपि वा ।
सुनिद्रासमये चापि भोजनावसरेषु च ॥
भोगानुभववेलासु सर्वत्राज्ञां प्रवर्तय ।
आज्ञामूलं जगत् सर्वम् आज्ञाहीनं हि नश्यति ॥
आज्ञां विना न कर्माणि सन्ति सर्वाणि भूतले ।
राज्ञो मूलश्रियो विप्रास् तेषु भक्तिमचञ्चलाम् ॥
यूयं कुरुत भूपाल ब्रह्मक्षत्रं प्रवर्तते ।
अन्यच्छृणु परं गुह्यं न वक्तव्यं कथञ्चन ॥
भ्रातृभिश्चापि कौन्तेय ज्येष्ठेनापि कदा चन ।
भ्रातृभिः प्रतिषिद्धोऽपि तीर्थयात्रां न मोक्ष्यसि ॥
हेतुभिश्शास्त्रवचनैर् ज्ञातिसम्बन्धिबान्धवैः ।
पाताले नागकन्यां च भूमौ पाण्ड्यसुतामपि ॥
द्वारकायां सुभद्रां च परिणेष्यसि फल्गुन ।
उपभार्याशतं त्वेवं भविष्यति तवानघ ॥
भीमस्य च हिडिम्ब्यासीद् धर्मसूनोर्भविष्यति ।
भविष्यतश्च यमयोस् तीर्थयात्रां समाचर ॥

वैशम्पायनः—

एवमुक्त्वाऽर्जुनं तत्र रहस्यं देवनिर्मितम् ।
अन्तर्धानं ययुस्सर्वे गन्धर्वाश्चोररूपिणः ।
श्रुत्वैवं तद्वचोवाक्यं गन्धर्वोक्तं शचीशजम् ॥ [अधिकः पाठः]

सोऽभिवाद्य गुरून् सर्वांस् तैश्चापि प्रतिनन्दितः ।
[1]धर्मराजमुवाचेदं व्रतमादिश्यतां मम ॥ २४॥

समयस्समतिक्रान्तो भवतो दर्शनान्मम ।
वनवासं गमिष्यामि समयो ह्येष नः कृतः ॥ २५॥

इत्युक्तो धर्मराजस्तु सहसा वाक्यमब्रवीत् ॥ २६
कथमित्यब्रवीद्वाचा शोकार्तस्सज्जमानया ।
युधिष्ठिरो गुडाकेशं भ्राता भ्रातरमब्रवीत् ॥ २७

युधिष्ठिरः—

प्रमाणमस्मि यदि ते मत्तश्शृणु वचो मम ॥ २७॥

अनुप्रवेशं यद्वीर कृतवांस्त्वं ममाप्रियम् ।
सर्वं तदनुजानामि व्यलीकं न च मे हृदि ॥ २८॥

गुरोरनुप्रवेशेन नोपघातो यवीयसः ।
यवीयसोऽनुप्रवेशो ज्येष्ठस्य विधिलोपकृत् ॥ २९॥

निवर्तस्व महाबाहो कुरुष्व वचनं मम ।
न हि ते धर्मलोपोऽस्ति न च मे धर्षणा कृता ॥ ३०॥

अर्जुनः—

न व्याजेन चरेद्धर्मम् इति मे भवतश्श्रुतम् ।
न तस्माद्विचलिष्यामि सत्येनायुधमालभे ॥ ३१॥

1. घ—अभिवन्दितो यमाभ्यां च तैश्च स प्रतिनन्दितः । अधिकः पाठः ।

आज्ञा तु मम दातव्या भवता कीर्तिवर्धन ।
भवदाज्ञामृते किञ्चिन्न कार्यमिति निश्चितम् ॥ ३२॥

वैशम्पायनः—

सोऽभ्यनुज्ञाप्य राजानं ब्रह्मचर्यादिदीक्षितः ।
वने द्वादश [1]मासानां वासायोपजगाम ह ॥ ३३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि एकाधिकद्विशततमोऽध्यायः* ॥ २०१ ॥
॥ १६ ॥ अर्जुनवनवासपर्वणि प्रथमोऽध्यायः ॥ १ ॥
अस्मिन्नध्याये ३३॥ श्लोकाः]

॥ द्व्यधिकद्विशततमोऽध्यायः ॥

ब्राह्मणैस्सह तीर्थान्यटतोऽर्जुनस्य गङ्गायामवतरणम् ॥ १ ॥ तत्र उलूप्या नागकन्यया गृहीतस्यार्जुनस्य नागलोकगमनम् ॥ २ ॥ संवादपूर्वकमुलूप्याः परिग्रहः ॥ ३ ॥ इरावत उत्पत्तिः ॥ ४ ॥ अर्जुनं पुनर्गङ्गाद्वारमुपनीय उलूप्यास्स्वलोकगमनम् ॥ ५ ॥

वैशम्पायनः—

तं प्रयान्तं महाबाहुं कौरवाणां यशस्करम् ।
अनुजग्मुर्महात्मानो ब्राह्मणा वेदपारगाः ॥ १

1. मासान्हि घ-कोशे नाध्यायसमाप्तिर्दृश्यते ।

वेदवेदाङ्गविद्वांसस् तथैवाध्यात्मचिन्तकाः ।
[1]मौक्षाश्च भगवद्भक्तास् सूताः पौराणिकाश्च ये ॥ २
कथकाश्चापरे राजन् श्रमणाश्च वनौकसः ।
[2]दिव्याख्यानानि ये चापि पठन्ति मधुरं द्विजाः ॥ ३
एतैश्चान्यैश्च बहुभिस् सहायैः पाण्डुनन्दनः ।
पृथक्छ्लक्ष्णकथैः प्रायान्मरुद्भिरिव वासवः ॥ ४
रमणीयानि चित्राणि वनानि च सरांसि च ।
सरितस्सागरांश्चैव देशानपि च भारत ॥ ५
पुण्यान्यपि च तीर्थानि ददर्श भरतर्षभः ॥ ५॥
स गङ्गाद्वारमासाद्य निवेशमकरोत् प्रभुः ॥ ६
तस्य तत्राद्भुतं कर्म शृणु मे जनमेजय ।
कृतवान् यद्विशुद्धात्मा पाण्डूनां प्रवरो रथी ॥ ७
निविष्टे तत्र कौन्तेये ब्राह्मणेषु च भारत ।
अग्निहोत्राणि विप्रास्ते प्रादुश्चक्रुरनेकशः ॥ ८
तेषु प्रणीयमानेषु ज्वलितेषु हुतेषु च ।
कृतपुष्पोपहारेषु निरन्तरगतेषु च ॥ ९

---

1. घ—वैयाकरणपाण्डित्या मीमांसान्यायकोविदाः ।
सांख्ययोगविदश्चान्ये तर्कपादविदस्तथा ॥ [अधिकः पाठः]
2. घ—दिव्याख्यानविदश्चान्ये यतयस्संशितव्रताः ।
नित्याग्निहोत्रिणो विप्रास् सदारसुतबान्धवाः ॥ [अधिकः पाठः]

कृताभिषेकैर्विद्वद्भिर् नियतैस्सत्पथे स्थितैः ।
शुशुभेऽतीव तद्राजन् गङ्गाद्वारं महात्मभिः ॥ १०

तथा पर्याकुले तस्मिन् निवेशे पाण्डवर्षभः ।
अभिषेकाय कौन्तेयो गङ्गामवततार ह ॥ ११

तत्राभिषेकं कृत्वा स तर्पयित्वा पितामहान् ।
उत्तितीर्षुर्जलाद्राजन् अग्निकार्यचिकीर्षया ॥ १२

अपकृष्टो महाबाहुर् नागराजस्य कन्यया ;
अन्तर्जले महाबाहुर् उलूप्या कामयानया ॥ १३

ददर्श पाण्डवस्तत्र पावकं सुसमाहितः ।
कौरव्यस्याथ नागस्य भवने परमार्चिते ॥ १४

तत्राग्निकार्यं कृतवान् कुन्तीपुत्रो धनञ्जयः ।
अशङ्कमानेन हुतस् तेनातुष्यद्धुताशनः ॥ १५

अग्निकार्यं स कृत्वा तु नागराजसुतां तदा ।
प्रहसन्निव कौन्तेय इदं वचनमब्रवीत् ॥ १६

अर्जुनः—

किमिदं साहसं भीरु कृतवत्यसि भामिनि ।
कस्यायं सुभगे देशः का च त्वं कस्य वाऽऽत्मजा ॥ १७

उलूपी—

ऐरावतकुले जातः कौरव्यो नाम पन्नगः ।

तस्याहं दुहिता पार्थ उलूपी नाम पन्नगी ॥ १८

साऽहं त्वामभिषेकार्थम् अवतीर्णं सरिद्वराम् ।
दृष्टवत्येव कौन्तेय कन्दर्पेणापि मूर्च्छिता ॥ १९

तां मामनङ्गमथितां त्वत्कृते कुरुनन्दन ।
अनन्यां नन्दयस्वाद्य प्रदानेनात्मनो रहः ॥ २०

अर्जुनः—

ब्रह्मचर्यमिदं भद्रे मम द्वादशमासिकम् ।
धर्मराजेन चादिष्टो नाहमस्मि स्वयं वशः ॥ २१

तव चापि प्रियं कर्तुम् इच्छामि जलचारिणि ।
अनृतं नोक्तपूर्वं च मया किञ्चन कर्हि चित् ॥ २२

कथं च नानृतं च स्यात् तव चैव प्रियं भवेत् ।
[1]अधर्मो मे न सिद्ध्येत तथा कार्यं भुजङ्गमे ॥ २३

उलूपी—

जानाम्यहं पाण्डवेय यथा चरसि मेदिनीम् ।
[2]यथा हि ते ब्रह्मचर्यम् इति वस्समयः कृतः ॥ २४

---

1. अ-ख-कोशयोः—सिद्ध्येत न च मेऽधर्मस् तथा कुर्यां भुजङ्गमे ।
क-ग-कोशयोः—पीड्येत न च मे धर्मस् तथा कुर्यां भुजङ्गमे ॥

2. क-ख-ग—तथा हि ते ब्रह्मचर्यम् इदमादिष्टवान् प्रभुः ।
परस्परं वर्तमानां द्रुपदस्य सुतां प्रति ।
यो नोऽनुप्रविशेन्मोहात् स नो द्वादशमासिकम् ॥
[अधिकः पाठः]

तदिदं द्रौपदीहेतोर् अन्योन्यस्य प्रवासनम् ।
कृतवांस्तत्र धर्मार्थम् अत्र धर्मो न लुप्यते ॥ २५
परित्राणं च कर्तव्यम् आर्तानां पृथुलोचन ।
कृत्वा मम परित्राणं तव धर्मो न लुप्यते ॥ २६
त्वया कामप्रचाराय प्रेरितं न हि यन्मनः ।
तस्मात् तव प्रत्यवायो युज्यते न हि कुत्रचित् ॥ २७
यदि वाऽप्यस्य धर्मस्य सूक्ष्मोऽपि स्याद् व्यतिक्रमः ।
स च ते धर्म एव स्याद् दत्त्वा प्राणान् ममार्जुन ॥ २८
भक्तां भजस्व मां पार्थ सतामेतन्मतं प्रभो ।
न करिष्यसि चेदेवं मृतां मामुपधारय ॥ २९
प्राणदानान्महाबाहो चर धर्ममनुत्तमम् ।
शरणं च प्रपन्नाऽस्मि त्वामद्य पुरुषोत्तम ॥ ३०
दीनानाथांश्च कौन्तेय परिरक्षसि नित्यशः ।
साऽहं शरणमभ्येमि रोरवीमि च दुःखिता ॥ ३१
याचे त्वामभिकामाऽहं तस्मात् कुरु मम प्रियम् ।
स त्वमात्मप्रदानेन सकामां कर्तुमर्हसि ॥ ३२

[1]वैशम्पायनः—

एवमुक्तस्तु कौन्तेयः पन्नगेश्वरकन्यया ।

---

1. घ—आतिष्ठ गन्धर्ववचो गोधनस्य विमोक्षणे ।
ब्राह्मणस्य स ते धर्म आर्तानामार्तिनाशन ॥ [अधिकः पाठः]

कृतवांस्तत्तथा सर्वं धर्ममुद्दिश्य कारणम् ॥ ३३
स नागभवने रात्रिं तामुषित्वा प्रतापवान् ।
पुत्रमुत्पादयामास स तस्यां सुमनोहरम् ॥ ३४
इरावन्तं महाभागं महाबलपराक्रमम् ॥ ३४॥
[1]विमलेऽभ्युदिते सूर्ये कौरव्यस्य निवेशनात् ।
निश्चक्राम तदा पार्थस् स्वमेव भवनं शुभम् ॥ ३५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि द्व्यधिकद्विशततमोऽध्यायः ॥ २०२ ॥
॥ १६ ॥ अर्जुनवनवासपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[अस्मिन्नध्याये ३५॥ श्लोकाः]

॥ द्व्यधिकद्विशततमोऽध्यायः ॥

अर्जुनस्य मणलूरुपुरगमनम् ॥ १ ॥ पुत्रिकापुत्रकधर्मेण चित्राङ्गदापरिग्रहः ॥ २ ॥

वैशम्पायनः—
कथयित्वा च तत्सर्वं ब्राह्मणेभ्यस्स भारत ।
प्रययौ हिमवत्पार्श्वे ततो वज्रधरात्मजः ॥ १
अगस्त्यवनमासाद्य वसिष्ठस्य च पर्वतम् ।
भृगुतीर्थे च कौरव्यः कृतवाञ्शौचमात्मनः ॥ २

1. घ—फल्गुनो यस्य मनसि सत्त्ववीर्यबलोन्नतैः ।
अष्टादशदिनं युद्धं कृष्णमात्रमजीजनत् ॥ [अधिकः पाठः]

प्रददौ गोसहस्राणि यज्ञानुद्दिश्य दक्षिणाः ।
निवेशांश्च द्विजातिभ्यस् सोऽददात् कुरुसत्तमः ॥ ३

हिरण्यबिन्दोस्तीर्थानि स्नात्वा पुरुषसत्तमः ।
दृष्टवान् पर्वतश्रेष्ठान् पुण्यान्यायतनानि च ॥ ४

अवतीर्य नरश्रेष्ठो ब्राह्मणैस्सह भारत ।
प्राचीं दिशमभिप्रेप्सुर् जगाम भरतर्षभः ॥ ५

आनुपूर्व्येण तीर्थानि दृष्टवान् कुरुसत्तमः ।
नदीं चोत्पलिनीं रम्याम् अरण्यं नैमिशं प्रति ॥ ६

नन्दामपरनन्दां च कौशिकीं च यशस्विनीम् ।
महानदीं गयां चैव गङ्गामपि च भारत ॥ ७

एवं तीर्थानि सर्वाणि पश्यमानस्तथाऽऽश्रमान् ।
आत्मनः पावनं कुर्वन् ब्राह्मणेभ्यो धनं ददौ ॥ ८

अङ्गवङ्गकलिङ्गेषु यानि पुण्यानि कानि चित् ।
जगाम तानि सर्वाणि पुण्यान्यायतनानि च ॥ ९

दृष्ट्वा च विधिवत्तानि धनं चापि ददौ पुनः ॥ ९॥

कलिङ्गराष्ट्रद्वारे तु ब्राह्मणाः पाण्डवानुगाः ।
अभ्यनुज्ञाय कौन्तेयम् उपावर्तन्त भारत ॥ १०॥

स तु तैरभ्यनुज्ञातः कुन्तीपुत्रो धनञ्जयः ।
सहायैरल्पकैश्शूरैः प्रययौ [1]लवणार्णवम् ॥ ११॥

1. अ-क-ग-घ—येन सागरम् ॥

स कलिङ्गानतिक्रम्य देशानायतनानि च ।
हर्म्याणि रमणीयानि प्रेक्षमाणो ययौ प्रभुः ॥ १२॥

शूर्पाकारमथाप्लुत्य सागरानूपमाश्रितः ।
महेन्द्रपर्वतं दृष्ट्वा तापसैरुपशोभितम् ॥ १३॥

गोदावर्यां ततस्स्नात्वा तामतीत्य महाबलः ।
कावेरीं तामथासाद्य सङ्गमे सागरस्य ह ॥ १४॥

स्नात्वा सम्पूज्य देवांश्च पितॄंश्च मुनिभिस्सह ।
समुद्रतीरेण शनैर् मणल्लूरुं जगाम ह ॥ १५॥

तत्र सर्वाणि तीर्थानि पुण्यान्यायतनानि च ।
अत्र त्रयोदशे मासे मणल्लूरेश्वरं प्रभुम् ॥ १६॥

अभिगम्य महाबाहुम् अभ्यगच्छन्महीपतिम् ॥ १७

मणल्लूरेश्वरं राजन् धर्मज्ञं चित्रवाहनम् ।
सर्वशास्त्रेषु नेतारं सर्वास्त्रज्ञमकल्मषम् ॥ १८

धर्मे सत्ये दमे शौचे शौर्ये चव विशेषतः ।
द्विजराजऋषीणां च धार्मिकाणां महास्थले ॥ १९

कीर्तने चोपमाभूतं क्षत्रधर्मविदुत्तमम् ॥ १९॥

तस्य चित्राङ्गदा नाम दुहिता चारुदर्शना ॥ २०

तां ददर्श पुरे तस्मिन् विचरन्तीं यदृच्छया ॥ २०॥

दृष्ट्वा च तां वरारोहां चकमे चैत्रवाहनीम् ।
अभिगम्य च राजानं ज्ञापयत् स्वं प्रयोजनम् ॥ २१॥
तमुवाचाथ राजा स सान्त्वपूर्वमिदं वचः ॥ २२

चित्रवाहनः—

राजा प्रभाकरो नाम कुलेऽस्मिन् सम्बभूव ह ।
अपुत्रः प्रसवेनार्थी तपस्तेपे स चोत्तमम् ॥ २३
उग्रेण तपसा तेन प्रणिपत्य प्रणम्य च ।
ईश्वरस्तोषितः पार्थ देवदेव उमापतिः ॥ २४
स तस्मै भगवान् प्रादाद् एकप्रसवजं कुलम् ।
एकैकः प्रसवस्तस्माद् भवत्यस्मिन् कुले सदा ॥ २५
तेषां कुमाराः पूर्वेषां सर्वेषां मम जज्ञिरे ।
कन्या तु मम जातेयं कुलस्योत्पादनी ध्रुवम् ॥ २६
पुत्रो ममेयमिति मे भावना पुरुषोत्तम ।
पुत्रिकाहेतुविधिना सम्मता भरतर्षभ ॥ २७
तस्मादेकस्सुतो योऽस्यां जायते भारत त्वया ।
एतच्छुल्कं भवत्वस्यां कुलकृज्जायतामिति ॥ २८
एतेन समयेनेमां प्रतिगृह्णीष्व भारत ॥ २८॥

वैशम्पायनः—

स तथेति प्रतिज्ञाय तां कन्यां प्रतिगृह्य च ।
मासे त्रयोदशे पार्थः कृत्वा वैवाहिकीं क्रियाम् ॥ २९॥

उवास नगरे तस्मिन् मासांस्त्रीन् स तया सह ॥ ३०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि त्र्यधिकद्विशततमोऽध्यायः* ॥२०३॥

॥१६॥ अर्जुनवनवासपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

[अस्मिन्नध्याये ३० श्लोकाः]

॥ चतुरधिकद्विशततमोऽध्यायः ॥

सौभद्रतीर्थे स्नानार्थमवतीर्णस्यार्जुनस्य ग्राहेण ग्रहणम् ॥ १ ॥ ग्राहदुद्धरणेन ग्राहरूपं परित्यज्य नारीरूपं प्राप्तया वन्दानाम्न्या स्वेषां ब्राह्मणेन शापदानकथनम् ॥ २ ॥ प्रसादितेन ब्राह्मणेन कृतस्य शापमोचनप्रकारस्य, नारदनिदेशेनैतत्तीर्थागमनस्य च अर्जुनं प्रति वन्दया कथनम् ॥ ३ ॥ एतत्कथां श्रुतवता अर्जुनेन ग्राहरूपाणामवशिष्टानां चतसृणामप्यप्सरसां तत्तत्तीर्थेभ्य उद्धरणेन तासां स्वस्वरूपप्राप्तिः ॥ ४ ॥ पुनर्मणिपूरमागत्य तत्र चित्राङ्गदायां जातं बभ्रुवाहननामानं स्वपुत्रं स्वश्वशुरे समर्प्य गोकर्णक्षेत्रगमनम् ॥ ५ ॥

वैशम्पायनः—

ततस्समुद्रे तीर्थानि दक्षिणे भरतर्षभ ।
अभ्यगच्छत् सुपुण्यानि रहितानि तपस्विभिः ॥ १
वर्जयन्ति स्म तीर्थानि तत्र पञ्च तु तापसाः ।
आचीर्णानि तु यान्यासन् पुरस्तात्तु तपस्विभिः ॥ २
अगस्त्यतीर्थं सौभद्रं पौलोमं च सुपावनम् ।

*घ-कोशे—अत्राध्यायसमाप्तिर्न दृश्यते ।

करं धर्मप्लवं चैव हयमेधफलं च यत् ॥ ३
भारद्वाजस्य तीर्थं च पापप्रशमनं महत् ।
विविक्तान्युपलक्ष्याथ तानि तीर्थानि पाण्डवः ॥ ४
दृष्ट्वा च वर्ज्यमानानि मुनिभिर्धर्मबुद्धिभिः ।
तपस्विनस्ततोऽपृच्छत् प्राञ्जलिः कुरुनन्दनः ॥ ५
तीर्थान्येतानि वर्ज्यन्ते किमर्थं ब्रह्मवादिभिः ॥ ५॥

तापसाः—

ग्राहाः पञ्च वसन्त्येषु हरन्ति च तपोधनान् ।
अत एतानि वर्ज्यन्ते तीर्थानि कुरुनन्दन ॥ ६॥

वैशम्पायनः—

श्रुत्वा तु वचनं तेषां वार्यमाणस्तपोधनैः ।
जगाम तानि तीर्थानि द्रष्टुं पुरुषसत्तमः ॥ ७॥
ततस्सौभद्रमासाद्य महर्षेस्तीर्थमुत्तमम् ।
विगाह्य सहसा शूरस् स्नानं चक्रे परन्तपः ॥ ८॥
अथ तं पुरुषव्याघ्रम् अन्तर्जलचरो महान् ।
निजग्राह जले ग्राहश् शापमोक्षाय भारत ॥ ९॥
स तमादाय कौन्तेयो विस्फुरन्तं जलेचरम् ।
उदतिष्ठन्महाबाहुर् बलेन बलिनां वरः ॥ १०॥
उत्कृष्ट एव तु ग्राहस् सोऽर्जुनेन तपस्विना ।
बभूव नारी कल्याणी सर्वाभरणभूषिता ॥ ११॥

दीप्यमाना श्रिया राजन् दिव्यरूपा मनोरमा ॥ १२

तदद्भुततमं दृष्ट्वा कुन्तीपुत्रो धनञ्जयः ।
तां स्त्रियं परमप्रीत इदं वचनमब्रवीत् ॥ १३

अर्जुनः—
का वै त्वमसि कल्याणि कुतो वाऽसि जलेचरी ।
किमर्थं च महत् पापम् इदं कृतवती पुरा ॥ १४

[1]स्त्री—
अप्सराऽस्मि महाबाहो देवारण्यविचारिणी ।
इष्टा धनपतेर्नित्यं [2]वन्दा नाम महाबल ॥ १५

मम सख्यश्चतस्रोऽन्यास् सर्वाः कामगमाश्शुभाः ।
ताभिस्सार्धं प्रयाताऽस्मि लोकपालनिवेशनम् ॥ १६

[3]ततः पश्याम वै सर्वा ब्राह्मणं संशितव्रतम् ।
रूपवन्तमधीयानम् एकमेकान्तचारिणम् ॥ १७

[4]तस्यैव तपसा राजंस् तद्वनं तेजसा वृतम् ॥ १७॥

आदित्य इव तं देशं कृत्स्नमभ्यवभासयत् ॥ १८

तस्य दृष्ट्वा तपस्तादृग् रूपं चाद्भुतदर्शनम् ।

---

1. घ—पिताऽहमस्मि ते वत्से निर्भया वद मेऽखिलम् ॥
श्रुत्वा प्रतिकरोम्यद्य भवत्या यन्मनीषितम् ॥ [अधिकः पाठः]
2. घ—वृन्दा
3. घ—मध्ये मार्गे तपस्यन्तं ब्राह्मणं संशितव्रतम् । [अधिकः पाठः]
4. घ—यथाप्रमाणमूर्ध्वादिसर्वावयवशोभितम् ॥ [अधिकः पाठः]

अवतीर्णोऽस्मि तं देशं तपोविघ्नचिकीर्षया ॥ १९

अहं च सौरभेयी च समीची बुद्बुदालसा ।
यौगपद्येन तं विप्रम् अभ्यगच्छाम भारत ॥ २०

गायन्त्योऽथ हसन्त्यश्च नृत्यन्त्यो वै वराङ्गनाः ।
प्रेक्षणानि च कुर्वन्त्यो विवृतं कारयन्ति च ॥ २१

[1]अनिच्छन्तीरिवाङ्गानि हासभावविलासितैः ।
बाहूरुमूलदन्तानां दर्शनं वै वराङ्गनाः ॥ २२

कुर्वन्त्यो लोभयन्त्यश्च तं द्विजं परितश्चिराः ॥ २२॥

[2]स च नास्मासु कृतवान् मनो वीर कथञ्चन ॥ २३

नाकम्पत महातेजास् स्थितस्तपसि निर्मलः ॥ २३॥

सोऽशपत् कुपितोऽस्मांस्तु ब्राह्मणः क्षत्रियर्षभ ।
ग्राहभूता जले यूयं चरिष्यथ शतं समाः* ॥ २४॥

ततो वयं प्रव्यथिताः सर्वा भारतसत्तम ।
याचाम शरणं विप्रं तं तपोधनमच्युतम् ॥ २५॥

रूपेण वयसा चैव कन्दर्पेण च दर्पिताः ।

1. विवृतानि च कुर्वन्त्यो गुह्यस्थानानि सर्वशः ।
अवशा इव कामार्ता हास्यभावविलासिन्यः ॥ ४३

2. घ—पद्मगन्धसुनिश्वासाः पद्मगन्धाङ्गयष्टि कन्यकाः ।

* अ-क-ख-ग—कोशेषु—अत्रैवाध्यायस्य

अयुक्तं कृतवत्यश्च क्षन्तुमर्हसि नो द्विज ॥ २६॥

एष एव वधोऽस्माकं सुपर्याप्तस्तपोधन ।
यद्वयं संशितात्मानं प्रलोभयितुमागताः ॥ २७॥

अवध्यास्तु स्त्रियस्सृष्टा मन्यन्ते धर्मचिन्तकाः ।
तस्माद्धर्मेण धर्मज्ञ नास्मान् हिंसितुमर्हसि ॥ २८॥

सर्वभूतेषु धर्मज्ञ मैत्रो ब्राह्मण उच्यते ।
सत्यो भवतु कल्याण एष वादो मनीषिणाम् ॥ २९॥

शरणं च प्रपन्नानां शिष्टाः कुर्वन्ति पालनम् ।
शरणं त्वां प्रपन्नास्स्म तस्मात् त्वं क्षन्तुमर्हसि ॥ ३०॥

एवमुक्तस्स धर्मात्मा ब्राह्मणश्शुभकर्मकृत् ।
प्रसादं कृतवान् वीर रविसोमसमप्रभः ॥ ३१॥

ब्राह्मणः—

विश्वं शतसहस्रं च सर्वमक्षय्यवाचकम् ।
परिमाणं शतं त्वेतन्नेदमक्षयवाचकम् ॥ ३२॥

'द' दभूता गृह्णन्तीः पुरुषाञ्जले ।
ेन स्थलं पुरुषसत्तमः ॥ ३३॥

तिपत्स्यथ ॥ ३४

े कदा चन ॥ ३४॥

[1]तानि तीर्थानि सर्वाणि ततःप्रभृति चैव ह ।
नारीतीर्थानि नाम्नेह ख्यातिं यास्यन्ति सर्वशः ॥ ३५॥
पुण्यानि च भविष्यन्ति पावनानि मनीषिणाम् ॥ ३६

[2]वन्दा—

ततोऽभिवाद्य तं विप्रं कृत्वा चापि प्रदक्षिणम् ।
विचिन्तया चापसृत्य तस्माद्देशात् सुदुःखिताः ॥ ३७
क नु नाम वयं सर्वाः कालेनाल्पेन तं नरम् ।
समागच्छेम यो नस्तद् रूपमापादयेत् पुनः ॥ ३८
ता वयं चिन्तयित्वैव मुहूर्तादिव भारत ।
दृष्टवत्यो महाभागं देवर्षिमुत नारदम् ॥ ३९
संप्रहृष्टास्म तं दृष्ट्वा देवर्षिममितद्युतिम् ।
अभिवाद्य च तं पार्थ स्थिता व्रीडितचेतनाः ॥ ४०
स नोऽपृच्छद्दुःखमूलम् उक्तवत्यो वयं च तत् ।
श्रुत्वा तच्च यथावृत्तम् इदं वचनमब्रवीत् ॥ ४१

नारदः—

दक्षिणे सागरानूपे पञ्च तीर्थानि सन्ति वै ।
पुण्यानि रमणीयानि तानि गच्छत मा चिरं ॥ ४२
तत्राशु पुरुषव्याघ्रः पाण्डवेयो धनञ्जयः ।
मोक्षयिष्यति शुद्धात्मा दुःखादस्मान्न संशयः ॥ ४३

---

1. घ—इतः प्रभृति तीर्थानि तानि सर्वाणि कन्यकाः ।
2. घ—बृन्दा

वन्दा—

इत्युक्त्वा नारदस्सर्वास् तत्रैवान्तरधीयत ॥ ४३॥
तस्मात् सर्वा वयं वीर निवसामोऽत्र नित्यशः ॥ ४४
तदिदं सत्यमेवाद्य मोक्षिताऽहं त्वयाऽनघ ॥ ४४॥
एतास्तु मम वै सख्यश् चतस्रोऽन्या हृदे स्थिताः ।
एता अपि महाबाहो मुनिशापाद्विमोक्षय ॥ ४५॥

वैशम्पायनः—

तच्छ्रुत्वा पाण्डवश्रेष्ठस् सर्वा एव विशाम्पते ।
तस्माच्छापाददीनात्मा मोक्षयामास वीर्यवान् ॥ ४६॥
उत्थाय च जलात् सर्वाः प्रतिलभ्य स्वकं वपुः ।
तास्तदाऽप्सरसो राजन्नदृश्यन्त यथा पुरा ॥ ४७॥
तीर्थानि शोधयित्वाऽथ तथाऽनुज्ञाय ताः प्रभुः ।
चित्राङ्गदां पुनर्द्रष्टुं मणलूरपुरं ययौ ॥ ४८॥
तस्यामजनयत् पुत्रं राजानं बभ्रुवाहनम् ।
तं दृष्ट्वा पाण्डवो राजंश् चित्रवाहनमब्रवीत् ॥ ४९॥
चित्राङ्गदायाश्शुल्कं च गृह्णेमं बभ्रुवाहनम् ।
तु भविष्यामि ऋणान्मुक्तो जनाधिप ॥ ५०॥
नर्वाक्यम् अब्रवीत् पाकशासनिः ॥ ५१

पञ्च तिरोधानं प्रपेदिरे ।

अर्जुनः—

इहैव भव भद्रे त्वं बभ्रुवाहनवर्धना ।
इन्द्रप्रस्थनिवासं मे त्वं तत्रागत्य रंस्यसे ॥ ५२

कुन्तीं युधिष्ठिरं भीमं भ्रातरौ मे कनीयसौ ।
आगता तत्र पश्येथा अन्यानपि च बान्धवान् ॥ ५३

बान्धवैस्सहिता भद्रे नन्दसे त्वमनिन्दिते ॥ ५३॥

धर्मे स्थितस्सत्यधृतिः कुन्तीपुत्रो युधिष्ठिरः ।
जित्वा तु पृथिवीं सर्वां राजसूयं करिष्यति ॥ ५४॥

तत्रागच्छन्ति राजानः पृथिव्यां नृपसंज्ञिताः ॥ ५५

बहूनि रत्नान्यादाय आगमिष्यति ते पिता ॥ ५५॥

एकसार्थं प्रयाताऽसि चित्रवाहनसेनया ॥ ५६

द्रक्ष्यामि राजसूये त्वां पुत्रं पालय मा शुचः ॥ ५६॥

बभ्रुवाहननाम्ना तु मम प्राणो बहिश्चरः ।
तस्माद्भद्रस्व पुत्रं वै पूरुवंशविवर्धनम् ॥ ५७॥

चित्रवाहनदायादं धर्मात् पौरवनन्दनम् ।
पाण्डवानां प्रियं पुत्रं तस्मात् पालय सर्वदा ॥ ५८॥

विप्रयोगेण सन्तापं मा कृथास्त्वमनिन्दिते ॥ ५९

वैशम्पायनः—

चित्राङ्गदामेवमुक्त्वा सागरानूपमाश्रितः ।

स्थानं दूरं समाप्लुत्य दत्त्वा बहुधनं तदा ॥ ६०
केरलान् समतिक्रम्य गोकर्णमभितोऽगमत् ॥ ६०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि चतुरधिकद्विशततमोऽध्यायः ॥ २०४ ॥
॥ १६ ॥ अर्जुनवनवासपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
[अस्मिन्नध्याये ६०॥ श्लोकाः]

॥ पञ्चाधिकद्विशततमोऽध्यायः ॥

अर्जुनस्य प्रभासतीर्थगमनम् ॥ १ ॥ तत्र स्मृतिपथागतसुभद्रारूपलावण्यादिकं चिन्तयतोऽर्जुनस्य परिव्राजकवेषस्वीकारेण तस्या हरणे निश्चयः ॥ २ ॥ अर्जुनस्य चिन्तितज्ञानेन हसता श्रीकृष्णेन सहशायिन्या सत्यभामया हासकारणे पृष्टे तां प्रति अर्जुनवृत्तान्तकथनम् ॥ ३ ॥ सत्यभामां शयने विहाय एकाकिना श्रीकृष्णेन प्रभासतीर्थं प्रति प्रस्थानम् ॥ ४ ॥ चारमुखेन अर्जुनस्य तत्रागमनं श्रुत्वा कृष्णस्य तत्र गमनम् ॥ ५ ॥ अर्जुनेन संभाष्य कृष्णस्य द्वारकां प्रति पुनरागमनम् ॥ ६ ॥

वैशम्पायनः—

सोऽपरान्तेषु तीर्थानि पुण्यान्यायतनानि च ।
सर्वाणि चानुपूर्व्येण जगामामितविक्रमः ॥ १
समुद्रे पश्चिमे यानि तीर्थान्यायतनानि च ।
यानि गत्वा स सर्वाणि प्रभासमुपजग्मिवान् ॥ २
प्रभास रामौ तु गदेन कथितां कथाम् ।

सुभद्रायाश्च माधुर्यरूपसंपद्गुणानि च ॥ ३

प्राप्तुं तां चिन्तयामास कोऽत्रोपायो भवेदिति ॥ ३॥
वेषवैकृतमापन्नः परिव्राजकरूपधृक् ॥ ४

कुकुरान्धकवृष्णीनाम् अज्ञातो वेषधारणात् ।
भ्रममाणश्चरन् भैक्षं परिव्राजकवेषवान ॥ ५

येन केनाप्युपायेन प्रविश्य च गृहं महत् ।
दृष्ट्वा सुभद्रां कृष्णस्य भगिनीमेकसुन्दरीम् ॥ ६

वासुदेवमतं ज्ञात्वा करिष्यामि हितं शुभम् ॥ ६॥
एवं विनिश्चयं कृत्वा दीक्षितो वै तदाऽभवत् ॥ ७

त्रिदण्डी मुण्डितः कुण्डी अक्षमालाऽङ्गुलीयकः ।
योगभारं वहन् पार्थो वटवृक्षस्य कोटरम् ॥ ८

प्रविशन्नेव बीभत्सुर् वृष्टिं वर्षति वासवे ।
चिन्तयामास देवेशं केशवं क्लेशनाशनम् ॥ ९

प्रणतार्तिहरं शम्भुं मायारूपेण वञ्चकम् ॥ ९॥
केशवश्चिन्तितं ज्ञात्वा दिव्यज्ञानेन दृष्टवान् ॥ १०

शयानश्शयने धन्ये सत्यभामासहायवान् ।
केशवस्सहसा राजन् जहास च ननन्द च ॥ १८

पुनः पुनस्सत्यभामा चाब्रवीत् पुरुषोत्तमम् ॥

सत्यभामा—

भगवंश्चिन्तयाऽऽविष्टश् शयने शयितस्सुखम् ।
भवान् बहुप्रकारेण जहास च पुनः पुनः ॥ १२॥
श्रोतव्यं यदि वा कृष्ण प्रसादो यदि चेन्मयि ।
वक्तुमर्हसि लोकेश तच्छ्रोतुं कामये ह्यहम् ॥ १३॥

[1]श्रीभगवान्—

पितृष्वसायाः पुत्रो मे भीमसेनानुजोऽर्जुनः ।
तीर्थयात्रां गतः पार्थः कारणात् समयात् तदा ॥ १४
तीर्थयात्रासमाप्तौ तु निवृत्तो निशि भारतः ।
सुभद्रां चिन्तयानस्तु तदर्थे चापि मां पुनः ॥ १५
चिन्तयन्नेव तां भद्रां यतिरूपधरोऽभवत् ॥ १५॥
यतिरूपप्रतिच्छन्नो द्वारकां प्राप्य माधवीम् ।
येन केनाप्युपायेन दृष्ट्वा तु वरवर्णिनीम् ॥ १६॥
वासुदेवमतं ज्ञात्वा प्रयतिष्ये मनोरथम् ॥ १७
एवं व्यवसितः पार्थो यतिलिङ्गेन पाण्डवः ॥ १७॥
छायायां वटवृक्षस्य वृष्टिं वर्षति वासवे ।
योगभारं वहन्नेव मानसं दुःखमाप्तवान् ॥ १८॥
यं मां विजानाति माधवो यदि मां स्मरन् ॥
व्याजमवष्टभ्य यायात् कतिपयैर्जनैः ॥ १९॥

---

[1] इदं मे महती कृष्ण तव हासेन वर्तते ।
तत्र रूपेषु ते कृष्ण तव हासोऽयमद्भुतः ॥ [अधिकः पाठः]

तद्भावं प्रविचिन्त्यैव हसितं मे सुलोचने ।
नास्त्यन्यन्मा विशङ्केथाश् शपे सत्येन मे शुभे ॥ ३९

वैशम्पायनः—

भ्रातरं वोऽभि पश्येति सत्यभामामदर्शयत् ॥ २१
[1]तत उत्थाय शयनात् प्रस्थितो मधुसूदनः ॥ २१॥
प्रभासं समनुप्राप्तं बीभत्सुमपराजितम् ।
तीर्थान्यनुचरन्तं च शुश्राव मधुसूदनः ॥ २२॥
चारणानां तु वचनाद् एकाकी स जनार्दनः ॥ २३
ततोऽभ्यगच्छत् कौन्तेयम् अज्ञातो नाम माधवः ॥ २३॥
ददृशाते तदाऽन्योन्यं प्रभासे कृष्णपाण्डवौ ॥ २४
तावन्योन्यं समाश्लिष्य पृष्ट्वा च कुशलं पथि ।
आस्तां प्रियसखायौ तौ नरनारायणावृषी ॥ २५
ततोऽर्जुनं वासुदेवस् तां चर्यां पर्यपृच्छत ॥ २५॥

वासुदेवः—

किमर्थं पावनानीह तीर्थान्यनुचरस्युत ॥ २६

वैशम्पायनः—

तोऽर्जुनो यथावृत्तं सर्वमाख्यातवांस्तदा ॥ १६।
श्रुत्वाऽथोवाच वार्ष्णेयस् त्वेवमेतदिति प्रभो ॥
तौ विहृत्य यथाकामं प्रभासे कृष्णपाण्डवौ ।
महीधरं रैवतकं वासायैवाभिजग्मतुः ॥ १८

1. घ—ज्ञानदृष्टश्चैव शयने मध्यरात्रे हरिस्स्वयम् ॥

कृष्णस्य वचनात् तं महीधरम् ।
...मलञ्चक्रुर् उपजह्रुश्च भोजनम् ॥ २९
...तेगृह्यार्जुनस्सर्वम् उपभुज्य च पाण्डवः ।
सहैव वासुदेवेन दृष्टवान् नटनर्तकान् ॥ ३०
अभ्यनुज्ञातवांस्सर्वान् अर्चयित्वा च पाण्डवः ।
सत्कृतं शयनं दिव्यम् अभ्यगच्छत् सहाच्युतः ॥ ३१
स कथां कथयन्नेव निद्रया जनमेजय ।
कौन्तेयोऽपि हृतस्तस्मिन् शयने सत्यविक्रमः ॥ ३२
मधुरेण स गीतेन वीणाशब्देन चानघ ।
प्रबोध्यमानो बुबुधे स्तुतिभिर्मङ्गलैस्तथा ॥ ३३
स कृत्वाऽवश्यकार्याणि वार्ष्णेयेनाभिनन्दितः ।
वार्ष्णेयं समनुज्ञाय ततो वासमरोचयत् ॥ ३४
तथेत्युक्त्वा वासुदेवो भोजनं वै शशास ह ॥ ३४॥
यतिरूपधरं पार्थं विसृज्य सहसा हरिः ।
रथेन काञ्चनाङ्गेन द्वारकामभिजग्मिवान् ॥ ३५॥
अलङ्कृता द्वारका तु बभूव जनमेजय ॥
...दृक्षवश्च गोविन्दं द्वारकावासिनो जनाः ।
...मार्गमाजग्मुस् तूर्णं शतसहस्रशः ॥ ३७
...पि वार्ष्णेया गोविन्दविरहाक्षमाः ।
...विष्टा भृशमुत्प्रेक्ष्य संस्थिताः ॥ ३८

अवलोकेषु नारीणां सहस्राणि शतानि च ।
भोजवृष्ण्यन्धकानां च समवायो महानभूत् ॥ ३९
स तथा सत्कृतस्सर्वैर् भोजवृष्ण्यन्धकात्मजैः ।
अभिवाद्याभिवाद्यांश्च सर्वैश्च प्रतिनन्दितः ॥ ४०
कुमारैस्सर्वशो वीरस् सत्कारेणाभिवादितः ।
समानवयसस्सर्वान् आश्लिष्य स पुनः पुनः ॥ ४१
कृष्णस्स्वभवनं रम्यं प्रविवेश महाद्युतिः ॥ ४१॥
प्रवासादागतं देव्यस् सर्वाः कृष्णमपूजयन्* ॥ ४२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि पञ्चाधिकद्विशततमोऽध्यायः ॥ २०५ ॥
॥ १६ ॥ अर्जुनवनवासपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
[अस्मिन्नध्याये ४२ श्लोकाः]
॥ समाप्तं चार्जुनवनवासपर्व ॥

॥ षडधिकद्विशततमोऽध्यायः ॥

॥ (अथ सुभद्राहरणपर्व) ॥

रैवतकपर्वतं प्रति उत्सवार्थं कृष्णादीनां गमनम् ॥ १ ॥ तत्र कृष्णस्य परिव्राजकरूपार्जुनदर्शनम् ॥ २ ॥ सुभद्रादर्शनेन तस्यां संजातहृच्छयार्जुनस्य यतिरूपेण सुभद्राहरणे कृष्णानुज्ञालाभः ॥ ३ ॥ १७
दितैतद्वृत्तान्तेन सपरिवारेण युधिष्ठिरेणाभ्यनुज्ञानम् ॥ ४ ॥

वैशम्पायनः—
ततः कतिपयाहस्सु तस्मिन् रैवतके गिरौ । १८

* घ-कोशे—अस्याध्यायसमाप्तिर्न दृश्यते ।

वृष्ण्यन्धकानामभवत् सुमहानुत्सवो नृप ॥ १

तत्र दानं ददुर्वीरा ब्राह्मणानां सहस्रशः ।
भोजवृष्ण्यन्धकाश्चैव [1]महे तस्य गिरेस्तदा ॥ २

प्रासादै रत्नचित्रैस्तु गिरेस्तस्य समन्ततः ।
स देशश्शोभितो राजन् दीपवृक्षैश्च शोभितः ॥ ३

वादित्राणि च तत्र[2]स्म वादकास्समवादयन् ।
ननृतुर्नर्तकाश्चैव जगुर्गीतानि गायकाः ॥ ४

अलङ्कृताः कुमाराश्च वृष्णीनां सुमहौजसः ।
यानैर्हाटकचित्राङ्गैश् चङ्क्रम्यन्ते स्म सर्वशः ॥ ५

पौराश्च पादचारेण यानैरुच्चावचैस्तथा ।
सदारास्सानुयात्राश्च शतशोऽथ सहस्रशः ॥ ६

ततो हलधरः क्ष्वीबो रेवतीसहितः प्रभुः ।
अनुगम्यमानो बहुभिर् अचरत् तत्र भारत ॥ ७

नथैव राजा वृष्णीनाम् उग्रसेनः प्रतापवान् ।
ीयमानो गन्धर्वैस् स्त्रीसहस्रसहायवान् ॥ ८

श्च साम्बश्च क्ष्वीबौ समरदुर्मदौ ।
म्बरधरौ विजह्रातेऽमराविव ॥ ९

ैव गदो भानुर्विडूरथः ।

---

2. क-ग-ङ—स्युः; घ—आसन्

निशठश्चारुदेष्णश्च पृथुर्विपृथुरेव च ॥ १०

सत्यकस्सात्यकिश्चैव भङ्गकारसहाचरौ ।
[1]हार्दिक्यः कृतवर्मा च ये चान्ये नानुकीर्तिताः ॥ ११

एते परिवृतास्स्त्रीभिर् गन्धर्वैश्च पृथक् पृथक् ।
तमुत्सवं रैवतके शोभयाञ्चक्रिरे तदा ॥ १२

वासुदेवो ययौ तत्र सह स्त्रीभिर्गुणान्वितः ।
दत्त्वा दानं द्विजातिभ्यः परिव्राजमपश्यत ॥ १३

तदा कौतूहले तस्मिन् वर्तमाने महोत्सवे ।
वासुदेवश्च पार्थश्च सहितौ परिजग्मतुः ॥ १४

तत्र चङ्क्रममाणौ तौ वसुदेवसुतां शुभाम् ।
अलङ्कृतां सखीमध्ये भद्रां ददृशतुस्तदा ॥ १५

दृष्ट्वैव तामर्जुनस्य कन्दर्पस्समजायत ।
तं तदैकाग्रमनसं कृष्णः पार्थमलक्षयत् ॥ १६

अब्रवीत् पुण्डरीकाक्षः प्रहसन्निव भारत ।
वनेचरस्य किमिदं कामेनालोड्यते मनः ॥ १७

ममैषा भगिनी पार्थ सारणस्य सहोदरी ।
यदि ते वर्तते बुद्धिर् वक्ष्यामि पितरं स्वयम् ॥ १८

---

1. अ-क-ख-ग—हृदिकः

अर्जुनः—

दुहिता वसुदेवस्य वासुदेवस्य च स्वसा ।
रूपेणैव च सम्पन्ना किमिवैषा न मोहयेत् ॥ १९

कृतमेव तु कल्याणं सर्वं मम भवेद्ध्रुवम् ।
यदि स्यान्मम वार्ष्णेय महिषीयं स्वसा तव ॥ २०

देवबृन्दस्सदा त्वां तु स्मृत्वा विजयतेऽसुरान् ।
तव सन्दर्शनात् स्वामिन्नप्राप्यं न हि तत् किमु ॥ २१

प्राप्तौ तु क उपायोऽस्यास् तं ब्रवीहि जनार्दन ।
आस्थास्यामि तथा सर्वं यदि शक्यं नरेण तत् ॥ २२

[1]वासुदेवः—

स्वयंवरः क्षत्रियाणां विवाहः पुरुषर्षभ ।
स च संशयितः पार्थ स्वभावस्यान्निमित्ततः ॥ २३

प्रसह्य हरणं चापि क्षत्रियाणां प्रशस्यते ।
विवाहहेतोः कन्यानाम् इति धर्मविदो विदुः ॥ २४

स त्वमर्जुन कल्याणीं प्रसह्य भगिनीं मम ।
यतिरूपधरस्त्वं तु यदा कालविपाकता ॥ २५

हर स्वयंवरे ह्यस्याः को वै वेद चिकीर्षितम् ॥ २५॥

---

1. घ—यदिदं मे भवान् कृष्ण मन्यतेऽभिमतं कृतम् ।
मन्ये सिद्धमिदं कार्यम् अस्माकं हि भवान् गतिः ॥
[अधिकः पाठः]

वैशम्पायनः—

ततोऽर्जुनश्च कृष्णश्च विनिश्चित्येतिकृत्यताम् ।
शीघ्रगान् पुरुषान् राजन् प्रेषयामासतुस्तदा ॥ २६॥
धर्मराजाय तत्सर्वम् इन्द्रप्रस्थगताय वै ॥ २७
श्रुत्वैव च महाबाहुर् अनुजज्ञे समातृकः ॥ २७॥
भीमसेनस्तु तच्छ्रुत्वा कृतकृत्योऽभ्यमन्यत ।
इत्येवं मनुजैस्सार्धम् उक्त्वा प्रीतिमुपेयिवान् ॥ २८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि षडधिकद्विशततमोऽध्यायः ॥ २०६ ॥
॥ १७ ॥ सुभद्राहरणपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[अस्मिन्नध्याये २८॥ श्लोकाः]

॥ सप्ताधिकद्विशततमोऽध्यायः ॥

द्वारकाया उपवने वसतः यतिरूपस्यार्जुनस्य रैवतकपर्वतात् प्रतिनिवृत्तैर्यादवैर्दर्शनम् ॥ १ ॥ यतिनिवासविषये यादवैः पृष्टे सुभद्रागृहे वसन्निति रामोक्तिः ॥ २ ॥ यतेस्सुभद्रागृहे कृष्णेन स्थापनम् ॥ ३ ॥ श्रुतपूर्वपार्थलक्षणदर्शनेन एनं यतिं अर्जुनं शङ्कमानायाः सुभद्रायाः यतिं प्रति अर्जुनादिकुशलप्रश्नः ॥ ४ ॥ अर्जुनेन तत्त्वे कथिते मोहितायां सुभद्रायां रुक्मिण्या श्वश्रूसमीपे तद्वृत्तकथनम् ॥ ५ ॥ वासुदेवानुमत्या देवक्या सुभद्राश्वासनम् ॥ ६ ॥ गूढं सुभद्राया विवाहचिकीर्षया कृष्णेन महादेवपूजाव्याजेन सर्वयादवैस्सह अन्तर्द्वीपगमनम् ॥ ७ ॥

वैशम्पायनः—

चारैस्सञ्चारिते तस्मिन् अनुज्ञातो धनञ्जयः ।
वासुदेवाभ्यनुज्ञातः कथयित्वेतिकृत्यताम् ॥ १

कृष्णस्य मतमास्थाय प्रययौ भरतर्षभः ॥ १॥
वृत्तोत्सवे रैवतके वृष्णयोऽभ्यगमन् पुरीम् ।
सुभद्राऽप्यथ शैलेन्द्रम् अभ्यर्च्य सह रैवतम् ॥ २॥
दैवतानि च सर्वाणि ब्राह्मणान् स्वस्ति वाच्य च ।
प्रदक्षिणं गिरिं कृत्वा प्रययौ द्वारकां प्रति ॥ ३॥
गतां रैवतकात् कन्यां प्रविष्टां द्वारकां प्रति ।
चिन्तयानस्ततो भद्राम् उपविष्टश्शिलातले ॥ ४॥
रमणीये वनोद्देशे बहुपादपसंवृते ।
सालतालाश्वकर्णैश्च बहुलैरर्जुनैस्तथा ॥ ५॥
चम्पकाशोकपुन्नागैः केतकैः पाटलैस्तथा ।
कर्णिकारैरशोकैश्च अङ्कोलैरतिमुक्तकैः ॥ ६॥
एवमादिभिरन्यैश्च संवृते स शिलातले ।
पुनः पुनश्चिन्तयानस् सुभद्रां भद्रभाषिणीम् ॥ ७॥
यदृच्छया चोपपन्नान् वृष्णिवीरान् ददर्श ह ॥ ८
बलदेवं च हार्दिक्यं साम्बं सारणमेव च ।
प्रद्युम्नं च गदं चैव चारुदेष्णं विदूरथम् ॥ ९
भानुं च निशठं चैव विपृथुं पृथुमेव च ।
तथाऽन्यांश्च बहून् पश्यन् हृदि शोकमधारयत् ॥ १०
ततस्ते सहितास्सर्वे यतिं दृष्ट्वा समुत्सुकाः ।
वृष्णयो विनयोपेताः परिवार्योपतस्थिरे ॥ ११

ततोऽर्जुनः प्रीतमनास् स्वागतं व्याजहार सः ।
आस्यतामास्यतां सर्वैं रमणीये शिलातले ॥ १२

इत्येवमुक्ता यतिना प्रीतास्ते यादवर्षभाः ।
उपोपविविशुस्सर्वे सुस्वागतमिति ब्रुवन् ॥ १३

ततस्तेषु निविष्टेषु वृष्णिवीरेषु पाण्डवः ।
आकारं गूहमानस्तु कुशलप्रश्नमब्रवीत् ॥ १४

सर्वत्र कुशलं चोक्त्वा बलदेवोऽब्रवीदिदम् ॥ १४॥

बलदेवः—

प्रसादं कुरु मे विप्र कुतस्त्वं चागतो ह्यसि ॥ १५

त्वया दृष्टानि पुण्यानि वदस्व वदतां वर ।
पर्वतांश्चैव तीर्थानि वनान्यायतनानि च ॥ १६

वैशम्पायनः—

तीर्थानां दर्शनं चैव पर्वतानां च भारत ।
आपगानां वनानां च कथयामास यादवे ॥ १७

ताः कथाः कथयन्नेव कथान्ते जनमेजय ।
कथां धर्मसमायुक्तां वृष्णिवीरे न्यवेदयत् ॥ १८

श्रुत्वा धर्मकथां पुण्यां वृष्णिवीरोऽभ्यपूजयत् ॥ १८॥

ततस्तु यादवास्सर्वे मन्त्रयन्ति स्म भारत ॥ १९

अयं देशातिथिश्श्रीमान् यतिलिङ्गधरो द्विजः ।

आवासं कमुपाश्रित्य वसेत निरुपद्रवः ॥ २०

इत्येवमब्रुवंस्ते वै रौहिणेयं तु यादवाः ॥ २०॥

ददृशुः कृष्णमायान्तम् सर्वे यादवनन्दनम् ।

एहि केशव तातेति रौहिणेयो वचोऽब्रवीत् ॥ २१॥

यतिलिङ्गधरो विद्वान् देशातिथिरयं द्विजः ।

वर्षरात्रनिवासार्थम् आगतो नः पुरं प्रति ॥ २२॥

स्थाने यस्मिन्निवसति तन्मे ब्रूहि जनार्दन ॥ २३

भगवान्—

त्वयि स्थिते महाभाग परवानस्मि धर्मतः ।

स्वयं तु रुचिरे स्थाने वासयेर्यदुनन्दन ॥ २४

वैशम्पायनः—

सुप्रीतस्तेन वाक्येन परिष्वज्य जनार्दनम् ।

बलदेवोऽब्रवीद्वाक्यं चिन्तयित्वा महाबलः ॥ २५

बलदेवः—

आरामे तु वसेद्धीमांश् चतुरो वर्षमासकान् ।

न्यापुरे सुभद्राया भुक्त्वा भोजनमिष्टतः ॥ २६

गृहेषु वसतान् इति मे धीयते मतिः ॥ २६॥

नुज्ञास्त्वया तत्र मन्यन्ते सर्वयादवाः ॥ २७

सुदेवः—

दर्शनीयश्च वाग्मी श्रीमान् बहुश्रुतः ।

कन्यापुरसमीपे तु न युक्तमिति मे मतिः ॥ २८

गुरुश्शास्ता च नेता च शास्त्रज्ञो धर्मवित्तमः ।
त्वयोक्तं न विरुध्येऽहं करिष्यामि वचस्तव ॥ २९

शुभाशुभस्य विज्ञाने नान्योऽस्ति भुवि कश्चन ॥ २९॥

[1]बलदेवः—

अयं देशातिथिश्श्रीमान् सर्वधर्मविशारदः ।
धृतिमान् विनयोपेतस् सत्यवाग्विजितेन्द्रियः ॥ ३०॥

यतिलिङ्गधरो ह्येष को विजानाति मानसम् ।
त्वमिमं पुण्डरीकाक्ष नीत्वा कन्यापुरं शुभम् ॥ ३१॥

निवेदय सुभद्रायै मद्वाक्यपरिचोदितः ॥ ३२

भक्ष्यैर्भोज्यैश्च पानैश्च अन्यैरिष्टैश्च पूजय[2]* ॥ ३२॥

वैशम्पायनः—

स तथेति प्रतिज्ञाय सहितो यतिना हरिः ।

---

1. घ—निस्सीमतररूपोयं सुभद्राऽपि तथाविधा ।
बलवानिन्द्रियग्रामो न जाने किं भविष्यति ॥ [अधिकः पाठः]

2 घ—सुशीलोऽयं यतिः कृष्ण इति मे निश्चितं मनः ।
श्रीकृष्णः—
कन्यागृहे यतेर्वासः सुखोदर्कोऽथवा भवेत् ।
दुःखोदर्को भवेद्वाऽपि नाहं जाने यदूद्वह ॥
भवता परवानस्मि यावदाचन्द्रतारकम् ॥ [अधिकः पाठः]

* अ-क-ख-ग-ङ—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते ॥

[1]कृत्वा तु संविदं तेन प्रहृष्टः केशवोऽभवत् ॥ ३३॥
पर्वते तौ विहृत्यैव यथेष्टं कृष्णपाण्डवौ ।
तां पुरीं प्रविवेशाथ गृह्य हस्ते च पाण्डवम् ॥ ३४॥
प्रविश्य च गृहं रम्यं सर्वभोगसमन्वितम् ।
पार्थमावेदयामास रुक्मिणीसत्यभामयोः ॥ ३५॥
हृषीकेशवचश्श्रुत्वा ते उभे चोचतुर्भृशम् ॥ ३६
मनोरथो महानेष हृदि नः परिवर्तते ।
कदा द्रक्ष्याम बीभत्सुं पाण्डवं गृहमागतम् ॥ ३७
इति चिन्तयमानानां पार्थो दुःखमपानुदत् ॥ ३७॥
प्राप्तमज्ञातरूपाभिर् उत्तमाभिरपूजयन् ॥ ३८
स तं प्रियातिथिं श्रेष्ठं समीक्ष्य यतिमागतम् ।
सोदर्यां भगिनीं कृष्णस् सुभद्रामिदमब्रवीत् ॥ ३९

भगवान्—

अयं देशातिथिर्भद्रे संयतो व्रतवानृषिः ।
प्राप्नोतु सततं पूजां तव कन्यापुरे वसन् ॥ ४०
आर्येण च परिज्ञातः पूजनीयो यतिस्सदा ।

---

1. घ—लब्धानुज्ञास्त्वया तात मन्यन्ते सर्वयादवाः ।
श्रीवासुदेवः—
शीलवान् दर्शनीयश्च वाग्मी श्रीमान् बहुश्रुतः ।
कन्यापुरसमीपेऽस्य न युक्तमिति मे मतिः ॥ [अधिकः पाठः]
हरिः—

तस्माद्भरस्व वार्ष्णेयि भक्ष्यैर्भोज्यैर्यातिं सदा ॥ ४१

एष यद्यद्दृषिर्ब्रूयात् कार्यमेव न संशयः ।
सखीभिस्सहिता भद्रे भवास्य वशवर्तिनी ॥ ४२

पुराऽपि यतयो भद्रे ये भैक्षार्थमनुव्रताः ।
ते बभूवुर्दशार्हाणां कन्यापुरनिवासिनः ॥ ४३

तेभ्यो भोज्यानि भक्ष्याणि यथाकालमतन्द्रिताः ।
कन्यापुरगताः कन्याः प्रयच्छन्ति यशस्विनि ॥ ४४

वैशम्पायनः —

सा तथोक्ताऽब्रवीत् कृष्णं करिष्यामि यथाऽऽत्थ माम् ।
तोषयिष्यामि वृत्तेन कर्मणा च द्विजर्षभम् ॥ ४५

एवमेतेन रूपेण कञ्चित् कालं धनञ्जयः ।
उवास भक्ष्यैर्भोज्यैश्च भद्रया परमार्चितः ॥ ४६

तस्य सर्वगुणोपेतां वासुदेवस्य सोदराम् ।
[1]पश्यतस्सततं भद्रां प्रादुरासीन्मनोभवः ॥ ४७

गूहयन्निव चाकारम् आलोक्य वरवर्णिनीम् ।
दीर्घमुष्णं निशश्वास पार्थः कामवशं गतः ॥ ४८

न कृष्णां रूपतो मेने वासुदेवस्य सोदराम् ।

1. क-ग-घ—प्राप्तां हृदीन्द्रसेनां वा साक्षाद्वा वरुणात्मजाम् ॥
[अधिकः पाठः]

प्राप्तां हृदीन्द्रसेनां वा साक्षाद्वा वरुणात्मजाम् ॥ ४९

अतीतसमये काले सोदर्याणां धनञ्जयः ।
न स्मार सुभद्रायाः कामाङ्कुशनिवारितः ॥ ५०

क्रीडारतिपरां भद्रां सखीजनशतैर्वृताम् ।
प्रीयते स्मार्जुनः पश्यन् स्वाहामिव हुताशनः ॥ ५१

पाण्डवस्य सुभद्रायास् सकाशे तु यशस्विनः ।
समुत्पत्तिः प्रभावश्च गदेन कथितः पुरा ॥ ५२

श्रुत्वा चाशनिनिर्घोषं केशवेनापि धीमता ।
उपमामर्जुनं कृत्वा विस्तरः कथितः पुरा ॥ ५३

क्रुद्धमत्तप्रलापश्च वृष्णीनामर्जुनं प्रति ।
पौरुषे चोपमां कृत्वा प्रावर्तन्त धनुष्मताम् ॥ ५४

अन्योन्यकलहे चापि विवादे चापि वृष्णयः ।
अर्जुनोऽपि न मे तुल्यः कुतस्त्वमिति तेऽब्रुवन् ॥ ५५

जातांश्च पुत्रान् गृह्णन्त आशिषो वृष्णयोऽब्रुवन् ।
अर्जुनस्य समो वीर्ये भव तात धनुर्धरः ॥ ५६

तस्मात् सुभद्रा चकमे पौरुषाद्भरतर्षभम् ॥ ५६॥

सत्यसन्धस्य रूपेण चातुर्येण च मोहिता ।
चारणातिथिसङ्घानां गदस्य च निशम्य सा ॥ ५७॥

अदृष्टे कृतभावाऽभूत् सुभद्रा भरतर्षभे ॥ ५८

कीर्तयन् ददृशे यो यः कथञ्चित् कुरुजाङ्गलम् ।
तं तमेव सदा भद्रा बीभत्सुं समभिपृच्छति ॥ ५९

अभीक्ष्णशः परिप्रश्नाद् अभीक्ष्णश्रवणात्तथा ।
प्रत्यक्ष इव भद्रायाः पाण्डवस्समपद्यत ॥ ६०

भुजौ भुजगसङ्काशौ ज्याघातेन किणीकृतौ ।
पार्थोऽयमिति पश्यन्त्या निस्संशयमजायत ॥ ६१

यथारूपं हि शुश्राव सुभद्रा भरतर्षभम् ।
तथारूपमवेक्ष्यैनं परां प्रीतिमवाप सा ॥ ६२

सा कदाचिदुपासीनं पप्रच्छ कुरुनन्दनम् ॥ ६२॥

सुभद्रा—

कथं देशाः कथं शैला नानाजनपदाः कथम् ।
सरांसि सरितश्चैव वनानि च कथं यते ॥ ६३॥

दिशः काश्च कथं प्राप्ताश् चरता भवता सदा ॥ ६४

वैशम्पायनः—

स तथोक्तस्तदा भद्रां बहुनर्मानृतं ब्रुवन् ।
उवाच परमप्रीतस् तस्या बहुविधाः कथाः ॥ ६५

निशम्य विविधं तस्य लोके चरितमात्मनः ।
कथापरिगतो भावः कन्यायास्समपद्यत ॥ ६६

पर्वसन्धौ तु कस्मिंश्चित् सुभद्रा भरतर्षभम् ।
रहस्येकान्तमासाद्य हृष्यमाणाऽभ्यभाषत ॥ ६७

सुभद्रा—

यतिना चरता लोकान् खाण्डवप्रस्थवासिनी ।
कच्चिद्भगवता दृष्टा पृथाऽस्माकं पितृष्वसा ॥ ६८

भ्रातृभिः प्रीयते सर्वैः कच्चिदार्यो युधिष्ठिरः ।
कच्चिद्धर्मपरो भीमो धर्मराजस्य धीमतः ॥ ६९

निवृत्तसमयः कच्चिद् अपराधाद्धनञ्जयः ।
नियमे कामभोगानां वर्तमानः प्रियेतरे । ७०

क्व नु पार्थश्चरत्यद्य बह्वीर्दुर्वसतीर्वसन् ।
सुखोचितो ह्यदुःखार्हो दीर्घबाहुररिन्दमः ॥ ७१

कच्चिच्छुतो वा दृष्टो वा पार्थो भगवताऽर्जुनः ॥ ७१॥

वैशम्पायनः—

निशम्य वचनं तस्यास् तामुवाच हसन्निव ॥ ७२

अर्जुनः—

आर्या पृथा कुशलिनी सहपुत्रा सहस्नुषा ।
प्रीयते पश्यती पुत्रान् खाण्डवप्रस्थ आसते ॥ ७३

अनुज्ञातश्च मात्रा च सोदर्यैश्च धनञ्जयः ।
द्वारकामावसत्येको यतिलिङ्गेन पाण्डवः ॥ ७४

पश्यन्ती सततं कस्मान्नाभिजानासि माधवि ॥ ७४॥

वैशम्पायनः—

निशम्य वचनं तस्य वासुदेवसहोदरी ।
निश्वासबहुला तस्थौ क्षितिं विलिखती तदा ॥ ७५॥

ततः परमसंहृष्टस् सर्वशस्त्रभृतां वरः ।
अर्जुनोऽहमिति प्रीतस् तामुवाच धनञ्जयः ॥ ७६॥

यथा तव गतो भावश् श्रवणान्मयि भामिनि ।
त्वद्गतस्सततं भावस् तथा शतगुणो मम ॥ ७७॥

प्रशस्तेऽहनि धर्मेण भद्रे स्वयमहं वृतः ।
सत्यवानिव सावित्र्या भविष्यामि पतिस्तव ॥ ७८॥

एवमुक्त्वा ततः पार्थः प्रविवेश लतागृहम् ॥ ७९

ततस्सुभद्रा ललिता लज्जाभावसमन्विता ।
मुमोह शयने दिव्ये शयाना न तथोचिता ॥ ८०

कन्यापुरे च संवृत्तं ज्ञात्वा दिव्येन चक्षुषा ।
शशास रुक्मिणीं कृष्णो भोजनादिकमर्जुने ॥ ८१

तदाप्रभृति तां भद्राम् चिन्तयन् वै धनञ्जयः ।
आस्ते स्म स तदाऽऽरामे [1]कार्श्येनेव सहाभिभूः ॥ ८२

सुभद्राऽपि न च स्वस्था पार्थं प्रति बभूव सा ।

1. क-ग-घ—कार्येणैव; घ—काश्यैजेन तदा

कृशा विवर्णवदना चिन्ताशोकपरायणा ॥ ८३

निश्वासपरमा भद्रा मानसेन मनस्विनी ।
न शय्यासनभोगेषु रतिं विन्दति केन चित् ॥ ८४

न नक्तं न दिवा शेते बभूवोन्मत्तदर्शना ।
एवं शोकपरां भद्राम् देवकी वाक्यमब्रवीत् ॥ ८५

देवकी—

मा शोकं कुरु वार्ष्णेयि धृतिमालम्ब शोभने ॥ ८५॥

निवेदयिष्ये त्वां रामे कृष्णे चैव नरर्षभे ।
पश्चाज्जानामि ते वार्ताम् मा शोकं कुरु माधवि ॥ ८६॥

वैशम्पायनः—

एवमुक्त्वा च सा माता भद्रायाः प्रियकामिनी ।
निवेदयामास तदा भद्रामानकदुन्दुभेः ॥ ८७॥

रहस्येकासना तत्र भद्राऽस्वस्थेति चाब्रवीत् ।
आगमे तु यतिश्रीमान् अर्जुनस्सोऽथ नश्श्रुतः ॥ ८८॥

अक्रूराय च कृष्णाय आहुकाय च सात्यकेः ।
निवेद्यतां महाप्राज्ञ श्रोतव्यं यदि वान्धवैः ॥ ८९॥

वसुदेवस्तु तच्छ्रुत्वा अक्रूराहुकयोस्तदा ।
निवेदयित्वा कृष्णाय मन्त्रयामास नैकधा ॥ ९०॥

इदं कार्यमिदं कृत्यम् इदमेवं विनिश्चितम् ॥ ९१

अक्रूरश्चोग्रसेनश्च सत्यकेन गदेन ह ।
पृथुश्रवाश्च कृष्णश्च सहिताश्शिनिना मुहुः ॥ ९२
रुक्मिणी सत्यभामा च देवकी रेवती तथा ।
वसुदेवेन सहिताः पुरोहितमते स्थिताः ॥ ९३
विवाहं मन्त्रयामासुर् द्वादशेऽहनि भारत ॥ ९३॥
अज्ञातं रौहिणेयस्य उद्धवस्य च भारत ।
विवाहं तु सुभद्रायाः कर्तुकामो गदाग्रजः ॥ ९४॥
उमासखस्य देवस्य ब्रह्मविश्वेशरूपिणः ।
महादेवस्य पूजार्थं व्याजेन मधुसूदनः ॥ ९५॥
[1]नगरे घोषयामास हितार्थं सव्यसाचिनः ॥ ९६
इतश्चतुर्थेऽहनि च अन्तर्द्वीपं च गम्यताम् ।
सदारैस्सानुयात्रैश्च सपुत्रैस्सहबान्धवैः ॥ ९७
गन्तव्यं सर्ववर्णैश्च गन्तव्यं सर्वयादवैः ॥ ९७॥
एवमुक्तास्तु ते सर्वे तथा चक्रुश्च सर्वशः ॥ ९८
ततस्सर्वदशार्हाणाम् अन्तर्द्वीपे नरर्षभ ।
चतुस्त्रिंशदहोरात्रं बभूव परमोत्सवः ॥ ९९
कृष्णरामाहुकाक्रूराः प्रद्युम्नश्शिनिसात्यकी ।
समुद्रं प्रययुर्हृष्टाः कुकुरान्धकवृष्णयः ॥ १००

1. क-ग-घ - चतुस्त्रिंशदहोरात्रं सुभद्रार्तिप्रशान्तये । [अधिकः पाठः]

युक्तयन्त्रपताकाभिर् वृष्णयो ब्राह्मणैस्सह ।
समुद्रं प्रययुर्नौभिस् सर्वे पुरनिवासिनः ॥ १०१
ततस्त्वरितमागत्य दाशार्हगणपूजितम् ।
सुभद्रा पुण्डरीकाक्षम् अब्रवीद्यतिशासनात् ॥ १०२
कृत्यवान् द्वादशाहानि स्थाता स भगवानिह ।
तिष्ठतस्तस्य कः कुर्याद् उपस्थानविधिं प्रति ॥ १०३
तमुवाच हृषीकेशः कस्त्वदन्यो विशेषतः ।
तमृषिं प्रत्युपस्थातुम् इह नार्हति मानवः ॥ १०४
त्वमेवास्मन्मतेनास्य महर्षेर्वशवर्तिनी ।
कुरु सर्वाणि कार्याणि कीर्तिं धर्ममवेक्ष्य च ॥ १०५
तस्य चातिथिमुख्यस्य सर्वेषां च तपस्विनाम् ।
संविधानपरा भद्रे भव त्वं वशवर्तिनी ॥ १०६

वैशम्पायनः—

एवमादिश्य भद्रां च रक्षां च मधुसूदनः ।
ययौ शङ्खप्रणादेन भेरीणां च महास्वनैः ॥ १०७
ततस्तद् द्वीपमासाद्य दानधर्मपरायणाः ।
उग्रसेनमुखास्सर्वे विजह्रुः कुकुरान्धकाः ॥ १०८
सप्तयोजनविस्तार आयतो दशयोजनम् ।
बभूव स महाद्वीपस् सपर्वतमहावनः ॥ १०९

सेतुपुष्करिणीजालैर् आक्रीडस्सर्वसात्वताम् ।

वापीपल्वलसङ्घैश्च काननैश्च मनोरमैः ॥ ११०
वासुदेवेन च द्वीपस् स सर्वैः कुकुरान्धकैः ।

बभूव परमोपेतस् त्रिविष्टप इवामरैः । १११

चतुस्त्रिंशदहोरात्रं दानधर्मपरायणाः ।
उग्रसेनमुखास्सर्वे विजह्रुः कुकुरान्धकाः ॥ ११२

विचित्रमाल्याभरणाश् चित्रगन्धानुलेपनाः ।
विहाराभिमुखास्सर्वे यादवाः पानगर्विताः ॥ ११३

सुनृत्तगीतवादित्रै रममाणास्तदाऽभवन् ॥ ११३॥
तत्र याते दशार्हाणाम् ऋषभे शार्ङ्गधन्वनि ।

सुभद्रोद्वाहनं पार्थः प्राप्तकालममन्यत ॥ ११४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि सप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥

॥ १७ ॥ सुभद्राहरणपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

[अस्मिन्नध्याये ११४॥ श्लोकाः]

॥ अष्टाधिकद्विशततमोऽध्यायः ॥

सुभद्राविवाहः ॥ १ ॥ कृष्णरथमास्थाय सुभद्रया सह अर्जुनस्य खाण्डवप्रस्थं गन्तुं यत्नः ॥ २ ॥

वैशम्पायनः—

वृष्ण्यन्धकपुरात् तस्माद् अपयानं च पाण्डवः ।
विनिश्चित्य तदा पार्थस् सुभद्रामिदमब्रवीत् ॥ १

अर्जुनः—

शृणु भद्रे यथाशास्त्रं यथार्थमृषिभिः कृतम् ॥ १॥
[1]कन्यायास्तु पिता भ्राता माता मातुल एव च ।
पितुर्भ्राता गुरुश्चापि दातुं प्रभवतां गताः ॥ २॥
महोत्सवं पशुपतेर् द्रष्टुकामः पिता गतः ।
अन्तर्द्वीपं गतो भद्रे पुत्रैः पौत्रैस्सबान्धवैः ॥ ३॥
मम चैव विशालाक्षि विदेशस्थास्तु बान्धवाः ।
तस्मात् सुभद्रे गान्धर्वो विवाहः पञ्चमो भवेत् ॥ ४॥
समागमे तु कन्यायाः क्रियाः प्रोक्ताश्चतुर्विधाः ।
तासां प्रवृत्तिं साधूनां शृणु माधवि तद्यथा ॥ ५॥
वरमाहूय विधिना पित्रा दत्ता यथाऽर्थिने ।
सा पत्नी तु बुधैरुक्ता सा वश्या तु पतिव्रता ॥ ६॥

1. क ग घ—विवाहं बहुधा वत्से वर्णानां धर्मसंयुतम् [अधिकः पाठः]

भृत्यानां भरणार्थाय आत्मनः पोषणाय च ।
दाने गृहीता या नारी सा भार्येति बुधैर्मता ॥ ७॥

धर्मतो वरयित्वा तु आनीय स्वं निवेशनम् ।
न्यायेन दत्ता तारुण्ये दाराः पितृकृता भवेत् ॥ ८॥

जनयेद्या तु भर्तारं जाया इत्येव नामतः ॥ ९

दाराः पत्नी च भार्या च जाया चेति चतुर्विधाः ।
चतस्र एवाग्निसाक्ष्याः क्रियायुक्तास्तु धर्मतः ॥ १०

गान्धर्वेण विवाहेन रागात् पुत्रार्थकारणात् ।
आत्मनाऽनुगृहीता या वश्या सा तु प्रजावती ॥ ११

गान्धर्वस्तु क्रियाहीनो रागादेव प्रवर्तते ।
सकामायास्सकामेन निर्मन्त्रो रहसि स्मृतः ॥ १२

मयोक्तमक्रियं चापि कर्तव्यं माधवि त्वया ॥ १२॥

अयनं चैव मासश्च ऋक्षं पक्षस्तथा तिथिः ।
करणं च मुहूर्तं च लग्नसम्पत् तथाऽद्य वै ॥ १३॥

विवाहस्य विशालाक्षि प्रशस्तं चोत्तरायणम् ।
वैशाखश्चैव मासानां पक्षाणां शुभ्र एव च ॥ १४॥

नक्षत्राणां तथा हस्तस् तृतीया च तिथिष्वपि ।
लग्नो हि मकरश्रेष्ठः करणानां बवस्तथा ॥ १५॥

मैत्रो मुहूर्तो वैवाह्य आवयोश्शुभकर्मणि ॥ १६

सर्वसम्पदियं भद्रे अद्य रात्रौ भविष्यति ॥ १६॥

भगवानस्तमभ्येति आदित्यस्तपतां वरः ।

नारायणो हि सर्वज्ञो न च बुध्येत विश्वकृत् ॥ १७॥

धर्मसङ्कटमापन्ने किं नु कृत्वा शुभं भवेत् ॥ १८

मनोभवेन कामेन मोहितं मां प्रलापिनम् ।

प्रतिवाक्यं च मे देवि किं न वक्ष्यसि माधवि ॥ १९

वैशम्पायनः—

अर्जुनस्य वचश्श्रुत्वा चिन्तयन्ती जनार्दनम् ।

[1]नोवाच किञ्चिद्वचनं बाष्पदूषितलोचना ॥ २०

रागोन्मादप्रलापी सन्नर्जुनो जयतां वरः ।

चिन्तयामास पितरं प्रविश्य च लतागृहम् ॥ २१

चिन्तयानं तु कौन्तेयं ज्ञात्वा शच्या शचीपतिः ।

सहितो नारदाद्यैस्तु मुनिसिद्धाप्सरोगणैः ॥ २२

अरुन्धत्या वसिष्ठेन ह्याजगाम कुशस्थलीम् ॥ २२॥

चिन्तितं च सुभद्रायाश् चिन्तयित्वा जनार्दनः ।

निद्रयाऽपहृतज्ञानं रौहिणेयं विना तदा ॥ २३॥

सहाक्रूरेण शिनिना सत्यकेन गदेन च ।

---

1. क-ग-ङ—बहुप्रकारमुक्ताऽपि अर्जुनेन महात्मना ।
तत्सर्वं वितथीकृत्य चिन्तयन्ती जगद्गुरुम् ॥
[अधिकः पाठः]

वसुदेवेन देवक्या आहुकेन च धीमता ॥ २४॥
आजगाम पुरीं रात्रौ द्वारकां स्वजनैर्वृतः ॥ २५
पूजयित्वा तु देवेशं नारदाद्यैर्महर्षिभिः ।
कुशलप्रश्नमुक्त्वा तु देवेन्द्रेणाभियाचितः ॥ २६
वैवाहिकीं क्रियां कृष्णस् तथेत्येवमुवाच ह ॥ २६॥
आहुको वसुदेवश्च सहाक्रूरस्ससात्यकिः ।
अभिप्रणम्य शिरसा पाकशासनमब्रुवन् ॥ २७॥
देवदेव नमस्तेऽस्तु लोकनाथ जगत्पते ।
वयं धन्यास्स्म लोकेषु बान्धवैस्सहिताः प्रभो ॥ २८॥
कृतप्रसादास्तु वयं तव वाक्येन विश्वजित् ॥ २९
एवमुक्त्वा प्रसाद्यैनं पूजयित्वा प्रयत्नतः ।
महेन्द्रशासनात् सर्वे सहिताश्च महर्षिभिः ॥ ३०
विवाहं कारयामासुश् शक्रपुत्रस्य शास्त्रतः ॥ ३०॥
अरुन्धती शची देवी रुक्मिणी देवकी तथा ।
दिव्यस्त्रीभिश्च सहिताः क्रियां भद्रां प्रयोजयन् ॥ ३१॥
महर्षिः काश्यपो होता सदस्या नारदादयः ।
पुण्याशिषः प्रयोक्तारस् सर्वे ह्यासंस्तदाऽर्जुने ॥ ३२॥
अभिषेकं ततः कृत्वा महेन्द्रः पाकशासनिम् ।
लोकपालैस्तु सहितस् सर्वदेवैरभिष्टुतः ॥ ३३॥

किरीटाङ्गदहाराद्यैर् हस्ताभरणकुण्डलैः ।
भूषयित्वा तदा पार्थं द्वितीयमिव वासवम् ॥ ३४॥

पुत्रं परिष्वज्य तदा प्रीतिमाप पुरन्दरः ॥ ३५
शची देवी तदा भद्राम् अरुन्धत्यादिभिस्तथा ।

कारयामास वैवाह्यमङ्गलं यादवस्त्रियः ॥ ३६
सहाप्सरोभिर्मुदिता भूषणैश्चाभ्यभूषयन् ॥ ३६॥

पौलोमीमिव मन्यन्ते सुभद्रां देवयोषितः ॥ ३७
ततो विवाहो ववृधे स्फीतस्सर्वगुणान्वितः ॥ ३७॥

तस्याः पाणिं गृहीत्वाऽसौ मन्त्रहोमपुरस्कृतः ।
यथा तस्यैव हि पिता शच्या इव शतक्रतुः ॥ ३८॥

सा जिष्णुमधिकं भेजे सुभद्रा चारुदर्शना ॥ ३९
पार्थस्य सदृशी भद्रा रूपेण वयसा तथा ।

सुभद्रायाश्च पार्थोऽपि सदृशो रूपलक्षणैः ॥ ४०
इत्यूचुश्च तदा देवाः प्रीतास्सेन्द्रपुरोगमाः ॥ ४०॥

एवं निवेश्य देवास्तु गन्धर्वैस्साप्सरोगणैः ।
आमन्त्र्य यादवांत्सर्वे विप्रजग्मुर्यथागतम् ॥ ४१॥

यादवाः पार्थमामन्त्र्य अन्तर्द्वीपं गतास्तदा ।
वासुदेवस्तदा पार्थम् उवाच यदुनन्दनः ॥ ४२॥

भगवान्—

द्वाविंशद्दिवसान् पार्थ इहोष्य भरतर्षभ ।
मामकं रथमारुह्य शैब्यसुग्रीवयोजितम् ॥ ४३॥

सुभद्रया सुखं पार्थ खाण्डवप्रस्थमाविश ॥ ४४

यादवैस्सहितः पश्चाद् आगमिष्यामि भारत ।
यतिवेषेण निरतो वस त्वं वीरसत्तम ॥ ४५

वैशम्पायनः—

एवमुक्त्वा प्रचक्राम अन्तर्द्वीपं जनार्दनः ।
कृतोद्वाहस्तदा पार्थः कृतकार्योऽभवत्तदा ॥ ४६

तस्यां चोपगतो भावः पार्थस्य सहसा गतः ॥ ४६॥

स तया युयुजे वीरो भद्रया भरतर्षभः ।
अभिनिष्पन्नया रामस् सीतयेव समन्वितः ॥ ४७॥

स हि जिष्णुर्विजज्ञे तां ह्रीं श्रियं सन्नतिक्रियाम् ।
द्वादशानां वरस्त्रीणां रूपेणासदृशीं सतीम् ॥ ४८॥

स प्रकृत्या श्रिया दीप्तस् सन्दिदीपे तयाऽधिकम् ।
उद्यत्सहस्रदीप्तांशुश् शरदीव दिवाकरः ॥ ४९॥

सा तु तं मनुजव्याघ्रम् अनुरक्ता मनस्विनी ।
कन्यापुरगता भूत्वा तत्परा समपद्यत* । ५०॥

* अ-क-ख-ग -कोशेष्वत्रैवाध्यायसमाप्तिर्दृश्यते ।

वैशम्पायनः—

वृष्ण्यन्धकपुरात् तत्र अपयानं धनञ्जयः ।
विनिश्चित्य तया पार्थस् सुभद्रामिदमब्रवीत् ॥ ५१॥

अर्जुनः—

द्विजानां गणमुख्यानां यथार्हं प्रतिप्रादय ॥
भोज्यैर्भक्ष्यैश्च कामैश्च स्वपुरीं प्रतियास्यताम् ॥ ५२॥
आत्मनश्च समुद्दिश्य महाव्रतसमापनम् । ५३
गच्छ भद्रे स्वयं तूर्णं महाराजनिवेशनम् ॥ ५३॥
तेजोबलजवोपेतैश् शलक्ष्णैर्हयवरोत्तमैः ।
शैब्यसुग्रीवसंयुक्तं रथं तूर्णमिहानय ॥ ५४॥
क्रीडार्थमिह भाषित्वा सखीभिस्सुभगे सह ।
क्षिप्रमादाय पर्येहि सह सर्वायुधानि च ॥ ५५॥
अनुकर्षन् पताकाश्च तूणीरांश्च धनूंषि च ।
सर्वान् रथवरे कुर्यास् सोत्सेधाश्च महागदाः ॥ ५६॥

वैशम्पायनः—

अर्जुनेनैवमुक्ता सा सुभद्रा भद्रभाषिणी ।
जगाम नृपतेर्वेश्म सखीभिस्त्वरिता सह ॥ ५७॥
क्रीडार्थमिति तत्रस्थान् रक्षिणो वाक्यमब्रवीत् ॥ ५८
रथेनानेन यास्यामि महाव्रतसमापनम् ।

शैव्यसुग्रीवयुक्तेन सायुधेन च शार्ङ्गिणः ॥ ५९

सुभद्रयैवमुक्ते तु जनाः प्राञ्जलयोऽभवन् ।
रथेनानेन भद्रे त्वं यथेष्टं क्रियतामिति ॥ ६०
योजयित्वा रथवरं कल्याणैरभिभाष्य ताम् ।
यथोक्तं सर्वमारोप्य आयुधानि च भामिनी ॥ ६१
क्षिप्रमादाय कल्याणी सुभद्राऽर्जुनमब्रवीत् ॥ ६१॥

सुभद्रा—

रथोऽयं रथिनां श्रेष्ठ आनीतस्तव शासनात् ।
स्वस्ति याहि यथाकामं कुरून् कौरवनन्दन ॥ ६२॥

वैशम्पायनः—

निवेद्य तु रथं भर्तुस् सुभद्रा भद्रसम्मता ।
ब्राह्मणानां तदा हृष्टा ददौ सा विविधं वसु ॥ ६३॥
स्नेहवन्ति च भोज्यानि प्रददावीप्सितानि च ।
यथाकामं यथाश्रद्धं वस्त्राणि विविधानि च ॥ ६४॥
तर्पिता विविधैर्भक्ष्यैस् तान्यवाप्य वसूनि च ।
ब्राह्मणास्स्वगृहं जग्मुः प्रयुज्य परमाशिषः ॥ ६५॥
सुभद्रया तु विज्ञप्तः पूर्वमेव धनञ्जयः ।
रश्मिप्रग्रहणे पार्थ न मेऽस्ति सदृशो भुवि ॥ ६६॥
तस्मात् सा पूर्वमारुह्य रश्मीञ्जग्राह माधवी ।

सोदरा वासुदेवस्य कृतस्वस्त्ययना हयान् ॥ ६७॥

व्यत्ययित्वा तु तल्लिङ्गं समुच्छ्रितमहाधनुः ।
आरुरोह रथश्रेष्ठम् शुक्लवासा धनञ्जयः ॥ ६८॥

महेन्द्रदत्तं मकुटं तथा ह्याभरणानि च ।
अलङ्कृत्य तु कौन्तेयः प्रयातुमुपचक्रमे ॥ ६९॥

ततः कन्यापुरे घोषस् तुमुलस्समपद्यत ॥ ७०
दृष्ट्वा रथगतं पार्थं खड्गबाणधनुर्धरम् ।
अभीशुहस्तां सुश्रोणीम् अर्जुनेन रथे स्थिताम् ॥ ७१
ऊचुः कन्यापुरे कन्या वासुदेवसहोदराम् ॥ ७१॥

कन्याः—

सर्वे कामास्समृद्धास्ते सुभद्रे भद्रभाषिणि ।
वासुदेवप्रियं लब्ध्वा भर्तारं वीरमर्जुनम् ॥ ७२॥

सर्वसीमन्तिनीनां त्वं श्रेष्ठा कृष्णसहोदरे ।
यस्मात् सर्वमनुष्याणां श्रेष्ठो भर्ता तवार्जुनः ॥ ७३॥

उपपन्नस्त्वया वीरस् सर्वलोकमहारथः ।
स्वस्ति याहि गृहं भद्रे सुहृद्भिस्सङ्गमोऽस्तु ते ॥ ७४॥

वैशम्पायनः—

एवमुक्ता प्रहृष्टाभिस् सखीभिः प्रतिनन्दिता ।
भद्रा भद्रजवोपेतान् अश्वान् पुनरचोदयत् ॥ ७५॥

ततश्चामरहस्ताऽत्र सखी कुब्जाङ्गनाऽभवत् ॥ ७६

ततः कन्यापुरद्वारि सुघोषमभिनिस्सृतम् ।
ददृशुस्तं रथश्रेष्ठं जना जीमूतनिस्वनम् ॥ ७७

सुभद्रासङ्गृहीतस्य रथस्य महतो रवम् ।
मेघस्वनमिवाकाशे शुश्रुवुः पुरवासिनः ॥ ७८

सुभद्रया च सम्पन्ने तिष्ठन् रथवरेऽर्जुनः ।
प्रबभौ परयोपेतः कैलास इव गङ्गया ॥ ७९

पार्थस्सुभद्रासहितो विरराज महारथः ।
पार्थस्यैव पिता शक्रो यथा शच्या समन्वितः ॥ ८०

सुभद्रां प्रेक्ष्य धर्मेण ह्रियमाणां यशस्विनीम् ।
चक्रुः किलकिलाशब्दम् आसाद्य बहवो जनाः ॥ ८१

दाशार्हाणां कुलस्य श्रीस् सुभद्रा भद्रभाषिणी ।
अभिकामा सकामेन पार्थेन सह गच्छति ॥ ८२

अथापरे तु संक्रुद्धा गृह्यतां व्रत मा चिरम् ।
[1]इति संवार्यमाणानां सन्नादस्सुमहानभूत् ॥ ८३

स तेन जनघोषेण वीरो गज इवार्दितः ।
ववर्ष शरवर्षाणि न तु कञ्चन रोषयत् ॥ ८४

मुमोच निशितान् बाणान् दीप्यमानान् स्वतेजसा ।

1. घ—इति संवार्य शस्त्राणि ववर्षुरभितो दिशम् । [अधिकः पाठः]

प्रासादवरसङ्घेषु हर्म्येषु भवनेषु च ॥ ८५

[1]क्षोभयित्वा पुरश्रेष्ठम् गरुत्मानिव सागरम् ।
प्रेक्षन् रैवतकद्वारं निर्ययौ भरतर्षभः ॥ ८६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि अष्टाधिकद्विशततमोऽध्यायः ॥ २०८ ॥
॥ १७ ॥ सुभद्राहरणपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
[अस्मिन्नध्याये ८६ श्लोकाः]

॥ नवाधिकद्विशततमोऽध्यायः ॥

द्वारकाया बहिर्निर्गच्छतोऽर्जुनस्य विपृथुना युद्धम् ॥ १ ॥ विपृथुं जित्वाऽर्जुनस्य खाण्डवप्रस्थं प्रति गमनम् ॥ २ ॥ युद्धोद्युक्तानां यादवानां बलरामवाक्यान्निवृत्तिः ॥ ३ ॥ बलस्य क्रोधः ॥ ४ ॥

वैशम्पायनः—

शासनात् पुरुषेन्द्रस्य बलेन महता बली ।
गिरौ रैवतके नित्यं बभूव विपृथुश्रवाः ॥ १

प्रवासे वासुदेवस्य तस्मिन् हलधरोपमः ।
सम्बभूव तदा गोप्ता पुरस्य पुरवर्धनः ॥ २

---

1. अ-क-ग-घ—प्रासादपङ्क्तिस्तम्भेषु वेदिकासु ध्वजेषु च ।
मुमोच निशितान् बाणान् न तु कञ्चन रोषयत् ॥
[अधिकः पाठः]

प्राप्य पाण्डवनिर्याणं निर्ययौ विपृथुश्रवाः ।
निशम्य पुरनिर्घोषं स्वमनीकमचोदयत् ॥ ३
सोऽभिपत्य तदाऽध्वानं ददर्श पुरुषर्षभम् ।
निस्सृतं द्वारकाद्वाराद् अंशुमन्तमिवाम्बुदात् ॥ ४
सविद्युतमिवाम्भोदं प्रेक्ष्य बाणधनुर्धरम् ।
पार्थमासाद्य योधानां विस्मयस्समपद्यत ॥ ५
उदीर्णरथनागाश्वम् अनीकमभिवीक्ष्य तत् ।
उवाच परमप्रीता सुभद्रा भरतर्षभम् ॥ ६
सङ्गृहीतुमभिप्रायो दीर्घकालकृतो मम ।
युध्यमानस्य सङ्ग्रामे रथं तव नरर्षभ ॥ ७
ओजस्तेजोद्युतिबलैर् अजितस्य महात्मनः ।
पार्थस्य वै सारथित्वे भवेथा इत्यशिक्षयन् ॥ ८
एवमुक्तः प्रियां प्रीतः प्रत्युवाच नरर्षभः । ८॥

अर्जुनः—

चोदयाश्वानसंसक्तान् विशन्तु विपृथोर्बलम् ॥ ९
बहुभिर्युध्यमानस्य तावकानजिघांसतः ।
पश्य बाहुबलं भद्रे शरान् विक्षिपतो मम ॥ १०

वैशम्पायनः—

एवमुक्ता तदा भद्रा पार्थेन भरतर्षभ ।
चुचोद चाश्वान् विस्रब्धा ततस्ते विविशुर्बलम् ॥ ११

1. अ—बभूव ।

तदाहतमहावाद्यं समुद्यग्ध्वजायुतम् ।
अनीकं विपृथोर्हृष्टं पार्थमेवान्ववर्तत ॥ १२

रथैर्बहुविधैर्हृष्टा सदश्वैश्च महाजवैः ।
किरन्तश्शरवर्षाणि परिवव्रुर्धनञ्जयम् ॥ १३

तेषामस्त्राणि संवार्य दिव्यैरस्त्रैर्महाबलवित् ।
आवृणोन्महदाकाशं शरैः परपुरञ्जयः ॥ १४

तेषां बाणान् महाबाहुर् विसृष्टान् सन्धितानपि ।
चिच्छेद निशितैर्बाणैश् शरांश्चैव धनूंषि च ॥ १५

युगानीषावरूथानि यन्त्राणि विविधानि च ।
अजिघांसन् परान् पार्थश् चिच्छेद निशितैश्शरैः ॥ १६

निर्धनुष्कान् विकवचान् विरथांश्च महारथान् ।
कृत्वा पार्थः प्रियां प्रीतः प्रेक्ष्यतामित्यदर्शयत् ॥ १७

सा दृष्ट्वा महदाश्चर्यं सुभद्रा पार्थमब्रवीत् ।
अवाप्तार्थोऽसि भद्रं ते याहि पार्थ यथासुखम् ॥ १८

संसक्तं पाण्डुपुत्रेण समीक्ष्य विपृथुर्बलम् ।
त्वरमाणोऽभिनिष्क्रम्य स्थीयतामित्यभाषत ॥ १९

तन्तु सेनापतेर्वाक्यं नात्यवर्तन्त यादवाः ।
सागरे मारुतोद्धूता वेलामिव महोर्मयः ॥ २०

ततो रथवरात्तूर्णम् अवरुह्य नरर्षभः ।

अभिगम्य नरव्याघ्रं प्रहृष्टः परिषस्वजे ॥ २१

सोऽब्रवीत् पार्थमासाद्य दीर्घकालमिदं तव ।
निवासमभिजानामि शङ्खचक्रगदाधरात् ॥ २२

न चास्त्यविदितं किञ्चिद् यद्यदाचरितं त्वया ।
सुभद्रासम्प्रयोगेन प्रीतस्तव जनार्दनः ॥ २३

प्राप्तस्य यतिलिङ्गेन द्वारकां तु धनञ्जय ।
विसृष्टा सर्ववृष्णीनाम् ऋषभेण च सोदरा ॥ २४

त्वमिमां वीर दाशार्हीं शचीमिव शचीपतिः ।
भक्तां गुणवतीं भद्रां सदा सत्कर्तुमर्हसि ॥ २५
बन्धुर्भव सुभद्राया गतिश्च त्वं धनञ्जय ॥ २५॥

बन्धुमानसि रामेण महेन्द्रावरजेन च ॥ २६

मामेव हि सदाऽकार्षीन्मन्त्रिणं मधुसूदनः ।
अन्तरेण सुभद्रां च त्वां च तात धनञ्जय ॥ २७

इमं रथवरं दिव्यं सर्वशस्त्रसमन्वितम् ।
इदमेवानुयात्रं च निर्दिश्य गदपूर्वजः ॥ २८

अन्तर्द्वीपं तदा वीर यातो वृष्णिसुखावहः ॥ २८॥
दीर्घकालावरुद्धं त्वां सम्प्राप्तं प्रियया सह ।

पश्यन्तु भ्रातरस्तत्र वज्रपाणिमिवामराः ॥ २९॥

आगते तु दशार्हाणाम् ऋषभे शार्ङ्गधन्वनि ।
भद्रामनुगमिष्यन्ति रत्नानि च वसूनि च ॥ ३०॥
अरिष्टं गच्छ पन्थानं सुखी भव धनञ्जय ।
नष्टशोकैर्विशोकस्य सुहृद्भिस्सङ्गमोऽस्तु ते ॥ ३१॥

ततो विपृथुमामन्त्र्य पार्थः प्रीतोऽभिवाद्य च ।
कृष्णस्य मतमास्थाय कृष्णस्य रथमास्थितः ॥ ३२॥

पूर्वमेव तु पार्थाय कृष्णेन विनियोजितम् ।
सर्वरत्नसुसम्पूर्णम् सर्वभोगसमन्वितम् ॥ ३३॥

रथेन काञ्चनाङ्गेन कल्पितेन यथाविधि ।
शैब्यसुग्रीवयुक्तेन किङ्किणीजालमालिना ॥ ३४॥

सर्वशस्त्रोपपन्नेन जीमूतरवनादिना ।
ज्वलिताग्निप्रकाशेन द्विषतां हर्षघातिना ॥ ३५॥

सन्नद्धः कवची खड्गी बद्धगोधाङ्गुलित्रवान् ।
गुप्तसेनानुयात्रेण रथमारोप्य माधवीम् ॥ ३६॥
रथेनाकाशगेनैव प्रययौ स्वपुरं प्रति ॥ ३७

ह्रियमाणां तु तां दृष्ट्वा सुभद्रां सैनिको जनः ।
व्याक्रोशत् प्राद्रवत् सर्वो द्वारकामभितः पुरीम् ॥ ३८

ते समासाद्य सहितास् सुधर्मामभितः पुरीम् ।

सभापालस्य तत् सर्वम् आचख्युः पार्थविक्रमम् ॥ ३९

तेषां श्रुत्वा सभापालो भेरीं सन्नाहयत्तदा ।
समाजघ्ने महाघोषां जाम्बूनदपरिष्कृताम् ॥ ४०

क्षोभितास्तेन शब्देन भोजवृष्ण्यन्धकास्तदा ।
अन्तर्द्वीपात् समुत्पेतुस् सहसा सहितास्तदा ॥ ४१
अन्नपानमपाहाय समापेतुस्समन्ततः ॥ ४१॥

ततो जाम्बूनदाङ्गानि परार्ध्यास्तरणानि च ।
मणिविद्रुमचित्राणि ज्वलिताग्निप्रभाणि च ॥ ४२॥

भेजिरे पुरुषव्याघ्रा वृष्ण्यन्धकमहारथाः ।
सिंहासनानि शतशो धिष्ण्यानीव हुताशनाः ॥ ४३॥

तेषां समुपविष्टानां देवानामुपसङ्गमे ।
आचख्यौ चेष्टितं जिष्णोस् सभापालस्सहानुगः ॥ ४४॥

तच्छ्रुत्वा वृष्णिवीरास्ते मदरक्तान्तलोचनाः ।
अमृष्यमाणाः पार्थस्य समुत्पेतुर्महाबलाः ॥ ४५॥

योजयित्वा रथानाशु नागानश्वांस्तथैव च ।
कवचानहरन् क्षिप्रं प्रासानाहरतेति च ॥ ४६॥
धनूंषि च महार्हाणि कवचानि बृहन्ति च ॥ ४७
सूतान् विचुक्रुशुः केचिद् रथान् योजयतेति च ।

स्वयं च तुरगान् केचित् निन्युर्हेमविभूषितान् ॥ ४८

रथेष्वानीयमानेषु कवचेषु महत्सु च ।
[1]महास्कन्धे नृवीराणां तदासीत्तुमुलं महत् ॥ ४९

वनमाली ततः क्षीबः कैलासशिखरोपमः ।
नीलवासा मदोत्सिक्त इदं वचनमब्रवीत् ॥ ५०

किमिदं चाकृतप्रज्ञास् तूष्णीम्भूते जनार्दने ।
अस्य भावमविज्ञाय सङ्क्रुद्धा मोघगर्जिताः ॥ ५१

एष तावदभिप्रायम् आख्यातु मम यद्धृदि ।
यदस्य सूचितं कर्तुं तत् कुरुध्वमतन्द्रिताः ॥ ५२

ततस्ते वचनं श्रुत्वा ग्राह्यरूपं हलायुधात् ।
तूष्णीम्भूतास्ततस्सर्वे साधु साध्विति चाब्रुवन् ॥ ५३

समवाचस्तु निश्शब्दा बलदेवस्य धीमतः ।
पुनरेव सभामध्ये सर्वे ते समुपाविशन् ॥ ५४

ततोऽब्रवीत् कामपालो वासुदेवं परन्तपम् ॥ ५४॥

बलदेवः—

त्रैलोक्यनाथ भो कृष्ण भूतभव्यभविष्यवित् ।
किमुवाऽत्रोपविष्टोऽसि प्रेक्षमाणो जनाकुलम् ॥ ५५॥
सत्कृतस्त्वत्कृते पार्थस् सर्वैरस्माभिरच्युत ।

1. क-ग-ङ—यादववीराणां; घ—अभिक्रन्दो नृवीराणां

न च सोऽर्हति तां पूजां दुर्बुद्धिः कुलपांसनः ॥ ५६॥
को हि तत्रैव [1]भुक्त्वाऽन्नं भेत्तुमर्हति पापकृत् ।
मन्यमानः कुले जातम् आत्मानं पुरुषः क्वचित् ॥ ५७॥
ईप्समानश्च सम्बन्धं कृतपूर्वं च मानयन् ।
को हि नाम भवेदर्थी साहसेन चरेद्बुधः ॥ ५८॥
सोऽवमत्य च नामास्मान् अवमत्य च केशवम् ।
प्रसह्य हृतवानद्य सुभद्रां मृत्युमात्मनः ॥ ५९॥
कथं हि शिरसो मध्ये कृतं तेन पदं मम ।
त्वया चेदभ्यनुज्ञातो मर्षयिष्यामि माधव ॥ ६०॥
न मर्षयिष्ये गोविन्द पादस्पर्शमिवोरगः ॥ ६१
अद्य निष्कौरवामेकः करिष्यामि वसुन्धराम् ।
न हि मे मर्षणीयोऽयम् अर्जुनस्य व्यतिक्रमः ॥ ६२
तमहं भ्रातृभिस्सार्धं निहन्मि कुल[illegible]नम् ॥ ६२॥

वैशम्पायनः—
रौहिणेयं गर्जमानं मेघदुन्दुभिनिस्स्वनम् ।
अन्वपद्यन्त ते सर्वे भोजवृष्ण्यन्धकास्तथा ॥ ६३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि नवाधिकद्विशततमोऽध्यायः ॥ २०९ ॥
॥ १७ ॥ सुभद्राहरणपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
[अस्मिन्नध्याये ६३॥ श्लोकाः]
(सुभद्राहरणपर्व समाप्तम्)

---

1. क-ग-ङ—भुक्त्वाऽन्नं भोजनं भेत्तुमर्हति ।
ख—तलान्नं भोक्तुमर्हति पापकृत् ।
घ—भुक्त्वाऽन्नं भेत्तुमर्हति पापकृत् ।

॥ दशाधिकद्विशततमोऽध्यायः ॥

(अथ हरणहारिकपर्व)

कृष्णेन बलरामसान्त्वनम् ॥१॥ अर्जुनं प्रत्यानेतुं यादवानां गमनम् ॥ २ ॥ विपृथुवाक्यादर्जुनं दूरगतं ज्ञात्वा तेषां प्रतिनिवर्तनम् ॥ ३ ॥ सुभद्रया सह अर्जुनस्य खाण्डवप्रस्थगमनम् ॥ ४ ॥ अर्जुनेन सुभद्रायाः गोपीवेषेण द्रौपदीसमीपप्रेषणम् ॥ ५ ॥ कृतनतिं सुभद्रां प्रति पृथाद्रौपदीभ्यां आशीर्वादः ॥ ६ ॥ स्वपुरं प्रविष्टेनार्जुनेन भ्रातृभ्यः स्वकृततीर्थयात्रावृत्तान्तकथनम् ॥ ७ ॥

वैशम्पायनः—

उक्तवन्तो यदा वाक्यम् असकृत् सर्ववृष्णयः ।
ततोऽब्रवीद्वासुदेवो वाक्यं धर्मार्थसंहितम् ॥ १

वासुदेवः—

मयोक्तं न श्रुतं पूर्वं सहितैस्सर्वयादवैः ।
अतिक्रान्तमतिक्रान्तं न निवर्तति कर्हि चित् ॥ २

शृणुध्वं सहितास्सर्वे मम वाक्यं सहेतुकम् ॥ २॥

नावमानं कुलस्यास्य गुडाकेशः प्रयुक्तवान् ।
सम्मानोऽभ्यधिकस्तेन प्रयुक्तोऽयं न संशयः ॥ ३॥

[1]अर्थान् धर्मांश्च वः पार्थो मन्यते सात्वतां सदा ।
स्वयंवरमनाधृष्यं मन्यते चापि पाण्डवः ॥ ४॥

---

1. क-घ-ग—अर्थलुब्धांश्च वः पार्थो मन्यते सात्वतात्सदा ।

प्रदानमपि कन्यायाः पशुवत् को नु मंस्यति ।
विक्रयं चाप्यपत्यस्य कः कुर्यात् पुरुषो भुवि ॥ ५॥
एतान् दोषांस्तु कौन्तेयो दृष्ट्वानिति मे मतिः ॥ ६
क्षत्रियाणां तु वीर्येण प्रशस्तं हरणं बलात् ।
अतः प्रसह्य हृतवान् कन्यां धर्मेण पाण्डवः ॥ ७
उचितश्चैव सम्बन्धस् सुभद्रा च यशस्विनी ।
एतस्यास्सदृशः पार्थः प्रसह्य हृतवानतः ॥ ८
भरतस्यान्वये [1]जातं शत्रुशातनमद्य वै ।
कुन्तिभोजात्मजापुत्रं का बुभूषेत नार्जुनम् ॥ ९
न च पश्यामि यः पार्थं विक्रमेण पराजयेत् ।
अपि सर्वेषु लोकेषु सदेवमनुजेष्वपि ॥ १०
स च नाम रथस्तादृङ् मदीयास्ते च वाजिनः ॥ १०॥
मम शस्त्राण्यशेषेण तूणी चाक्षयसायकौ ।
योद्धा पार्थश्च शीघ्रास्त्रः को नु तेन समो भवेत् ॥ ११॥
तमभिद्रुत्य सान्त्वेन परमेण धनञ्जयम् ।
हृष्टास्सर्वे निवर्तध्वं ममैषा परमा मतिः ॥ १२॥
यदि निर्जित्य वः पार्थो बलाद्गच्छेत् स्वकं पुरं ।
विनश्येद्वो यशस्सद्यो न तु सान्त्वे पराजयः ॥ १३॥

1. घ—जातं शन्तनोः पुत्रमद्य वै । क-ग-ङ—जातश्शत्रुशातनकृत्तथा ।

पितृष्वसायाः पुत्रो मे सम्बन्धं नार्हति द्विषाम् ॥ १४

वैशम्पायनः—

तच्छ्रुत्वा वासुदेवस्य तथा कर्तुं जनाधिप ।
उद्योगं कृतवन्तस्ते भेरीं सन्नाद्य यादवाः ॥ १५

अर्जुनस्तु तदा श्रुत्वा भेरीसन्नादनं महत् ।
अर्जुनस्त्वरमाणस्तु सुभद्रामभ्यभाषत ॥

अर्जुनः—

आयान्ति वृष्णयस्सर्वे ससुहृज्जनबान्धवाः ।
त्वदर्थं योद्धुकामास्ते मदरक्तान्तलोचनाः ॥ १

प्रमत्तानशुचीन् मूढान् सुरामत्तान् नराधमान् ।
वमनं पानशीलांस्तान् करिष्यामि शरोत्तमैः ॥ १८
उताहो वा मदोन्मत्तान् नयिष्यामि यमक्षयम् ॥ १८॥

वैशम्पायनः—

एवमुक्त्वा प्रियां पार्थो न्यवर्तत महाबलः ॥ १९
निवर्तमानं दृष्ट्वैव सुभद्रा त्रस्ततां गता ।
एवं मा वद पार्थेति पादयोः पतिता तदा ॥ २०

सुभद्रा—

सुभद्रा तु कलिर्जाता वृष्णीनां निधनाय च ।
एवं ब्रुवन्ति पौरास्ते जनवादं जनाः प्रभो ॥ २
मम शोकं वर्धयन्ति तस्मात् पापं न चिन्तय ।

परिवादभयान्मुक्ता त्वत्प्रसादाद्भवाम्यहम् ॥ २२

वैशम्पायनः—

एवमुक्तस्ततः पार्थः प्रियया भद्रया तदा ।
गमनाय मतिं चक्रे पार्थस्सत्यपराक्रमः ॥ २३
स्मितपूर्वं तदाऽऽभाष्य परिष्वज्य प्रियां तदा ।
उत्थाप्य च पुनः पार्थो याहि याहीति चाब्रवीत् ॥ २४
ततस्सुभद्रा त्वरिता रश्मीत्सङ्गृह्य पाणिना ।
चोदयामास जवनाञ् छीघ्रमश्वान् कृतत्वरा ॥ २५
ततस्तु कृतसन्नाहा वृष्णिवीरास्समाहिताः ।
प्रत्यानयार्थं पार्थस्य जवनैस्तुरगोत्तमैः ॥ २६
राजमार्गमनुप्राप्ता दृष्ट्वा पार्थस्य विक्रमम् ॥ २६॥
प्रासादपङ्क्तिस्तम्भेषु वेदिकासु ध्वजेषु च ।
अर्जुनस्य शरान् दृष्ट्वा विस्मयं परमं गताः ॥ २७॥
केशवस्य वचस्तथ्यं मन्यमानास्तु यादवाः ।
अतीत्य तं रैवतकं श्रुत्वा तु विपृथोर्वचः ॥ २८॥
अर्जुनेन कृतं श्रुत्वा गन्तुकामास्तु वृष्णयः ।
श्रुत्वा [1]दीर्घं गतं पार्थं न्यवर्तन्त नराधिपाः ॥ २९॥
पुरोद्यानमतिक्रम्य विशालं च गिरिव्रजम् ।

1. क-ग-घ-ङ—दूरगतं

[1]सानुमुञ्जावतं चैव वनान्युपवनानि च ॥ ३०॥

पुण्येष्वानर्तराष्ट्रेषु वापीपद्मसरांसि च ।
प्राप्य धेनुमतीतीर्थम् अश्वरोधसरः प्रति ॥ ३१॥

प्रेक्षावर्तं ततश्शैलम् अम्बुदं च नगोत्तमम् ।
आराच्छृङ्गमथासाद्य तीर्त्वा कारवतीं नदीम् ॥ ३२॥

प्राप्य साल्वेयराष्ट्राणि [2]निषादानप्यतीत्य च ।
देवापृथुपुरं पश्यन् सर्वतस्सुसमाहितः ॥ ३३॥

तमतीत्य महाबाहुर् देवारण्यमपश्यत ॥ ३४

पूजयामासुरायान्तं देवारण्ये महर्षयः ॥ ३४॥

स वनानि नदीश्शैलान् गिरिप्रस्रवणानि च ।
अतीत्य च तदा पार्थस् सुभद्रासारथिस्तदा ॥ ३५॥

कौरवं विषयं प्राप्य विशोकस्समपद्यत ॥ ३६

सोदर्याणां महाबाहुस् सिंहाशयमिवाशयम् ।
आरादुपवनोपेतां दाशार्हप्रतिमां पुरीम्* ॥ ३७

क्रोशमात्रे पुरस्यासीद् गोष्ठं पार्थस्य शोभनम् ।
तत्राभीयात् स बीभत्सुर् निविष्टो यदुकन्यया ॥ ३८

---

1. ग-ङ—सानून्मुञ्जावतं । घ—सानून्युञ्जयिनीं चैव
2. क-ग-घ-ङ—निषादानभ्यतीत्य च । घ—निषधानप्यतीत्य च
* अ-क-ख-ग—कोशेष्वत्रैवाध्यायसमाप्तिर्दृश्यते ।

अर्जुनः—

ततस्सुभद्रां सत्कृत्य पार्थो वचनमब्रवीत् ।
गोपालिकानां वेषेण गच्छ त्वं वृजिनं पुरम् ॥ ३९
कामव्याहारिणी कृष्णा रोचतां ते वचो मम ॥ ३९॥
दृष्ट्वा तु परुषं ब्रूयात् सह तत्र मया गताम् ॥ ४०
अन्यवेषेण तु गतां दृष्ट्वा सा त्वां प्रियं वदेत् ॥ ४०॥
यत्तु सा प्रथमं ब्रूयान्न तस्यास्ति [1]निवर्तनम् ।
तस्मान्मानं च दर्पं च व्यपनीय स्वयं व्रज ॥ ४१॥

वैशम्पायनः—

तस्य तद्वचनं श्रुत्वा सुभद्रा प्रत्यभाषत ॥ ४२

सुभद्रा—

एवमेतत् करिष्यामि यथा त्वं पार्थ भाषसे ॥ ४२॥

वैशम्पायनः—

सुभद्रावचनं श्रुत्वा सु[illegible]तः पाकशासनिः ।
गोपालांस्स समानीय त्वरितो वाक्यमब्रवीत् । ४३॥

अर्जुनः

तरुण्यस्सन्ति यावन्त्यस् तास्सर्वा व्रजयोषितः ।
आगच्छन्तु गमिष्यन्त्या भद्रया सह सङ्गताः ॥ ४४॥
इन्द्रप्रस्थं पुरवरं कृष्णां द्रष्टुं यशस्विनीम् ॥ ४५

वैशम्पायनः—

एतच्छ्रुत्वा तु गोपालैर् आनीता व्रजयोषितः ॥ ४५॥

---

1. क-ग-ङ—व्यतिक्रमः

ततस्ताभिः परिवृतां व्रजस्त्रीभिरनिन्दिताम् ।
सुभद्रां त्वरमाणश्च रक्तकौशेयवासिनीम् ॥ ४६॥
पार्थः प्रस्थापयामास कृत्वा [1]गोपालिकावपुः ॥ ४७
साऽधिकं तेन रूपेण शोभमाना यशस्विनी ।
गोपालिकामध्यगता प्रययौ वृजिनं पुरम् ॥ ४८
ततः पुरवरश्रेष्ठम् इन्द्रप्रस्थं यशस्विनी ।
त्वरिता खाण्डवप्रस्थम् आससाद विवेश च ॥ ४९
सा गृहश्रेष्ठमासाद्य वीरपत्नी यशस्विनी ।
ववन्दे पृथुताम्राक्षी पृथां भद्रा पितृष्वसाम् ॥ ५०
ततोऽभिगम्य त्वरिता पूर्णेन्दुसदृशानना ॥
ववन्दे द्रौपदीं भद्रा प्रेष्याऽहमिति चाब्रवीत् ॥ ५१
प्रत्युत्थाप्य तु तां देवी कृष्णा कृष्णसहोदरीम् ।
सस्वजे चाभवत् प्रीता निस्सपत्नोऽस्तु ते पतिः ॥ ५२
वीरसूर्भव भद्रे त्वं भव भर्तृप्रिया तथा ॥ ५२॥
ओजसा [2]निर्मिता बह्वीर् उवाच परमाशिषः ॥ ५३
तथैव मुदिता भद्रा तामुवाच तथाऽस्त्विति ॥ ७३॥
ततस्सुभद्रां वार्ष्णेयी परिष्वज्य शुभाननाम् ।

---

1. क-ख-ग-घ-ङ—गोपालिकं वपुः
2. क-ग-ङ—निभृता

अङ्के निवेश्य मुदिता वासुदेवं प्रशस्य च ॥ ५४॥
ततः किलकिलाशब्दः क्षणेन समपद्यत ।

हर्षादानर्तयोधानाम् आसाद्य वृजिनं [1]पुरम् ॥ ५५॥
देवपुत्रप्रकाशास्ते जाम्बूनदमयध्वजाः ।

पृष्ठतोऽनुययुः पार्थं पुरुहूतमिवामराः ॥ ५६॥
गोभिरुष्ट्रैस्सदश्वैश्च युक्तानि बहुला जनाः ।

ददृशुर्यानमुख्यानि दाशार्हपुरवासिनाम् ॥ ५७॥
ततः पुरवरे यूनां प्रहर्षस्समजायत ।

प्रवासादागतं पार्थं दृष्ट्वा स्वमिव बान्धवम् । ५८॥
सोऽभिगम्य नरश्रेष्ठो दाशार्हगणसंवृतः ।

पौरैः पुरवरैःप्रीत्या परया चाभिनन्दितः ॥ ५९॥
प्राप्य चान्तःपुरद्वारम् अवरुह्य रथोत्तमात् ।

ववन्दे धौम्यमासाद्य मातरं च धनञ्जयः ॥ ६०॥
स्पृष्ट्वा च चरणौ राज्ञो भीमस्य च धनञ्जयः ।

यमाभ्यां वन्दितो [2]हृष्टस् सस्वजे तौ ननन्द च ॥ ६१॥
ब्राह्मणप्रमुखांत्सर्वान् भ्रातृभिस्सह सङ्गतः ।

यथार्हं मानयामास पौरजानपदानपि ॥ ६२॥

1. क-ग-ङ—नीं पुरीम्। घ—नां पुरम्
2. क-ग-ङ—हृष्टः परिष्वज्य च पाण्डवः

तत्रस्थान्यनुयातानि प्रदाय गुरवे वधूम् ।
पूजयाञ्चक्रुरासाद्य कुन्तीपुत्रं युधिष्ठिरम् ॥ ६३॥
पुरस्तादेव तेषां तु स महात्मा महायशाः ।
पूजनार्होऽभवद्राजा यथा वै गदपूर्वजः ॥ ६४॥
पाण्डवेन यथार्हं ते पूजार्हेण सुपूजिताः ।
न्यविशन्ताभ्यनुज्ञाता राज्ञा तुष्टा यशस्विना ॥ ६५॥
तामदीनामदीनार्हां सुभद्रां प्रीतिवर्धिनीम् ।
साक्षाच्छ्रियममन्यन्त पार्थाः कृष्णसहोदराम् ॥ ६६॥
[1]गुरूणां श्वशुराणां च देवराणां तथैव च ।
सुभद्रा स्वेन वृत्तेन बभूव परमप्रिया ॥ ६७॥
ततस्ते हृष्टमनसः पाण्डवेया महारथाः ।
युधिष्ठिरमुखाः प्रीता बभूवुर्जनमेजय ॥ ६८॥
कुन्ती च सततं प्रीता कृष्णा च सततं तथा[2] ॥ ६९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि दशाधिकद्विशततमोऽध्यायः ॥ २१० ॥
॥ १८ ॥ हरणहारिकपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[अस्मिन्नध्याये ६९ श्लोकाः]

---

1. घ—ते उभे रूपसम्पन्ने कृष्णाभद्रे पुरौकसः ।
रूपमेतादृशं लोके विद्यते च विसिष्मिरे ॥ [अधिकः पाठः]
2. क-ख-ग-ङ—तया

॥ एकादशाधिकद्विशततमोऽध्यायः ॥

कृष्णानुमत्याऽर्जुनः सुभद्रां जहारेति पौराणामूहः ॥ १ ॥ अर्जुनं इन्द्रप्रस्थं प्राप्तं ज्ञात्वा यादवैस्सह श्रीकृष्णस्य इन्द्रप्रस्थं प्रत्यागमनम् ॥ २ ॥ आगताञ्श्रीकृष्णादीञ्श्रुत्वा युधिष्ठिरस्य प्रत्युद्गमनं तेषां सत्कारश्च ॥ ३ ॥ वैवाहिकमहोत्सवकरणम् ॥ ४ ॥ पारिबर्हदानम् ॥ ५ ॥ कञ्चित्कालं तत्रोषितानां कुरुभिः पूजितानां बलरामादीनां द्वारकां प्रति गमनम् ॥६॥

वैशम्पायनः—

अथ शुश्राव निर्वृत्ते वृष्णीनां परमोत्सवे ।
अर्जुनेन हृतां भद्रां शङ्खचक्रगदाधरः ॥ १

पुरस्तादेव पौराणां संशयस्समजायत ।
जानता वासुदेवेन ग[1]सितो भरतर्षभः ॥ २

लोकस्य विदितं ह्यासीत् पूर्वं विपृथुना यथा ।
सान्त्वयित्वाऽभ्यनुज्ञातो भद्रया सह सङ्गतः ॥ ३

दित्सता सोदरां तस्मै पतत्त्रिवरकेतुना ।
अर्हते पुरुषेन्द्राय पार्थायायतलोचनाम् ॥ ४

सत्कृत्य [1]पाण्डवश्रेष्ठो जयेन जयतां वरः ।
भद्रया सह बीभत्सुः प्रापितो वृजिनं पुरम् ॥ ५

1. क-ख-ग-घ-ङ—चतुरङ्गेण बलेन जयतां

श्रुत्वा तु पुण्डरीकाक्षस् सम्प्राप्तं स्वपुरोत्तमम् ।
अर्जुनं पाण्डवश्रेष्ठम् इन्द्रप्रस्थगतं तथा ॥ ६

यियासुः खाण्डवप्रस्थम् अमन्त्रयत केशवः ।
पूर्वं सत्कृत्य राजानम् आहुकं मधुसूदनः ॥ ७

तथा विपृथुमक्रूरं सङ्कर्षणविदूरथौ ।
पित्रा च पुरुषेन्द्रेण पुरस्तादनुमोदितः ॥ ८

सम्प्रीतः प्रीयमाणेन वृष्णिराज्ञा जनार्दनः ।
अभिमन्त्र्याभ्यनुज्ञातो योजयामास वाहिनीम् ॥ ९

ततस्तु यानान्यासाद्य दाशार्हपुरवासिनाम् ।
सिंहनादः प्रहृष्टानां क्षणेन समपद्यत ॥ १०

योजयन्तस्सदश्वांस्तु यानयुग्यं रथांस्तथा ।
गजांश्च परमप्रीतास् समपद्यन्त वृष्णयः ॥ ११

वृष्ण्यन्धकमहामात्रैस् सह वीरैर्महारथैः ।
भ्रातृभिश्च कुमारैश्च योधैश्च शतशो वृतः ॥ १२

सैन्येन महता शौरिर् अभिगुप्तः परन्तपः ।
तत्र दान[1]परश्श्रीमान् जगाम स महायशाः ॥ १३

अक्रूरो वृष्णिवीराणां सेनापतिररिन्दमः ।

---

1 क-ग-ङ—पतिः श्रीमानाजगाम महा
घ—पतिः श्रीमाञ् जगाम सुमहायशाः

[1]अनाधृष्णिर्महातेजा उद्धवश्च महायशाः ॥ १४
साक्षाद्बृहस्पतेश्शिष्यो महाबुद्धिर्महायशाः ॥ १४॥
सात्यकिश्च महेष्वासः कृतवर्मा महारथः ॥ १५
प्रद्युम्नश्चैव साम्बश्च निशङ्कुश्शङ्कुरेव च ।
चारुदेष्णश्च विक्रान्तो झिल्लिर्विपृथुरेव च ॥ १६
सारणश्च महातेजा गदश्च विदुषां वरः ।
एते चान्ये च बहवो वृष्णिभोजान्धकास्तथा ॥ १७
आजग्मुः खाण्डवप्रस्थम् आदाय हरणं बहु ॥ १७॥
[2]अन्वाहारं समादाय पृथुवृष्णिपुरोगमाः ।
प्रययुर्स्सिहनादेन सुभद्रामवलो[3]ककाः ॥ १८॥
ते त्वदीर्घेण कालेन कृष्णेन सह यादवाः ।
पुरमासाद्य पार्थानां परां प्रीतिमवाप्नुवन् ॥ १९॥
ततो युधिष्ठिरो राजा श्रुत्वा माधवमागतम् ।
प्रतिग्रहार्थं कृष्णस्य यमौ प्रास्थापयद्गृहात् ॥ २०॥
ताभ्यां प्रतिगृहीतं तु वृष्णिचक्रं समृद्धिमत् ।
विवेश खाण्डवप्रस्थं पताकाध्वजशोभितम् ॥ २१॥
चन्दनस्य रसैश्शीतैः पुण्यगन्धैर्निषेवितम् ।

1. क-ग-ङ—अनाधृष्यो महा। घ—अनाधृतिर्महा
2. क-ग-ङ—उपहारं। घ—अन्वाहार्यं
3. क-ग-ङ—कितुम्

दह्यताऽगुरुणा चैव देशे देशे सुगन्धिनम् ॥ २२॥

सुसंहृष्टजनाकीर्णं वणिग्भिरुपशोभितम् ।
प्रतिपेदे महाबाहुस् सह रामेण केशवः ॥ २३॥

वृष्ण्यन्धकैस्तथा भोजैस् समेतः पुरुषोत्तमः ।
सम्पूज्यमानः पौरैश्च ब्राह्मणैश्च सहस्रशः ॥ २४॥

विवेश भवनं राज्ञः पुरन्दरगृहोपमम् ॥ २५

युधिष्ठिरस्तु रामेण समागच्छद्यथाविधि ।
मूर्ध्नि केशवमाघ्राय पर्यष्वजत बाहुना ॥ २६

तं प्रीयमाणः कृष्णस्तु विनयेनाभिपूजयन् ।
भीमं च पुरुषव्याघ्रं विधिवत् प्रत्यपूजयत् ॥ २७

तांश्च वृष्ण्यन्धकश्रेष्ठान् धर्मराजो युधिष्ठिरः ।
प्रतिजग्राह सत्कारैर् यथाविधि यथोचितम् ॥ २८

गुरुवत् पूजयामास कांश्चित् कांश्चिद्वयस्यवत् ।
कांश्चिदभ्यवदत् प्रेम्णा कैश्चिदप्यभिवादितः ॥ २९

ततः पृथा च पार्थाश्च [1]मुदिताः कृष्णया सह ।
पुण्डरीकाक्षमासाद्य बभूवुर्मुदितेन्द्रियाः ॥ ३०

हर्षादभिगतौ दृष्ट्वा सङ्कर्षणजनार्दनौ ।
बन्धुमन्तं पृथा पार्थं युधिष्ठिरममन्यत ॥ ३१

1. क-ख-ग-घ-ङ—सहिताः

ततस्सङ्कर्षणाक्रूरावश्रमे[1] यावदीनवत् ।
भद्रवत्यै सुभद्रायै धनौघमुपजह्रतुः ॥ ३२

प्रवालानि च [2]हाराणि भूषणानि सहस्रशः ।
कुथास्तरपरिस्तोमान् व्याघ्राजिनपुरस्कृतान् ॥ ३३

तथाऽऽभरणरत्नौघैर् दीप्तप्रभमजायत ।
शयनासनयानैश्च युधिष्ठिरनिवेशनम् ॥ ३४

ततः प्रीतिकरो यूनां विवाहपरमोत्सवः ।
भद्रवत्यै सुभद्रायै सप्तरात्रमवर्तत ॥ ३५

ततो ददौ वासुदेवः कन्यार्थे धनमुत्तमम् ।
हरणं वै सुभद्राया ज्ञातिदेयं महायशाः ॥ ३६

रथानां काञ्चनाङ्गानां किङ्किणीजालमालिनाम् ।
चतुर्युजामुपेतानां सूतैः कुशलसम्मितैः ॥ ३७

[3]सहस्रं प्रददौ कृष्णो गवां नियुतमेव च ।
उपपाद्य तु वश्यानां दोग्ध्रीणां पुण्यवर्चसाम् ॥ ३८

गजानां तु प्रभिन्नानां त्रिधा प्रस्रवतां मदम् ।
गिरिकूटनिकाशानां समरेष्वनिवर्तिनाम् ॥ ३९

---

1. क-ख-ग-घ-ङ—यमदीनवत्
2. क-ङ—वस्त्राणि । ख-ग—यन्त्राणि । घ—वज्राणि
3. घ—बाह्लीकसिन्धुजातानां काम्भोजानां शतं शतम् ।
हरणार्थं ददौ कृष्णस् तुरगाणां जनेश्वर ॥ [अधिकः पाठः]

सुवर्ण[1]कक्ष्याग्रैवेयसुवर्णाङ्कुशभूषितम् ।
[2]कृष्णानां पटुघण्टानां चारूणां हेममालिनाम् ॥ ४०
हस्त्यारोहैरुपेतानां सहस्रं साहसप्रियः ।
प्रददौ वासुदेवस्तु वसुदेवाज्ञया तदा ॥ ४१
बडवानां च शुभ्राणां चन्द्रांशुसमवर्चसाम् ।
ददौ जनार्दनः प्रीत्या सहस्रं हेममालिनाम् ॥ ४२
काम्भोजारट्टबाह्लीकसिन्धुजानां च भारत ।
सुवर्णकृतसन्नाहघण्टारावविनादिनाम् ॥ ४३
श्वेतचामरसंच्छन्नांत्सर्वशस्त्रैरलङ्कृतान् ।
जात्यश्वानां सहस्राणि पञ्चाशत् प्रददौ तदा ॥ ४४
हयानां चन्द्रकाशानां श्यामकर्णं ददौ शतम् ॥ ४४॥
तथैवाश्वतरीणां च दान्तानां वातरंहसाम् ।
शतान्यञ्जनकेशानां श्वेतानां पञ्च पञ्च च ॥ ४५॥
शिबिकानां सहस्रं च प्रददौ मधुसूदनः ॥ ४६
कृष्णानामपि चाश्वानां बाह्लीकानां जनार्दनः ।
ददौ शतसहस्रं वै कन्याधनमनुत्तमम् ॥ ४७
स्नापनाच्छादने चैव भोजने पाचने तथा ।

1. क-ग-घ-ङ—कक्ष्यान् ग्रैवेयान्
2. क-ग—कृष्णानां परवादानां वराणां । घ—द्विपानां स्वर्णघण्टानां

आदानोद्वासने चैव प्रेषणे यत्र कुत्र चित् ॥ ४८
अनुलेपने च गन्धानां पेषणे च विचक्षणम् ।
सर्वकर्मणि निष्णातं युक्तं च वयसाऽन्वितम् ॥ ४९
स्त्रीणां सहस्रं गौरीणां सुवेषाणां सुवर्चसाम् ।
सुवर्णशतकीर्णानाम् अरोगाणां सुवर्चसाम् ॥ ५०
परिचर्यासु दक्षाणां प्रददौ पुष्करेक्षणः ॥ ५०॥
कृताकृतस्य मुख्यस्य कनकस्य सुवर्चसः ।
[1]महार्हभारान् दाशार्हः प्रददौ प्रयुतं तदा ॥ ५१॥
भूषणानां च मुख्यानां शतभारं ददौ धनम् ॥ ५२
मुक्ताहाराणि शुभ्राणि शतसङ्ख्यानि केशवः ।
प्रवालानां सहस्रं च तथा वै शयनासनान् ॥ ५३
सुवर्णपादपीठानां मा.हार्स्तरणांस्तथा ।
पर्यङ्काणां सहस्रं तु ददौ कन्याधनं तथा ॥ ५४
रामः [2]पाणिग्राहणिकं ददौ पार्थाय लाङ्गली ।
प्रीयमाणो हलधरस् सम्बन्धं प्रेम कामयन् ॥ ५५
स महाधनरत्नौघो वस्त्रकम्बलफेनवान् ।
महारथगजग्राहो महाश्वैश्शैवलाकुलः ॥ ५६
पाण्डुसागरमाविद्धं प्रविवेश महानदः ॥ ५६॥

1. अ-ख-घ—मनुष्य। 2. अ-ख-घ—पाद्मग्राहनीकम्।

पूर्णमापूरयंस्तेषाम् अभीष्टस्सर्वभोगवत् ।
प्रतिजग्राह तत्सर्वं धनौघं वै युधिष्ठिरः ॥ ५७॥

पूजयामास तांश्चैव वृष्ण्यन्धकमहारथान् ॥ ५८
ते समेता महात्मानः कुरुवृष्ण्यन्धकोत्तमाः ।

विजह्रुरमरावासे नरास्सुकृतिनो यथा ॥ ५९
तत्र तत्र महापानैर् आसवैश्च महाधनैः ।

पीत्वा पीत्वा च मैरेयान् उत्कृष्टतलनादितैः ॥ ६०
यथायोगं यथाप्रीति विजहुः कुरुवृष्णयः । ६०॥

एवमुत्तमवीर्यास्ते विहृत्य दिवसान् बहून् ।

पूज्य पार्थान् पृथां चैव भद्रां च यदुपुङ्गवाः ॥ ६१॥
केशवेनाभ्यनुज्ञाता गन्तुकामाः पुरं प्रति ।

पूजिताः कुरुभिर्जग्मुः पुनर्द्वारवतीं प्रति ॥ ६२॥
रत्नान्यादाय शुभ्राणि दत्तानि कुरुसत्तमैः ।

रामं पुरस्कृत्य ययुर् यादवानां महारथाः ॥ ६३॥

रामस्सुभद्रां सम्पूज्य परिष्वज्य [1]स्वसां तदा ।
न्यासेति द्रौपदीमुक्त्वा परिदाय महाबलः ॥ ६४॥

पितृष्वसायाश्चरणावभिवाद्य ययौ तदा ॥ ६५
तस्मिन् काले पृथा प्रीता पूजयामास तं तथा ॥ ६५॥

---

1 — — —

स वृष्णिवीरः पार्थैश्च पौरैश्च परमार्चितः ।
ययौ द्वारवतीं रामो वृष्णिभिस्सह संयुतः ॥ ६६॥

वासुदेवस्तु पार्थेन तत्रैव सह भारत ।
चतुस्त्रिंशदहोरात्रं रममाणो महाबलः ॥ ६७॥
उवास नगरे रम्ये शक्रप्रस्थे [1]महात्मना ॥ ६८
व्यचरद्यमुनाकूले पार्थेन सह भारत ॥ ६८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि एकादशाधिकद्विशततमोऽध्यायः ॥ २११ ॥
॥ १८ ॥ हरणहारिकपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[अस्मिन्नध्याये ६८॥ श्लोकाः]

॥ द्वादशाधिकद्विशततमोऽध्यायः ॥

अभिमन्युत्पत्तिः ॥१॥ द्रौपद्याः युधिष्ठिरादिभ्यः पञ्चपुत्रोत्पत्तिः ॥२॥
तेषां विद्याभ्यासश्च ॥ ३ ॥

वैशम्पायनः—

ततस्सुभद्रा सौभद्रं केशवस्य प्रिया स्वसा ।
जयन्तमिव पौलोमी द्युतिमन्तमजीजनत् ॥ १
दीर्घबाहुं [2]महोरस्कं वृषभाक्षमरिन्दमम् ।

1. क-ख-ग-घ-ङ—महामनाः 2. क-ख-ग-घ-ङ—महासत्त्वं

सुभद्रा सुषुवे वीरम् अभिमन्युं नरर्षभम् ॥ २

अभीश्च मन्युमांश्चैव ततस्तमरिमर्दनम् ।
अभिमन्युरिति प्राहुर् आर्जुनिं ब्राह्मणर्षभाः ॥ ३

स सात्वत्यामतिरथस् सम्बभूव धनञ्जयात् ।
मखे निर्मथ्यमानात्तु शमीगर्भाद्धुताशनः ॥ ४

यस्मिञ्जाते महाबाहुः कुन्तीपुत्रो युधिष्ठिरः ।
[1]अयुतं गा द्विजातिभ्यः प्रादान्निष्कांश्च तादृतः ॥ ५

लालितो वासुदेवस्य बाल्यात्प्रभृति चाभवत् ।
पितॄणां चैव सर्वेषां प्रजानामिव चन्द्रमाः ॥ ६

जन्मप्रभृति कृष्णश्च चक्रे तस्य क्रियाश्शुभाः ।
स चापि ववृधे बालश् शुक्लपक्षे यथा शशी ॥ ७

चतुष्पादं दशविधं धनुर्वेदमरिन्दमः ।
अर्जुनाद्वेद [2]वेदज्ञात् सकलं दिव्यमानुषम् ॥ ८

[3]विज्ञानेष्वपि चास्त्राणां सौष्ठवे च महाबलः ।
क्रियास्वपि च सर्वासु विशेषानभ्यशिक्षयत् ॥ ९

आगमे च प्रयोगे च चक्रे तुल्यमिवात्मना ।

---

1. घ—अतिप्रीतो द्विजातिभ्यः प्रादान्निष्कं तथैव च ।
2. अ-ख—वेदज्ञः
3. क-ख-ग-ङ—ज्ञानेष्वपि च शस्त्राणां सौष्ठवेषु

तुतोष पुत्रं सौभद्रं प्रेक्षमाणो धनञ्जयः ॥ १०

सर्वसंहननोपेतं सर्वलक्षणलक्षितम् ।
दुर्धर्षमृषभस्कन्धं व्यात्ताननमिवान्तकम् ॥ ११

सिंहदर्पं महेष्वासं मत्तमातङ्गविक्रमम् ।
मेघदुन्दुभिनिर्घोषं पूर्णचन्द्रनिभाननम् ॥ १२

कृष्णस्य सदृशं शौर्ये वीर्ये रूपे तथाऽऽकृतौ ।
ददर्श पुत्रं बीभत्सुर् जयन्तं मघवानिव ॥ १३

[1]पूर्वमेव तु पाञ्चाली पञ्चभिः पतिभिश्शुभा ।
लेभे पञ्च सुतान् वीरान् छ्लाघ्यान् पञ्चानलानिव ॥ १४

युधिष्ठिरात् प्रतिविन्ध्यं सुतसोमं वृकोदरात् ।
अर्जुनाच्छ्रुतकर्माणं शतानीकं च नाकुलिम् ॥ १५

सहदेवाच्छ्रुतसेनम् एतान् पञ्च महारथान् ।
पाञ्चाली सुषुवे वीरान् आदित्यानदितिर्यथा ॥ १६

शाश्वतः प्रतिविन्ध्यं तम् ऊचुर्विप्रा युधिष्ठि[2]रम् ॥
परप्रहरणज्ञाने प्रतिविन्ध्यो भवत्वयम् ॥ १७

सुते सोमसहस्रे तु सोमार्कसमतेजसम् ।
सुतसोमं महाप्राज्ञं सुषुवे भीमसेनतः ॥ १८

---

1. घ—पाञ्चाल्यपि च पञ्चभ्यः पतिभ्यश्शुभलक्षणा ।
2. क-ख-ग-घ-ङ—रात्

श्रुतं कर्म महत् कृत्वा निवृत्तेन किरीटिना ।
जातः पुत्रस्तथेत्येवं श्रुतकर्मा ततोऽभवत् ॥ १९

शतानीकस्य राजर्षेः कौरव्यः कुरुनन्दनः ।
चक्रे पुत्रं सनामानं नकुलः कीर्तिवर्धनः ॥ २०

ततस्त्वजीजनत् कृष्णा नक्षत्रे वह्निदैवते ।
सहदेवात् सुतं तस्माच् छ्रुतसेनेति तं विदुः ॥ २१

एकवर्षान्तरास्त्वेते द्रौपदेया यशस्विनः ।
अन्वजायन्त राजेन्द्र परस्परहितैषिणः ॥ २२

जातकर्माण्यानुपूर्व्याच् चूडोपनयनानि च ।
चकार विधिवद्धौम्यस् तेषां भरतसत्तम ॥ २३

कृत्वा च वेदाध्ययनं ततस्सुचरितव्रताः ।
जगृहुस्सर्वमिष्वस्त्रम् अर्जुनाद्दिव्यमानुषम् ॥ २४

दिव्यगर्भोपमैः पुत्रैर् व्यूढोरस्कैर्महाबलैः ।
अन्विता राजशार्दूल पाण्डवा मुदमाप्नुवन् ॥ २५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि द्वादशाधिकद्विशततमोऽध्यायः ॥ २१२ ॥
॥ १८ ॥ हरणहारिकपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
[समाप्तं च हरणहारिकपर्व]
[अस्मिन्नध्याये २५ श्लोकाः]

॥ त्रयोदशाधिकद्विशततमोऽध्यायः ॥

(अथ खाण्डवदाहपर्व)

युधिष्ठिरस्य राज्यपरिपालनप्रकारवर्णनम् ॥ १ तत्रैव निवसता श्रीकृष्णेन सहार्जुनस्य जलक्रीडार्थं यमुनां प्रति गमनम् ॥ २ ॥

वैशम्पायनः—

इन्द्रप्रस्थे वसन्तस्ते जघ्नुरन्यान् नराधिपान् ।
शासनाद्धृतराष्ट्रस्य राज्ञश्शान्तनवस्य च ॥ १

आश्रित्य धर्मराजानं सर्वलोकोऽवसत् सुखम् ।
पुण्यलक्षणकर्माणं स्वदेहमिव देहिनः ॥ २

स समं धर्मकामार्थान् सिषेवे भरतर्षभ ।
त्रीनिवात्मसमान् बन्धून् बन्धुमानिव मानयन् ॥ ३

तेषां समविभक्तानां क्षितौ देहवतामिव ।
बभौ धर्मार्थकामानां चतुर्थ इव पार्थिवः ॥ ४

अध्येतारं परं [1]वेदाः प्रयोक्तारं महाध्वराः ।
रक्षितारं [2]शुभा वर्णा लेभिरे तं जनाधिपम् ॥ ५

[3]अधिष्ठानवती लक्ष्मीः परायणवती मही ।

---

1. अ—वेदान् प्रयोक्तारं महाध्वरे ।
2. अ-घ-शुभांल्लोकांल्लेभिरे
3. घ—चत्वार इव ते वर्णा रेमिरे तं जनाधिपम् । [अधिकः पाठः]

बन्धुमानखिलो लोकस् तेनासीत् पृथिवी[1]क्षिता ॥ ६
भ्रातृभिस्सहितो राजा चतुर्भिरधिकं बभौ ।
प्रयुज्यमानैर्विततो वेदैरिव महाध्वरः ॥ ७
तं तु धौम्यादयो विप्राः परिवार्योपतस्थिरे ।
बृहस्पतिसमा [2]मुख्याः प्रजापतिमिवाध्वरे ॥ ८
धर्मराजे ह्यतिप्रीत्या पूर्णचन्द्र इवामले ।
प्रजानां रेमिरे तुल्यं नेत्राणि हृदयानि च ॥ ९
न तु केवलदैवेन प्रजा भावेन रेमिरे ॥ ९॥
यद्बभूव मनःकान्तं कर्मणा स चकार तत् ॥ १०
न ह्ययुक्तं न चापथ्यं नानृतं न च विप्रियम् ।
भाषितं चारुभाषस्य जज्ञे पार्थस्य धीमतः ॥ ११
स हि सर्वस्य लोकस्य हितमात्मन एव च ।
चिकीर्षुस्सुमहातेजा रेमे भरतसत्तम ॥ १२
तथा तु मुदितास्सर्वे पाण्डवा विगतज्वराः ।
अजयत् पृथिवीपालांस् त्रासयन्तस्स्वतेजसा ॥ १३
ततः कतिपयाहस्सु बीभत्सुः कृष्णमब्रवीत् । १३॥

अर्जुनः—

उष्णानि कृष्ण वर्तन्ते गच्छाव यमुनां प्रति ॥ १४
सुहृज्जनवृतौ तत्र विहृत्य मधुसूदन ।

---

1. अ-ख—क्षिताम् 2. घ-बुद्ध्या

सायाह्ने [1]विनिवर्तावो रोचतां ते जनार्दन ॥ १५

वासुदेवः—

कुन्तीसुत ममाप्येष रोचते यद्वयं जले ।
सुहृज्जनवृताः पार्थ विहरेम यथासुखम् ॥ १६

वैशम्पायनः—

आमन्त्र्य तौ धर्मराजम् अनुज्ञाप्य च भारत ।
जग्मतुः पार्थगोविन्दौ सुहृज्जनवृतौ ततः ॥ १७

विहरन् खाण्डवप्रस्थे काननेषु च माधवः ।
पुष्पितोपवनां रम्यां ददर्श यमुनां नदीम् ॥

आलयं सर्वभूतानां खाण्डवं खड्गचर्मभृत् ।
ददर्श स तु तं देशं सहितस्सव्यसाचिना ॥

ऋक्षगोमायुसङ्घुष्टं हंससारसनादितम् ।
शाखामृगगणैर्जुष्टं निकेतं सर्वरक्षसाम् ॥

द्वीपिगोमायुसिंहर्क्षवराहरुरुवारणैः ।
नानामृगसहस्रैश्च पक्षिभिश्च समावृतम् ॥ २१

[2]मानार्हं तच्च सर्वेषां देवदानवरक्षसाम् ।
आलयं पन्नगेन्द्रस्य तक्षकस्य महात्मनः ॥ २२

वेणु[3]शाल्मलितालिङ्गैर् उपेतं वेत्रसंवृतम् ।

---

1. अ—विनिवर्तामः । घ—विचरिष्यावो
2. क-ग-ङ—माननार्हं च सर्वेषां । ख—माननार्हस्य ।
घ—मानार्हाणां च
3. ख—शब्दतमालिङ्गैरुपेतं । ग—वेत्रसंवृते ।
घ—शाल्मलिमाल्यङ्गैः कुकुभिः ।

[1]शाकपद्मकतालैश्च शतशाखैश्च रौहिणैः ॥ २३
निरुद्देशं समप्रख्यम् आवृतं गजसंस्थितैः ।
गुल्मैः कीचकवेणूनाम् आशीविषनिषेवितम् ॥ २४
[2]विगतार्कं महाभोगविततद्रुमसङ्कटम् ।
स्नुहीवेत्रकुलिङ्गाक्षैर् हिन्तालैश्च समावृतम् ॥ २५
[3]व्यालदंष्ट्रिगणाकीर्णं वर्जितं सर्वमानुषैः ।
रक्षसां भुजगेन्द्राणां पक्षिणां च महालयम् । २६
[4]शस्सर्वभूतेशस् सर्वलोकविभागवित् ।
शाम्बरधरो देवस् तद्वनं बहुधा चरन् ॥ २७
प्रस्य सयक्षस्य सभूतगणपक्षिणः ।
इवस्य विनाशं तं ददर्श मधुसूदनः ॥ २८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि त्रयोदशाधिकद्विशततमोऽध्यायः ॥ २१३ ॥
॥ १९ ॥ खाण्डवदाहपर्वणि प्रथमोऽध्यायः ॥ १ ॥

[अस्मिन्नध्याये २८ श्लोकाः]

---

1. क-ग-ङ—एकपद्मकतालैश्च शतसंख्यैश्च ।
घ—अशोकधवतालैश्च शतसंख्यैश्च
2. घ—विहगौघसमाकीर्णं पूतनाद्रुमसङ्कटम् । [अधिकः पाठः]
3. घ—नानाकण्टकवृक्षैश्च यथा कण्टककुञ्जकैः ।
कण्टकीकुञ्जगुल्मैश्च कण्टकावृतभूतलैः ॥
निम्नोन्नतप्रदेशैश्च तीक्ष्णपाषाणसङ्कटम् ।
अत्यगाधमहागर्तैर् वनापगमहाभयम् ॥ [अधिकः पाठः]
4. अ-क-ख-ग-ङ—भूतानां सर्वदेवेशस्

॥ चतुर्दशाधिकद्विशततमोऽध्यायः ॥

ब्राह्मणरूपस्याग्नेः तत्रागमनम् ॥ १ ॥ खाण्डववनदहनार्थं कृष्णार्जुनौ प्रति अग्नेः प्रार्थना ॥ २ ॥ किमर्थमग्नेः खाण्डवदिधक्षेति जनमेजयेन प्रश्ने वैशम्पायनेन श्वेतक्युपाख्यानकथनम् ॥ ३ ॥ अर्जुनेन दिव्यानां रथाश्वधनुरादीनां याचनम् ॥ ४ ॥ अग्निना वरुणादाहृतानां रथादीनां अर्जुनाय दानम् ॥ ५ ॥ श्रीकृष्णाय सुदर्शनकौमोदक्योश्च दानम् ॥ ५ ॥ अग्नेः खाण्डवदाहारम्भः ॥ ६ ॥

वैशम्पायनः—

विहारदेशं सम्प्राप्य नानाद्रुममनुत्तमम् ।
गृहैरुच्चावचैर्युक्तं पुरन्दरपुरोपमम् ॥

भक्ष्यैर्भोज्यैश्च पेयैश्च रसवद्भिर्महाधनैः ।
माल्यैश्च विविधैर्युक्तं तथा वार्ष्णेयपाण्डवौ ॥

[1]आविविशतुरापूर्णं रत्नैरुच्चावचैश्शुभैः ।
यथोपजोषं सर्वश्च जनश्चिक्रीड भारत ॥

वने काश्चिज्जले काश्चित् काश्चिद्वेश्मसु चाङ्गनाः ।
यथादेशं यथाप्रीति चिक्रीडुः कृष्णपार्थयोः ॥ ४

वासुदेवप्रिया नित्यं सत्यभामा च भामिनी ।
द्रौपदी च सुभद्रा च वासांस्याभरणानि च ॥ ५

प्रायच्छतां महार्हाणि स्त्रीणां तास्सम मदोत्कटाः ।

---

1. क-ख-ग-घ-ङ—आविवेशतुः

काश्चिन् प्रहृष्टा ननृतुश् चुक्रुशुश्च तथाऽपराः ॥ ६

जहसुश्च परा नार्यः पपुश्चान्या वरासवम् ।
रुरुधुश्चापरास्तत्र प्रजघ्नुश्च परस्परम् ॥ ७

मन्त्रयामासुरन्याश्च रहस्यानि परस्परम् ।
केचिन्माल्यानि चिन्वन्तीः केचिन्माल्यानि दध्रिरे ॥ ८

वेणुवीणामृदङ्गानां मनोज्ञानां च सर्वशः ।
[1]देन पूर्यते हर्म्यं तद्वनं सुमहर्द्धिमत् ॥ ९

[1]स्तदा वर्तमाने कुरुदाशार्हनन्दनौ ।
पं जग्मतुः कञ्चिद् उद्देशं सुमनोहरम् ॥ १०

त्वा महात्मानौ कृष्णौ परपुरञ्जयौ ।
सनयो राजंस् ततस्तौ सन्निषीदतुः ॥ ११

पूर्वव्यतात [illegible]नि विक्रान्तानीतराणि च ।
हूनि कथयि[illegible]त्वा तौ रेमाते जिष्णुमाधवौ ॥ १२

तत्रोपविष्टौ मुदित[illegible]ौ नाकपृष्ठेऽश्विनाविव ।
अभ्यागच्छत्तदा विप्र[illegible]ो वासुदेवधनञ्जयौ ॥ १३

बृहत्सालप्रतीकाशः प्रतप्त[illegible]कनकप्रभः ।
[2]हरिपिङ्गोज्ज्वलश्मश्रुः प्रमा[illegible]णायामतस्समः ॥ १४

1. क-ग-ङ—तस्मादावर्तमानौ तु
2. क-ख-ग-घ-ङ—हरिपिङ्गो हरिश्म[illegible]श्रुः

तरुणादित्यसङ्काशश् [1]चीरवासा जटाधरः ।
पद्मपत्राननः पिङ्गस् तेजसा प्रज्वलन्निव ॥ १५

जगाम तौ कृष्णपार्थौ दिधक्षुः खाण्डवं वनम् ॥ १५॥

उपसृष्टं तु तं कृष्णो भ्राजमानं द्विजोत्तमम् ।
दृष्ट्वा जगाम मनसा पावकोऽयमिति प्रभुः ॥ १६॥

अर्जुनो वासुदेवश्च तूर्णमुत्पत्य तस्थतुः* ॥ १७

सोऽब्रवीदर्जुनं चैव वासुदेवं च सात्वतम् ।
लोकप्रवीरौ तिष्ठन्तौ खाण्डवस्य समीपतः ॥

ब्राह्मणः—

ब्राह्मणो बहुभोक्ताऽस्मि भुञ्जेऽपरिमितं सदा ।
भिक्षे वार्ष्णेयपार्थौ वाम् एकां तृप्तिं प्रयच्छतम् ॥

वैशम्पायनः—

एवमुक्तौ तमब्रूतां ततस्तौ कृष्णपाण्डवौ ।
केनान्नेन भवांस्तृप्येत् तस्यान्नस्य यतावहे ॥ २०

एवमुक्तस्स भगवान् अब्रवीत्तावुभौ ततः ।
भाषमाणौ तदा वीरौ किमन्नं क्रियतामिति ॥ २१

ब्राह्मणः—

नाहमन्नं बुभुक्षे वै पावकं मां निबोधतम् ।

---

1. कृष्णवासाः

*अ-क-ख-ग-ङ—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते

यदन्नमनुरूपं मे तद्युवां संप्रयच्छतम् ॥ २२

इदमिन्द्रस्सदा दावं खाण्डवं परिरक्षति ।
न च शक्नोम्यहं दग्धुं रक्ष्यमाणं महात्मना ॥ २३

वसत्यत्र सखा तस्य तक्षकः पन्नगस्सदा ।
सगणस्तत्कृते दावं परिरक्षति वज्रभृत् ॥ २४

तत्र भूतान्यनेकानि रक्ष्यन्तेऽस्य प्रसङ्गतः ।
निर्दग्धुं न शक्नोमि दावं शक्रस्य तेजसा ॥ २५

तां प्रज्वलितं दृष्ट्वा मेघैरद्भिः प्रवर्षति ।
दग्धुं न शक्नोमि दिधक्षुर्दावमीप्सितम् ॥ २६

ताभ्यां सहायाभ्याम् अस्त्रविद्यां समागतः ।
खाण्डवं दावम् एतदन्नं वृतं मया ॥ २७

उदकधारास्ता भूतानि च समन्ततः ।
मास्त्रविदौ सम्यक् सर्वतो वारयिष्यथः ॥ २८

*जनमेजयः—
किमर्थं भगवानग्निः खाण्डवं दग्धुमिच्छति ।
रक्ष्यमाणं महेन्द्रेण नानासत्त्वसमायुतम् ॥ २९

---

* अष्टाविंशश्लोकात् परं सार्धाष्टनवतितमश्लोकपर्यन्तमुपवर्णितं श्वेतक्युपाख्यानं अ-ख-घ—कोशेषु नोपलभ्यते ; तथाऽपि, क-ग-ङ—कोशेषु पूर्वोक्तोपाख्यानान्तर्गतश्लोका विश्लिष्टा एव कतिचन दृश्यन्ते ; अतः मद्रपुरराजकीयप्राच्यपुस्तकभाण्डागारस्थविश्वासार्हतालपत्रकोशादुद्धृत्य उपाख्यानमिदं यथावन्मुद्रितम् ॥

(Madras Catalogue D

न ह्येतत्कारणं ब्रह्मन्नल्पं संप्रतिभाति मे ।
यद्ददाह सुसंक्रुद्धः खाण्डवं हव्यवाहनः ॥ ३०

एतद्विस्तरशो ब्रह्मञ् छ्रोतुमिच्छामि तत्त्वतः ।
खाण्डवस्य पुरा दाहो यथा समभवन्मुने ॥ ३१

वैशम्पायनः—

हन्त ते कथयिष्यामि पौराणीमृषिसंस्तुताम् ।
कथामिमां नरश्रेष्ठ खाण्डवस्य विनाशनीम् ॥ ३२

पौराणश्श्रूयते तात राजा हरिहयोपमः ।
श्वेतकिर्नाम विख्यातो बलविक्रमसंयुतः ॥ ३३

यज्वा दानपतिर्धीमान् यथा नान्योऽस्ति कश्चन ।
ईजे च स महायज्ञैः क्रतुभिश्चाप्तदक्षिणैः ॥ ३४

तस्य नान्याऽभवद्बुद्धिर् दिवसे दिवसे नृप ।
सत्रे क्रियासमारम्भे दानेषु विविधेषु च ॥ ३५

तस्यैवं वर्तमानस्य कदाचित् कालपर्यये ।
सत्रमाहर्तुकामस्य संवत्सरशतं किल ॥ ३६

ऋत्विजो नाभ्यपद्यन्त समाहर्तुं महात्मनः ॥ ३६॥

स तु राजाऽकरोद्यत्नं महान्तं ससुहृज्जनः ॥ ३७

प्रणिपातेन सान्त्वेन दानेन च महायशाः ।
ऋत्विजोऽनुनयामास भूयो भूयस्त्वतन्द्रितः ॥ ३८

ते चास्य तमभिप्रायं न चक्रुरमितौजसः ॥ ३८॥
स चाश्रमस्थान् राजर्षिस् तानुवाच रुषाऽन्वितः ॥ ३९
यद्यहं पतितो विप्राश् शुश्रूषायां न च स्थितः ।
आशु त्याज्योऽस्मि युष्माभिर् ब्राह्मणैश्च जुगुप्सितः ॥ ४०
तन्नार्हत क्रतुश्रद्धां व्याघातयितुमुत्तमाम् ।
अस्थाने वा परित्यागं कर्तुं मे द्विजसत्तमाः ॥ ४१
प्रपन्न एव वो विप्राः प्रसादं कर्तुमर्हथ ।
सान्त्वदानादिभिर्वाक्यैस् तत्त्वतः कार्यवत्तया ॥ ४२
प्रसादयित्वा वक्ष्यामि यन्नः कार्यं द्विजोत्तमाः ॥ ४२॥
अथवाऽहं परित्यक्तो भवद्भिर्द्वेषकारणात् ।
ऋत्विजोऽन्यान् गमिष्यामि याजनार्थं द्विजोत्तमाः ॥ ४३॥
एतावदुक्त्वा वचनं विरराम स पार्थिवः ॥ ४४
यदा न शेकू राजानं याजनार्थं परन्तपाः ।
ततस्ते याजकाः क्रुद्धास् तमूचुर्नृपसत्तमम् ॥ ४५

ऋत्विजः—

तव कर्माण्यजस्रं वै वर्तन्ते पार्थिवोत्तम ।
ततो वयं परिश्रान्तास् सततं कर्मवाहिनः ॥ ४६
श्रमादस्मात् परिश्रान्तांस्स त्वं नस्त्यक्तुमर्हसि ॥ ४६॥
बुद्धिमोहं समास्थाय त्वरासम्भावितोऽनघ ।

गच्छ रुद्रसकाशं त्वं स हि त्वां याजयिष्यति ॥ ४७॥

वैशम्पायनः—

साधिक्षेपं वचश्श्रुत्वा सङ्क्रुद्धश्श्वेतकिर्नृपः ।
कैलासपर्वतं गत्वा तप उग्रं समास्थितः ॥ ४८॥

आराधयन् महादेवं नियतस्संशितव्रतः ।
उपवासपरो राजन् दीर्घकालमतिष्ठत ॥ ४९॥

कदाचिद्द्वादशे काले कदाचिदपि षोडशे ।
आहारमकरोद्राजा मूलानि च फलानि च ॥ ५०॥

ऊर्ध्वबाहुस्त्वनिमिषस् तिष्ठन् स्थाणुरिवाचलः ।
षण्मासानभवद्राजा श्वेताकिस्सुसमाहितः ॥ ५१॥

तं तथा नृपशार्दूलं तप्यमानं महत्तपः ।
शङ्करः परमप्रीत्या दर्शयामास भारत ॥ ५२॥

शङ्करः—

प्रीतोऽस्मि नरशार्दूल तपसा ते परन्तप ।
वरं वृणीष्व भद्रं ते यं त्वमिच्छसि पार्थिव ॥ ५३॥

वैशम्पायनः—

एतच्छ्रुत्वा तु वचनं रुद्रस्यामिततेजसः ।
प्रणिपत्य महात्मानं राजर्षिः प्रत्यभाषत ॥ ५४॥

श्वेतकिः—

यदि मे भगवन् प्रीतस् सर्वलोकनमस्कृतः ।
स्वयं मां देवदेवेश याजयस्व सुरेश्वर ॥ ५५॥

वैशम्पायनः—

एतच्छ्रुत्वा तु वचनं राज्ञा तेन प्रभाषितम् ।

उवाच भगवान् प्रीतस् स्मितपूर्वमिदं वचः ॥ ५६॥

रुद्रः—

नास्माकमेतद्विषये वर्तते याजनं प्रति ।
त्वया च सुमहत् तप्तं तपो राजन् वरार्थिना ॥ ५७॥
याजयिष्यामि राजंस्त्वां समयेन परन्तप ॥ ५८
समा द्वादश राजेन्द्र ब्रह्मचारी समाहितः ।
सततं त्वाज्यधाराभिर् यदि तर्पयसेऽनलम् ॥ ५९
कामं प्रार्थयसे यं त्वं मत्तः प्राप्स्यसि तं नृप ॥ ५९॥

वैशम्पायनः—

एवमुक्तस्तु रुद्रेण श्वेतकिर्मनुजाधिपः ।
तथा चकार तत् सर्वं यथोक्तं शूलपाणिना ॥ ६०॥
पूर्णे तु द्वादशे वर्षे पुनरायान्महेश्वरम् ॥ ६१
दृष्ट्वैव स च राजानं शङ्करो लोकभावनः ।
उवाच परमप्रीतश् श्वेतकिं नृपसत्तमम् ॥ ६२

रुद्रः—

तोषितोऽहं नृपश्रेष्ठ त्वयेहाद्येन कर्मणा ।
याजनं ब्राह्मणानां तु विधिदृष्टं परन्तप ॥ ६३
अतोऽहं त्वां स्वयं नाद्य याजयामि परन्तप ॥ ६३॥
ममांशस्तु क्षितितले महाभागो द्विजोत्तम ।
दुर्वासा इति विख्यातस् स हि त्वां याजयिष्यति ॥ ६४।

मन्नियोगान्महातेजास् सम्भारास्सम्भ्रियन्तु ते ॥ ६५

वैशम्पायनः—

एतच्छ्रुत्वा तु वचनं रुद्रेण समुदाहृतम् ।
स्वपुरं पुनरागम्य सम्भारान् पुनरार्जयत् ॥ ६६
ततस्सम्भृतसम्भारो भूयो रुद्रमुपागमत् ॥ ६६॥
सम्भृता मम सम्भारास् सर्वोपकरणानि च ॥ ६७
त्वत्प्र[illegible]दान्महादेव श्वो मे दीक्षा भवेदिति ॥ ६७॥
एतच्छ्रुत्वा तु वचनं तस्य राज्ञो महात्मनः ।
दुर्वाससं समाहूय रुद्रो वचनमब्रवीत् ॥ ६८॥

रुद्रः—

एष राजा महाभागश् श्वेतकिर्द्विजसत्तम ।
एनं याजय विप्रेन्द्र मन्नियोगेन भूमिपम् ॥ ६९॥

वैशम्पायनः—

बाढमित्येव वचनं रुद्रं ऋषिरुवाच ह ॥ ७०
ततस्सत्रं समभवत् तस्य राज्ञो महात्मनः ।
यथाकामं यथोक्तञ्च सत्रं सुबहुदाक्षिणम् ॥ ७१
तस्मिन् परिसमाप्ते तु राज्ञस्सत्रे महात्मनः ।
दुर्वाससाऽभ्यनुज्ञाता विप्रतस्थुस्स याजकाः ॥ ७२
ये तत्र दीक्षितास्सर्वे सदस्याश्च महौजसः ॥ ७२॥
सोऽपि राजा महाभागस् स्वपुरं प्राविशत् तदा ॥ ७३
ततो भगवतो वह्नेर् विकारस्समजायत ।

तेजसा विप्रहीणश्च ग्लानिश्चैनं समाविशत् ॥ ७४
स लक्षयित्वा चात्मानं तेजोहीनं हुताशनः ।
जगाम सदनं पुण्यं ब्रह्मणो लोकपूजितम् ॥ ७५
तत्र ब्रह्माणमासीनम् इदं वचनमब्रवीत् ॥ ७५॥

अग्निः—

तेजसा विप्रहीणोऽस्मि बलेन च जगत्पते ।
इच्छेयं त्वत्प्रसादेन आत्मनः प्रकृतिं स्थिराम् ॥ ७६॥

वैशम्पायनः—

एतच्छ्रुत्वा तु वचनं भगवांत्सर्वलोककृत् ।
हव्यवाहमिदं वाक्यम् उवाच प्रहसन्निव ॥ ७७॥

ब्रह्मा—

त्वया द्वादशवर्षाणि वसोर्धाराकृतं हविः ।
उपयुक्तं महाभाग तेन त्वां ग्लानिराविशत् ॥ ७८॥
तेजसा विप्रहीणत्वात् सहसा हव्यवाहन ।
मा गमस्त्वं यथा वह्ने प्रकृतिस्थो भविष्यसि ॥ ७९॥
अरुचिं नाशयिष्ये ते समयं प्रतिपद्य तु ॥ ८०
पुरा देवनियोगेन यत् त्वया भस्मसात्कृतम् ।
आलयं देवशत्रूणां सुघोरं खाण्डवं वनम् ॥ ८१
तत्र सर्वाणि सत्त्वानि निवसन्ति विभावसो ।
तेषां त्वं मेदसा तृप्तः प्रकृतिस्थो भविष्यसि ॥ ८२
मत्प्रसादाद्रुचिस्सम्यक् त्वयि वह्ने भविष्यति ।

गच्छ शीघ्रं प्रदग्धुं त्वं ततो मोक्ष्यसि किल्बिषात् ॥ ८३

वैशम्पायनः—

एतच्छ्रुत्वा तु वचनं परमेष्ठिमुखाच्च्युतम् ।
उत्तमं जवमास्थाय प्रदुद्राव हुताशनः ॥ ८४
आगम्य खाण्डवं दावम् उत्तमं जवमास्थितः ।
सहसा प्रज्वलत्याग्निः क्रुद्धो वायुसमीरितः ॥ ८५
प्रदीप्तं खाण्डवं दृष्ट्वा ये स्युस्तत्र निवासिनः ।
परमं यत्नमातिष्ठन् पावकस्य प्रशान्तये ॥ ८६
करैस्तु करिणश्शीघ्रं जलमादाय सत्वराः ।
सिषिचुः पावकं क्रुद्धाश् शतशोऽथ सहस्रशः ॥ ८७
बहुशीर्षास्तथा नागाश् शिरोभिर्जलसन्ततिम् ।
मुमुचुः पावकाभ्याशे सत्वराः क्रोधमूर्छिताः ॥ ८८
तथैवान्यानि सत्त्वानि नानाप्रहरणोद्यमैः ।
विलयं पावकं शीघ्रम् अनयन् भरतर्षभ ॥ ८९
अनेन तु प्रकारेण भूयो भूयश्च प्रज्वलन् ।
सप्तकृत्वः प्रशमितः खाण्डवे हव्यवाहनः ॥ ९०
स तु नैराश्यमापन्नस् सदा ग्लानिसमन्वितः ।
पितामहमुपागच्छत् सङ्क्रुद्धो हव्यवाहनः ॥ ९१
तच्च सर्वं यथान्यायं ब्रह्मणे स न्यवेदयत् ।
उवाच चैनं भगवान् मुहूर्तं स विचिन्त्य तु ॥ ९२

ब्रह्मा—

उपायः परिदृष्टो मे यथा त्वं धक्ष्यसेऽनघ ।
खाण्डवं दावमद्यैव मिषतोऽस्य शचीपतेः ॥ ९३

नरनारायणौ यौ तौ पूर्वदेवौ विभावसो ।
सम्प्राप्तौ मानुषौ लोके कार्यार्थं हि दिवौकसाम् ॥ ९४

अर्जुनं वासुदेवं च यौ तौ लोकोऽभिमन्यते ।
तावेतौ सहितावेहि खाण्डवस्य समीपतः ॥ ९५

तौ त्वं याचस्व साहाय्ये दाहार्थं खाण्डवस्य च ।
ततो धक्ष्यसि तं दावं रक्षितं त्रिदशैरपि ॥ ९६

तौ तु सत्त्वानि सर्वाणि यत्नतो वारयिष्यतः ।
देवराजं च सहितौ तत्र मे नास्ति संशयः ॥ ९७

वैशम्पायनः—

एतच्छ्रुत्वा तु वचनं त्वरितो हव्यवाहनः ।
कृष्णपार्थावुपागम्य यमर्थं प्रत्यभाषत ॥ ९८

तं ते कथितवानस्मि पूर्वमेव नृपोत्तम ॥ ९८॥

तच्छ्रुत्वा वचनं त्वग्नेर् बीभत्सुर्जातवेदसम् ।
दिधक्षुं खाण्डवं दावम् अकामस्य शतक्रतोः ॥ ९९॥

अर्जुनः—

उत्तमास्त्राणि मे सन्ति दिव्यानि च बहूनि च ।
यैरहं शक्नुयां योद्धुम् अपि वज्रधरान् बहून् ॥ १००॥

धनुर्मे नास्ति भगवन् बाहुवीर्येण सम्मितम् ।
कुर्वतस्समरे यत्नं वेगं यद्विषहेत वै ॥ १०१॥

शरैस्त्वदर्थे बहुभिर् अक्षयैः क्षिप्रमस्यतः ।
न हि वोढुं रथश्शक्तश् शरान् मम यथेप्सितान् ॥ १०२॥

अश्वांश्च दिव्यानिच्छेयं पाण्डुरान् वातरंहसः ।
रथं च मेघनिर्घोषं सूर्यप्रतिमतेजसम् ॥ १०३॥

तथा कृष्णस्य वीर्येण नायुधं विद्यते समम् ।
येन नागान् पिशाचांश्च निहन्यान्माधवो रणे ॥ १०४॥

उपायं कर्मणस्सिद्धौ भगवन् वक्तुमर्हसि ।
निवारयेयं येनेन्द्रं वर्षमाणं महाशनिम् ॥ १०५॥

पौरुषेण तु यत् कार्यं तत् कर्ताऽहं स्म पावक ।
करणानि समर्थानि भगवन् दातुमर्हसि* ॥ १०६॥

वैशम्पायनः—

एवमुक्तस्स भगवान् धूमकेतुर्हुताशनः ।
चिन्तयामास वरुणं लोकपालं दिदृक्षया ॥ १०७॥

[1]आदित्यमुदके देवं निवसन्तं जलेश्वरम् ॥ १०८

स च सञ्चिन्तितं ज्ञात्वा दर्शयामास पावकम् ।
तमब्रवीद्धूमकेतुः प्रतिपूज्य जलेश्वरम् ॥ १०९

---

* अ-क-ख-ग-ङ—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते।
1. घ—श्वेतकुण्डलिनं देवं सर्वाभरणभूषितम् ।

चतुर्थं लोकपालानां रक्षितारं महेश्वरम् ॥ १०९॥

अग्निः—

[1]सोमेन राज्ञा यद्दत्तं धनुश्चैवेषुधी च ये ।
तत् प्रयच्छोभयं शीघ्रं त्वमस्मै सव्यसाचिने ॥ ११०॥
दिव्यैरश्वैस्समायुक्तं रथं च कपिलक्षणम् ।
कार्यं च सुमहत् पार्थो गाण्डीवेन करिष्यति ॥ १११॥
चक्रेण वासुदेवश्च तन्मदर्थे प्रदीयताम् ॥ ११२

वैशम्पायनः—

ददानीत्येव वरुणः पावकं प्रत्यभाषत ॥ ११२॥
तदद्भुतं महावीर्यं यशःकीर्तिविवर्धनम् ।
सर्वशस्त्रैरनाधृष्यं सर्वशस्त्रप्रमाथिनम् ॥ ११३॥
सर्वायुधमहामात्रं परसैन्यप्रधर्षणम् ।
एकं शतसहस्रेण सम्मितं राष्ट्रवर्धनम् ॥ ११४॥
चित्रमुच्चावचैर्वर्णैश् शोभितं श्लक्ष्णमव्रणम् ।
देवगन्धर्वऋषिभिः पूजितं शाश्वतीस्समाः ॥ ११५॥
प्रादाच्चैव धनूरत्नम् अक्षय्यौ च महेषुधी ॥ ११६
रथं च दिव्याश्वयुजं कपिप्रवरलक्षणम् ।
उपेतं कामगैरश्वैर् गान्धर्वैर्हेममालिभिः ॥ ११७
पाण्डुराभ्रप्रतीकाशैर् मनोवायुसमैर्जवे ।
सर्वोपकरणैर्युक्तम् अजय्यं देवदानवैः ॥ ११८

1. क-ग-ङ—सोमेन दत्तं तु धनुस् त्वथ ते इषुधी शुभे ।

भानुमन्तं महाघोषं सर्वभूतमनोहरम् ।
ससर्ज [1]यं सुतपसा भुवने भुवनप्रभुः ॥ ११९

प्रजापतिरानिर्देश्यं यस्य रूपं रवेरिव ।
यं स्म सोमस्समारुह्य दानवानजयत् प्रभुः ॥ १२०

[2]नवमेघप्रतीकाशं ज्वलन्तमिव च श्रिया ।
[3]आश्रिता तं रथश्रेष्ठं शक्रायुधसमा बभौ ॥ १२१

तापनीया सुरुचिरा ध्वजयष्टिरनुत्तमा । १२१॥
तस्यां तु वानरो दिव्यस् सिंहलाङ्गूललक्षणः ।

[4]निर्दहन्निव तत्र [5]स्थस् संस्थितो मूर्ध्न्यशोभत ॥ १२२॥
[6]ध्वजे भूतानि तत्रासन् विविधानि महान्ति च ।

नादेन परसैन्यानां येषां संज्ञा प्रणश्यति ॥ १२३॥
स तं नानापताकाभिश् शोभितं रथसत्तमम् ।

प्रदक्षिणमुपावृत्य दैवतेभ्यः प्रणम्य च ॥ १२४॥
सन्नद्धः कवची खड्गी बद्धगोधाङ्गुलित्रवान् ।

---

1. ग-ङ—यत्स्वतपसा । घ—यं स्वतपसा भुवनैर्भुवनेश्वरम्
2. घ—सुरारियोषित्सौवर्णश्रुतिताटङ्कनाशनम् ॥ [अधिकः पाठः]
3. क-ख-ग-घ—आश्रित्य तं रथश्रेष्ठं शक्रध्वजसमं बभौ।
4. घ—यः पुरा वायुसंभूतो रक्षोगणविनाशनः ॥ [अधिकः पाठः]
5. क-ख-ग-ङ—स्थः संस्थिते मूर्ध्नि शोभते ।
घ—तन्मूर्ध्नि संस्थितो भीमो विनर्दन् बह्वशोभत ।
6. घ—हनुमान् परितस्तत्र भूतानि विविधानि च ॥

आरुरोह तदा पार्थो विमानं सुकृती यथा ॥ १२५॥
तच्च दिव्यं धनुश्रेष्ठं ब्रह्मणा निर्मितं पुरा ।
गाण्डीवमुपसङ्गृह्य बभूव मुदितोऽर्जुनः ॥ १२६॥
हुताशनं नमस्कृत्य ततस्तदतिवीर्यवान् ।
जग्राह बलमास्थाय ज्यया च युयुजे धनुः ॥ १२७॥
मौर्व्यां तु युज्यमानायां बलिना पाण्डवेन ह ।
येऽशृण्वन् कूजितं तस्य तेषां वै व्यथितं मनः ॥ १२८॥
लब्ध्वा रथं धनुश्चैव तथाऽक्षय्ये महेषुधी ।
बभूव कल्यः कौन्तेयः प्रहृष्टस्साह्यकर्मणि ॥ १२९॥
वज्रनाभं ततश्चक्रं ददौ कृष्णाय पावकः ।
आग्नेयमस्त्रं दयितं स च कल्योऽभवत्तदा ॥ १३०॥
अब्रवीत् पावकश्चैनम् एतेन मधुसूदन ।
अमानुषानपि रणे विजेष्यसि न संशयः ॥ १३१॥
अनेन त्वं मनुष्याणां देवानामपि चाहवे ।
रक्षःपिशाचदैत्यानां नागानां चाधिकस्तथा ॥ १३२॥
भविष्यसि न सन्देहः प्रवरारिनिवारणे ॥ १३३
तवैतच्चक्रमस्त्रं यत् सुदर्शनं नाम नामतः ।
तच्चास्मिन्नर्पय विभो दैत्यघाते यथा पुरा ॥ १३४
क्षिप्रं क्षिप्रं रणे चैतत् त्वया माधव शत्रुषु ।

हत्वाऽप्रतिहतं सङ्ख्ये पाणिमेष्यति ते पुनः ॥ १३५

वरुणश्च ददौ तस्मै गदामशनिनिस्स्वनाम् ।
दैत्यान्तकरणीं घोरां नाम्ना कौमोदकीं हरेः ॥ १३६

ततः पावकमब्रूतां [1]प्रहृष्टावर्जनाच्युतौ ॥ १३६॥

अर्जुनाच्युतौ—

कृतास्त्रौ शस्त्रसम्पन्नौ रथिनौ ध्वजिनावपि ।
कल्यौ स्वो भगवन् योद्धुम् अपि सर्वैस्सुरासुरैः ॥ १३७॥

किं पुनर्वज्रिणैकेन पन्नगार्थे युयुत्सता ॥ १३८

अर्जुनः—

चक्रमस्त्रं हि वार्ष्णेयो विसृजन् युधि वीर्यवान् ।
त्रिषु लोकेषु तन्नास्ति यन्न जीयाज्जनार्दनः ॥ १३९

गाण्डीवं धनुरादाय तथाऽक्षय्ये महेषुधी ।
अहमप्युत्सहे लोकान् विजेतुं युधि पावक ॥ १४०

सर्वतः परिवार्यैनं नादेन महता प्रभो ।
कामं सम्प्रज्वलाद्यैव कल्यौ स्वस्साह्यकर्मणि ॥ १४१

यदि खाण्डवमेष्यति प्रमादात्
सगणो वा परिरक्षितुं महेन्द्रः ।
शरताडितखण्डकुण्डलानां
कदनं द्रक्ष्यति देववाहिनीनाम् ॥ १४२

---

1. क-ख-ग-घ-ङ—प्रहृष्टौ कृष्णपाण्डवौ ।

वैशम्पायनः—

एवमुक्तस्स भगवान् [1]दाशार्हेणार्जुनेन ह ।
तैजसं रूपमास्थाय दावं दग्धुं प्रचक्रमे ॥ १४३

सर्वतः परिवार्याथ सप्तार्चिर्ज्वलनस्तथा ।
ददाह खाण्डवं क्रुद्धो युगान्तमिव दर्शयन् ॥ १४४

परिगृह्य समाविष्टस् तद्वनं मनुजर्षभ ।
मेघस्तनितनिर्घोषस् सर्वभूतानि निर्दहन् ॥ १४५

दह्यतस्तस्य च बभौ रूपं दावस्य भारत ।
मेरोरिव महीध्रस्य काञ्चनस्य महाद्युतेः ॥ १४६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि चतुर्दशाधिकद्विशततमोऽध्यायः ॥ २१४ ॥
॥ १९ ॥ खाण्डवदाहपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[अस्मिन्नध्याये १४६ श्लोकाः]

॥ पञ्चदशाधिकद्विशततमोऽध्यायः ॥

खाण्डवदाहं दृष्ट्वा तस्तैर्देवैः प्रार्थितेनेन्द्रेण जलवर्षणम् ॥ १ ॥ इन्द्राभिवृष्टस्य जलस्यार्जुनेन निवारणम् ॥ २ ॥ पुत्रं निगीर्याकाशमुत्पतन्त्याः तक्षकभार्यायाः अर्जुनेन शिरश्छेदः ॥ ३ ॥ इन्द्रेण स्वकृतवायुवर्षमोहितादर्जुनात्तक्षकपुत्रस्याश्वसेनस्य मोचनम् ॥ ४ ॥ अर्जुनेन पावकान्मुमुक्षूणां नागादीनां मारणम् ॥ ५ ॥ इन्द्रस्य कृष्णार्जुनाभ्यां युद्धम् ॥ ६ ॥

वैशम्पायनः—

तौ रथाभ्यां सुयुक्ताभ्यां दावस्योभयतस्स्थितौ ।
दिक्षु सर्वासु भूतानां चक्राते कदनं तदा ॥ १

1. अ-क-ख-ग-ङ—सहायेना

यत्र यत्र हि दृश्यन्ते प्राणिनः खाण्डवालयाः ।
पलायन्तस्तत्र तत्र तौ वीरौ पर्यधावताम् ॥ २

छिद्रं न स्म प्रपश्यन्ति रथयोराशुविक्रमात् ।
आविद्धाविव दृश्येते रथिनौ तौ रथोत्तमे ॥ ३

खाण्डवे दह्यमाने तु भूतान्यथ सहस्रशः ।
उत्पेतुर्भैरवान्नादान् विनदन्तो दिशो दश ॥ ४

दग्धैकदेशा बहवो निष्टप्ताश्च तथाऽपरे ।
स्फुटिताक्षा विशीर्णाश्च [1]विप्लुताक्षा विचेतसः ॥ ५

समालिङ्ग्य सुतानन्ये पितॄन् भ्रातॄंस्तथाऽपरे ।
त्यक्तुं न शेकुस्स्नेहेन तत्रैव निधनं गताः ॥ ६

विकृतैर्दशनैरन्ये खमुत्पेतुस्सहस्रशः ।
तत्र तत्र विधून्वन्तः पुनरग्नौ प्रपेदिरे ॥ ७

दग्धपक्षाक्षिचरणा विवेष्टन्तो महीतले ।
तत्र तत्र प्रदृश्यन्ते विनश्यन्तश्शरीरिणः ॥ ८

जलस्थानेषु तप्तेषु क्वाथ्यमानेषु वह्निना ।
गतसत्वास्स्म दृश्यन्ते कूर्ममत्स्यास्सहस्रशः ॥ ९

शरीरैस्सम्प्रदीप्तैश्च देहवन्त इवाग्नयः ।
अदृश्यन्त वने तत्र प्राणिनः प्राणिसंक्षये ॥ १०

1. क-ग-ङ—विप्लुष्टाश्च विशेषतः ।

तांस्तथोत्पततः पार्थश् शरैस्सञ्छिद्य खण्डशः ।
दीप्यमाने ततः प्रास्यत् प्रहसन् कृष्णवर्त्मनि ॥ ११

ते शराचितसर्वाङ्गा निनदन्तो महारवान् ।
ऊर्ध्वमुत्पत्य वेगेन निपेतुः पावके पुनः ॥ १२

शरैरभ्याहतानां च दह्यतां च वनौकसाम् ।
विरावश्श्रूयते हि स्म समुद्रस्येव मथ्यतः ॥ १३

वह्नेश्चापि प्रवृद्धस्य समुत्पेतुर्महार्चिषः ।
जनयामासुरुद्वेगं सुमहान्तं दिवौकसाम् ॥ १४

ततो जग्मुर्महात्मानस् सर्व एव दिवौकसः ।
शरणं देवराजं तं सहस्राक्षं पुरन्दरम् ॥ १५

देवाः—

किमिदं मानवास्सर्वे दह्यन्ते कृष्णवर्त्मना ।
कच्चिन्न संक्षयः प्राप्तो लोकानाममरेश्वर ॥ १६

[1]वैशम्पायनः—

तच्छ्रुत्वा वृत्रहा तेभ्यस् स्वयमेवान्ववेक्ष्य च ।
खाण्डवस्य विमोक्षार्थं प्रययौ हरिवाहनः ॥ १७

महता मेघजालेन नानारूपेण वज्रभृत् ।
आकाशं तमसाऽऽस्तीर्य प्रववर्ष सुरेश्वरः ॥ १८

1. अ—दृष्ट्वाक्रोशमकुर्वंस्ते लोकास्सर्वे भयान्विताः । [अधिकः पाठः]

ततोऽक्षमात्रा विसृजन् धाराश्शतसहस्रशः ।
अभ्यवर्षत् सहस्राक्षः पावकं खाण्डवं प्रति ॥ १९

असम्प्राप्तास्तु ता धारास् तेजसा जातवेदसः ।
ख एव समशुष्यन्त न काश्चित् पावकं गताः ॥ २०

ततो नमुचिहा क्रुद्धो भृशमर्चिष्मतस्तदा ।
[1]पुनरेवातिवर्षेण ववर्ष बलवृत्रहा ॥ २१

[2]सन्ततामिश्च धाराभिश् चण्डधूमसमाकुलम् ।
बभूव तद्वनं घोरं स्तनयित्नुसुघोषवत्* ॥ २२

तस्याभिवर्षतो धाराः खाण्डवं प्रत्यवारयत् ।
शरवर्षेण बीभत्सुर् उत्तमास्त्राणि दर्शयन् ॥ २३

शरैस्समन्ततस्सर्वं खाण्डवं चापि पाण्डवः ।
छादयामास तद्वर्षम् [3]अपकृत्य ततो वनात् ॥ २४

न च स्म किञ्चिच्छक्नोति भूतं निश्चरितुं ततः ।
सञ्छाद्यमाने गगने अस्यता सव्यसाचिना ॥ २५

---

1. घ—पुनरेवाभ्यवर्षन्तम् अम्भः प्रविविशुस्सृञ्जन् ।
2. घ—अर्चिर्धाराभिसम्बन्धं सघोषस्तनयित्नुवत् ।
* अ-क-ख-ग-ङ—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते ।
3. क-ग—अपाकृष्य ततो घनात् । घ—अपकृष्यात्ततो वनात् ।
ङ—अपकृष्य ततो घनात्

तक्षकस्तु न तत्रासीन्नागराजो महाबलः ।
दह्यमाने तु तस्मिंस्तु कुरुक्षेत्रे तदाऽभवत् ॥ २६

अश्वसेनोऽभवत्तत्र तक्षकस्य सुतो बली ।
स यत्नमकरोत्तीव्रं मोक्षार्थं हव्यवाहनात् ॥ २७

न शशाक स निर्गन्तुं कौन्तेयशरपीडितः ।
[1]मोक्षयामास तं माता निगीर्य भुजगात्मजा ॥ २८

तस्य पूर्वं शिरो ग्रस्तं पुच्छमस्य निगीर्यते ।
ऊर्ध्वमभ्यगमत् सा तु पन्नगी पुत्र[2]गृध्नुनी ॥ २९

तस्यास्तीक्ष्णेन भल्लेन पृथुधारेण पाण्डवः ।
शिरश्चिच्छेद गच्छन्त्यास् तामपश्यत् सुरेश्वरः ॥ ३०

तं मुमोचयिषुर्वज्री वातवर्षेण पाण्डवम् ।
मोहयामास तत्काले ह्यश्वसेनस्त्वमुच्यत ॥ ३१

तां च मायां तदा दृष्ट्वा घोरां नागेन वञ्चितः ।
द्विधा त्रिधा च चिच्छेद खगतां भरतर्षभ ॥ ३२

शशाप तु ततः क्रुद्धो बीभत्सुर्जिह्मगामिनम् ।
पावको वासुदेवश्चाप्यप्रतिष्ठो भविष्यसि ॥ ३३

ततो जिष्णुस्सहस्राक्षं खं वितत्येषुभिश्शितैः ।

1. क-ग-ङ—मोचयामास
2. क-ख-ग—गृद्धिनी । घ-ङ—गर्धिनी

योधयामास सङ्क्रुद्धो वज्रिनां तामनुस्मरन् ॥ ३४

देवराजोऽपि तं दृष्ट्वा संरब्धमिति फल्गुनम् ।
[1]दिव्यास्त्रमसृजद्दीप्तं विततानाकुलं नभः ॥ ३५

[2]ततो वायुर्महाघोरः क्षोभयामास सागरान् ।
वियत्स्थो जनयन् मेघाञ् जलधारामुचोऽतुलान् ॥ ३६

तद्विघातार्थमसृजद् अर्जुनोऽप्यस्त्रमद्भुतम् ।
वायव्यमेवाभिमन्त्र्य अस्त्रं प्रति विशारदः ॥ ३७

तेनेन्द्राशनिमेघानां वीर्यौजस्तद्विनाशितम् ॥ ३७॥

[3]जलधाराश्च ताइशोषं जग्मुर्नेशुश्च विद्युतः ।
क्षणेन चाभवद्व्योम सम्प्रशान्तरजस्तमः ॥ ३८॥

[4]शुभशीतानिलगुणं प्रकृतिस्थार्कमण्डलम् ॥ ३९

निष्प्रतीकारहृष्टश्च हुतभुग्विविधाकृतिः ।
प्रजज्वालाथ सोऽर्चिष्मान् स्वनादैः पूरयन् दिशः ॥ ४०

कृष्णाभ्यां रक्षितं दृष्ट्वा तं च दावमहङ्कृताः ।

---

1. क-ग—दिव्यमस्त्रं च विसृजन् विततानाकुलं नभः ।
वायव्यमस्त्रं विसृजन् विततानाखिलं नभः ॥
2. क-ग—सुभद्रजवमादीप्तं तदा वायुं विसर्ज ह । [अधिकः पाठः]
3. घ—जलधाराश्च्युतास्तेन जग्मुश्शोषं सविद्युतः ।
4. क-ग-ङ—सुखी शीतानिलगुणः प्रसन्नश्चार्कमण्डलः ।
ख-घ—सुखशीतानिलगुणं

समुत्पेतुरथाकाशं सुपर्णाद्याः पतत्रिणः ॥ ४१
गरुडा वज्रसदृशैः पक्षतुण्डनखैस्तथा ।
प्रहर्तुकामास्सम्पेतुर् आकाशात् कृष्णपाण्डवौ ॥ ४२
तथैवोरगसङ्घाश्च पाण्डवस्य समीपतः ।
उत्सृजन्तो विषं घोरं विचेरुर्ज्वलिताननाः ॥ ४३
[1]तांश्चकर्त शरैः पार्थस् सरोषान् दृश्य खेचरान् ।
विविशुश्चापि तं दीप्तं देहाभावाय पावकम् ॥ ४४
ततस्सुरास्सगन्धर्वा यक्षराक्षसपन्नगाः ।
उत्पेतुर्नादमतुलम् उत्सृजन्तो रणार्थिनः ॥ ४५
अयःकणकचक्रासिमुसलोद्यतपाणयः ।
कृष्णपार्थौ जिघांसन्तः क्रोधसम्मूर्छितौजसः ॥ ४६
तेषामपि प्रहरतां शस्त्रवर्षं च मुञ्चताम् ।
प्रममाथोत्तमाङ्गानि बीभत्सुर्निशितैश्शरैः ॥ ४७
कृष्णश्च सुमहातेजाश् चक्रेणारिविघातिना ।
दैत्यदानवसङ्घानां चकार कदनं महत् ॥ ४८
अपरे तु शरैर्विद्धाश् चक्रवेगेरितास्तथा ।
वेलामिव समासाद्य व्यवेष्टन्त महौजसः ॥ ४९
ततश्शक्रोऽतिसङ्क्रुद्धस् त्रिदशानां महेश्वरः ।

1. क-ग-ङ—तांश्चार्कसदृशैरस्त्रैस् सरोषान् दृश्य खेचरान् ।

पाण्डुरं गजमास्थाय तावुभौ समुपाद्रवत् ॥ ५०

अशनिं गृह्य तरसा वज्रं चोद्यम्य पाहवे ।
निघ्नतेति च तौ प्राह सुराञ्छत्रुनिषूदनः ॥ ५१

ततस्समुद्यतां दृष्ट्वा देवेन्द्रेण महाशनिम् ।
जगृहुस्सर्वशस्त्राणि स्वानि स्वानि ततस्तथा ॥ ५२

कालदण्डं यमो राजन् गदां चैव धनेश्वरः ।
[1]पाशांश्च तत्र वरुणस् त्रिशूलं च तथा शिवः ॥ ५३

[2]स्कन्दश्शक्तिं समादाय तस्थौ मेरुरिवाचलः ।
ओषधीर्दीप्यमानाश्च जगृहातेऽश्विनावपि ॥ ५४

जगृहे च धनुर्धाता मुसलं तु जयस्तथा ।
[3]पर्वतं चापि जग्राह क्रुद्धस्त्वष्टा महाबलः ॥ ५५

अंशस्तु शक्तिं जग्राह मृत्युर्दैवः परश्वथम् ।
प्रगृह्य परिघं घोरं विचचारार्यमाऽपि च ॥ ५६

मित्रश्च क्षुरपर्यन्तं चक्रं गृह्य व्यवस्थितः ।
पूषा भगश्च सङ्क्रुद्धस् सविता च विशाम्पते ॥ ५७

आत्तकार्मुकनिस्त्रिंशाः कृष्णपार्थावभिद्रवन् ।

1. घ—व—पाशी पाशं त्रिशूलं च तथेशानस्तनूनपात् ।
2. घ—शक्तिं खड्गं यातुराजस् समीरोऽङ्कुशमेव च ।
3. घ—जग्राह भूधरं त्वष्टा क्रुद्धोऽयोधीन्महाबलः ।

रुद्राश्च वसवश्चैव मरुतश्च महाबलाः ॥ ५८
विश्वे देवास्तथा साध्या दीप्यमानास्स्वतेजसा ॥ ५८॥
एते चान्ये च बहवो देवास्तौ पुरुषोत्तमौ ।
कृष्णपार्थौ जिघांसन्तः प्रतीयुर्विविधायुधाः ॥ ५९॥
तत्राद्भुतान्यदृश्यन्त निमित्तानि महावने ।
युगान्तसमरूपाणि भूतोत्पातानि भारत ॥ ६०॥
तथा दृष्ट्वा सुसंरब्धं शक्रं देवैरसहाच्युतौ ।
अभीतौ युधि दुर्धर्षौ तस्थतुस्सज्जकार्मुकौ ॥ ६१॥
आगतांश्चैव तान् दृष्ट्वा देवानेकैकशस्तथा ।
वारयेतां सुसङ्क्रुद्धौ शरैर्वज्रोपमैस्तदा ॥ ६२॥
असकृद्भग्नसङ्कल्पास् सुराश्शरबहुक्षताः ।
भयाद्रणं परित्यज्य शक्रमेवाभिशिश्रियुः ॥ ६३॥
दृष्ट्वा निवारितान् देवान् माधवेनार्जुनेन च ।
आश्चर्यमगमंस्तत्र मुनयो [1]नभसि स्थिताः ॥ ६४॥
शक्रश्चापि तयोर्वीर्यम् उपलभ्यासकृद्रणे ।
बभूव परमप्रीतो भूयश्चैतावयोधयत् ॥ ६५॥
ततोऽश्मवर्षं सुमहद् व्यसृजत् पाकशासनः ।
भूय एव तदा वीर्यं जिज्ञासुस्सव्यसाचिनः ॥ ६

1. क-ख-ग-घ-ङ—दिवि विष्ठिताः

तच्छरैरर्जुनो वर्षं प्रतिजघ्नेऽत्यमर्षणः ॥ ६७
विफलं क्रियमाणं तत् सम्प्रेक्ष्य च शतक्रतुः ।
भूयस्संवर्धयामास तद्वर्षं देवराडपि ॥ ६८
सोऽश्मवर्षं महावेगैर् इषुभिः पाकशासनिः ।
विलयं गमयामास हर्षयन् पितरं तथा ॥ ६९
समुत्क्षिप्य तु पाणिभ्यां मन्दराच्छिखरं महत् ।
सद्रुमं व्यसृजच्छक्रो जिघांसुः पाण्डुनन्दनम् ॥ ७०
ततोऽर्जुनो वेगवद्भिर् ज्वलितानलसन्निभैः ।
बाणैर्विध्वंसयामास गिरेश्शृङ्गं सहस्रशः ॥ ७१
गिरेर्विशीर्यमाणस्य तस्य रूपं तदा बभौ ।
[1]सार्कचन्द्रग्रहस्येव नभसः प्रविशीर्यतः ॥ ७२
तेन चापतता देशे शैलेन महता भृशम् ।
भूय एव ततस्तत्र प्राणिनां प्राणसंक्षयः ॥ ७३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि पञ्चदशाधिकद्विशततमोऽध्यायः ॥ २१५ ॥
॥ १९ ॥ खाण्डवदाहपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
[समाप्तं च खाण्डवदाहपर्व]
[अस्मिन्नध्याये ७३ श्लोकाः]

---

1. घ—सङ्कीर्णैरश्शृङ्गपाषाणैः पतद्भिस्तैस्समन्ततः ।
एक एवाहतास्तत्र प्राणिनः खाण्डवालयाः ॥ [पाठान्तरम्]
2. क-ग-ङ—तेनार्वाक्पतता दावे

॥ षोडशाधिकद्विशततमोऽध्यायः ॥

(अथ मयदर्शनपर्व)

देवेषु पराजितेषु अशरीरवाणीश्रवणेन इन्द्रस्य निवृत्तिः ॥ १ ॥ पलायमानं मयं हन्तुमुद्युक्ते श्रीकृष्णे अर्जुनं शरणं गतायै मयाय तेन अभयदानम् ॥ २ ॥ खाण्डवदाहेऽपि अश्वसेनादीनामदाहस्य वैशम्पायनेन कथनम् ॥ ३ ॥ शार्ङ्गकाणां मोचनकारणे जनमेजयेन पृष्टे वैशम्पायनेन मन्दपालोपाख्यानकथनारम्भः ॥ ४ ॥ तपसा पितृलोकं गतस्याप्यनवाप्ततपःफलस्य मन्दपालस्य देवाज्ञया प्रजोत्पादनार्थं पुनर्भूमावागमनम् ॥ ५ ॥ तत्र शार्ङ्ग्यां जरितायां पुत्रचतुष्टयोत्पादनम् ॥ ६ ॥ सपुत्रां जरितां खाण्डवे विसृज्य लपितानाम्न्याऽन्यया शार्ङ्ग्या सङ्गतस्य मन्दपालस्य विप्ररूपाग्निदर्शनम् ॥ ७ ॥ तस्य खाण्डवदिधक्षां ज्ञात्वा पुत्ररक्षणार्थं स्तुतादग्नेर्वरलाभः ॥८॥ प्रज्वलदग्निदर्शनेन जरितायाः स्वपुत्रैस्संवादः ॥ ९ ॥

वैशम्पायनः—

तथा शैलनिपातेन धर्षिताः खाण्डवालयाः ।
दानवा राक्षसा नागास् तरक्षुर्वृक्षवनौकसः ॥ १
द्विपाः प्रभिन्नाश्शार्दूलास् सिंहाः केसरिणस्तथा ।
मृगाश्च महिषाश्चैव शतशः पक्षिणस्तथा ॥ २
समुद्विग्ना विससृपुस् तथाऽन्या भूतजातयः ॥ २॥
[1]तं दावं समुदैक्षन्त कृष्णं चाभ्युद्यतायुधम् ॥ ३
[2]उत्पातितेन शब्देन त्रासिता इव चाभवन् ॥ ३॥

---

1. क-ग-घ-ङ—तथाऽर्जुनं समुद्वीक्ष्य
2. क-ग-घ-ङ—उत्पातनादशब्देन

स्वतेजोभास्वरं चक्रम् उत्ससर्जातिवेगवत् ।
तेनार्ता जातयः क्षुद्रास् सदानवनिशाचराः ॥ ४॥

निकृत्ताश्शतशस्सर्वा निपेतुरनले क्षणात् ॥ ५

न्यपतन् राक्षसास्तत्र कृष्णचक्रविदारिताः ।
वसारुधिरसम्पृक्तास् सन्ध्यायामिव तोयदाः ॥ ६

पिशाचान् पक्षिणो नागान् पशूंश्चैव सहस्रशः ।
निघ्नंश्चरति वार्ष्णेयः कालवत्तत्र भारत ॥ ७

[1]क्षिप्तं क्षिप्तं पुनश्चक्रं कृष्णस्यामिततेजसः ।
हत्वाऽनेकानि सत्वानि पाणिमेति पुनः पुनः ॥ ८

तथा तु निघ्नतस्तस्य सर्वभूतानि भारत ।
बभूव रूपमत्युग्रं सर्वभूतात्मनस्तदा ॥ ९

समेतानां हि देवानां दानवानां च सर्वशः ।
विजेता नाभवत् कश्चित् कृष्णपाण्डवयोर्मृधे ॥ १०

तयोर्बलात् परित्रातुं तं च दावं यदा सुराः ।
ना शक्नुवन्छमयितुं तदाऽभूवन् पराङ्मुखाः ॥ ११

शतक्रतुस्तु सम्प्रेक्ष्य विमुखान् देवतागणान ।
बभूवावस्थितः प्रीतः प्रशंसन् कृष्णपाण्डवौ ॥ १२

विनिवृत्तेषु देवेषु वागुवाचाशरीरिणी ।

1. अ – क्षिप्तं क्षिप्तं हि यच्चक्रम्

शतक्रतुमभिप्रेक्ष्य तदा गम्भीरनिस्स्वना ॥ १३

आकाशवाणी—

न ते सखा सन्निहितस् तक्षकः पन्नगोत्तमः ।
दाहकाले खाण्डवस्य कुरुक्षेत्रं गतो ह्यसौ ॥ १४

न च शक्यौ त्वया जेतुं युद्धेऽस्मिन् समवस्थितैः ।
वासुदेवार्जुनौ शक्र निबोधेदं वचो मम ॥ १५
नरनारायणावेतौ तावेतौ लोकभावनौ ॥ १५॥

भवानप्यभिजानाति यद्वीर्यौ यत्पराक्रमौ ॥ १६

नैतौ शक्यौ दुराधर्षौ विजेतुममरैरपि ।
अपि सर्वेषु लोकेषु पुराणावृषिसत्तमौ ॥ १७

पूजनीयतमावेतावपि सर्वैस्सुरासुरैः ।
यक्षराक्षसगन्धर्वनरकिन्नरपन्नगैः ॥ १८

तस्मादितस्सुरैस्साधं गन्तुमर्हसि वासव ।
[1]दिष्टं चाप्यनुपश्यैतत् खाण्डवस्य विनाशनम् ॥ १९

वैशम्पायनः—

इति वाक्यमुपश्रुत्य तथ्यमित्यमरेश्वरः ।
क्रोधामर्षौ समुत्सृज्य सम्प्रतस्थे दिवं तदा ॥ २०

सम्प्रस्थितं महात्मानं सर्व एव दिवौकसः ।

1. क-ग—दृष्टं चाप्यनुपश्यैनं । ङ—दृष्टिं चाप्यनुपश्यैनं

त्वरितास्सहिता राजन् अनुजग्मुश्शतक्रतुम् ॥ २१

देवराजं तदा यान्तं सह देवैरवेक्ष्य तु ।
वासुदेवार्जुनौ वीरौ सिंहनादं विनेदतुः ॥ २२

देवराजे गते राजन् प्रहृष्टौ कृष्णपाण्डवौ ।
निर्विशङ्कौ पुनर्दावं दाहयामासतुस्तदा ॥ २३

स मारुत इवाभ्राणि नाशयित्वाऽर्जुनस्सुरान् ।
व्यधमच्छरसम्पातैः प्राणिनः खाण्डवालयान् ॥ २४

न च स्म किञ्चिच्छक्तोऽभूद् भूतं निश्चरितुं ततः ।
सञ्छाद्यमानमिषुभिर् अस्यता सव्यसाचिना ॥ २५

नाशकंश्चापि भूतानि महान्त्यपि रणेऽर्जुनम् ।
निरीक्षितुममोघेषुं करिष्यन्ति कुतो रणम् ॥ २६

शतेनैकं च विव्याध शतं चैकेन पत्रिणा ।
व्यसवस्ते पतन्त्यग्नौ साक्षात् कालह २७

न चालभन्त ते शर्म रोधस्सु विष
पितृदेवनिवासेषु सन्तापश्चोपजाय
भूतसङ्घसहस्राणि दीनाश्चक्रुर्महा
रुरवो वारणाश्चैव तथैव मृगप
तेन शब्देन वित्रेसुर् गङ्गोदधि
अप्सु न व्यचरंश्चैव तथाऽन्रे

न त्वर्जुनं महाबाहुं नापि कृष्णं जगत्पतिम् ।
निरीक्षितुं च शक्नोति कश्चिद्योद्धुं कुतः पुनः ॥ ३१

एकायनगता येऽपि न्यविशंस्तत्र केचन ॥
राक्षसान् दानवान् नागाञ् जघ्ने चक्रेण तान् हरिः ॥ ३२

ते तु भिन्नशिरोदेहाश् चक्रवेगाद्गतासवः ।
पेतुरास्ये महाकायाः दीप्तस्य वसुरेतसः ॥ ३३

समांसरुधिरौघैश्च मेदौघैश्च समीरिताः ॥ ३३॥

उपर्याकाशगो वह्निर् विधूम इव दृश्यते ।
दीप्ताक्षो दीप्तजिह्वश्च दीप्तव्यात्तमहाननः ॥ ३४॥

दीप्तोर्ध्वकेशः पिङ्गाक्षो विष्वक् प्राणभृतां वरः ॥ ३५

तां स कृष्णार्जुनकृतां सुधां प्राप्य हुताशनः ।
बभूव मुदितस्सद्यः परां निर्वृतिमागतः ॥ ३६

तथाऽसुरं मयं नाम तक्षकस्य निवेशनात् ।
विप्रद्रवन्तं सहसा ददर्श मधुसूदनः ॥ ३७

तमग्निः प्रार्थयामास दिधक्षुर्वातसारथिः ।
स्नेहवान् वै जटी भूत्वा नदन् स्म जलदो यथा ॥ ३८

क्रोधंसुर्वासुदेवस्तं चक्रमुद्यम्य विष्ठितः ॥ ३८॥

सम्प्रस्थितं दृष्ट्वा दिधक्षुं च हुताशनम् ।

1. क-ग—दृष्टं लेलिहानोऽग्निर् मयं दग्धुं तमन्वगात् । [अधिकः पाठः]

अभिधायार्जुनेत्येवं मयश्चुक्रोश पाण्डवम् ॥ ३९॥

तस्य भीतस्वनं श्रुत्वा मा भैरिति धनञ्जयः ।
प्रत्युवाच मयं पार्थो जीवयन्निव भारत ॥ ४०॥

यं न भेतव्यमित्याह मयं पार्थो दयापरः ॥ ४१

तं पार्थेनाभये दत्ते नमुचेर्भ्रातरं मयम् ।
न हन्तुमैच्छदाशार्हः पावको न ददाह च ॥ ४२

तद्वनं पावको धीमान् दिनानि दश पञ्च च ।
ददाह कृष्णपार्थाभ्यां रक्षितः पाकशासनात् ॥ ४३

तस्मिन वने दह्यमाने षडग्निर्न ददाह च ।
अश्वसेनं मयं चैव चतुरश्शार्ङ्गकांस्तथा * ॥ ४४

जनमेजयः—
किमर्थं शार्ङ्गकानग्निर् न ददाह तथा गते ।
तस्मिन् वने दह्यमाने ब्रह्मन्नेतत् प्रचक्ष्व मे ॥ ४५

नागस्याप्यश्वसेनस्य दानवस्य मयस्य च ।
कारणं कीर्तितं ब्रह्मन् शार्ङ्गकाणां न कीर्तितम् ॥ ४६

तदेतद्भुतं ब्रह्मन् शार्ङ्गकाणामनाशनम् ।
कीर्तयस्वाग्निसम्मर्दे कथं ते न विनाशिताः ॥ ४

वैशम्पायनः—
यदर्थं शार्ङ्गकानग्निर् न ददाह तथा गते ।

* अ-क-ख-ग-ङ—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते । ९४॥

तन् ते सम्यग्यथावृत्तं कीर्तयिष्यामि भारत ॥ ४८

धर्मज्ञानां मुख्यतमस् तपस्वी संशितव्रतः ।
आसीन्महर्षिश्रुतवान् मन्दपाल इति श्रुतः ॥ ४९

मार्गं समास्थितो राजन् ऋषीणामूर्ध्वरेतसाम् ।
स्वाध्यायवान् धर्मरतस् तपस्वी विजितेन्द्रियः ॥ ५०

स गत्वा तपसः पारं देहमुत्सृज्य भारत ।
जगाम पितृलोकाय न लेभे तत्र तत्फलम् ॥ ५१

स लोकानफलान् दृष्ट्वा तपसा निर्जितानपि ।
पप्रच्छ धर्मराजस्य समीपस्थान् दिवौकसः ॥ ५२

मन्दपालः—
किमर्थमावृता लोका मयेह तपसाऽर्जिताः ।
किं मया न कृतं तत्र यस्यैतत् कर्मणः फलम् ॥ ५३

तत्राहं तत् करिष्यामि [1]यदर्थमिदमावृतम् ।
[2]फलमेतस्य तपसः कथयध्वं दिवौकसः ॥ ५४

देवाः—
ऋणिनो मानवा ब्रह्मन् सर्वे जायन्ति तच्छृणु ॥ ५४॥

ब्रह्मचर्येण यज्ञेन प्रजया च न संशयः ।

क-ख—यदर्थमिह आवृतम् । घ—येनेमानागतः पुनः ।
सम्प्रयोति सकलानेतान् तत्कर्म ब्रूत मा चिरम् । [अधिकः पाठः]
———प्रजाभिर्ब्रह्मचर्येण स्वाध्यायतपसा तथा ।

1. क-ग—दृब्रह्मचर्येण यज्ञेयं

[1]तदपाक्रियते सर्वं यज्ञेन तपसा सुतैः ॥ ५५॥

तपस्वी यज्ञकृच्चासि न च ते विद्यते प्रजा ।
त इमे प्रसवस्यार्थे तव लोकास्समावृताः ॥ ५६॥

प्रजायस्व ततो लोकान् उपभोक्तासि शाश्वतान् ॥ ५७

पुन्नाम्नो नरकात् पुत्रस् त्रायते हि पुरा मतम् ।
तस्मादपत्यं सन्ताने यतस्व ब्रह्मसत्तम ॥ ५८

वैशम्पायनः—

[2]स एवमुक्तो धर्मात्मा मन्दपालो महानृषिः ।
क नु [3]शीघ्रमपत्यं स्याद् बहुलं चेत्यचिन्तयत् ॥ ५९

स चिन्तयन्नभ्यगच्छत् प्रबलप्रसवान् खगान् ।
शार्ङ्गिकां शार्ङ्गको भूत्वा जरितां समुपेयिवान् ॥ ६०

[4]स तस्यां जनयामास चतुरश्शार्ङ्गकानृषीन् ।
तानपास्य च तत्रैव जगाम लपितां प्रति ॥ ६१

बालान् स तानण्डगतान् सह मात्रा मुनिर्वने ॥ ६१॥

तस्मिन् गते महाभागे लपितां प्रति भारत ।
अपत्यस्नेहसंविग्ना जरिता बहुचिन्तयत् ॥ ६२॥

---

1. क-ग-ङ—तदेव क्रियते । घ—तपसा क्रियते
2. क-ग-घ-ङ—तच्छ्रुत्वा मन्दपालस्तु तेषां वाक्यं दिवौकसाम् ।
3. क-ग-ङ—शीघ्रं तु भगवान् अपत्यं दापयिष्यति ।
4. क-घ-ङ—तस्यां पुत्रानजनयच् चतुरो ब्रह्मवादिनः ।

तेन त्यक्तानसन्त्याज्यान् ऋषीनण्डगतान् वने ।
नाजहात् पुत्रकानार्तान् जरिता खाण्डवे नृप ॥ ६३॥

बभार चैतान् सञ्जातान् स्व[1]प्रीत्या स्नेहवद्द्विज ॥ ६४

ततोऽग्निं खाण्डवं दग्धुम् आयान्तं दृष्टवानृषिः ।
मन्दपालश्चरंस्तस्मिन् वने लपितया सह ॥ ६५

तं सङ्कल्पं विदित्वाऽग्नेर् ज्ञात्वा बालांश्च पुत्रकान् ।
महर्षिर्मन्दपालोऽसौ वह्निं स्तोतुं प्रचक्रमे ॥ ६६

सोऽभितुष्टाव विप्रर्षिर् ब्राह्मणो जातवेदसम् ।
पुत्रान् प्रति वदन् भीतो लोकपालं महौजसम् ॥ ६७

मन्दपालः—

त्वमग्ने सर्वलोकानां मुखं त्वमसि हव्यवाट् ।
त्वमन्तस्सर्वभूतानां गूढश्चरसि पावक ॥ ६८

त्वामेकमाहुर्मुनयस् त्वामेवाहुस्त्रिधा पुनः ।
त्वामष्टधा कल्पयित्वा यज्ञवाटमकल्पयन् ॥ ६९

त्वया सृष्टमिदं सर्वं वदन्ति परमर्षयः ॥ ६९॥

त्वदृते हि जगत् कृत्स्नं सद्यो नश्येद्धुताशन ॥ ७०

[illegible]भ्यं कृत्वा नमो विप्राः स्वकर्मविहितां गतिम् ।
[illegible]त सह पत्नीभिस् सुतैरपि च शाश्वतीम् ॥ ७१

१—चृत्या स्नेहविकृत्या

त्वामग्ने जलदानाहुः खे विषक्तान् सविद्युतः ।
दहन्ति सर्वभूतानि त्वत्तो निष्क्रम्य हायनाः ॥ ७२

जातवेदस्त्वयैवेदं विश्वं सृष्टं महाद्युते ।
तवैव कर्म विहितं भूतं सर्वं चराचरम् ॥ ७३

त्वयाऽऽपो विहिताः पूर्वं त्वयि सर्वमिदं जगत् ।
त्वयि हव्यं च कव्यं च यथावत् सम्प्रतिष्ठितम् ॥ ७४

त्वमेव दहनो देव त्वं धाता त्वं बृहस्पतिः ।
त्वमश्विनौ यमौ मित्रस् सोमस्त्वमसि चानिलः ॥ ७५

[1]वैशम्पायनः—

एवं स्तुतस्तदा तेन मन्दपालेन पावकः ।
तुतोष तस्य नृपते मुनेरमिततेजसः ॥ ७६

उवाच चैनं प्रीतात्मा किमिष्टं करवाणि ते ॥ ७६॥

तमब्रवीन्मन्दपालः प्राञ्जलिर्हव्यवाहनम् ।
[2]सन्दहन् खाण्डवं दावं मम पुत्रान् विसर्जय ॥ ७७॥

तथेति तत् प्रतिश्रुत्य भगवान हव्यवाहनः ।

---

1. ब—मम पुत्रांश्च पौत्रांश्च पत्नीं रक्ष हुताशन ।
गृहं क्षेत्रं पशून् रक्ष रक्ष मां सर्व सर्वदा ॥ [अधिक
2. ब—भार्यां रक्ष गृहं रक्ष पशून् मे रक्ष सर्वदा ।
तपन्तु हेतयस्सर्वे हन्यादस्मात्त्वाभिभो ।
सर्वत्र सर्वदाऽस्माकं शिवो भव हुताशन ॥

खाण्डवे तेन कालेन प्रजज्वाल दिधक्षया * ॥ ७८॥

वैशम्पायनः—

ततः प्रज्वलिते शुक्रे शार्ङ्गकास्ते सुदुःखिताः ।
बभूवुः परमोद्विग्ना नागच्छन्त परायणम् ॥ ७९॥

निशम्य पुत्रकान् बालान् माता तेषां तपस्विनी ।
जरिता पुत्रशोकार्ता विललाप सुदुःखिता ॥ ८०॥

जरिता—

अयमग्निर्दहन् कक्षम् इत आयाति भीषणः ।
जगत् सन्दीपयन् भीमो मम दुःखविवर्धनः ॥ ८१॥

इमे च कर्षयन्तीह शिशवो मन्दचेतसः ।
अ [illegible]र्हीनाः पूर्वेषां नः परायणाः ॥ ८२॥

त्रासयं[illegible]ति लेलिहानो महीरुहान् ।
अशक्तिमत्व[illegible]ा न शक्तास्सरणे मम ॥ ८३॥

[1]आदाय तानशक्तोऽस्मि पुत्रांस्तरितुमन्ततः ।
न च त्यक्तुमहं शक्ता हृदयं दूयतीव मे ॥ ८४॥

[2]नु त्यजाम्यहं पुत्रं कमादाय व्रजाम्यहम् ।
मे स्यात् कृतं कृत्वा मन्यध्वं पुत्रकाः कथम् ॥ ८५॥

---

[1] ग-ङ—कोशेष्वत्रैवाध्यायसमाप्तिर्दृश्यते ।
[2]—आदातुं च न शक्ताऽस्मि पुत्रान् सरितुमन्ततः ।

चिन्तयानाऽपि मोक्षं वै नाधिगच्छामि किञ्चन ।
छादयित्वा हि वो गात्रैः करिष्ये मरणं सह ॥ ८६॥
जरितारौ कुलं ह्येतज् ज्येष्ठे त्वेवं प्रतिष्ठितम् ।
शारिसृक्षः प्रजायेत पितॄणां कुलवर्धनः ॥ ८७॥
स्तम्बमित्रस्तपः कुर्याद् द्रोणो ब्रह्मविदुत्तमः ॥ ८८
इत्येवमुक्त्वा प्रययौ पिता वो निर्घृणः पुरा ।
सहैव चरितुं बालैर् न शक्नोमि तपोवनात् ॥ ८९
कमुपादाय शक्येयं गन्तुं कष्टाऽऽपदुत्तमा ॥ ८९॥

वैशम्पायनः —

किं नु कृत्वा कृतं कार्यं भवेदिति च विह्वला ।
नापश्यत् स्वधिया मोक्षं स्वसुतानां तदाऽनलात् ॥ ९०॥
एवं ब्रुवन्तीं शार्ङ्गास्ते प्रत्यूचुश्च स्वमातरम् ॥ ९१

शार्ङ्गकाः —

स्नेहमुत्सृज्य मातस्त्वं पत यत्र न हव्यवाट् ॥ ९१॥
अस्मास्विह विनष्टेषु भवितारस्सुतास्तव ।
त्वयि मातर्विनष्टायां न नस्स्यात् कुलसन्ततिः ॥ ९२॥
अन्ववेक्ष्यैतदुभयं क्षेमं स्याद्यत् कुलस्य नः ।
तद्वै कर्तुं परं कामो मातरेष भवेत्तव ॥ ९३॥
मा वै कुलविनाशाय स्नेहं कार्षीस्सुतेषु ते ।
न हीदं कर्म मोघं स्याल् लोककामस्य नः पितुः ॥ ९४॥

जरिता—

इदमाखोर्बिलं भूमौ वृक्षस्यास्य समीपतः ।
तदाविशध्वं त्वरिता वहेरत्र [1]न नो भयम् ॥ ९५॥
ततोऽहं पांसुना च्छिद्रम् अपिधास्यामि पुत्रकाः ।
एवं प्रतिकृतं मन्ये ज्वलतः कृष्णवर्त्मनः ॥ ९६॥
तत एष्याम्यतीतेऽग्नौ विहन्तुं पांसुसञ्चयम् ।
रोचतामेष वो योगो विमोक्षाय हुताशनात् ॥ ९७॥

शार्ङ्गकाः—

अबर्हान् मांसभूतान् नः क्रव्यादाखुर्विनाशयेत् ।
पश्य मातर्भयमिदं न शक्ष्याम निषेवितुम् ॥ ९८॥
कथमग्निर्न नो हन्यात् कथमाखुर्न भक्षयेत् ।
कथं न स्यात् पिता मोघः कथं माता म्रियेत नः ॥ ९९॥
बिल आखोर्विनाशस्याद् अग्नेराकाशचारिणाम् ।
अन्ववेक्ष्यैतदुभयं श्रेयान् दाहो न भक्षणम् ॥ १००॥
गर्हितं मरणं नस्याद् आखुना तु तदा बिले ।
शिष्टदृष्टः परित्यागश् शरीरस्य हुताशने ॥ १०१॥
अग्निदाहे तु नियतं ब्रह्मलोके ध्रुवा गतिः ॥ १०२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि षोडशाधिकद्विशततमोऽध्यायः ॥ २१६ ॥
॥ २० ॥ मयदर्शनपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[अस्मिन्नध्याये १०२ श्लोकाः]

---

1. क-ग-घ-ङ—न वो

॥ सप्तदशाधिकद्विशततमोऽध्यायः ॥

पुत्रैस्सह संवादानन्तरं जरितायाः स्थानान्तरगमनम् ॥ १ ॥ जरितार्यादीनां चतुर्णां शार्ङ्गकाणां परस्परं संवादः ॥ २ ॥ स्तुत्या प्रसन्नेनाग्निना तेभ्योऽभयदानम् ॥ ३ ॥ शार्ङ्गकाणां प्रार्थनया अग्निना मार्जाराणां दाहः ॥ ४ ॥

जरिता—

अस्माद्बिलान्निष्पतितम् आखुं श्येनो जहार तम् ।
क्षुद्रं गृहीत्वा पादाभ्यां भयं न भविता ततः ॥ १

शार्ङ्गकाः—

[1]नापाहृतं वयं विद्मश् श्येनेनाखुं कथञ्चन ।
अन्येऽपि भवितारोऽत्र तेभ्योऽपि भयमेव नः ॥ २

संशयो वह्निरागच्छेद् दृष्टं वायोर्निवर्तनम् ।
मृत्युर्नो बिलवासिभ्यो भवेन्मातरसंशयः ॥ ३

निस्संशयात् संशयितो मृत्युर्मातर्विशिष्यते ।
चर खे त्वं यथान्यायं पुत्रानाप्स्यसि शोभनान् ॥ ४

जरिता—

अहं वै श्येनमायान्तम् अद्राक्षं बिलमन्तिकात् ।
सञ्चरन्तं समादाय जहाराखुं बिलाद्बली ॥ ५

1. ग-ङ—एकमेव हृतं विद्मः । घ—न हृतं तं वयं

तं पतन्तमहं श्येनं त्वरिता पृष्ठतन्वगाम् ।
आशिषोऽस्य प्रयुञ्जाना हरतो मूषिकं बिलात् ॥ ६

यो नो द्वेष्टारमादाय श्येनराज प्रधावसि ।
भव त्वं दिवमास्थाय निरमित्रो हिरण्मयः ॥ ७

स यदा भक्षितस्तेन क्षुधितेन पतत्रिणा ।
तदाऽहं तमनुज्ञाप्य प्रत्युपायां पुनर्गृहम् ॥ ८

प्रविशध्वं बिलं पुत्रा विस्रब्धा नास्ति वो भयम् ।
श्येनेन मम पश्यन्त्या हृत आखुरसंशयम् ॥ ९

शार्ङ्गकाः—

न विद्महे वयं मातर् हृतमाखुमितः पुरा ।
अविज्ञाय न शक्ष्यामः प्रवेष्टुं विवरं भुवः ॥ १०

जरिता—

अहं तमभिजानामि हृतं श्येनेन मूषिकम् ।
अत एव भयं नास्ति क्रियतां वचनं मम ॥ ११

शार्ङ्गकाः—

न त्वं मिथ्योपचारेण मोक्ष्यसेथा भयाद्धि नः ।
समाकुलेषु ज्ञानेषु न बुद्धिकृतमेव तत् ॥ १२

न चोपकृतमस्माभिर् न चास्मान् वेत्थ ये वयम् ।
पीड्यमाना [1]स्मरस्यस्मान् का सती के वयं तव ॥ १३

1. क-ग—भरस्य; घ—हरस्य

तरुणी दर्शनीयाऽसि समर्था भर्तुरेषणे ।
अनुगच्छस्व भर्तारं पुत्राँल्लप्स्यसि शोभने ॥ १४

वयमग्निं समाविश्य लोकान् प्राप्स्यामहे [1]शुभे ।
अथास्मान् न दहेदग्निर् [2]अम्बाऽभूः पुनरेव नः ॥ १५

वैशम्पायनः—

एवमुक्ता ततश्शार्ङ्गी पुत्रानुत्सृज्य खाण्डवे ।
जगाम त्वरिता देशं क्षेममग्नेरनाश्रयम् ॥ १६

ततस्तीक्ष्णार्चिरभ्यागाज् ज्वलितो हव्यवाहनः ।
यत्र शार्ङ्गा बभूवुस्ते मन्दपालस्य पुत्रकाः ॥ १७

[3]ततस्तं ज्वलितं दृष्ट्वा ज्वलनं ते विहङ्गमाः ।
व्यथिताः करुणा वाचश् श्रावयामासुरन्तिकात् ॥ १८
जरितारिस्ततो वाक्यं श्रावयामास पावकम्* ॥ १८॥

जरितारिः—

पुरतः कृच्छ्रकालस्य धीमाञ्जागर्ति पूरुषः ।
स कृच्छ्रकालं सम्प्रेक्ष्य व्यथां नैवैति कर्हिचित् ॥ १९॥

यस्तु कृच्छ्रमसम्प्राप्तं विश्वासान्नावबुध्यते ।
स कृच्छ्रकाले व्यथितो [4]न श्रेयो विन्दते महत् ॥ २०॥

---

1. क-ख-ग-ङ—शुभान् । घ—प्राप्स्याम शोभनान्
2. अ—रम्बायाः 3. क-ग-घ-ङ—शार्ङ्गका
* अ-क-ख-ग-ङ—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते ।
4. क-ग-घ-ङ—न प्रजानाति किञ्चन

शारिसृक्कः—

धीरस्त्वमसि मेधावी प्राणकृच्छ्रमिदं च नः ।
नमस्तेऽस्तु बहूनां हि भवत्येको गुणाधिकः ॥ २१॥

स्तम्बमित्रः—

ज्येष्ठश्चाता भवति वै ज्येष्ठो मुञ्चति कृच्छ्रतः ।
ज्येष्ठश्चेन्न प्रजानाति कनीयान् किं करिष्यति ॥ २२॥

द्रोणः—

हिरण्यरेतास्त्वरितो ज्वलन्नायाति नः क्षयम् ।
सप्तजिह्वोऽनलः क्रूरो लोलिहानो विसर्पति ॥ २३॥

वैशम्पायनः—

एवमुक्तो भ्रातृभिस्तु जरितारिर्विभावसुम् ।
तुष्टाव प्राञ्जलिर्भूत्वा यथा तच्छृणु पार्थिव ॥ २४॥

जरितारिः—

आत्माऽसि वायोर्ज्वलन शरीरमसि वीरुधाम् ।
योनिरापश्च ते शुक्र योनिस्त्वमसि चाम्भसः ॥ २५॥

ऊर्ध्वं चाधश्च गच्छन्ति विसर्पन्ति च शाश्वताः ।
अर्चिषस्ते महावीर्य रश्मयस्सवितुर्यथा ॥ २६॥

शारिसृक्कः—

माता प्रपन्ना पितरं [1]न विद्मः
पक्षा जाता नैव नो धूमकेतो ।

1. क-ग-ङ—विपक्षा वयं कृशा भगवन् नः प्रसीद ।

न नस्त्राता विद्यते वै त्वदन्यस्
तस्मादस्मान् परिपाह्येकवीर ॥ २७॥

यदग्ने ते शिवं रूपं ये च ते सप्त हेतयः ।
तेन नः परिरक्षेथाः पीडितान् छरणैषिणः ॥ २८॥

त्वमेवैकस्तपसे जातवेदो
नान्यस्तप्ता विद्यते गोपु देव ।
ऋषीनस्मान् बालकान पालयस्व
परेणास्मान् प्रेहि वै हव्यवाह ॥ २९॥

रुरुरुवाच—
सर्वमग्ने त्वमेवैकस् त्वयि सर्वमिदं जगत् ।
त्वं धारयसि भूतानि भुवनं त्वं बिभर्षि च ॥ ३०॥

द्रोणः—
त्वमग्निर्हव्यवाहस्त्वं त्वमेव परमा गतिः ।
मनीषिणस्त्वां यजन्ते बहुधा चैकधाऽपि च ॥ ३१॥

सृष्ट्वा लोकांस्त्रीनिमान् हव्यवाह
काले प्राप्ते पचसि पुनस्समिद्धः ।
त्वं सर्वस्य भुवनस्य प्रसूतिस्
त्वमेवाग्ने भवसि पुनः प्रतिष्ठा ॥ ३२॥

त्वमन्नं प्राणिनां भुङ्क्षे अन्तर्भूतो जगत्पते ।
नित्यप्रवृद्धः पचसि त्वयि सर्वं प्रतिष्ठितम् ॥ ३३॥

सूर्यो भूत्वा रश्मिभिर्जातवेदो
भूमेरम्भो भूमिजातान् रसांश्च ।
विश्वं चादाय पुनरुत्सृज्य काले
सृष्ट्वा [1]वृष्ट्या भावयसीह शुक्र ॥ ३४॥

त्वत्त एताः पुनश्शुक्र वीरुधो हरितच्छदाः ।
जायन्ते पुष्करिण्यश्च सुभद्रश्च महोदधिः ॥ ३५॥

शोभनं सख्य तिग्मांशो वरुणस्य परायणम् ।
शिवस्त्वाता भवास्माकं माऽस्मानद्य विनाशय ॥ ३६॥

पिङ्गलाक्ष हयग्रीव कृष्णवर्त्मन् हुताशन ।
परेण प्रेहि मुञ्चास्मान् सागरस्य गृहानिव ॥ ३७॥

वैशम्पायनः—

एवमुक्तो जातवेदा द्रोणेनाक्लिष्टकर्मणा ।
द्रोणमाह प्रतीतात्मा मन्दपालप्रतिज्ञया ॥ ३८॥

अग्निः—

ऋषिर्द्रोणस्त्वमसि वै ब्रह्मैतद्व्याहृतं त्वया ।
ईप्सितं ते करिष्यामि न च ते विद्यते भयम् ॥ ३९॥

मन्दपालेन वै यूयं मम पूर्वं निवेदिताः ।
वर्जयेः पुत्रकान् मह्यं दहन् दावमिति स्म ह ॥ ४०॥

1. क-ख-ग-घ—दृष्ट्वा भावयसीव शुक्र ।

यच्च तद्वचनं तस्य त्वया यच्चेह भाषितम् ।
[1]उभयं मे गरीयस्तु ब्रूहि किं करवाणि ते ॥ ४१॥

भृशं प्रीतोऽस्मि भद्रं ते ब्रह्मन् स्तोत्रेण ते विभो ॥ ४२

द्रोणः—

[2]इमे मार्जारकाश्शुक्र नित्यमुद्वेजयन्ति नः ।
एतान् कुरुष्व दंष्ट्रासु हव्यवाट् त्वं सबान्धवान् ॥ ४३

वैशम्पायनः—

तथा तत् कृतवानग्निर् अभ्यनुज्ञाय शार्ङ्गकान् ।
ददाह खाण्डवं [3]सर्वं समिद्धो जनमेजय ॥ ४४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि सप्तदशाधिकद्विशततमोऽध्यायः ॥ २१७ ॥
॥ २० ॥ मयदर्शनपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

[अस्मिन्नध्याये ४४ श्लोकाः]

---

1. क-ग-ङ—उभयस्य गरीयस्त्वात् । ख-घ—उभयं मे गरीयस्त्वात्
2. क-ग-ङ—त्वद्भक्तान् सर्वदेवेश जातवेदो महायशाः ।
[अधिकः पाठः]
3. अ-क-ख-ग—चापि संप्रेक्ष्य

॥ अष्टादशाधिकद्विशततमोऽध्यायः ॥

पुत्रांश्चिन्तयन्तं मन्दपालं प्रति लपितायाः सासूयवचनम् ॥ १ ॥ अग्निशान्त्यनन्तरं आत्मदिदृक्षयाऽऽगतं मन्दपालं प्रति भार्यया पुत्रैश्च उपालम्भः ॥ २ ॥ मन्दपालस्य पुत्राश्वासनपूर्वकं सर्वैस्सहान्यत्र गमनम् ॥ ३ ॥ देवगणैस्सहागतस्येन्द्रस्य कृष्णार्जुनवरदानपूर्वकं स्वलोकगमनम् ॥ ४ ॥ अग्नेः स्वस्थानगमनानन्तरं कृष्णार्जुनमयानां नदीकूल उपवेशनम् ॥

वैशम्पायनः—

मन्दपालोऽपि कौरव्य चिन्तयानस्सुतान् सदा ।
उक्तवानप्यशीतांशुं स नैव स्म न तप्यते ॥ १

स तप्यमानः पुत्रार्थे लपितामिदमब्रवीत् ॥ १॥

मन्दपालः—

कथं नु शक्ताः पतने लपिते मम पुत्रकाः ।
वर्धमाने हुतवहे वाते शीघ्रं प्रवायति ॥ २॥

असमर्था विमोक्षाय भविष्यन्ति ममात्मजाः ॥ ३

कथं नु शक्ता त्राणाय माता तेषां तपस्विनी ।
भविष्यत्यसुखाविष्टा पुत्रत्राणमपश्यती ॥ ४

कथं सञ्चरणेऽशक्तान् पतने च ममात्मजान् ।
सन्तप्यमाना भीता वा गमनायाभिधावती ॥ ५

जरितारिः कथं पुत्रश् शारिसृक्कः कथं च मे ।

स्तम्बमित्रः कथं द्रोणः कथं सा च तपस्विनी ॥ ६

वैशम्पायनः—

लालप्यमानं तमृषिं मन्दपालं तथा वने ।
लपिता प्रत्युवाचेदं सासूयमिव भारत ॥ ७

लपिता—

न ते पुत्रेष्ववेक्षाऽस्ति यानृषीनुक्तवानसि ।
तेजस्विनो वीर्यवन्तो न तेषां ज्वलनाद्भयम् ॥ ८

दावाग्नेः परिदत्ताश्च त्वया हि मम सन्निधौ ।
प्रतिश्रुतं तथा तेन ज्वलनेन महात्मना ॥ ९

लोकपालोऽनृतां वाचं न च वक्ता कथञ्चन ।
[1]समर्थस्त्वं च वक्ता वै न हि ते स्वस्ति मानसम् ॥ १०

तामेव तु ममामित्रां चिन्तयन् परितप्यसे ।
ध्रुवं मयि न ते स्नेहो यथा तस्यां पुराऽभवत् ॥ ११

न हि पक्षवता भाव्यं निस्स्नेहेन सुहृज्जने ।
[2]पीड्यमान उपस्प्रष्टुं शक्यो नात्मा कथञ्चन ॥ १२

गच्छ त्वं जरितामेव यस्यार्थे परितप्यसे ।
चरिष्याम्यद्य चैवैका यथा कापुरुषे रता ॥ १३

---

1. अ-ख—न समर्थस्त्वया वक्ता न हि
2. ख—वध्यमान । ग—पीड्यमान उपस्प्रष्टं ।
घ—पीड्यमान उपस्पृष्टुमशक्तानां

मन्दपालः—

नाहमेवं चरे लोके यथा त्वमभिमन्यसे ।
अपत्यहेतोर्विचरे तच्च कृच्छ्रतरं मम ॥ १४

भूतं हित्वा भविष्यं वै यो रमेत स मन्दधीः ।
अवमत्य तथा लोकान् यथेच्छसि तथा कुरु ॥ १५

एष हि ज्वलमानोऽग्निर् लेलिहानो महीरुहान् ।
द्वेष्यं हि हृदि सन्तापं जनयत्यशिवं मम ॥ १६

वैशम्पायनः—

तस्मादेशादतिक्रान्ते ज्वलने जरिता ततः ।
जगाम पुत्रकानेव जरिता पुत्रगृद्धिनी ॥ १७

सुतान् कुशलिनस्सर्वान् विमुक्ताञ्जातवेदसः ।
रोरूयमाणान् कृपणान् सुतान् दृष्ट्वती वने ॥ १८

न श्रद्धेयं ततस्तेषां दर्शनं सा पुनः पुनः ।
एकैकशश्च पुत्रांस्तान् क्रोशमानाऽन्वपद्यत ॥ १९
जरिता तु परिष्वज्य पुत्रस्नेहाच्चुचुम्ब ह ॥ १९॥

ततोऽभ्यगच्छत् सहसा मन्दपालोऽपि भारत ।
अथ ते सर्व एवैनं नाभ्यनन्दन्त वै सुताः ॥ २०॥

गुरुत्वान्मन्दपालस्य तपसश्च विशेषतः ।
अभिवादयामहे सर्वे जातपक्षाः प्रसादतः ॥ २१॥

एवमुक्तवतां तेषां प्रतिनन्द्य महातपाः ।
परिष्वज्य च तान् सर्वान् मूर्ध्युपाघ्राय बालकान् ॥ २२॥

पुत्रस्पर्शात्तु या प्रीतिस् तामवाप स गौतमः ॥ २३

लालप्यमानमेकैकं जरितां च पुनः पुनः ।
उच्यते वचनं किञ्चिन्न स्म तैस्साध्वसाधु वा ॥ २४

मन्दपालः—

ज्येष्ठस्सुतस्ते कतमस् तदनुज्येष्ठ एव च ।
मध्यमः कतमः पुत्रः कनीयान् कतमश्च ते ॥ २५

एवं ब्रुवन्तं दुःखार्तं किं मां न प्रतिभाषसे ।
कृतवानस्मि हव्याशे नैव शान्तिमितो लभे । २६

वैशम्पायनः—

[1]एवं जरां तु तां पत्नीं मन्दपालस्तदाऽस्पृशत् ॥ २६॥

जरिता—

किं ते ज्येष्ठसुते कार्यं किमनन्तरजेन वा ।
किं च ते मध्यमे कार्यं किं कनिष्ठे तपस्विनि ॥ २७॥

यत्र मां सर्वतो हीनाम् उत्सृज्यासि गतः पुरा ।
तामेव लपितां गच्छ तरुणीं चारुहासिनीम् ॥ २८॥

---

1. क-ग—इवमुक्त्वा।
घ—भत्रैवमुक्ता सा पत्नी मन्दपालं तदाऽब्रवीत्।

मन्दपालः—

न स्त्रीणां विद्यते किञ्चिद् अन्यत्र पुरुषान्तरात् ।
सापत्नकमृते लोके भवितव्यं हि तत्तथा ॥ २९॥

सुव्रता चापि कल्याणी सर्वलोकपरिश्रुता ।
अरुन्धती पर्यशङ्कद् वसिष्ठमृषिसत्तमम् ॥ ३०॥

विशुद्धभावमत्यन्तं सदा प्रियहिते रतम् ।
सप्तर्षिमध्यगं विप्रम् अवमेने च तं मुनिम् ॥ ३१॥

अपध्याता च सा तेन [1]ततो धूम्रारुणाकृतिः ।
[2]लक्ष्यालक्ष्या नाभिरूपा निमित्तमिव लक्ष्यते ॥ ३२॥

अपत्यहेतोस्सम्प्राप्तं तथा त्वमपि मामिह ।
इष्टमेवं [3]गतं हित्वा सा तथैव च वर्तसे ॥ ३३॥

न वै भार्येति विश्वासः कार्यः पुंसा कथञ्चन ।
न हि कार्यमनुध्याति भार्या पुत्रवती सती ॥ ३४॥

वैशम्पायनः—

ततस्ते सर्व एवैनं पुत्रास्सम्यगुपासते ।
स च तानात्मजान् राजन्नाश्वासयितुमारभत्* ॥ ३५॥

---

1. क-ग-घ-ङ—धूम्रारुणसमप्रभा
2. क-ग-ङ—लक्ष्यालक्ष्या नाति ।
घ—लक्ष्यालक्ष्याधिरूढा च तदाप्रभृति लक्ष्यते
3. क-ग-घ-ङ—गते हित्वा सा तथा त्वं च वर्तसे ।
* अ-क-ख-ग-ङ—कोशेष्वत्रैवाध्यायसमाप्तिर्दृश्यते ।

मन्दपालः—

युष्माकं परिरक्षार्थं विज्ञप्तो ज्वलनो मया ।
अग्निना च तथेत्येवं पूर्वमेव प्रतिश्रुतम् ॥ ३६॥

अग्नेर्वचनमादाय मातुर्धर्मज्ञतां च वः ।
युष्माकं च परं वीर्यं पूर्वं नाहमिहागतः ॥ ३७॥

न सन्तापो हि वः कार्यः पुत्रका मरणं प्रति ।
ऋषीन् वेद हुताशोऽपि ब्रह्मैतद्विदितं च वः ॥ ३८॥

वैशम्पायनः—

एवमाश्वास्य पुत्रांश्च भार्यामादाय भारत ।
मन्दपालस्ततो देशाद् अन्यं देशं जगाम ह ॥ ३९॥

भगवानपि तिग्मांशुस् समिद्धः खाण्डवं वनम् ।
ददाह परमप्रीतः कृष्णाभ्यां परिरक्षितः ॥ ४०॥

वसामेदोवहाः कुल्यास् तत्र पीत्वा च पावकः ।
अगच्छत् परमां तृप्तिं दर्शयामास चार्जुनम् ॥ ४१॥

ततोऽन्तरिक्षाद्भगवान् अवतीर्य शतक्रतुः ।
मरुत्परिवृतः पार्थं माधवं चाब्रवीदिदम् ॥ ४२॥

इन्द्रः—

कृतं युवाभ्यां कर्मेदम् अमरैरपि दुष्करम् ।
वरान् वृणीतं तुष्टोऽस्मि दुर्लभानप्यमानुषान् ॥ ४३॥

वैशम्पायनः—

पार्थस्तु वरयामास शक्रादस्त्राणि सर्वशः ।
गृहीतुं तच्च शक्रस्तु ददौ कालं च कर्म च ॥ ४४॥

इन्द्रः—

यदा प्रसन्नो भगवान् महादेवो भविष्यति ।
तदा तुभ्यं प्रदास्यामि पाण्डवास्त्राणि सर्वशः ॥ ४५॥

अहमेव च तं कालं वेत्स्यामि कुरुनन्दन ।
तपसा महता चापि तव दास्यामि तानहम् ॥ ४६॥

आग्नेयानि च सर्वाणि वायव्यानि धनञ्जय ।
मदीयानि च सर्वाणि ग्रहीष्यसि धनञ्जय ॥ ४७॥

वैशम्पायनः—

वासुदेवोऽपि पार्थेन प्रीतिं वव्रे च शाश्वतीम् ।
[1]ददौ च तस्मै देवेन्द्रस् तं वरं प्रीतिमांस्तदा ॥ ४८॥

पावकश्चापि तं दावं दग्ध्वा समृगपक्षिणम् ।
अहोभिरेकविंशद्भिर् विरराम सुतर्पितः ॥ ४९॥

जग्ध्वा मांसानि पीत्वा च मेदांसि रुधिराणि च ।
युक्तः परमया प्रीत्या तावुवाच विशाम्पते ॥ ५०॥

अग्निः—

युवाभ्यां पुरुषाग्र्याभ्यां तर्पितोऽस्मि यथासुखम् ।

---

1. क-ग-घ—दत्त्वा ताभ्यां वरं प्रीतस् सह देवैर्मरुत्पतिः ।
हुताशनमनुज्ञाप्य जगाम त्रिदिवं पुनः ॥ [अधिकः पाठः]

अनुजानामि वां वीरौ भविता यत्र वाञ्छितम् ॥ ५१॥

एवं तौ समनुज्ञातौ पावकेन महात्मना ।
अर्जुनो वासुदेवश्च दानवश्च मयस्तथा ॥ ५२॥

परिक्रम्य ततस्सर्वे त्रयोऽपि भरतर्षभ ।
रमणीये नदीकूले सहितास्समुपाविशन् ॥ ५३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आदिपर्वणि अष्टादशाधिकद्विशततमोऽध्यायः ॥ २१८ ॥

॥ २० ॥ मयदर्शनपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

[अस्मिन्नध्याये ५३॥ श्लोकाः]

॥ समाप्तं मयदर्शनपर्व ॥

आदिपर्वणि ९९८४॥ श्लोकाः—२३३ वाक्यानि ॥

॥ आदिपर्व च समाप्तम् ॥

इतः परं सभापर्व भविष्यति तस्यायमाद्यः श्लोकः ।

जनमेजयः—

अर्जुनो जयतां श्रेष्ठो मोक्षयित्वा मयं तदा ।
किं चकार महातेजास् तन्मे ब्रूहि द्विजोत्तम ॥

॥ शुभमस्तु ॥

॥ श्रीरस्तु ॥

महाभारतस्य आदिपर्वद्वितीयसम्पुटस्थानां विषयाणाम्

अक्षरमातृकाक्रमेण सूचनम्

	अध्यायः-पुटम्
अग्निना वरुणध्यानेन वरुणेनाहृतानां रथादीनामर्जुनाय दानम्	२१४-१४२१
अग्निना श्रीकृष्णाय सुदर्शनकौमोदक्योश्च दानम्	२१४-१४२२
अग्निना खाण्डवदाहे उपक्रान्ते जरितायाः स्वपुत्रैस्सह संवादः	२१६-१४४६
अग्नेः ब्राह्मणरूपस्य श्रीकृष्णार्जुनसमीपं प्रत्यागमनम्	२१४-१४१०
अग्नेः किमर्थं खाण्डवदिधक्षेति जनमेजयस्य प्रश्नः	२१४-१४१२
अग्नेः खाण्डवदाहारम्भः	२१४-१४२६
अङ्गारवर्णप्रार्थनया आग्नेयास्त्रपरिवर्तनेन तस्मादग्नेयास्त्रयार्जुनेन ग्रहणानुमोदनम्	१६७-१०७६
अङ्गारवर्णनाम्ना गन्धर्वेण पाण्डवानां पुरोहितसम्पादनोपदेशः	१६८-१०७९
अभिमन्यूत्पत्तिः	२१२-१४०१
अभिमन्युप्रभृतीनां अर्जुनात् शस्त्राभ्यासः	२१२-१४०४
अर्जुनमिन्द्रप्रस्थं प्राप्तं ज्ञात्वा यादवैस्सह श्रीकृष्णस्य इन्द्रप्रस्थं प्रत्यागमनम्	२११-१३९४
अर्जुनं प्रत्यानेतुं यादवानां गमनम्	२१०-१३८७
अर्जुनं विपृथुवाक्यादूरगतं ज्ञात्वा यादवानां प्रतिनिवर्तनम्	२१०-१३८७
अर्जुनस्य धनुःपूरणेऽपेक्षा	१८२-११५५
अर्जुनस्य चोरितानां गवां प्रत्याजिहीर्षया धनुर्ग्रहणार्थं द्रौपदीयुधिष्ठिराधिष्ठिते आयुधागारे प्रवेशः	२०१-१३२०
अर्जुनस्य ब्राह्मणैस्सह तीर्थाटनकाले गङ्गायामवतरणम्	२०२-१३२५
अर्जुनस्य गङ्गायामुलूप्या नागकन्यया ग्रहणेन नागलोकगमनम्	२०२-१३२७

	अध्यायः-पुटम्
अर्जुनस्य मणलूरुपुरगमनम्	२०३-१३३२
अर्जुनस्य सौभद्रतीर्थे स्नानकाले ग्राहेण ग्रहणम्	२०४-१३३४
अर्जुनस्य पुनर्मणलूरुपुरगमनम्	२०४-१३४०
अर्जुनस्य प्रभासतीर्थगमनम्	२०५-१३४२
अर्जुनस्य स्मृतिपथागतसुभद्रारूपलावण्यादिचिन्तनात् परिव्राजकवेषस्वीकरेण तस्या हरणे निश्चयः	२०५-१३४३
अर्जुनस्य चिन्तितज्ञानेन हसता श्रीकृष्णेन सहशायिन्या सत्यभामया हासकारणे पृष्टे तां प्रति अर्जुन-वृत्तान्तकथनम्	२०५-१३४३
अर्जुनस्य सुभद्रादर्शनेन तस्यां सञ्जातहृद्गतस्य यतिरूपेण सुभद्राहरणे कृष्णानुज्ञालाभः	२०६-१३५०
अर्जुनस्य यतिरूपस्य द्वारकोपवने वासः	२०७-१३५२
अर्जुनस्य सुभद्रया सह कृष्णरथमास्थाय खाण्डवप्रस्थं गन्तुं यत्नः	२०८-१३७२
अर्जुनस्य द्वारकाया बहिर्निर्गमनकाले विपृथुसेनया सह युद्धम्	२०९-१३७६
अर्जुनस्य सुभद्रया सह इन्द्रप्रस्थं प्रति गमनारम्भः	२०९-१३८०
अर्जुनस्य इन्द्रप्रस्थं प्रति गमनम्	२१०-१३८८
अर्जुनस्य श्रीकृष्णेन सह जलक्रीडार्थं यमुनां प्रति गमनम्	२१३-१४०७
अर्जुनेनानुरूपपुरोहितसम्पादनं पृष्टेन गन्धर्वेण धौम्यवरणाभ्यनुज्ञा	१८०-११३७
अर्जुनेन धनुरारोपणपूर्वकं लक्ष्यवेधः	१८३-११५८
अर्जुनेन स्वयंवरे कर्णपराजयः	१८४-११६६
अर्जुनेन कर्णजयद्रथपुत्रयोर्वधः	१९४-१२४२
अर्जुनेन कर्णदुर्योधनादीनां पराजयः	१९४-१२४४
अर्जुनेन चोरेभ्यः प्रत्याहृता गा ब्राह्मणाय दत्त्वा यथा-समयं तीर्थयात्रागमनम्	२०१-१३२२
अर्जुनेन संवादपूर्वकमुलूप्याः परिग्रहः	२०२-१३२८
अर्जुनेन पुत्रिकापुत्रकधर्मेण चित्राङ्गदापरिग्रहः	२०३-१३३३

अध्यायः-पुटम्

अर्जुनेन वन्दया कथितवृत्तान्तश्रवणेन ग्राहरूपाणामन्या-
सामप्सरसां तीर्थेभ्य उद्धरणेन तासां स्वस्वरूपप्राप्तिः २०४-१३४०
अर्जुनेन बभ्रुवाहनं श्वशुराय चित्रवाहनाय ससपर्ध
गोकर्णक्षेत्रगमनम् २०४-१३४१
अर्जुनेन सम्भाष्य कृष्णस्य द्वारकां प्रति पुनरागमनम् २०५-१३४६
अर्जुनेन तत्त्वे कथिते मोहितायां सुभद्रायां देवक्या आश्वासनम् २०७-१३६०
अर्जुनेन सह युद्धं कुर्वाणं स्वसैन्यं निवर्त्य विपृथुना
अर्जुनस्य सत्कारः २०९-१३७८
अर्जुने बलरामस्य कोपः २०९-१३८२
अर्जुनेन सुभद्राया गोपीवेषेण द्रौपदीसमीपप्रेषणम् २१०-१३८९
अर्जुनेन स्वपुरप्रवेशानन्तरं भ्रातृभ्यः स्वकृततीर्थ-
यात्रावृत्तान्तकथनम् २१०-१३९१
अर्जुनेनाग्नेयस्यकाशाद्दिव्यानां रथाश्वधनुरादीनां याचनम् २१४-१४२१
अर्जुनेन इन्द्रे देवैस्सह पराजिते आकाशवाणीश्रवणेन
इन्द्रस्य निवृत्तिः २१६-१४३६
आग्नेयास्त्रेण दग्धाद्वथादधःपतितस्याङ्गारवर्णनाम्नो
गन्धर्वस्यार्जुनेन ग्रहणम् १६६-१०७४
इन्द्रस्य सदेवस्य कृष्णाभ्यां सह युद्धम् २१५-१४३३
इन्द्राभिवृष्टस्य जलस्यार्जुनेन निवारणम् २१५-१४२९
इन्द्रेण देवगणैस्सहागत्य कृष्णार्जुनाभ्यां वरं प्रदाय
स्वलोकगमनम् २१८-१४६१
इरावत उत्पत्तिः २०२-१३३०
एकचक्रायां भिक्षामटतः पाण्डवान् दृष्ट्वा पौराणां वितर्कः १५४-१००४
एकचक्रायां गृहस्वामिनो ब्राह्मणस्य सभार्यस्य क्रन्दनम् १५४-१००७
एकस्याः बहुभार्यात्वे शङ्कमानान् द्रुपदादीन् प्रति
व्यासेन स्वस्याभिप्रायकथनानुज्ञा १८८-१२०१
और्वस्य ऊरुं भित्त्वा निर्गतस्य तेजसाऽन्धीभूतानां
क्षत्रियाणां ब्राह्मणीं प्रति शरणगमनम् १७७-११२४

अध्यायः-पुटम्

और्वेण लोकविनाशाय तपसि कृते तस्य तत्पितृकृत-तपोनिवारणम् १७८-११२६
और्वेण स्वपितृवाक्येन क्रोधस्य समुद्रे त्यागः १७८-११२९
और्वोपाख्यानकथनेन वसिष्ठेन पराशरस्य सर्वलोक-विनाशप्रयत्नान्निवारणम् १७८-११३०
कर्णेन विनिन्दवृत्तान्तकथनम् १९६-१२६३
कल्माषपादराज्ञोपाख्यानम् १७४-११०८
कल्माषपादं प्रति वसिष्ठपुत्रेण शक्तिना शापदानम् १७४-११०९
कल्माषपादशरीरे किङ्करनामकराक्षसस्य विश्वामित्राज्ञया प्रवेशः १७४-१११०
कल्माषपादेन ब्राह्मणाय क्षुधिताय निशि नरमांसं वा आनीय दातव्यमिति सूदस्याज्ञा १७४-१११९
कल्माषपादस्य सूददारा नरमांसदानेन क्रुद्धेन ब्राह्मणेन शापदानम् १७४-१११२
कल्माषपादेन रक्षसाऽऽविष्टेन वसिष्ठपुत्रस्य शक्तेर्हननं, भक्षणं च १७४-१११३
कल्माषपादेन अन्येषामपि वसिष्ठपुत्राणां हननम् १७४-१११३
कल्माषपादस्य वसिष्ठादृश्यन्त्योर्भक्षणाय अभिद्रवणम् १७५-१११७
कल्माषपादस्य वसिष्ठेन शापान्मोक्षणम् १७६-१११८
कल्माषपादस्य वसिष्ठादश्मकनामकपुत्रोत्पत्तिः १७६-११२१
कल्माषपादभार्यायां वसिष्ठेन पुत्रोत्पादनकारणं पृष्टवन्त-मर्जुनं प्रति पुनर्गन्धर्वेण कल्माषपादकथाकथनम् १७९-११३३
कल्माषपादेन शक्तिशापाद्राक्षसाविष्टेन वने मिथुनत्वाय सङ्गतयोः ब्राह्मणयोर्मध्ये पुंसो भक्षणम् १७९-११३४
कल्माषपादस्य ब्राह्मण्या शापः १७९-११३६
कल्माषपादेन ब्राह्मणीप्रसादनेन तव भार्या वसिष्ठेन सङ्गम्य वंशकरं पुत्रं जनयिष्यतीति वरदानम् १७९-११३६
कल्माषपादस्य वसिष्ठेन शापे मोचिते तत्पत्न्या सम्भोगोद्योगे ब्राह्मणीशापस्मारणेन राज्ञा स्वभार्यायां वसिष्ठनियोजनम् १७९-११३६

	अध्यायः-पुटम्
कुन्तीहिडिम्बीसंवादः	१५०—९८०
कुन्त्या रोदनकारणे पृष्टे ब्राह्मणेन बकवृत्तान्तकथनम्	१५७-१०२२
कुन्त्या ब्राह्मणाय बकं प्रति स्वपुत्रप्रेषणकथनम्	१५८-१०२६
कुन्त्या भीमप्रभावकथनेन युधिष्ठिराश्वासनम्	१५९-१०३०
कुन्त्या विदुरोक्तम्लेच्छभाषार्थज्ञानाय प्रश्नः	१४०—९३५
कुन्त्या राक्षो अन्नादिना ब्राह्मणभोजनम्	१४३—९४४
कुन्त्यां पश्चाद्द्रौपदीदर्शनेन चिन्तान्वितायां युधिष्ठिर-अर्जुनयोस्संवादः	१८५-११७६
कुलालशालां प्रति श्रीकृष्णस्यागमनम्	१८५-११७९
कृतवीर्यवंश्यैः क्षत्रियैर्धनार्थं भृगुवंश्यानां ब्राह्मणानां हननम्	१७७-११२३
कृष्णबलरामाभ्यां सुभद्रायै यौतकदानम्	२११-१३९७
कृष्णस्य परं खाण्डवप्रस्थे वासः	२११-१४०१
कृष्णमागतं श्रुत्वा युधिष्ठिरेण प्रतिग्रहाय नकुलसहदेवप्रेषणम्	२११-१३९५
कृष्णादीनामुत्सवार्थं रैवतकपर्वतं प्रति गमनम्	२०६-१३४७
कृष्णानुमत्याऽर्जुनस्सुभद्रां जहारेति पौराणामूहः	२११-१३९३
कृष्णार्जुनाभ्यां दूतप्रेषणेन युधिष्ठिरस्याप्यनुज्ञालाभः	२०६-१३५१
कृष्णार्जुनयोः स्त्रीभिस्सह विहरणम्	२१४-१४०९
कृष्णार्जुनाभ्यामनुज्ञां प्राप्याग्नेर्गमनानन्तरं कृष्णार्जुन-मयानां नदीकूले उपवेशनम्	२१८-१४६२
कृष्णेन सत्यभामां शयने विहाय प्रभासतीर्थं प्रति गमनम्	२०५-१३४५
कृष्णेन रैवतके परिव्राजकरूपार्जुनदर्शनम्	२०६-१३४९
कृष्णेन यतेः कन्यागृहे वासो न युक्त इति कथनम्	२०७-१३५४
कृष्णेन बलरामस्य सान्त्वनम्	२१०-१३८४
कृष्णेन खाण्डववनदर्शनं तन्नाशदर्शनञ्च	२१३-१४०८
खनकेन परिखाख्याजेन सुरङ्गाकरणम्	१४२—९४३
खाण्डववनदाहार्थं कृष्णार्जुनौ प्रत्यग्नेः प्रार्थना	२१४-१४११
खाण्डवदाहार्थमग्नेर्गमने सप्तकृत्वः अग्निप्रशमनम्	२१४-१४१९

अध्यायः-पुटम्

खाण्डवदावदाहार्थं पुनरप्यग्नेर्ब्रह्मसमीपगमने नरनारायणयोः कृष्णार्जुनरूपेणावतीर्णयोस्सन्निधौ याचस्वेति ब्रह्मणा कथनम् २१४–१४२०
खाण्डवदाहं दृष्ट्वा त्रस्तैर्देवैः प्रार्थितेनेन्द्रेण जलवर्षणम् २१५–१४२८
खाण्डवदाहकाले मये निर्गमनाय उद्युक्ते श्रीकृष्णेन तस्य वधोद्योगे च मयस्यार्जुनं प्रति शरणागतिः २१६–१४४०
खाण्डवदाहेऽपि अश्वसेनादीनामदाहस्य वैशम्पायनेन कथनम् २१६–१४४१
गङ्गायां स्त्रीभिस्सह जलक्रीडां कुर्वता अङ्गारवर्णनाम्ना गन्धर्वेण सहार्जुनस्य युद्धम् १६६–१०७२
गन्धर्वपत्न्या प्रार्थितस्य युधिष्ठिरस्याज्ञया गन्धर्वमोचनम् १६६–१०७५
गन्धर्वायार्जुनेनाग्नेयास्त्रदानम् १८०–११२८
गन्धर्वेण अङ्गारवर्णनाम्ना चित्ररथेन अर्जुनाय वसिष्ठमाहात्म्यकथनपूर्वकं पाण्डवानां पुरोहितसङ्ग्रहणोपदेशः १७३–१०९७
गन्धर्वेणार्जुनाय पराशरस्य राक्षसनाशाय यागकरणकथनम् १७८–११३१
घटोत्कचोत्पत्तिः १५३—९९९
घटोत्कचनामप्राप्तिहेतुकथनम् १५३–१०००
घटोत्कचस्य पाण्डवचिन्तनसमकालमागमिष्यामीति प्रतिज्ञायोत्तरदिशागमनम् १५३–१००१
जनमेजयेन कृष्णस्य कार्मुकानारोपणे कारणे पृष्टे पाण्डवार्थमिति वैशम्पायनस्योत्तरम् १८५–११७८
जरितायाः पुत्रैस्सह संवादानन्तरं स्थानान्तरगमनम् २१७–१४४९
जरितार्यादीनां चतुर्णां शार्ङ्गकाणां परस्परं संवादः २१७–१४५१
जरितां पुत्रैस्सह खाण्डवे विसृज्य लपितानाम्न्या अन्यया सङ्गतस्य मन्दपालस्य विप्ररूपाग्निदर्शनम् २१६–१४४४
तपतीं स्वकन्यां स्वभक्ताय संवरणाय दातुं सवितुर्निश्चयः १६९–१०८३
तपतीसंवरणयोस्संवादः १७०–१०८८
तपत्यास्सूर्यकन्यायाः उपाख्यानम् १६९–१०८२
तस्करैः कस्यचिद्ब्राह्मणस्य गोहरणम् २०१–१३१८
तक्षकभार्यायाः पुत्रमश्वसेनं निगीर्य आकाशोत्पतनकाले अर्जुनेन तस्याश्शिरश्छेदः २१५–१४३०

	अध्यायः-पुटम्
तक्षकसुतस्याश्वसेनस्य इन्द्रेण मोचनम्	२१५-१४३०
तिलोत्तमया ब्रह्माज्ञास्वीकारः	२००-१३१०
तिलोत्तमया ब्रह्मादिप्रदक्षिणकाले इन्द्रादिदेवानामवस्थानरीतिः	२००-१३११
तिलोत्तमायास्सुन्दोपसुन्दसमीपागमनम्	२००-१३१२
तिलोत्तमायां सकामयोस्सुन्दोपसुन्दयोः परस्परं गदाप्रहारेण मरणम्	२००-१३१५
तिलोत्तमायै ब्रह्मणा वरदानम्	२००-१३१६
दुर्योधनादीनां पाञ्चालनगरं प्रति युद्धार्थं गमनम्	१९४-१२४०
दुर्योधनेन धृतराष्ट्राय पाण्डवविवासनं प्रति कथनम्	१३८—९१९
दुर्योधनेन अर्थमानादिदानेन प्रकृतीनां स्ववशे स्थापनम्	१३८—९२४
दुर्योधनेन पाण्डवानां तन्मातुश्च दहनाय कर्णादिभिस्समालोचनम्	१३९—९२८
दुर्योधनेन रहसि पुरोचनं प्रति निगूढं जतुगृहनिर्माणं पाण्डवेषु विश्वस्तेषु तद्दाहश्च कुर्विति कथनम्	१३९—९२९
दुर्योधनं प्रति कर्णेनोक्तं श्रुतवतो धृतराष्ट्रस्य भीष्मादिभिस्सह मन्त्रणम्	१९५-१२५८
द्रुपदपुत्रयोस्सुमित्रप्रियदर्शनयोः कर्णजयद्रथाभ्यां हननम्	१९४-१२४२
द्रुपदपुरोहितेन युधिष्ठिरं प्रति जातिकुलादिप्रश्नः	१८७-११९०
द्रुपदादिभिः स्वस्वमते कथिते व्यासेनास्य विवाहस्य धर्म्यत्वकथनम्	१८८-१२०२
द्रुपदप्रश्ने युधिष्ठिरेण स्वेषां पाण्डवत्वकथनम् ...	१८८-११९६
द्रुपदेन धृष्टद्युम्नं प्रति द्रौपदी केन हृतेति प्रश्नः	१८६-११८५
द्रुपदेन तत्त्वविवित्सया पाण्डवान् प्रति पुरोहितप्रेषणम्	१८७-११८९
द्रुपदेन पाण्डवपरीक्षणार्थमनेकविधवस्तुसम्पादनम् ...	१८७-११९३
द्रुपदेन व्यासदत्तदिव्यदृष्ट्या पाण्डवद्रौपदीपूर्वरूपदर्शनम्	१९०-१२२०
द्रुपदेन पाण्डवेभ्यः पारिबर्हदानम्	१९७-१२७६

	अध्यायः-पुटम्
द्रोणेन मदुक्तं न क्रियते चेत् कुरवो विनङ्क्ष्यन्तीत्युक्तिः	१९६-१२६४
द्रौपद्या अर्जुनकण्ठे मालाप्रक्षेपः	१८३-११६०
द्रौपद्या सह भीमार्जुनयोः कुलालगृहप्रवेशः	१८४-११७४
द्रौपद्या सह कुन्त्या अन्तःपुरप्रवेशः	१८७-११९४
द्रौपद्याः पञ्चपत्नीत्वे द्रुपदस्य विवादः	१८८-११९९
द्रौपद्या देवतांशत्वस्य व्यासेन कथनम्	१९१-१२२३
द्रौपद्याः युधिष्ठिरादिभ्यः पञ्चपुत्रोत्पत्तिः	२१२-१४०३
द्रौपदीस्वयंवरं शृण्वतां राज्ञां पाण्डवानाञ्च द्रुपदपुरप्रवेशनम्	१८१-११४०
द्रौपदीं प्रति धृष्टद्युम्नेन स्वयंवरं प्रत्यागतानां राज्ञां नामकथनम्	१८२-११४६
द्रौपदीं प्रति कुन्त्या आशीर्वादः	१९२-१२३१
द्वैपायनवचनस्मरणेन पञ्चानां द्रौपदी भार्येति युधिष्ठिरनिश्चयः	१८५-११७८
धनुरारोपणायोत्थितमर्जुनं प्रति ब्राह्मणानां शुभाशंसनम्	१८३-११५६
धर्मपुत्रेण भीष्माद्यनुज्ञापूर्वकं सहानुजैर्माता च वारणावतगमनम्	१३८—९२६
धृतराष्ट्रसमीपे कर्णदुर्योधनयोर्भाषणम्	१९५-१२५२
धृतराष्ट्रदुर्योधनसंवादः	१९५-१२५३
धृतराष्ट्राज्ञया विदुरस्य द्रुपदनगरगमनम्	१९७-१२६९
धृतराष्ट्रेण दुर्योधनाय पाण्डवविवासनं प्रति अभ्यनुज्ञानम्	१३८—९१९
धृतराष्ट्रेण पाण्डवेभ्यः वारणावतगमनाय प्रोत्साहनेनाभ्यनुज्ञादानम्	१३८—९२५
धृतराष्ट्रेण युधिष्ठिरस्यार्धराज्येऽभिषेकः	१९८-१२७९
धृष्टद्युम्नेन लक्ष्यवेधपणकथनम्	१८१-११४५
धृष्टद्युम्नेन भीमार्जुनाभ्यां द्रौपदी हृतेति कथनम् ...	१८७-११८६
धौम्यस्य उत्कचकतीर्थे पाण्डवैः पौरोहित्याय वरणम्	१८०-११३८
नारदेन सुन्दोपसुन्दवृत्तान्तोपक्षेपः	१९९-१२९९
नालायनी तव दुहिता द्रौपदी ज्ञातेति द्रुपदं प्रति व्यासस्योक्तिः	१८९-१२०८

	अध्यायः-पुटम्
नालायन्या उपाख्यानम्	१८९-१२०४
नालायन्या मौद्गल्यस्य स्थविरस्य पत्युराराधनम्	१८९-१२०५
नालायन्याराधनतुष्टेन मौद्गल्येन आत्मनः पञ्चरूप-स्वीकारेण तस्यां रमणम्	१८९-१२०६
नालायन्या रुद्रात् पञ्चपत्नीत्ववरप्राप्तिः	१८९-१२१०
नितन्तुनामकराजर्षिपुत्राणां पञ्चानां भौमाश्वीनाम्न्या एकया राजपुत्र्या पतित्वेन वरणम्	१९१-१२२१
निषादेन नाविकेन साभिज्ञानं विदुरवाक्येन पाण्डवानां नावा गङ्गातारणम्	१४५—९५९
पञ्चपुत्राया निषाद्या रात्रौ जतुगृहे स्वापः	१४३—९४५
पञ्चेन्द्रोपाख्यानम्	१९०-१२१२
पराजितानां दुर्योधनादीनां हास्तिनपुरगमनम्	१९४-१२४५
पराशरोत्पत्तिः	१७७-११२१
पराशरनामनिर्वचनम्	१७७-११२२
पराशरेण वसिष्ठस्य अदृश्यन्तीसमीपे तातेत्यामन्त्रणेन दुःखितया तया तव पिता रक्षसा भक्षितः पितामहो-ऽयमिति कथनेन पराशरस्य सर्वलोकविनाशप्रयत्नः	१७७-११२२
पराशरेण राक्षससत्त्रग्नेः हिमवत उत्तरस्मिन् पार्श्वे त्यागः	१७८-११३३
पराशरसमीपे पुलस्त्यस्य राक्षससत्त्रसमापनप्रार्थनम्	१७८-११३२
पाञ्चालनगरं गच्छतां पाण्डवानां मार्गे ब्राह्मणसंवादः	१६५-१०६८
पाञ्चालराजेन द्रुपदेन नगरे द्रौपदीस्वयंवरोद्घोषणम्	१६३-१०६२
पाण्डवकृतधृष्टद्युम्नद्रौपदीसम्भवप्रश्नस्य ब्राह्मणेनोत्तरकथनम्	१३२-१०५०
पाण्डवानां द्रुपदनगरप्रस्थानम्	१६४-१०६४
पाण्डवानां विवासनाय दुर्योधनादीनां मन्त्रणम्	१३८—९१९
पाण्डवानां वारणावतगमने उत्साहोत्पत्तिः	१३८—९२५
पाण्डवानां हास्तिनपुराद्वारणावतगमने पौराणामनुगमनम्	१४०—९३१
पाण्डवानां वारणावतगमनम्-तद्दिनकथनञ्च	१४०—९३५
पाण्डवानां वारणावतजनप्रत्युद्गमनम्	१४१—९३६

	अध्यायः-पुटम्
पाण्डवानां जतुगृहप्रवेशः	१४१—९३७
पाण्डवानां दाहं निश्चित्य पौरैः धृतराष्ट्राय दूतमुखेन पाण्डववृत्तान्तनिवेदनम्	१४४—९४७
पाण्डवदाहेन धृतराष्ट्रस्य बहिश्शोकः	१४४—९४९
पाण्डवानामध्वगमनेन पिपासया निद्रया च परिश्रमः	१४६—९६२
पाण्डवान् प्रति प्रेषितया हिडिम्बया विलम्बिते हिडिम्बस्य तत्रागमनम्	१४८—९७२
पाण्डवानां शालिहोत्राश्रमाद्गमनम्	१५३—१००२
पाण्डवानां जतुगृहे पुरोचनद्वारा दुर्योधनेन दाहः कारित इति जनैर्द्रुपदायावेदितमिति ब्राह्मणेन पाण्डवेभ्यः कथनम्	१६३—१०५९
पाण्डवा न विनश्येयुरिति द्रुपदपुरोहितेन द्रुपदाय द्रौपदीस्वयंवरः कार्य इत्यावेदनम्	१६३—१०६२
पाण्डवानामर्धरात्रे गङ्गातीरगमनम्	१६६—१०७१
पाण्डवान् ब्राह्मणमध्यस्थान् विज्ञाय श्रीकृष्णेन बलरामाय कथनम्	१८२—११५१
पाण्डवावासे धृष्टद्युम्नस्य निलीयावस्थानम्	१८६—११८२
पाण्डववृत्तान्तं सर्वं ज्ञात्वा धृष्टद्युम्नस्य प्रतिनिवर्तनम्	१८६—११८४
पाण्डवानां द्रुपदप्रहितदूतोक्त्या कुन्त्या सह द्रुपदगृहगमनम्	१८७—११९२
पाण्डवानां भोजनानन्तरं साङ्ग्रामिकवस्तुपूर्णप्रदेशे प्रवेशः	१८७—११९५
पाण्डवानां द्रौपदीविवाहं चारद्वारा श्रुतवद्भिः अन्यैः राजभिर्भीष्मधृतराष्ट्रादीनां धिक्कारः	१९३—१२३३
पाण्डवान् प्रति धार्तराष्ट्राणाम्मन्त्रालोचनम्	१९३—१२३४
पाण्डवा हन्तव्या इति शकुनेरुक्तिः	१९३—१२३५
पाण्डवानां हन्तुमशक्यत्वात्तैस्सह सन्धिः कर्तव्य इति सौमदत्तेरुक्तिः	१९३—१२३६
पाण्डवा हन्तव्या एवेति कर्णस्योक्तिः	१९४—१२३९
पाण्डवास्संविभज्या इति द्रोणवचनम्	१९६—१२६१

अध्यायः-पुटम्

पाण्डवानां हास्तिनपुरं प्रति गमनाय श्रीकृष्ण-द्रुपदयोरभ्यनुज्ञा १९७-१२७४
पाण्डवानां हास्तिनपुरप्रवेशः १९७-१२७७
पाण्डवानां हास्तिनपुरे भीष्मादिवन्दनपुरस्सरं गृहप्रवेशः १९७-१२७८
पाण्डवानां खाण्डवप्रस्थगमनम् १९८-१२८५
पाण्डवानां समीपे नारदागमनम् १९९-१२९४
पाण्डवेभ्य उदकदानाय धृतराष्ट्रादीनां गङ्गां प्रति गमनमुदकदानञ्च १४४—९५०
पाण्डवेभ्यः मध्येमार्गं व्यासेनागत्य द्रौपदीपूर्ववृत्तान्त-कथनपूर्वकं द्रौपदी भवतां पत्नी भविष्यतीति कथनम् १६४-१०६६
पाण्डवैरन्येषाञ्च राज्ञां पराजयः १८४-११७२
पाण्डवैः नारदोक्तां सुन्दोपसुन्दकथां श्रुतवद्भिः तत्समक्षं द्रौपदीविषये समयकरणम् २००-१३१७
पावकान्मुमुक्षूणां नागादीनां कृष्णार्जुनाभ्यां मारणम् २१५-१४३१
पुलशोकेन वसिष्ठस्य प्राणत्यागार्थमनेकधा प्रयतनम् १७४-१११३
पुरोचनेन तथैवेति जतुगृहनिर्माणम् १३९—९३०
पृथाविदुरसंवादः १९७-१२७५
पौरब्राह्मणैर्धृतराष्ट्रादिनिन्दनम् १४०—९३२
पौराणामागमनं, तैः धृतराष्ट्रपुरोचननिन्दा १४३—९४६
पौरैः पाण्डवानां स्वस्वगृहेषु सत्कारः १४१—९३६
प्रकृतिभिः वारणावतनगरं रमणीयं पशुपतेरुत्सवश्च उपस्थित इति पाण्डवानां प्रलोभनम् १३८—९२४
बकभीमयोर्युद्धम् १६०-१०३८
बकस्य भीमेन वधः १६०-१०४३
बकवधानन्तरं समागतानां तत्परिवाराणां भीमेन समयकरणम् १६१-१०४४
बकशरीरं नगरद्वारदेशे निधाय ब्राह्मणगृहमागत्य भीमेन कुन्त्यादीन् प्रति बकवृत्तान्तकथनम् १६१-१०४५
बकवधे भीमवचनम् १५९-१०३७

	अध्यायः-पुटम्
बकवधेन पौराणां भीमसेवनम्	१६१-१०४७
बभ्रुवाहनस्य चित्राङ्गदायामर्जुनाज्जननम्	२०४-१३४०
बलरामकेशवद्रौपदीनामुत्पत्तिकथा	१९०-१२१८
बलरामेण पुनः कन्यागृहे स्थापयेति चोदितेन कृष्णेन अर्जुनस्य यतेः सुभद्रागृहे स्थापनम्	२०७-१३५६
ब्रह्मणाऽग्नेः खाण्डवदाहानुज्ञा	२१४-१४१८
ब्राह्मणपरिदेवनम्	१५४-१०१८
ब्राह्मणप्रार्थनया कुन्त्युक्त्या च भीमेन बकमुद्दिश्य गमनाङ्गीकारः	१५८-१०२८
ब्राह्मणगृहे प्रतिश्रयार्थमागतस्य कस्यचिद्ब्राह्मणस्य मुखात् पाण्डवानां द्रौपदीस्वयंवरश्रवणम्	१६२-१०४९
ब्राह्मणीवाक्येन आर्यं प्रति शरणागतानां चक्षुःप्राप्तिः	१७८-११२५
ब्राह्मणेन कुन्त्यै भगवदिच्छया कदाचित् तव पुत्रा अपि द्रौपद्या वृता भवेयुरिति कथनम्	१६३-१०६३
ब्राह्मणाक्रन्दनश्रवणेन कुन्त्याः भीमानुमत्या ब्राह्मणान्त-गृहप्रवेशः	१५४-१००८
ब्राह्मणं प्रति तत्पत्नीवाक्यम्	१५५-१०१३
ब्राह्मणं प्रति तत्कन्यावाक्यम्	१५६-१०१९
ब्राह्मणं प्रति बालस्य वचनम्	१५६-१०२१
भीमस्य सुप्तान् भ्रातॄन् मातरञ्च विलोक्य प्रलापः, जागरणञ्च	१४६—९६४
भीमस्य कुम्भकारान्महत्तरपात्रलाभः	१५४-१००६
भीमस्य बकवनगमनम्	१५९-१०३४
भीमहिडिम्बीसंवादः	१४७—९७१
भीमहिडिम्बयोर्युद्धम्-पाण्डवप्रबोधश्च	१४९—९७५
भीमार्जुनाभ्यां कुन्त्यै द्रौपद्याः भिक्षेत्यावेदने कुन्त्या पञ्चानां सहभोजनानुज्ञा	१८५-११७५
भीमाद्यानीतस्य भैक्षस्य कुन्त्याज्ञया द्रौपद्या परिवेषणम्	१८६-११८२
भीमेन छद्मगमनाय सुरङ्गाकरणोपदेशः	१४१—९३८
भीमेन पूर्णं सुरङ्गाशोधनेन कुन्तीयुधिष्ठिरादीनां तत्र प्रवेशनम्	१४३—९४५

अध्यायः-पुटम्

भीमेन पुरोचनसमीपे जातुषागारादीपनं-तस्य ततो निर्गमनञ्च १४३ —१४५
भीमेन कुन्त्यादीनादाय अविदितं वनगमनम् १४३—९४६
भीमेन युधिष्ठिरादीनां वहनेन दक्षिणदिग्गमनम् १४५—९६०
भीमेन मातृभ्रातृणां वहनेन रात्र्यामेव चतुर्विंशति-
योजनपर्यन्तदूरगमनम् १४६—९६१
भीमेन सरोवरे जलं निपीय स्नात्वा च पद्मपत्रैरुत्तरीयेण च
बद्ध्वा पानीयमानीय भ्रातृभ्यो मात्रे च दानाय यतनम् १४६—९६२
भीमेन शकटस्थान्नभोजनम् १५९—१०३४
भीमेन शल्यपराजयः १८४—११७०
भीमं प्रति युधिष्ठिरेण वेश्मनस्तस्यागनेयत्वप्रतिपादनम् १४१—९३७
भीमं हृष्टं ज्ञात्वा युधिष्ठिरेण मातरं प्रति भीमस्य हर्ष-
कारणप्रश्नः १५९—१०२९
भीष्मेण दुर्योदनादिसमीपे पाण्डवेभ्योऽर्धराज्यं
दातव्यमिति स्वाभिप्रायकथनम् १९५—१२५९
भेरीताडनेन वृष्ण्यन्धकानां सन्नाहः २०९—१३८०
मन्दपालस्य तपसा पितृलोकगमनेऽपि देवाज्ञया
प्रजोत्पादनार्थं पुनर्भूमावागमनम् २१६—१४४२
मन्दपालेन शार्ङ्गयां जरितायां पुत्रचतुष्टयोत्पादनम् २१६—१४४३
मन्दपालेन खाण्डवदिधक्षुमग्निं प्रति पुत्ररक्षणार्थं स्तोत्रेण
तस्या द्वरलाभः २१६—१४४४
मन्दपाले पुत्रांश्चिन्तयति लपितायास्सासूयवचनम् २१८—१४५६
मन्दपाले खाण्डवाग्निशमनानन्तरं पुत्रादिदिदृक्षया
आगच्छति तस्य भार्यया पुत्रैश्च उपालम्भः २१८—१४५८
मन्दपालस्य पुत्राश्वासनपूर्वकं सर्वैस्सहान्यत्र गमनम् २१८—१४६०
मयस्य शरणागत्या अर्जुनेन मोचनम् २१६—१४४१
मृतबकदर्शनार्थं पौराणां गमनम् १६१—१०४६
यादवैर्यतिरूपस्यार्जुनस्य द्वारकोपवने दर्शनम् २०७—१३५२
यादवैर्यतेरस्य क्व वा निवासो युक्तस्स्यादिति पृष्टे
सुभद्रागृहे वसत्विति रामोक्तिः २०७—१३५३

१२७—१२७२

	अध्याय-पुटम्
युधिष्ठिरस्य इन्द्रप्रस्थपुरप्रवेशः	१९८–१२९०
युधिष्ठिरस्य राज्यपरिपालनप्रकारवर्णनम्	२१३–१४०५
युधिष्ठिरादिभिः क्रमेण द्रौपद्याः पाणिग्रहणम्	१९१–१२२६
युधिष्ठिरेण सान्त्वनेन पौराणां निवर्तनम्	१४०—९३३
युधिष्ठिरेण कुन्त्यै म्लेच्छभाषार्थस्य सूक्ष्मतया कथनम्	१४०—९३५
युधिष्ठिरेण आग्नेयादस्माद्वेश्मनः निर्गमनोपायकरणचोदनम्	१४२—९४२
युधिष्ठिरेण पुरोचनहर्षं ज्ञात्वा जतुगृहमादीप्य पुरोचनमपि विनाश्य अविदितपलायनमेव कार्यमिति भ्रातृभ्यः कथनम्	१४३—९४४
युधिष्ठिरेण भीमं प्रति हिडिम्बीविषये स्त्रीवधो न कार्य इति कथनम्	१५१—९८७
युधिष्ठिरेण दुर्योधनपराजयः	१८४–११७१
युधिष्ठिरेण द्रुपदपुरोहितं प्रति जातिकुलादिप्रश्नो न कर्तुं युक्त इति कथनम्	१८७–११९१
युधिष्ठिरेण विश्वकर्मद्वैपायनश्रीकृष्णबलरामादीनां विशेषतस्सम्माननेन प्रस्थापनम्	१९८–१२९२
युधिष्ठिरेण कृष्णबलरामसत्कारः	२११–१३९६
युधिष्ठिरेण पूजितानां बलरामादीनां द्वारकां प्रति गमनम्	२११–१४००
युद्धोद्युक्तानां यादवानां बलरामवाक्यान्निवृत्तिः	२०९–१३८२
राजभिः पुनर्युद्धाय निश्चये कृते श्रीकृष्णेन युद्धनिवारणेन राज्ञां स्वस्वालयगमनम्	१८४–११७३
राजसु क्रोधाद् द्रुपदहननार्थमागतेषु राज्ञां सम्मुखे भीमार्जनयोस्सज्जीभूय स्थितयोस्सतोः कृष्णबलरामयोस्संवादः	१८३–११६१
राज्ञां केषाञ्चिद्धनुर्दर्शनेन धनुःपूरणे नैराश्यम्	१८२–११५२
वन्दानाम्न्या ग्राहरूपं परित्यज्य स्वीरूपं प्राप्तया अर्जुनाय स्वेषां ब्राह्मणेन शापदानकथनम्	२०४–१३३६
वन्दया ब्राह्मणप्रसादनेन स्वेषां शापमोचनप्रकारस्य नारदनिदेशेन सौभद्रतीर्थागमनस्य च अर्जुनं प्रति कथनम्	२०४–१३३७

	अध्यायः-पुटम्
वसिष्ठविश्वामित्रयोर्धेनुनिमित्तं विवादः	१७३-११०२
वसिष्ठस्य पुनर्गङ्गापतनादिना प्राणत्यागासम्भवेन आश्रमं प्रत्यागमनम्	१७५-१११४
वसिष्ठात् कल्माषपादपत्न्यां गर्भसम्भवः	१७६-११२०
वसिष्ठाभ्यनुज्ञया तपत्या सह संवरणस्य द्वादशवत्सरपर्यन्तं गिरौ विहारः	१७२-१०९५
वसिष्ठेन सूर्यस्तुतिकरणम्	१७२-१०९३
वसिष्ठेन संवरणार्थे सूर्यं प्रति तपतीवरणम्	१७२-१०९४
वसिष्ठेन संवरणार्थं सूर्येण दत्तया तपत्या सह संवरणसमीपं प्रत्यागमनम्	१७२-१०९४
वसिष्ठेन संवरणस्य स्वराष्ट्रप्रापणम्	१७२-१०९६
वसिष्ठेन पराशरस्य सर्वलोकविनाशप्रयत्नं वारयता और्वोपाख्यानकथनम्	१७७-११२२
विदुरेण म्लेच्छभाषया युधिष्ठिराय जतुगृहान्मोचनोपायकथनम्	१४०—९३४
विदुरप्रहितस्य खनकस्य पाण्डवसमीपे म्लेच्छभाषास्मारणेन किं हितं कार्यमिति प्रश्नः	१४२—९४१
विदुरेण सह भीष्मप्रलापः	१४४—९५०
विदुरेण रहसि भीष्माय पाण्डवा जतुगृहादलक्षिता बिलाद्बहिर्निर्गता इति कथनम्	१४४—९५४
विदुरप्रेषितेन पुरुषेण पाण्डवेभ्यः नौकाप्रदर्शनम्	१४५—९५७
विदुरात् ज्ञातपाण्डववृत्तान्तेन धृतराष्ट्रेण द्रौपद्यानयनार्थमाज्ञापनम्	१९५-१२४८
विदुरेण भीष्मद्रोणोक्तमेवावश्यं करणीयमिति धृतराष्ट्रं प्रत्युक्तिः	१९६-१२६५
विदुरेण पाञ्चालनगरे श्रीकृष्णादीनां समीपे धृतराष्ट्रसन्देशकथनम्	१९७-१२७२
विश्वामित्रस्य मृगयाप्रसङ्गेन वसिष्ठाश्रमगमनम्	१७३-१०९९

	अध्यायः-पृष्ठम्
विश्वामित्रस्य सपरिवारस्य वसिष्ठेनातिथिसत्कारः	१७३-११००
विश्वामित्रेण वसिष्ठधेनुयाचनम्	१७३-११०१
विश्वामित्रस्य पराजयः	१७३-११०६
विश्वामित्रस्य तपसा ब्राह्मणत्वप्राप्तिः	१७३-११०७
विश्वकर्मणः कृष्णचिन्तनेन इन्द्राज्ञया खाण्डवप्रस्थागमनम्	१९८-१२८६
विश्वकर्मणा इन्द्रप्रस्थपुरनिर्माणम्	१९८-१२८७
व्यासागमनम्	१८८-१२०२
व्यासस्य शालिहोत्रसरसि पाण्डवानुद्दिश्यागमनम्	१५३—९९६
व्यासेन कुन्त्या आश्वासनम्	१५३—९९७
व्यासस्य प्रतिनिवर्तनञ्च	१५३—९९८
व्यासेन पाण्डवानामाश्वासनम्	१५३—९९६
ासस्य पुनरपि पाण्डवसमीपागमनम्	१५३-१००२
ासेन एकचक्रायां ब्राह्मणगृहे पाण्डवानां निवासानुज्ञा	१५३-१००३
शक्तिभार्यामदृश्यन्तीनाम्नीं गर्भवतीं ज्ञात्वा वसिष्ठस्य आत्मघातान्निवर्तनम्	१७५-१११६
शार्ङ्गकाणां मोचनकारणे जनमेजयेन पृष्टे वैशम्पायनेन मन्दपालोपाख्यानकथनारम्भः	२१६-१४४१
शार्ङ्गकैः कृतेन स्तोत्रेण प्रसन्नेनाग्निना तेभ्योऽभयदानम्	२१७-१४५२
शार्ङ्गकाणां प्रार्थनया अग्निना मार्जाराणां दाहः	२१७-१४५५
शिशुपालादीनां धनुःपूरणे भङ्गः	१८२-११५३
श्रीकृष्णप्रेषितालङ्कारादीनां पाण्डवैस्स्वीकारः	१९२-१२३१
श्रीकृष्णबलरामयोः पाञ्चालपुरे वासः	१९४-१२४६
श्वेतक्युपाख्यानस्य वैशम्पायनेन कथनम्	२१४-१४१३
श्वेतकिना राज्ञा शतवार्षिकसत्रकरणाय ऋत्विजां प्रार्थनम्	२१४-१४१३
श्वेतकिं प्रति ऋत्विग्भिः रुद्रसकाशं गच्छेत्युक्तिः	२१४-१४१४
श्वेतकितपसा प्रीतेन रुद्रेण द्वादशवत्सरान् सन्ततं वसुधारयाऽग्नेः प्रीणने याजयिष्यामीत्युक्तिः	२१४-२१५
श्वेतकिना वसुधारयाऽग्नेः प्रीणनेन रुद्रेणदुर्वाससः याजनार्थं प्रेषणम्	२१४-१४१६

अध्यायः-पुटम्

श्वेतकिना दुर्वासःपौरोहित्येन सत्रकरणं समापनञ्च २१४–१४१७
श्वेतकिसत्रेणाग्नेर्विकारजननेन तच्छान्त्यर्थं ब्रह्मसमीपगमनम् २१४–१४१८
सुन्दोपसुन्दयोर्ब्रह्मणो वरलाभः २००–१३०१
सुन्दोपसुन्दयोर्दिग्विजयः, कुरुक्षेत्रे निवासश्च २००–१३०४
सुन्दोपसुन्दकृतोपद्रवस्य ब्रह्मणे देवादिभिः निवेदनम् २००–१३०८
सुन्दोपसुन्दवधार्थं ब्रह्मणाऽऽज्ञप्तेन विश्वकर्मणा तिलोत्तमासृष्टिः २००–१३०९
सुभद्रया यतौ अर्जुनलक्षणदर्शनेन शङ्कया यतिं प्रति अर्जुनादिकुशलप्रश्नः २०७–१३५९
सुभद्राया गूढं विवाहचिकीर्षया यतिं सुभद्रागृहे संस्थाप्य कृष्णेन महादेवपूजाव्याजेन सर्वैर्यादवैस्सह अन्तर्द्वीपगमनम् २०७–१३६३
सुभद्राविवाहः २०८–१३६६
सुभद्रायाः प्रणामकाले पृथाद्रौपदीभ्यां आशीर्वादः २१०–१३९०
सुभद्राविवाहमहोत्सवानुष्ठानम् २११–१३९७
सैनिकानां द्वारकागमनेन वृत्तान्तं श्रुतवता सभापालेन भेरीसन्ताडनम् २०९–१३८१
संवरणस्य मृगयार्थं गमनेन गिरौ तपतीदर्शनेन कामोत्पत्तिः १६९–१०८५
संवरणे राज्ञि तपत्या सह भाषितुं प्रवृत्ते तस्या अन्तर्धानम् १६९–१०८६
संवरणं भूमौ निपतितं दृष्ट्वा तत्समीपं प्रति तपत्या आगमनम् १७०–१०८७
संवरणस्य तपत्यां मोहाद्भूमौ पुनः पतनम् १७१–१०९०
संवरणस्यामात्येनोत्थाप्याश्वसनम् १७१–१०९१
संवरणस्य सूर्योपासनकाले वसिष्ठस्मरणम् १७१–१०९१
संवरणाभिप्रायं ज्ञातवता वसिष्ठेन सूर्यसमीपगमनम् १७१–१०९२
संवरणस्य राज्येऽभावेन अनावृष्टिः १७२–१०९५
संवरणस्य तपत्या सह स्वपुरगमनेन वर्षेण सस्याद्युद्गमः १७२–१०९६
हिडिम्बप्रेरितायास्तद्भगिन्या हिडिम्बायाः पाण्डवसमीपगमनम् १४७—९६७

अध्यायः-पुटम्

हिडिम्बया भीमसेनरूपसन्दर्शनेन कामनया मनसि चिन्तनम् १४७—९६८
हिडिम्बया मानुषं वपुरास्थाय भीमसमीपमागत्य स्वकामावेदनम् १४७—९६९
हिडिम्बाया भ्रातुर्दर्शनेन भीत्या भीमं प्रति उक्तिः १४८—९७३
हिडिम्बां प्रति भीमेन न भेतव्यं त्वया, अहमेनं हनिष्यामीति सान्त्वनम् १४८—९७४
हिडिम्बेन स्वभगिनीसन्तर्जनम् १४८—९७५
हिडिम्बस्य भीमं प्रत्याद्रवणम् १४८—९७५
हिडिम्बीवार्तया भीमं हिडिम्बेन युद्ध्यमानं ज्ञातवतां युधिष्ठिरादीनां तत्र गमनम् १५०—९८२
हिडिम्बवधाय भीमार्जुनसंवादः १५०—९८२
हिडिम्बस्य भीमेन वधः १५०—९८४
हिडिम्ब्या भीमे स्वकामावेदनम् १५१—९८७
हिडिम्बाया भीमेन निराकरणम् १५१—९८७
हिडिम्बया कुन्तीं प्रति विनयेन स्वस्या धर्मज्ञत्वस्य भविष्यज्ज्ञत्वस्य च प्रकटनम् १५१—९८७
हिडिम्बाया धर्मज्ञतां ज्ञात्वा तदङ्गीकरणे भीमं प्रति कुन्त्या अनुमतिः १५१—९९०
हिडिम्बां प्रति भीमेन सह वर्तने युधिष्ठिरेण समयकरणम् १५१—९९०
हिडिम्बया सह पाण्डवानां शालिहोत्रसरोगमनम् १५२—९९१
हिडिम्बीग्रहणे भीमं प्रति कुन्त्या आज्ञा १५२—९९२
हिडिम्ब्या सह भीमस्य समयकरणम् १५२—९९३
हिडिम्ब्या सह भीमस्य रमणीयदेशेषु विहृत्य सायाह्ने शालिहोत्राश्रमं प्रति तया सह पुनरागमनम् १५२—९९४
हिडिम्बाया भीमेन निवर्तनम् १५३—१००१
क्षत्रियभीत्या कयाचिद्ब्राह्मण्या ऊरौ धृतं गर्भं हन्तुं क्षत्रियाणामुद्यमः १७७—११२३

॥ श्रीरस्तु ॥

महाभारतस्य आदिपर्वद्वितीयसम्पुटस्थानाम्

॥ अशुद्धानां शोधनम् ॥

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शोधनम्
९१९	२	अष्टत्रिंश	अष्टात्रिंश
९२५	५	युमाभि	युष्माभि
९२७	१०	अष्टत्रिंश	अष्टात्रिंश
९३४	१०	विन्दतेऽनिशम्	विन्दते दिशम्
९३५	५	बोद्धव्यं	बोद्धव्यं
	२१	बोद्धृव्यं	बोद्धव्यं
९३६	३	वारणवतगा	वारणावतगा
	८	विविशुवारणा	विविशुर्वारणा
९४०	१४	क्वचित्क्वचित्	क्वचित्क्वचित्
	१६	पलायतां	पलायताम्
९४७	१	महाबलै	महाबलौ
	४	शतहस्रि	शतसहस्रि
९५०	१३	मन्दिरम्	मन्दरम् ?
९५२	१५	क्व गता	गता क्व

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शोधनम्
९५८	८	क्षत्रघ्नं	कक्षघ्नं ?
		महाकुक्षी	महाकुक्षि ?
	१६	स्नह	स्नेह
९६६	३	प्राश्यन्ती	प्राश्नन्ती?
	११	शततभो	शततमो
९८०	१९	निर्गछ	निर्गच्छ
९९८	१५	फलहारास्	फलाहारास्
१०१६	१६	[3]क-ग-घ—	[1]-क-ग-घ—
१०२५	४	न्यायामु	न्यायमु
१०२६	६	शतसास्रि	शतसहस्रि
१०३२	९	च्छत्रुं	च्छत्रुम्
१०४०	१८	पातयासास	पातयामास
१०४३	२	हीयमानं तु तदा	हीयमानं तदा
१०४४	३	मानीय	मागत्य
१०४५	१७	पादै	पादौ
१०४६	२१	पुरोकसः	पुरौकसः
१०५१	९	शोषितम्	शेषितम्
१०५२	१३	ब्राह्मणः	—
१०५६	१९	यातो	याजो
१०६४	१७	भैक्ष	भैक्षं
	१८	एतछ्रुत्वा	एतच्छ्रुत्वा
१०६९	१७	षवै	चैव

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शोधनम्
१०७०	१५	समाप्ति	समाप्तिः
१०७२	१५	नाभिजानीथा	नाभिजानीथ
१०७७	७	शतं	शतम्
१०८२	८	कन्याया तपत्या	कन्यायास्तपत्या
	१९	श्रुतीवद्वघः	श्रुतविद्वघः
१०९६	१४	ततोऽऽर्जन	ततोऽर्जुन
१११०	७	राज्य	मार्ग
,,	,,	विश्वामित्रवसिष्ठयोः	भूपवासिष्ठयोस्तदा
१११४	७	शतसस्रिकायां	शतसहस्रिकायां
११३२	५	विनाशितः	विनाशिताः
	६	सरोषेण	स रोषेण
११४९	१८	दीच्यः	दीच्याः
११५१	१८	ताम्रोज्वल	ताम्राज्ज्वल
११५२	१	पुथु	पृथु
११६१	५	वैशम्पायनः	—
११६६	२	कर्ण	शल्य
११८२	१५	निवेदयाञ्चचक्रु	निवेदयाञ्चक्रु
११८६	५	परीक्षणार्थं	परीक्षणार्थं
१२१६	२०	प्रावेपमानो	प्रवेपमानो
१२१८	१६	भाया	भार्या
१२२३	२	व्यासः	—
१२२४	१५	द्रोपदीं	द्रौप्रदीं

पृष्ठम्	पंक्तिः	अशुद्धम्	शोधनम्
१२२६	१७	बुहुभि	बहुभि
१२३८	१६	शतसस्त्रिकायां	शतसहस्रिकायां
१२६३	१०	इति श्रुतः	इति विश्रुतः
१२६४	१५	मन्यस	मन्यसे
१२७१	१५	श्चैतान् तत्तस्तान्	श्चैतांस्ततस्तान्
१२७३	६	दायादान् त्वरन्ते	दायादांस्त्वरन्ते
१२८२	८	सम्मत्य	सम्मन्त्य
१२८३	९	बन्धश्च	बन्धं च
१३०२	१८	चुकुतु	चक्रतु
१३३४	८	स्वेषां	स्वासां
	१३	बुभ्रवाहन	बभ्रुवाहन
१३४६	५	अभ्यनुज्ञातवां त्सर्वान्	अभ्यनुज्ञातवानत्सर्वान्
१३८४	३	यादवनां	यादवानां
	२०	सात्वतांत्सदा	सात्वतानत्सदा
१३८७	७	रश्मींत्संगृह्य	रश्मीनत्संजृह्य
१३८९	१५	गोपालांत्स	गोपालानत्स
१३९१	१६	प्रमुखां त्सर्वान्	प्रमुखानत्सर्वान
१३९८	९	संच्छन्नांत्सर्वे	सञ्छन्नानत्सर्व
१३९९	१९	पादग्राहनीकम्	पादग्रहानीकम
१४१४	१८	श्रान्तांत्स	श्रान्तानत्स
१४१८	९	भगवांत्सर्व	भगवानत्सर्व
१४३४	१७	व्यसृजन्	व्यसृजत्

Printed by V. Ramaswamy Sastrulu & Sons, at 'Vavilla' Press Madras.